॥ बृहदारण्यभावबोधप्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ ॥ लक्ष्मीपतिंसुखमुखैरखिलैर्गुणौघैःपूर्णं
व्यपेतनिखिलाघमचिंत्यशक्तिं ॥ प्राणादिसर्वजगतोजनिपूर्वहेतुंमोक्षैकहेतुमनिशंप्रणमामिविष्णुं ॥ १ ॥ निखिलाद्वैतसिद्धांत
प्रासाज्ञानविनाशकाः ॥ श्रीमदाचार्यसूर्योयंदद्यात्तत्वप्रकाशनं ॥ २ ॥ वाग्वज्रेणाच्छिनद्योसकृदतिविवदद्वादिसंदोहभूभृत्प
क्षान्धीमंदरेणप्रमथनमकरोन्मध्वसिद्धांतवार्धेः ॥ संप्राप्याथोसुधांयोनिखिलसुमनसःपाययामासमुक्त्यैतंमूर्ध्नाश्रीजयार्यसपदि
बहुहर्शंसंयमींद्रंनमामि ॥ ३ ॥ येनवेदांतभाष्याणिविवृतानिमहात्मना ॥ तंवंदेव्यासतीर्थाख्यंवेदांतार्थप्रसिद्धये ॥ ४ ॥
योऽध्यापयित्वावेदांश्चमध्वसिद्धांतमादिशत् ॥ त्याम्नंप्रादाद्धरेःप्रीत्यैरघुवर्यंगुरुंभजे ॥ ५ ॥ यत्काण्वोपनिषद्भाष्यंपूर्णप्रज्ञवि
निर्मितं ॥ तत्कृपालवमाश्रित्यव्याख्यास्येतद्यथामति ॥ ६ ॥ इहामुत्रफलभोगविरक्तस्यशमदमादिमतोमुमुक्षोरधिकारिणो
ऽनिष्टनिवृत्तेःपरमानंदावाप्तेश्चसाधनत्वेनप्रवृत्तांकाण्वीमुपनिषदमन्यैरन्यथाव्याख्यातत्वेनाप्रवृत्तामिवमन्यमानोयथावद्व्याचि
ख्यासुर्भगवानानंदतीर्थमुनिर्विलीनप्रकृतितयांतरायविधुरोप्यनवरतमीश्वरप्रवणकरणवृत्तिरपि नारायणप्रणामादिकंप्रारिप्सित
स्यानंतरायपरिसमाप्तेःप्रचयस्यचहेतुतयाऽविगीतशिष्टाचारपरंपरादिनावगतमवश्यकरणीयंशिष्यान्ग्राहयितुंग्रंथादौनिबध्नाति
॥ **प्राणादेरिति** ॥ स्वस्यविष्णुवंदनंकादाचित्कंनभवतीत्याशयेनोक्तं ॥ **सदेति** ॥ ननुसतीष्वन्यासुदेवतासुकुतोविष्णो

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ प्राणादेरीशितारंपरमसुखनिधिंसर्वदोषव्यपेतंसर्वांतस्थंसुपूर्णप्रकृ
तिपतिमजंसर्ववाह्यंसुनित्यं । सर्वज्ञंसर्वशक्तिंसुरमुनिमनुजाद्यैःसदासेव्यमानंविष्णुंवंदेसदाहंसकलजगदनाद्यंतमानंददंतं ॥ १ ॥

रेववंद्यत्वमितिचेत् अन्यत्रवंद्यत्वप्रयोजकविशिष्टत्वाद्यभावात् । त्रिविधाहिदेवतावंद्याभवति विशिष्टाधिकृतेष्टाचेति । नहि देवतावंदनंव्यसनितयाक्रियते । किंतुविघ्नविघातादिप्रयोजनापेक्षितया । विशिष्टैवदेवतातस्येष्टे । अधिकृताचस्वविषयकग्रंथ प्रबोधादिकंसंपादयति । वंदनंखलुभक्त्याद्युपेतमेवसफलंतच्चेष्टायामेवदेवतायामुपपद्यतइति । तत्रविशिष्टत्वाधिकृतत्वप्रतिपा दनाद्यप्राणादेरीशितारमित्यादीनिसर्वाण्यपिविशेषणानि । लक्ष्मीमुक्तव्यावृत्त्यर्थंपरमेतिसुखविशेषणं । पारतंत्र्यादिसर्वदोषव्य पेतं । देशतःकालतोगुणतश्चपूर्णत्वलाभायसुपूर्णमित्युक्तं । पराधीनविशेषलाभादिनाकेनापिप्रकारेणनजायतइत्यजं । सर्ववाह्यं सर्वविलक्षणं । अपूर्णत्वादिचतुर्विधनाशाभावलाभायसुनित्यमित्युक्तं । सर्वज्ञं स्वपरगताखिलविशेषज्ञं । सर्वशक्तिं प्रकृतिप्रा णादिपालननियमनादिविषयशक्तिमंतं । सुराः पद्मापद्मभवादयः । सेव्यत्वेनिमित्तोक्तिः सकलेति । सकलस्य जगतः अना द्यंताः चेष्टोत्पत्तिनाशा यस्मात्सतथोक्तः तं । सेवाप्रयोजनोक्तिरानंददमिति । स्वातंत्र्येणमोक्षानंददं । एवंचैतेषांविशिष्टधर्म प्रतिपादकतयाविशिष्टत्वप्रतिपादकत्वंद्रष्टव्यं । यःप्राणमंतरोयमयतीत्यादिनाप्राणादेरीशितृत्वं । अथैषएवपरमआनंदइतिपर मसुखनिधित्वं । योशनायापिपासेइत्यादिनासर्वदोषव्यपेतत्वं । यःपृथिव्यांतिष्ठन्नित्यादिनासर्वांतस्थत्वं । योयमात्मेदममृतमि दंब्रह्मेदंसर्वमित्यत्रब्रह्मसर्वपदाभ्यांसुपूर्णत्वं। अमृतपदेनसुनित्यत्वं। एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चेतिप्रकृतिपतित्वं । “ आत्मैवेदमग्रआसीदित्यजत्वं । नेतिनेतीतिसर्ववाह्यत्वं । सर्वानुभूरित्यनुशासनमितिसर्वज्ञत्वं । सयथाआर्द्रैधाग्नेरित्यादिना सर्वसृष्टयुक्त्यासर्वशक्तित्वं । तद्योयोदेवानांप्रत्यबुध्यतेत्यादिनासुरादिसेव्यत्वं । अशनायाहिमृत्युः सतयावाचातेनात्मनेदं

सर्वमसृजत सर्ववाअत्तीत्यादिनासकलजगदनाद्यंतत्वं कंह्वास्मैभवतीत्यादिनानंददत्वमुक्तमित्येतेषामधिकृतत्वप्रतिपादकत्वंद्र
ष्टव्यं । इष्टत्वप्रतिपादनार्थमप्यानंददमित्युक्तं । यद्वा नानिर्धारितस्वरूपस्यप्रणामोयुक्तः नचांतरेणलक्षणंवस्तुनिर्धारणमिति
विभवादनेकानिविष्णोर्लक्षणान्यनेनोच्यंते । एतेषांविशेषणानांविष्णुमात्रनिष्ठत्वंप्रागेवोक्तमिति । योहवाअविदितार्षेछंदोदै
वतब्राह्मणेनमंत्रेणयजतियाजयतिवाध्यापयतिवास्थाणुंवर्छतिगर्तेवापद्यतेप्रवामीयतइतिश्रुतेर्दैवतादिज्ञानवतएवविद्याफलतीति
ज्ञायते । तत्रब्राह्मणपदोपलक्षितार्थज्ञानंव्याख्यानादेवभविष्यति । प्रायःछदोवद्धत्वंनास्त्येव । तदुपनिबंधेतुअक्षरपरिगणनया
तज्ज्ञानंसुकरमेव । अतःऋषिदेवतेज्ञापयन्नाह ॥ यथेति ॥ यथायत्प्रकारानुपूर्वींविशिष्टोपनिषदा लक्ष्मीशंतुष्टाव तथा तत्प्र
कारानुपूर्वींविशिष्टामुपनिषदंजगादेत्यर्थः । अस्याउपनिषदोवाजसनेयकंकाण्वमितिलोकप्रसिद्धंनामोपपादयन्नवांतरऋषीनाह ॥
वाजिरूपेणेति ॥ सूर्येणप्रोक्तत्वेसौर्यमितिस्यादित्यतोवाजिरूपेणेत्युक्तं । तेन कण्वाधीतत्वेन लक्ष्मीशमित्युपनिषत्प्रतिपाद्यो
क्त्यासंसारव्याविवृत्सुभ्यःसंसारनिवृत्तिसाधनब्रह्मात्मैकत्वविद्याप्रतिपत्तयेग्रंथावृत्तिरारभ्यतइत्युक्तंपरास्तं । ब्रह्मात्मैकत्वज्ञान
स्यानर्थफलत्वेनसंसारनिवृत्तिसाधनत्वाभावात् । पूर्वमंतःकरणशुद्धिद्वाराब्रह्मविद्याधिकारार्थमश्वमेधोनिरूपितः । कर्मणाशु
द्धांतःकरणस्यसुविरक्तस्यब्रह्मस्वरूपंनिरूपयति ॥ उषावाअश्वस्यमेध्यस्येत्यादिकयासमग्रोपनिषदा ॥ ननुतदप्य

भाष्यं ॥ यथातुष्टावलक्ष्मीशंसर्गादौचतुराननः । तथाजगादसूर्याययाज्ञवल्क्यायसोब्रवीत् ॥ २ ॥ वाजिरूपेणसूर्येणप्रोक्तंवाजसनेयकं ।
कण्वायया ज्ञवल्क्योदात्काण्वंतेनप्रकीर्तितमितिवाराहे ॥ ३ ॥

ध्यायद्वयंकुतोनव्याख्यातमितिचेन्न । तस्यकर्मकांडत्वेनाब्रह्मविद्यात्वात्परैरव्याख्यातत्वेनान्यथाप्रतीत्यभावाच्चेति । तत्रादौप्रकृताश्वमेधयागेमेध्यभूताश्वनिष्ठब्रह्मविद्यामाह ॥ उषाइति ॥ तत्रमेध्यस्याश्वस्योपआदिसर्वजगदाश्रयत्वंप्रतीयते । तदीशलिंगं । अतोऽयुक्तमित्यतस्तद्घटयति ॥ अश्वेति ॥ तत्र अश्वरूपेचतुर्मुखे । अस्त्वेवंकिंततःप्रकृतेनह्यत्राश्वरूपोविष्णुर्विरिंचोवाप्रतिपाद्यः । मेध्यस्याश्वस्यश्रवणादित्यतआह ॥ तयोरिति ॥ तयोः विष्णुब्रह्मणोः । तदंगेषु मेध्याश्वांगेषु । ननुमेध्याश्वस्यविष्णुविरिंचप्रतिमात्वेपितदंगेषुजगत्सन्निहितमित्युक्तिःकथमित्यतआह ॥ तयोरिति ॥ विष्णुविरिंचयोरित्यर्थः । ननूच्चैःश्रवाःमेध्याश्वेतिष्ठतीतिक्वचिदुक्तेःकथंविष्णुब्रह्माणौतत्रतिष्ठतइत्युक्तिरित्यतस्तद्घटयति ॥ उच्चैःश्रवाइति ॥ कर्मांगस्यपशोःसंस्कर्तव्यत्वात्कालादिदृष्टयःशिरआदिषुक्षिप्यंतइत्यन्यैःखंडतात्पर्यमुक्तं तदप्यनेनापहस्तितंभवति । अप्रामाणिकत्वात् । मिथ्यादृष्टित्वेनतस्यपशुसंस्काररूपत्वाभावाच्च । पर्वतादिशब्दानांप्रसिद्धपर्वतादिपरत्वमन्यैरुक्तं तन्निरासार्थंतेषांदेवतापरत्वंप्रमाणेनाह ॥ पर्वताइति ॥ सिकताश्चैवेत्येवकारश्चशब्दार्थः । अन्यथासूर्यश्चक्षुरि

भाष्यं॥ अश्वस्यरूपोब्रह्माभूदश्वरूपाज्जनार्दनात्। तत्रसन्निहितोविष्णुरश्वरूपःस्वयंप्रभुः। तयोश्चप्रतिमामेध्योयतोश्वोयंश्रुतौश्रुतः । सर्वजगत्तदंगेपुतस्मात्सन्निहितंस्मृतं । तयोरंगेष्विदंयस्माज्जगत्सर्वंप्रतिष्ठितमितिप्रध्याने । उच्चैःश्रवाःसन्निहितोमेध्येश्वेतत्रकेशवः । तन्मिन्निदंजगत्सर्वंब्रह्माचोच्चैःश्रवःस्थितइतिसौपर्णे । पर्वताःसिकताश्चैवनद्यःकूपाःसरांसिच । हविःकपालयूपाद्यादेवताएवसर्वशः ।

त्यादिदेवतोपक्रमविरोधःस्यादितिभावः । ननुतर्हिसूर्यश्चक्षुरित्यादिवत्देवतावाचकपदप्रयोगःस्यादित्यतआह ॥ **तत्तन्नामैवे ति** ॥ पर्वताद्यभेदात्किंतेषांतन्नामेत्यतस्तदभिमानादित्याह ॥ **भिन्नानामिति** ॥ तर्हिविष्णोःपर्वताद्यभिमानाभावान्नामानि सर्वाणीतिश्रुत्यादौकथंपर्वतादिशब्दवाच्यत्वोक्तिरित्यतआह ॥ **नामानीति** ॥ तान्यपि अन्यवाचकत्वेनप्रतीतान्यपि मुख्य यावृत्त्येतिशेषः । तत्रहेतुमाह ॥ **सहीति** ॥ तत्तच्छब्दनिर्वचनलभ्यगुणैरधिकोहियस्मादित्यर्थः । ननूषावाअश्वस्यमेध्यस्यशि रइतिसमानाधिकरणतयाप्रयुक्तत्वात्कथंसर्वंजगत्तदंगेषुसन्निहितमितिव्याख्यानमित्यतआह ॥ **उषाइति** ॥ ब्रह्मनामेत्यनेन 7
नामब्रह्मेतिश्रुतिमुपादत्ते । तत्वमसीत्यादौविद्यमानाःशिरो नाम तदित्यादिप्रथमांताःशब्दाइत्यर्थः । सप्तम्यर्थत्वेप्रयोजनंसूच यति ॥ **तदैक्यवाचिवदिति** ॥ तदैक्यप्रतिपादकवत्प्रतीयमानाअपिउषाःशिरइत्यादिवाक्यरूपाःशब्दास्तद्गत्वप्रतिपादका इत्यर्थः । कुतोनैक्यार्थाइत्यतआह ॥ **तेसर्वइति** ॥ शिरश्चक्षुरित्यादिप्रथमांतान्शब्दान्सप्तम्यर्थत्वेनव्याख्यायेदानींप्रथमां तत्वेनापिव्याख्याति ॥ **ईशेति** ॥ भगवच्छिरआद्यंगानांप्रकाशरूपत्वसूरिप्राप्यत्वादिनोषाःसूर्यइत्यादिशब्दार्थत्वतःशिरआदि शब्दाईशांगवाचिनोवास्युरित्यर्थः । प्रथमायाःसप्तम्याद्यर्थत्वमनुशासनैर्द्रढयन्तदर्थत्वेयोजनांसूचयति॥**सप्तस्विति** ॥**तत्तद्यो**

भाष्यं॥ तत्तन्नामैवनामैषांभिन्नानामभिमानतः । नामानितान्यपिहरेःसहिसर्वगुणाधिकइतिनारदीये। उषाःशिरोत्रब्रह्मनामतत्वमस्यादयोखिलाः । सप्तम्यर्थाःसमुद्दिष्टाःपंचम्यर्थास्तथाश्रुताः । षष्ठ्यर्थाश्चचतुर्थ्यर्थास्तृतीयार्थाश्चसर्वशः । तदैक्यवाचिवच्छब्दाअपितद्गत्ववाचकाः । ऐक्यार्थानैव तेसर्वेभिन्नरूपायतःसदा । ईशांगवाचिनोत्रास्युस्तेषामेवतदर्थतः ।

ग्यार्थतेति॥प्रथमायाःपंचमीतृतीयार्थत्वेउषआदीनांशिरआदिजातत्वं षष्ठ्यर्थत्वेतच्छेपत्वं चतुर्थ्यर्थत्वेतत्सेवाद्यर्थस्थितत्वं द्विती यार्थत्वेतत्प्रत्युपासकतयास्थिततत्वमित्यादियथायोग्यार्थतेत्यर्थः । ननुविष्णोर्मेध्याश्वहृदयमात्रगतत्वेनतदंगेष्वभावात् तयोरंगेष्वि ति विष्ण्वंगगतत्वेनजगतोमेध्याश्वांगगतत्वोक्तिघटनाकथमित्यतआह॥ अंगेति ॥ अश्वस्यमेध्यस्येतिसर्वत्रानुषंगार्थंपुनर्वचनमि त्यन्यैर्व्याख्यातं तदसत्।प्रथमोक्तेरेवसर्वत्रानुषंगसंभवात् । कस्यचिदश्वस्यैवमासीदितीतिहासरूपेणोच्यतइतिशंकायाअपरिहारा च्चेत्यभिप्रेत्यस्वयंपुनर्वचनप्रयोजनमाह ॥ पुनरपीति ॥ कुतएतत्सिध्यतीत्यतोनियामकंपठति ॥ सर्वव्यक्तिष्विति ॥ विश्वस्मा दिंद्रउत्तरइतिपुनर्वचनं एषतआत्मांतर्याम्यमृतइत्यादिपुनर्वचनंचतात्पर्याधिक्यवित्तये । एतेन सर्वेव्याख्याताव्याख्याताइतिप्र तीतानुपपत्तेराभासत्वविवक्षयोद्दिष्टमितियोज्यं। नकेवलमेकवारंपुनर्वचनंकिंतुशतशोपिस्युः ।पृथक्पृथक्प्रतिवाक्यं । ऊवध्यंसि कताइत्येतत् ऊवध्यमुदरस्थमजीर्णमशनं सिकताः विश्लिष्टावयवसाम्यादित्यन्यैर्व्याख्यातं। तदसत् । अप्रामाणिकत्वात्प्रमाणवि रुद्धत्वाच्चेतिभावेनोवध्यशब्दार्थंप्रमाणेनाह ॥विष्णोरिति ॥ इदानीमुवध्यंसिकताइतिवाक्यार्थमाह॥तत्स्थत्वादिति॥ननुपृ

भाष्यं ॥ सप्तसुप्रथमायस्मात्तत्तद्योग्यार्थताभवेदितिब्रह्मतर्के। अंगप्रत्यंगशोव्याप्तोविष्णुरेवतुरंगमे। अतोविष्ण्वंगगंसर्वंमेध्यांगस्थमुदीरितमितिच । पुनरप्यश्वस्यमेध्यस्येतिवचनंकस्यचिदश्वस्यैवमासीदितीतिहासरूपेणनोच्यतेकिंतुसर्वमेध्यानामेवमितिज्ञापनार्थं । सर्वव्यक्तिष्वभिव्याहृयैतात्पर्या धिक्यवित्तये । प्रतीतानुपपत्तेरप्याभासत्वविवक्षया । पुनर्वचनमुद्दिष्टंशतशोपिपृथक्पृथगितिच । विष्णोःपुरीषस्थानीयाकाठिन्यात्पृथिवीस्मृता । तत्स्थत्वात्सिकताःसर्वाऊवध्यस्थाःप्रकीर्तिताः ।

थिवीपाजस्यमितिपृथिव्याःपादगत्वोक्तेःकथमुदरगतोवध्यरूपत्वमित्यतआह ॥ उर्व्यास्त्विति ॥ एकस्याजडरूपायाःपृथिव्याः कथंपादोदरोभयगतत्वमित्यतआह ॥ यतइति ॥ अनुकीर्तिताःपृथिव्यादिशब्दैः । तथापिपृथिव्यभिमानिधरायाएकत्वात्तदवस्थो दोषइत्यतआह ॥ तासांचेति ॥ एकस्यावहुरूपत्वंकथमित्यतआह ॥ ऐश्वर्यादिति ॥ आत्मानंवहुधाकृत्वाक्रीडतेयोगसंपदेत्युक्त योगसंपदादिरूपहेतुसमुच्चयेचशब्दः । अवांतरदिशःपर्शवइत्येतद्व्याचष्टे ॥ अवांतरेति ॥ पार्श्वस्थास्थीनिपुच्छंचेत्यर्थः । ननुदि शांचतुष्ट्वात्पार्श्वयोर्द्वित्वात्कथंदिशःपार्श्वेइत्युक्तिरितिचेत् अत्रसर्वमुखत्वोपपत्तेरश्वस्यपार्श्वाभ्यामेवसर्वदिशांसंबाधाददोषइतिके चित् । तदसत् । मुखपुच्छाद्यवयवेनापिसर्वदिशांसंबंधादतिप्रसंगादितिभावेनस्वयंप्रमाणेनपरिहरति ॥ पूर्वेति ॥ पार्श्वयोःप्रत्येकंपू र्वपश्चिमार्धभागसद्भावेनचतुष्ट्वादित्यर्थः । ऋतवोंगानीत्यत्रापिसंख्यावैषम्यंपरिहरति ॥ शिरश्चेति ॥ पादमूलानि खुराः । संवत्सरोद्वादशमासाःत्रयोदशमासावाआत्मा शरीरमित्यन्यथाप्रतीतिनिरासायसंवत्सरआत्मेत्येतद्व्याचष्टे ॥ संवत्सराभि मानीति ॥ अप्रतीतेर्यकृत्क्लोमन्शब्दार्थंवदन्यकृच्चक्लोमानश्चपर्वताइतिवाक्यंव्याचष्टे ॥ क्लोमानश्चेति ॥ हृदयगतदक्षिणो त्तरभागस्थमांसविशेषावित्यर्थः । गुदस्यैकत्वेनवहुवचनानुपपत्तेःसिंधवोगुदाइत्येतद्व्याचष्टे ॥ आंत्रेष्विति ॥ नभोमांसानी 9

भाष्यं ॥ उर्व्यास्तुपादगत्वेपिनोवध्यत्वंविरुध्यते । यतस्तदभिमानिन्योदेवताअनुकीर्तिताः । तासांचवहुरूपत्वादैश्वर्याच्चपरेशितुरितिच । अवांतर दिशोविष्णोरस्थिपुच्छान्युदाहृताः । पूर्वपश्चार्धभेदेनदिशःपार्श्वेप्रकीर्तिते । शिरश्चपादमूलानिपुच्छंपड्ऋतवःस्मृता । संवत्सराभिमानीचब्रह्मासर्वशरी रगः । क्लोमानश्चयकृच्चैवमांसांगिर्यभिमानिनः । आंत्रेपुनद्यःसर्वाश्चसोयंविष्णुःसनातनइतिच ।

त्येतत् नभो नभस्थामेघाः अंतरिक्षस्योदरत्वोक्तेर्मांसानीतिपरैर्व्याख्यातं । तदसत् । नभःशब्दस्यलाक्षणिकत्वापत्तेः । नचमुख्यार्थानुपपत्त्यातदंगीकारः । नभोंतरिक्षशब्दयोःपृथग्वाच्यार्थसंभवेनतदयोगादितिभावेनतद्वाक्यद्वयंव्याचष्टे ॥ नभोमानीति ॥ १ ॥ अथखंडार्थः ॥ मेध्यस्य मेधार्हस्ययागीयस्याश्वस्यतदंतर्गतभगवतः शिरः शिरसि उषाःस्थिता । वा इतिअस्यार्थस्यप्रमाणप्रसिद्धिंसूचयति । सूर्यश्चक्षुः चक्षुर्गतः वातोनासिक्यवायुः प्राणःघ्राणगतः । वैश्वानरोवैश्वानरनामाऽग्निः व्यात्तं विवृतमुखगतः । संवत्सरस्तदभिमानीब्रह्मा मेध्यस्याश्वस्यतदंतर्गतस्या त्मासर्वशरीरगः । द्यौर्द्युलोकाभिमानी पृष्ठं पृष्ठाश्रितः । अंतरिक्षमंतरिक्षाभिमानीविघ्नेशसूनुः उदरंउदरेस्थितः । पृथिवीतदभिमानिनी पाजस्यंपादाश्रिता । दिशोदिगभिमानिनः । पार्श्वेप्रत्येकंपूर्वपश्चिमार्धभेदेनभागद्वयोपेतोभयपार्श्वस्थाः । अवांतरदिशःआग्नेयादिकोणाधिपाः । पर्शवःपार्श्वस्थास्थिपुच्छाश्रिताः । ऋतवोवसंताद्यभिमानिनःषट् । अंगानिशिरःखुरचतुष्टयपुच्छरूपषंडगाश्रिताः । मासाश्चार्धमासाश्चेतिचशब्दावितरेतरयोगे । मासाभिमानिनःपक्षाभिमानिनश्च । पर्वाणि प्रधानसंधिषुअवांतरसंधिषुचस्थिताः । अहोरात्राणि तदभिमानिनः । प्रतिष्ठाः प्रतितिष्ठंत्येतैरितिप्रतिष्ठाःपादाः तदाश्रिताः । एकस्यापिभगवदंगस्यानेकदेवाश्रयत्वोपपत्तेःपृथिवीपाजस्यमहो

भाष्यं ॥ नभोभिमानीविघ्नेशोविष्णोर्मांसाश्रितःसदा । अंतरिक्षाभिमानीचतत्सूनुरुदरेस्थितइतिच ॥ १ ॥

उप० ॥ ॐउषावाअश्वस्यमेध्यस्यशिरः । सूर्यश्चक्षुर्वातःप्राणोव्यात्तमग्निर्वैश्वानरःसंवत्सरआत्माऽश्वस्यमेध्यस्य । द्यौःपृष्टमन्तरिक्षमुदरंपृथिवीपाजस्यंदिशःपार्श्वेअवांतरदिशःपर्शवऋतवोऽङ्गानिमासाश्चार्धमासाश्चपर्वाण्यहोरात्राणिप्रतिष्टानक्षत्राण्यस्थीनिनभोमांसानि ।

रात्राणिप्रतिष्ठाइत्याद्युक्तिरुपपन्ना । नक्षत्राण्यश्विन्यादीनिदैवतानि । अस्थीनितदाश्रितानि । नभो नभोभिमानीविश्वेशः । मांसा
नितदाश्रितःसिकताःतदभिमानिदेवाः । ऊवध्यंविष्णुपुरीस्थानीयपृथिव्याश्रिताः । स्यंदनात्सिंधवोनद्यः । गुदाःआंत्राश्रिताः ।
पर्वताःगिर्यभिमानिनः । यकृच्चक्लोमानश्चहृदयस्यदक्षिणोत्तरभागमांसविशेषाश्रिताः । ओषधयश्चवनस्पतयश्चेतिचशब्दावि
तरेतरसमुच्चये । तदभिमानिदेवाः । लोमानितदाश्रिताः । उद्यन्उदयंप्राप्तःसविता । पूर्वार्धःनाभेरूर्ध्वभागाश्रितः । निम्लोचन्
अस्तंगतःसविता । जघनार्धोनाभेरधोभोगाश्रितः । विद्योततेविद्योतनं तदभिमानी । यद्विजृंभतेविजृंभणं । तत् तदाश्रितइतियोज
ना । स्तनयति गर्जनं तदभिमानी । यद्विधूनतेविधूननं गात्रकंपनं तत्तदाश्रितः । वर्षतिवर्षणं तदभिमानी । यन्मेह
तिमेहनं मूत्रणं । तत्तदाश्रितः । वागेवप्रसिद्धवागभिमानिनी । अस्यवाक्तदाश्रितेति ॥ १ ॥ ७ ॥ ॥ अथभाष्यार्थः ॥
प्रकृताश्वमेधसंबंधिविद्याविशेषमाह ॥ अहरित्यादिना ॥ अहःसौवर्णोमहिमाग्रहः सुवर्णपात्रं । अश्वंपुरस्तात्अन्वजायत ।
तस्यपूर्वेपूर्वः समुद्रेसमुद्रः योनिःआसादनस्थानं । रात्रिःराजतोमहिमाग्रहः रजतपात्रं । एनंअश्वपश्चात्पृष्ठतःअन्वजायतइत्या
दिपरकीयव्याख्यानंअप्रामाणिकत्वात्प्रमाणविरुद्धत्वाच्चासदितिभावेनव्याचष्टे ॥ अश्वेति ॥ अश्वपूर्वापरौहोम्यौभागौहोमार्थं
गृह्येतेइतिग्रहनामानौमहिमानौस्मृताविल्यन्वयः । एवंमहिमशब्दार्थमुक्त्वाअहर्वाअश्वंपुरस्तादित्यादिवाक्यार्थमाह ॥ अहो

उप० ॥ ऊवध्यंःसिकताःसिंधवोगुदायकृच्चक्लोमानश्चपर्वताओषधयश्चवनस्पतयश्चलोमान्युद्यन्पूर्वार्धोनिम्लोचञ्जघनार्धोयद्विजृम्भतेतद्विद्योतते
यद्विधूनतेतत्स्तनयतियन्मेहतितद्वर्षतिवागेवास्यवाक् ॥ १ ॥
भाष्यं ॥ अश्वपूर्वापरौहोम्यौमहिमानौग्रहौस्मृतौ । अहोरात्राभिमंतारौतयोरप्यभिमानिनौ ।

11

रात्रेति ॥ तयो र्महिम्नोः । कौतावित्यतआह ॥ कामइति ॥ परस्परसमुच्चयेचशब्दौ । परोक्तव्यावृत्त्यर्थमेवकारः । तस्य पूर्वेसमुद्रेयोनिः तस्यापरेसमुद्रेयोनिरित्यस्यतात्पर्यमाह ॥ विष्णिवति ॥ तयोःसमुद्रशब्दंनिर्वक्ति ॥ समुद्रेकादिति ॥ अपरः समुद्रइतिशेषः । अनेनाश्वंएनमितिद्वितीयाषष्ठ्यर्थे । पुरस्तात्पश्चादित्यनंतरंभागइत्यध्याहारः । महिमाहोमार्थंगृही तत्वेनग्रहनामकः । ततश्चाश्वंअश्वस्यविभक्तस्यपुरस्तात्पूर्वोभागोमुखभागइतियावत् । महिमाहोमार्थंगृहीतत्वेनग्रहनामा । अहःअहरभिमानिकामाभिमन्यमान अन्वजायत । तस्याहरभिमानिनः पूर्वेपूर्वोमुख्यः समुद्रेसमुद्रः समुद्रेकात्समुद्रनामा विष्णु र्योनिःकारणं । एनंएतस्याश्वस्य पश्चात्परभागः पुच्छभागइतियावत् । महिमाग्रहो रात्रिःरात्र्यभिमानिरत्यभिमन्य मानः अन्वजायत । तस्यरात्र्यभिमानिनः अपरेअपरःअमुख्यः समुद्रेसमुद्रः उपचारेणोद्रेकात्समुद्रनामाचतुर्मुखो योनिः कारणमितिव्याख्यातंभवति । एतौपूर्वोक्तौ महिमानौग्रहौ अश्वमभितः अश्वमभिव्याप्य । अश्वसमग्रदेहादितियावत् । संबभूवतुरितिवाक्यशेषार्थोज्ञेयः । नकेवलंभगवानश्वरूपीमेध्याश्वेतिष्ठति । किंतर्हि देवादिवाहेष्वपीत्युक्तं ॥ हयइत्यादि ना ॥ तद्वाक्यंमेध्याश्वोहयोविशिष्टगतिर्जातिविशेषोवाभूत्वादेवानवहत्देवत्वमगमत्देवानामोढावाऽभवदित्यादिनान्यैरन्यथा व्याख्यातं । तदसदितिभावेनाह ॥ सविष्णुरिति ॥ एतेनभगवान्स्वयमेवहयादिर्भूत्वादेवादीनवहदित्यपिपरास्तं ।

भाष्यं ॥ कामश्चाथरतिश्चैवविष्णुब्रह्मशरीरजौ ॥ समुद्रेकात्समुद्रस्तुविष्णुःपूर्वउदाहृतः । उपचारेणतूद्रेकादपरश्चचतुर्मुखः ॥ सविष्णुर्हयनामासन्देववाहेपुसंस्थितः । वाजिनामातुगांधर्वेष्ववर्वनामाऽऽसुरेपुच ।

समुद्रएवपरमात्मावंधुर्वंधनंवध्यतेस्मिन्नित्येतदपव्याख्यानमितिभावेनसमुद्रएवास्यवंधुरित्येतद्व्याचष्टे ॥ तद्वंधुरिति ॥ अस्य मेध्याश्वस्यसमुद्रःपरमात्माप्रसिद्धसमुद्रोवायोनिःकारणमित्येतदपव्याख्यानमितिभावेनाह ॥ तस्मादेवेति ॥ जन्यजनकभावात्पितापुत्रवद्भेदोनमंतव्यइत्याह ॥ रूपेनि ॥ भेदाभावेकथंजन्यजनकभावइत्यतआह ॥ ऐश्वर्यादिति ॥ तथापिभेदाभावेपि किंनिमित्ततोभगवान्हयादिनामेत्यतआह ॥ हत्वेति ॥ ह हत्वानिर्वचनत्वात् । यातेःकप्रत्ययेधात्वाकारलोपेयातीतियइति हयः । वाजंयुद्धमस्यास्तीतिवाजी । इनेरर्थःकर्तृत्वादिति । ऋगतावित्येतस्मादर्तीत्यर्थेवन्प्रत्ययेगुणेचार्वेति रूपसिद्धिः । आशुत्वादाशुगमनादित्यर्थः । आशूपपदाद्वागतिगंधनयोरित्यतःकप्रत्ययेउपपदोकारलोपेआकारह्रस्वत्वेचाश्व इतिरूपसिद्धिरितिभावः । स्मृतौविष्णोर्हयादिशब्दवाच्यत्वेहत्वायातीत्यादिनैवनिमित्तमुक्तमितिप्रतीयते । नतुदेववाहेषुसंस्थितइत्यादिनातदुक्तमिति । अतस्तद्वाक्यद्वयतात्पर्यंस्ववचनेनाह ॥ तेषामिति ॥ अनेनसविष्णुर्देवादिवाहेषुसंस्थितःसन्हयादिनामेतियोजनासूचिताभवति । यद्वाहत्वायातीत्यादावुक्तनिमित्तेनहयाद्यनंतर्गतस्यभगवतोहयादिशब्दवाच्यत्वमुच्यतइत्यन्यथाप्रतीतिनिरासायस्मृतितात्पर्यमाह॥ तेषामिति ॥ नन्वसुराद्यश्वानामपिहंतृत्वाद्धत्वायातीतिदेवाश्वानामेवकथंविशेषइत्याशंकांप

भाष्यं ॥ मनुष्येष्वश्वनामासौतद्वंधुःस्वयमेवसः । तस्मादेवोत्थितिस्तस्यरूपभेदोनतस्यच । ऐश्वर्यात्सतथापीशोव्यक्तिभावंगमिष्यति । हत्वायातियतःशत्रून्हरिस्तस्माद्धयःस्मृतः । सर्वदायुद्धकर्तृत्वाद्वाजीचापिप्रकीर्तितः । अर्वातिगमनादुक्तआशुत्वादश्वउच्यतइतिवैहायसे । तेषांतेषांवाहनेषुस्थित्वातत्तत्कर्तृत्वात्तत्तन्नामा ।

रिहरति ॥ पतंतीति ॥ नियमाभिप्रायेणतदुक्तिरितिभावः । नन्वतिगमनाशुगमनयोर्भेदाभावात्कथमर्वाश्वइतिशब्दभेदइत्यत
आह ॥ वेगेति ॥ सर्वदायुद्धकर्तृत्वादितिगंधर्वाश्वानांसदायुद्धकर्तृत्वोक्त्यागंधर्वाणामपितल्लब्धं । तत्कथं देवानामपियुद्धकर्तृ
त्वादित्यतआह ॥ गंधर्वाइति ॥ ननुगंधर्वागानादिकर्तारःश्रूयंतेतत्कथंतेषांयुद्धेरतत्वमित्यतआह ॥ केचिदिति ॥ चारणाः
गुप्तचारकाः ॥ खंडार्थःस्पष्टः ॥२॥ इत्यश्वब्राह्मणं ॥१॥ प्रकृताश्वमेधयज्ञोदेवादिभिरप्यनुष्ठितइतिवक्तुंतदुपयुक्तामाख्यायि
कामाह ॥ नैवेहेत्यादिना ॥ तत्रादिवाक्यं इहसंसारमंडलेऽग्रेगनआदेरुत्पत्तेःप्राक्किंचनकिंचिदपिनामरूपप्रविभक्तविशेषंनै
वासीन्नवभूवेतिपरैर्व्याख्यातं । तदसत् । अप्रामाणिकत्वात्प्रमाणविरुद्धत्वाच्चेतिभावेनतद्वाक्यंप्रमाणेनव्याचष्टे ॥ सर्वसंहार
कमिति ॥ देवीमित्यादिवद्विष्णुमित्येववाच्येयत्सर्वसंहारकमितिविशेषणमुक्तं तेनसर्वसंहारकर्तुःसंहारकारणाभावादितिविष्णो
रवस्थानेयुक्तिरुक्ता । देवींरमां त्रिगुणसाम्यंप्रकृतिं कर्माणिअदृष्टानि प्राणंअहंकारकार्यविशेषंसूक्ष्मरूपं । इंद्रियमिंद्रियसूक्ष्मरू

भाष्यं० ॥ पतंतिनियतंहंतुंदेवाश्वाःशत्रुमूर्धसु । वेगाधिकाआसुराश्वावेगमात्रंनृवाहनइतिस्कांदे । गंधर्वास्तुसदायुद्धरतादेवानुगायतः ।
तदशक्तौतुदेवानांयुद्धंतेत्वासिनोयतः । केचिद्गानरतानित्यंगंधर्वानर्तकाःपरे । केचिद्गायरतानित्यंचारणादेवचारकाइतिच ॥२॥ इत्यश्वब्राह्मणं ॥१॥

उप ॥ अहर्वाअश्वंपुरस्तान्महिमाऽन्वजायततस्यपूर्वेसमुद्रेयोनीरात्रिरेनंपश्चान्महिमाऽन्वजायततस्यापरेसमुद्रेयोनिरेतौवाअश्वंमहिमानाव
भितःसंबभूवतुः । हयोभूत्वादेवानवहद्वाजीगन्धर्वानर्वाऽसुरानश्वोमनुष्यान्समुद्रएवास्यबन्धुःसमुद्रोयोनिः ॥ २ ॥ इत्यश्वब्राह्मणं ॥ १ ॥

भाष्यं ॥ सर्वसंहारकविष्णुंदेवींजीवांस्तथैवच । कालंत्रिगुणसाम्यंचकर्माणिप्राणमिंद्रियं । संस्कारंचैववेदांश्चनर्तेकिंचिल्लयेत्वभूदितिब्रह्मतर्के ।

पं । विष्ण्वादीनांप्रलयकालेअभावेनिमित्तकारणाद्यभावेनोत्तरत्रसृष्टिर्नस्यादितिभावः । यद्वा इहअस्वतंत्रवर्गे किमपि प्रलयकालेनैवासीदित्येवश्रुत्यर्थः । ननुतर्हिप्रलयेरमाजीवादीनामपिसत्त्वात्कथमियमुक्तिरित्यतःप्रवृत्तंमृत्युनैवेदमावृतमासीदितिवाक्यंव्याचष्टे ॥ लयकालइति ॥ तथाचाव्यक्तत्वाद्यपेक्षयैवनैवासीदित्युक्तं नत्वभावादित्यभिप्रायेण । अव्यक्तादौतद्व्यपदेशस्यलोकेदृष्टत्वादितिभावः । अथवा यद्विनैवेहकिंचनाग्रआसीदितिवाक्यस्यरमादिव्यतिरिक्तंकिमपिनासीदित्यर्थः । तर्हिनासदासीदित्यादिश्रुतिविरोधः । तत्ररजःशब्दोपलक्षितप्रकृत्यादीनांविशिष्यनिषेधादित्यतःप्रवृत्तंमृत्युनैवेतिवाक्यंव्याचष्टे ॥ लयकालइति ॥ पूर्वोक्तएवाभिप्रायः । यद्वाविष्ण्वादिव्यतिरिक्तंकिमपिनासीदितिपूर्ववाक्यार्थः । तत्रविष्णुरमादीनांप्रलयेसतांकिंसाम्यं न इतिप्रवृत्तंमृत्युनेतिवाक्यंव्याचष्टे ॥ लयकालइति ॥ अनेनमृत्युशब्दोहिरण्यगर्भपरइतिपरेषांव्याख्यानमपास्तं । अद्भ्यःसंभृतोहिरण्यगर्भइत्यादिश्रुत्याहिरण्यगर्भस्याजन्यत्वप्रतीतेरप्सृष्टेःपूर्वंहिरण्यगर्भस्यैवाभावात् । सयद्यदेवासृजतेत्यादेरपितत्परत्वप्राप्तावत्ताचराचरग्रहणादित्यादिसूत्रविरोधाच्च । मृत्योरावरकत्वंकुतइत्यतउक्तं ॥ अशनाययेति ॥ तद्यथावरकत्वेहेतुप्रतिपादकंस्यात्तथातंपरमात्मनिनिर्वक्ति ॥ अशनमिति ॥ अश्यतइत्यशं तंनयतीतिअशनाया । अशनायेत्युक्तइत्यर्थः । अनेनाशितुमिच्छाअशनायासैवमृत्योर्लक्षणंतयालक्षितेनमृत्युनेतिपरकीयंव्याख्यानंप्रमाणविरुद्धमित्युक्तंभवति । यस्मात्कर्म

भाष्यं ॥ लयकालेपरमात्मनैवावृतमासीत् । अशनंजगदेतद्यन्नयत्यात्मेच्छयाहरिः । अशनायाततःप्रोक्तउदन्याकर्मनायकइतिब्राह्मे ।

नायकस्ततउदन्येतिप्रोक्तइत्यर्थः । अप्शब्दापरपर्यायोदशब्दस्यकर्मवाचित्वात् । अतएवतस्मिन्नपोमातरिश्वादधातीत्यत्राप्श
ब्दःकर्मपरतयाव्याख्यातःतस्मिन्कर्माण्यधान्मरुत्इति । न्येत्यस्यनायकत्वार्थकत्वादितिभावः । यद्वाअशनंआसम्यगात्मेच्छ
यायापयतीत्यशनाया । तथाचपरमात्मनःसर्वसंहारकत्वेनस्वोदरेसर्वस्यनिक्षिप्तत्वेनावरकत्वमितिभावः । ननुयदिजगन्नियामक
त्वेनमृत्योरावरकत्वंतर्हिरन्नादीनामपिश्रुत्यादौजगन्नियामकत्वप्रतीतेस्तदावृतमित्यप्युक्तिःस्यादित्याशंकानिवर्तकत्वेनोत्तरवाक्य
मवतारयति ॥ अन्यत्रेति ॥ यद्वाननुसंहर्तृत्वेनमृत्योरावरकत्वंयदि तर्हिरमादीनामपिसंहर्तृत्वात्तदावृतमासीदित्यप्युक्तिःस्या
दित्याशंकानिवर्तकत्वेनोत्तरवाक्यमवतारयति ॥ अन्यत्रेति ॥ नेता स्वतइतिशेषः । श्रुतिपुप्रसिद्धेरितिहिशब्दार्थउक्तः ।
मृत्युशब्देनप्रकृतस्यात्रतदितिपरामर्शइतिप्रतीतिंनिवारयन्व्याचष्टे ॥ तत्ततएवेति ॥ अन्यथासइतिपुल्लिंगनिर्देशःस्यादिति
भावः । तदितिपरामृश्यमानंहेतुंदर्शयति ॥ यतइति ॥ समृत्युः मनःकरणमकुरुतकृतवानित्यन्यथाप्रतीतिमपाकुर्वन्नप्रतीते
रात्मन्वीत्यस्यार्थमाह ॥ आत्मवानिति ॥ मनोकुरुतेत्यस्यार्थःऐच्छदिति । ननुकथंस्वस्यस्ववत्वं कथंचतदिच्छोपपन्नेत्यतआ
ह ॥ शरीरवान्स्यामितीति ॥ शरीरंजगत् । तथाचयतःस्वयमेवासीन्नान्यत्ततआत्मन्वीस्यामित्यैच्छदित्यनयोर्हेतुहेतुमद्भा
वोपपत्तिः । तस्यार्चतआपोजायंतइत्युत्तरवाक्यानुरोधेनसोर्चन्नित्यस्मात्प्रागध्याहार्यमाह ॥ अबिति ॥ अन्यथाशरीरवान्स्या

भाष्यं ॥ अन्यत्रनेतृत्वप्रतीतावपिश्रुतिपुप्रसिद्धेःसएवनेतेत्याह । अशनायाहिमृत्युरिति । तत्ततएवमनोकुरुतयतःस्वयमेवासीन्नान्यत् ।
आत्मवान्स्यामित्यैच्छत् । शरीरवान्स्यामिति । अप्सृष्ट्यर्थमनोकुरुत ।

मितीच्छायांशरीररूपंजगदजायतेत्युक्तिःस्यात् । नत्वापोजायंतेत्युक्तिःस्यादितिभावः । आत्मवान्शरीरवान्स्यामित्येत त्प्रमाणेनद्रढयति ॥ ऐच्छादिति ॥ अदेहःसन्नित्यनेनयतःस्वयमेवासीन्नान्यदित्येतत्प्रमापितं । ननुविष्णोर्जन्यदेहाभावा त्कथंतदिच्छेत्यतआह ॥ यतइति ॥ कथंभगवच्छरीरत्वंजगतइत्यतउक्तं ॥ तद्वशत्वादिति ॥ शरीरस्येवजगतः तदधीनत्वादित्यर्थः । ननुविष्णोरदेहत्वेपद्भ्यांभूमिरजायतेत्यादिश्रुतिविरोधइत्यतआह ॥ स्वयमिति ॥ सोर्चन्नचरदि त्यत्रकर्मानुक्तेस्तत्प्रदर्शनपूर्वकंव्याचष्टे ॥ सोत्मानमिति ॥ अन्यस्यविष्णवर्च्यत्वाभावादितिभावः । अप्सृष्टचर्थंअर्च न्नितिसंबंधः । तस्यार्चतआपोऽजायंतेतिवाक्यमपेक्षितपूरणेनव्याचष्टे ॥ अर्चतइति ॥ तत्रसामान्यन्यायमाह ॥ यत्कुर्वन्नि ति ॥ तदात्मकंतदनुगुणं । यत्कुर्वन्यत्सृजेदीशस्तत्तदात्मकंभवेदितिसामान्यन्यायोहियतोतआपश्चार्चतोयतोजाताअतोऽर्चन साधनाइतिसंबंधः । यद्वाऽप्सृष्टयर्थमर्चनंकिमितिकर्तव्यमित्यतस्तत्रसामान्यन्यायमाह ॥ यत्कुर्वन्निति ॥ तदात्मकंतदनु गुणंअतोर्चतइत्यतःशब्दस्यपूर्वेणान्वयः । यत्कुर्वन्यत्सृजेदीशस्तत्तदनुगुणंभवेत्हियस्मात्अतःसोत्मानंअर्चन्नचरदित्यर्थः । भग वानवादिसृष्टावर्चनादिनाविनाऽशक्तःकिं । नेत्याह ॥ अन्यथेति ॥ अन्यथाकर्तुंअर्चनांविनावादिकंकर्तुं । ईशोपितदवादिकंतत्त

भाष्यं ॥ ऐच्छद्विष्णुरदेहःसन्देहवान्त्स्यामितिप्रभुः । यतोदेहइदंसर्वंतस्यविष्णोरदेहिनः । तद्वशत्वात्स्वयंदेवश्चिदानंदशरीरकः । सो त्मानमर्चन्नचरदप्सृष्टयर्थंजनार्दनः । यत्कुर्वन्यत्सृजेदीशस्तद्भवेद्धितदात्मकं । अतोर्चतोयतोजाताआपोतोर्चनसाधनाः । अन्यथाकर्तुमीशोपिक्री डयातत्तदात्मकं । कर्तुंतत्तत्प्रवृत्तिःसंस्तत्करोतिस्वयंप्रभुरितिब्रह्मांडे ।

दात्मकमर्चाद्यनुगुणंकर्तुंतत्तत्प्रवृत्तिःअर्चनादिविषयप्रवृत्तिःसन्नवादिकंकरोतीत्यर्थः । ननुउपनिषद्रष्टुश्चतुर्मुखादेरबादिस्रष्टृत्वा भावात् । अचतोवैमृत्योःकमभूदितिवक्तव्यं । मइत्यस्मच्छब्दप्रयोगः कथमित्यतआह ॥ **मइति** ॥ चतुर्मुखाद्यंतर्यामिणइतिभा वः । अंतर्यामिणोऽहेयत्वेननिमित्तेनअस्मच्छब्दवाच्यत्वेप्रमाणंदर्शयन्प्रसंगाद्युष्मदादिशब्दवाच्यत्वेपिप्रमाणंदर्शयति ॥ **अस्म दिति** ॥ यद्वासर्वाहेयत्वेनाहमितिप्रथमांतशब्दवाच्यत्वसंभवेपिमइतिषष्ठ्यंतशब्दवाच्यत्वंकथमित्यतस्तत्रप्रमाणंवदन्प्रसंगाद न्यत्राप्याह ॥ **अस्मदिति** ॥ सप्तविभक्त्यंतैरस्मच्छब्दैरित्यर्थः । प्रतियोगितआभिमुख्येनावस्थितेरित्यर्थः । तच्छब्दैरितिबहुव चनेनसर्वविभक्त्यंतैरितिसूचयति । परोक्षतः परोक्षत्वतः । ननुतर्हिविष्णोरेकत्वाद्द्विवचनबहुवचनांतास्मदादिशब्दवाच्यत्वं कथमित्यतआह ॥ **सएवेति** ॥ बहुशब्दोनेकपरः । बहुवचनांतशब्दइत्यर्थः । केनरूपेणास्मदादिशब्देनचोच्यतेइत्यतआह ॥ **जीवेति** ॥ **द्वंद्वेनेति** ॥ जडद्वंद्वेनेत्यर्थः । अहमादिशब्दवाच्यत्वंजीवाभेदेनैवकिंनस्यादित्यतउक्तं ॥ **भिन्नोपीति** ॥ सर्व वस्तुभ्योजडेभ्यः । जीवभेदएवकुतइत्यतआह ॥ **पूर्णेति**॥ अर्चतोवैमेकमभूदितितदेवार्कस्यार्कत्वमितिवाक्यंप्रमाणेनव्याचष्टे॥ **उदकमिति**॥ अर्चतोजातमित्यनेनेनवार्कशब्दप्रवृत्तिनिमित्तमुच्यतइतिभ्रमंवारयितुंस्मृत्यभिप्रायमाह॥ **अर्चतइति**॥ **स्मृतौकश**

भाष्यं ॥ मेसर्वाहेयस्यविष्णोः । अस्मच्छब्दगतैर्विष्णुर्वाच्यःसप्तविभक्तिभिः । सर्वाहेयत्वतस्त्वेकःसर्वस्यप्रतियोगितः । युष्मच्छब्दाभिधे यश्चतच्छब्दैश्चपरोक्षतः । सएवबहुरूपत्वाद्बहुशब्दाभिधानवान् । जीवस्थितेनरूपेणद्वंद्वेनापिद्विधोच्यते । भिन्नोपिसर्वजीवेभ्यःसर्ववस्तुभ्यएवच । पूर्णानंदादिरूपस्यकुतो ल्पसुखिनैकतेतित्रह्मतर्के । उदकंसुखहेतुत्वात्कमित्येवाभिधीयते । तदेवह्यर्चतोजातमतोर्कइतिकीर्त्यतइतिव्यासनिरुक्ते । ॥ ९ ॥

ब्दस्यपूर्वनिर्वचनादरित्यस्यपश्चान्निरुक्तत्वात्कारितिस्यान्नत्वर्कइत्यतोवाह॥ अर्चतइति॥ कंहवाइत्यत्रकशब्दस्योदकार्थत्वप्रतीतिं निवारयन्व्याचष्टे॥ कमिति॥ उदकार्थत्वमेवकिंनस्यादित्यतोज्ञानस्यैवसुखहेतुत्वप्रतीतिंनिवारयन्समग्रंवाक्यंप्रमाणेनव्याचष्टे॥ अपामिति॥विष्णोरर्चतइतिशेषः॥१॥अयंखंडार्थः॥अग्रे प्रलये। इह अस्वतंत्रवर्गे।किंचनजीवजडरूपं। नैवासीत्। अनादिनित्य जीवादेःसत्वान्नासीदितिकथमुक्तिरित्यतउक्तं॥ मृत्युनैवेति॥मृत्योरावरकत्वेहेतुः॥ अशनाययेति॥ अश्यतइत्यशंजगत् तन्न यतीतिअशनायातया।अन्यत्रनेतृत्वप्रतीतावपिश्रुतिषुप्रसिद्धेःसएवनेतेत्याह॥अशनायाहीति॥ मृत्युरशनायेतिश्रुत्यादिप्रसिद्ध मित्यर्थः। यस्मान्मृत्युःस्वयमेवासीदन्यन्नैवासीत् तत्तस्मात्। आत्मन्वीआत्मवान्जगद्रूपशरीरवान्स्यामितिमनोकुरुतऐच्छत्। समृत्युःशरीररूपजगत्सिसृक्षयाऽप्सृष्ट्यर्थमनोकुरुतेतिशेषः। तदनंतरंसमृत्युःअर्चन्नात्मानंपूजयन् अचरत्संचचार। तस्यार्चतः पूजयतःमृत्योःसकाशात्पूजासाधनभूताआपोऽजायंत। उपनिषद्द्रष्टाचतुर्मुखोवक्ति॥अर्चतइति॥ अर्चतोवैमेसर्वाहेयस्यमदंत र्यामिणःमृत्युरूपस्यविष्णोःसकाशात् कंसुखंभवत्यस्मादितिसुखसाधनंकंउदकं अभवत् उत्पन्नमितियत् तदेवार्चद्विष्णुजातत्वसुख साधनत्वंचार्कस्यार्कत्वंअर्कशब्दप्रवृत्तिनिमित्तं।अर्चतोजातत्वादर् सुखसाधनत्वात्कं इतिज्ञेयं। योऽधिकारी एवंउक्तरीत्याअर्कस्या

भाष्यं॥ अर्चतोजातंसुखसाधनंचेत्यर्कइत्यर्थः। कंसुखमस्मैभवति। अपांहिसुखहेतूनांवेदविष्णोर्जनिंहियः। समुक्तःसुखभागेवस्याद्विष्णोस्तु प्रसादतइतिमाहात्म्ये॥ १॥

उप०॥ नैवेहकिंचनाग्रआसीन्मृत्युनैवेदमावृतमासीदशनायया अशनायाहिमृत्युस्तन्मनोऽकुरुताऽऽत्मन्वीस्यामिति। सोर्चन्नचरत्तस्यार्चत आपोऽजायंतार्चतोवैमेकमभूदिति। तदेवार्कस्यार्कत्वंकꣳहवाअस्मैभवतियएवमेतदर्कस्यार्कत्वंवेद॥ १॥

र्कत्वंवेद तेनवेदनेनेश्वरप्रसादद्वारा अस्मैकंसुखंमौक्कंभवति। हवाइतिप्रमाणप्रसिद्धिद्योतकौनिपाताविति ॥७॥ १॥ अथभाष्यार्थः॥आपोवार्कइतिवाक्यंपरैः कःपुनरसावर्कइति उच्यते।आपोयाअर्चनांगभूतास्ताएवाग्नेरर्कत्वस्यहेतुत्वात्इतिव्याख्यातं तदसत्। पूर्वखंडएवापामर्कत्वस्योक्तत्वेनकःपुनरसावितिप्रश्नस्यैवायोगात् । नहिसिद्धेर्थेप्रश्नःसंभवतीत्याशयवान्पुनर्वचनप्रयोजनमाह॥ अर्कशब्दस्येति॥तदेवार्कस्यार्कत्वंइत्युत्तरवाक्यगतार्कशब्दस्यादित्येप्रसिद्धत्वात् तस्यार्चतआपइति पूर्ववाक्यगताप्शब्दोपित त्रादित्यएववर्ततइत्यंगीकर्तव्यं। तस्यार्चतआपोजायंतेत्युक्तं अर्चते वैमेकमभूदित्यनूद्य तदेवार्कस्यार्कत्वमित्युक्तत्वेनपूर्वोत्तरवाक्यगताप्शब्दार्कशब्दयोरेकविषयत्वावगमात् । तथाचादित्यस्यैवात्रसृष्टिरुच्यतइतिशंकांनिवर्तयितुमितिभावः। पुनर्वचनेनसाशंका कथंनिवृत्तेत्यतआह ॥ नेति ॥ अप्स्वेवेत्यनेन वाइत्येतदवधारणार्थत्वेनव्याख्यातं। बाणाद्यर्थत्वप्रतीतेःशरशब्दार्थमाह ॥ शर इति ॥ मंडोघनीभूतइत्यर्थः ।कुतःशरशब्दोमंडार्थइत्याशंकांपरिहरन्तद्यदपांशरआसीत्तत्समहन्यतसापृथिव्यभवत्इतिवाक्यं प्रमाणेनव्याचष्टे ॥ फेनरूपस्त्विति ॥ सुसंहतः मृत्युनास्वरेतसासंघातत्वंप्रापितइत्यर्थः । पृथिवीत्वं ब्रह्मांडरूपत्वं । अपएव ससर्जादौतासुवीर्यमवासृजत्। तदंडमभवद्धैमंइत्यन्यत्रोक्तत्वात्। तस्यामश्राम्यत् इत्येतत्परैःतस्यांपृथिव्यामुत्पादितायां समृत्युः

भाष्यं ॥ अर्कशब्दस्यादित्येप्रसिद्धत्वादप्शब्दोपितत्रेत्याशंकांनिवर्तयितुमापोवाअर्कइतिपुनर्वचनं । नादित्येर्कशब्दः । किंत्वप्स्वेवार्कशब्द इत्यर्थः । शरोमंडः । फेनरूपस्तुयोमंडोजलस्थोसौसुसंहतः ।

प्रजापतिः अश्राम्यत्श्रमयुक्तोबभूव । सर्वोहिलोकःकार्यंकृत्वाश्राम्यति । प्रजापतेस्तन्महत्कार्यंयत्पृथिवीसर्गइतिव्याख्यातं तदसत् । मृत्युशब्दस्यपरमात्मपरत्वेनव्याख्यतत्वात् । परमात्मनश्चश्रमाभावात् । नचलोकदृष्टिविरोधः । तस्याशक्तविषय त्वादित्याशयवांस्तद्वाक्यंव्याचष्टे ॥ तस्यामिति ॥ श्रुतौतस्यतप्तस्येत्यनुवादान्यथानुपपत्त्यातस्यामश्राम्यदित्यनंतरंअध्याहार्य माह ॥ ततइति ॥ वाय्वादिदेवतोत्पादकत्वेहेतुर्देवराडिति । तस्यश्रांतस्यतप्तस्यतेजोरसोनिरवर्तताग्निःइतिवाक्यार्थमाह ॥ तच्चिंतनादिति ॥ नन्वग्निःस्यादितिचिंतनाद्वायुःकथमुत्पन्नइत्यतआह ॥ अग्नीति ॥ कथंवायुरग्निशब्दाभिधेयइत्यतआह ॥ अग्रजत्वादिति ॥ ननुशक्तिविस्रंसनव चित्वेनैवश्रमशब्दस्यप्रसिद्धेःकथंतस्यांशिश्यइतिशयनार्थतयाव्याख्यानमित्यतआह ॥ शक्तीति॥चशब्दौपरस्परसमुच्चये । तर्ह्युभयार्थत्वेश्रमशब्दस्यकथंशयनार्थतयाव्याख्य।नमित्याशंक्याह॥हरेरिति ॥ यद्यपि शक्तिविस्रंसनेशयनेचश्रमशब्दःकीर्तितः तथापिहरेःशक्तिविस्रंसनाभावाच्छ्रमोनामशयनमेवेत्यभिप्रायेणोपसंहरति ॥अतइति॥ श्रमशब्दस्यशयनार्थत्वेआंतरोपपत्तिमप्याह ॥ तस्यामिति ॥ चशब्देनपूर्वोक्तप्रमाणोक्तांयुक्तिंसमुच्चिनोति ॥ साधिकरण त्वादिति ॥ श्रमशब्दस्योभयार्थत्वेपि प्रकृतेश्रमोनामशयनमेवयुक्तं । तस्यामश्राम्यदितिपृथिव्यधिकरणत्वश्रवणात् । शयन

भाष्यं ॥ पृथिवीत्वंसमापन्नस्तस्यांशिश्येजनार्दनः । ततःसंचिंतयामासस्यादग्निरितिदेवराट् । तच्चिंतनात्समुत्पन्नोवायुरग्न्यभिधानवान् । अग्रजत्वादग्रणीत्वाद्वायोरग्नित्वमिष्यतइतिप्रवृत्ते । शक्तिविस्रंसनेचापिशयनेचापिकीर्तितः । श्रमशब्दोहरेर्नैवशक्तिविस्रंसनंक्वचित् । अतोहरेःश्रमो नामशयनंसंप्रकीर्तितमितिब्रह्मतर्के । तस्यामश्राम्यदितिसाधिकरणत्वाच्चशयनंयुक्तं ।

क्रियायाश्चपृथिव्यधिकरणत्वसंभवादित्यर्थः । पृथिव्यधिकरणत्वश्रवणेपिशक्तिविस्रंसनंकुतोनश्रमशव्दार्थइत्यतआह ॥ नहीति ॥ श्रमःशक्तिविस्रंसनं । ननुश्रमस्यांतःकरणमधिकरणं तस्यशरीरमधिकरणं शरीरस्यपृथिव्यधिकरणमित्यधिकरणपरंपराविवक्षयांतःकरणधर्मस्यापिश्रमस्यपृथिव्यधिकरणत्वंयुज्यतइत्याशंक्याह ॥ अधिकरणेति ॥ ननुशयनार्थत्वेपिपृथिव्याः साक्षादधिकरणत्वंनयुक्तं । विष्णुशयनक्रियायाःशेषः शेषस्यश्वेतद्वीपः तस्यक्षीरसागरः तस्यचपृथिव्यधिकरणमितिअधिकरणपरंपराकल्पनस्यावश्यकत्वादित्यतःप्रमितत्वान्नक्लिष्टकल्पनेत्याशयवांस्तत्रप्रमाणमुदाहरति ॥ सृष्ट्वेति ॥ तस्यांपृथिव्यां अब्धिमध्यगःसन् श्वेताख्येद्वीपे अनंतेशेषेशेतइतिसंबंधः । ननुसंतापार्थकतप्तस्येतितप्तशव्दवलादश्राम्यदित्येतच्छक्तिविस्रंसनार्थकंयुक्तमित्यतस्तस्यप्रमाणेनार्थांतरमाह ॥ तप्तइति ॥ यतआलोचनायुक्तस्तप्तइत्युच्यतेतस्माद्धरेस्तप्ततातुकार्यार्थकामनेतिसंबंधः । अत्रालोचनानामेच्छाविशेषेग्राह्यः । संतापार्थत्वमेवकिंनस्यादित्यतआह ॥ कुतइति ॥ अनेनतप्तस्य खिन्नस्येतिपरकीयव्याख्यानमप्यपास्तं । प्राक्प्रमाणेनतेजोरसशव्दस्यव्याख्यातत्वादप्रतीतेस्तंव्याचष्टे ॥ तेजइति ॥ जगतइतिशेषोक्तिः । तेजःशव्दार्थकथनंसामर्थ्येतिरसशव्दार्थःसारभूतइति । रसःसारोवरश्चेतिशव्दाःपर्यायवाचकाइत्यभिधाना

भाष्यं ॥ नहिपृथिव्यांश्रमोनामांतःकरणधर्मोयुज्यते अधिकरणपरं पराकल्पनंचक्लिष्टकल्पनं । सृष्ट्वासपृथिवींविष्णुःशेतेनंतेब्धिमध्यगः । तस्यांपृथिव्यांश्वेताख्येद्वीपेमुक्तैरुपास्यतइतिमुक्तिसंहितायां । तप्तआलोचनायुक्तस्तस्मात्कार्यार्थकामना । तप्ततातुहरेरुक्ताकुतोदुःखंहरेःप्रभोरिति व्रह्मतर्के । तेजोरसःजगतःसामर्थ्यसारभूतः ॥ २ ॥

दिति ॥ २ ॥ ततश्चायंखंडार्थः ॥ अर्कशब्दस्यादित्येप्रसिद्धत्वादप्शब्दोपितत्रेत्याशंकांनिवारयितुमाह ॥ **आपइति** ॥ आपएवार्कः अर्कशब्दवाच्याइत्यर्थः । तत्तत्राप्सु यत्यः अपांशरःफेनरूपोमंडः आसीत् तत्सशरः मृत्युना स्वरेत सा समहन्यत संघातत्वंप्रापितः । यःसंघातः सा पृथिवीब्रह्मांडरूपाऽभवत् । तस्यांपृथिव्यां अश्राम्यत्शिश्ये मृत्युनामाजनार्दनः । तदनंतरंअग्निःस्यादितिकामनामकरोदितिशेषः।श्रांतस्यशयितस्यतप्तस्यकार्यकामनावतः तस्यमृत्युनामकस्यपरमात्मनः सकाशात् । तेजोरसोजगत्सामर्थ्यसारभूतः अग्निःअग्रजत्वादग्न्यभिधानवान्वायुः निरवर्ततअजायतेति ॥ २ ॥ **अथभाष्यार्थः** ॥ सत्रेधात्मानंव्यकुरुतेत्यस्यसजातःप्रजापतिःत्रेधात्रिप्रकारमात्मानंस्वयमेवकार्यकारणसंघातंव्यकुरुतव्यभजत्इत्यादिपरव्याख्यानमप्रामाणिकंप्रमाणविरुद्धंचेतिभावेनखंडंप्रमाणेनव्याचष्टे ॥ **वायुरित्यादिना** ॥ सत्रेधेत्युक्तत्वादग्निंतृतीयमित्यपिग्राह्यमितिसूचयन्अग्निशब्दंतावत्प्रकारांतरेणवायौनिर्वक्ति ॥ **वायुरिति** ॥ सत्रेधात्मानमित्युक्तरूपाणांमूलानुक्तव्यापारानाह ॥ **सवायुरिति** ॥ हूयते हविरादायहूयते हविःप्रक्षेपाधिकरणत्वेनहूयतेवा । आदित्यशब्दस्यसूर्यपरत्वप्रतीतिंनिवारयितुंवायौनिर्वक्ति ॥ **आदायेति** ॥ आयुरादायेत्यन्वयः । आदित् इत्यस्यार्थ आदायेति । यकारस्यार्थो यातीति । आयुरितियोग्य

उप० ॥ आपोवाअर्कस्तद्यदपांशरआसीत्तत्समहन्यत । सापृथिव्यभवत्तस्यामश्राम्यत्तस्यश्रान्तस्यतप्तस्यतेजोरसोनिरवर्ततााग्निः ॥ २ ॥

भाष्यं ॥ वायुरग्निरितिप्रोक्तोह्यप्रणीत्वादथांगिनां । नेतृत्वाददनाच्चापितस्यस्रष्टाजनार्दनः । सवायुर्वायुरूपेणजगत्पातिशरीरगः । आदित्यस्थेनरूपेणजगद्यातिप्रकाशयन् । अग्निस्थेनतुरूपेणहूयतेसर्वयष्टृभिः । आदाययात्यायुरितिसएवादित्यउच्यते ।

23

तयासंवध्यते । तर्ह्यादित्याग्निशब्दयोःसूर्यादौप्रसिद्धिःकथमित्यतआह ॥ तत्संबंधादिति ॥ अत्रोपनिषदिअंतेत्राद्यवाक्यग
ताग्निशब्दस्यादौनिर्वचनेन आदौप्रयुक्तवाक्यगतादित्यशब्दस्यांतेनिर्वचनेन मध्यवाक्यप्रतिपाद्यवायोर्व्यापारत्वादावुक्त्या
त्रयाणांरूपाणांसाम्येन नक्रमेणनिर्देशेप्राधान्यादिकंनिमित्तमित्यभिप्रेत्योपनिषदिआदित्यंतृतीयंवायुंतृतीयंअग्निंतृतीयमित्युक्त
मितिसूचितं । तस्यप्राचीदिक्शिरइत्यादेःतस्यास्यप्रथमाग्नेःअश्वमेधक्रतूपयोगिकस्यार्कस्यविराजःचित्यात्मकस्याश्वस्येवदर्श
नमुच्यतेइत्यादिपरेषांव्याख्यानंनिर्मूलकमितिभावेनव्याचष्टे ॥ सएषइत्यादिना ॥ सएषोप्सुप्रतिष्ठितइत्यंशंव्याचष्टे ॥
सएषइति ॥ विष्णोःकूर्मरूपप्रतिपादकप्रमाणानुरोधेनाह ॥ विष्णुनेति ॥ अनंतशेषः। असौचासौचेमौअसौचासौचसक्थ्यौ
इतिवाक्यद्वयतात्पर्यंवदन्कूर्मस्वरूपस्यपादाःकुत्रसंतीतिजिज्ञासायामाह ॥ अप्स्विति ॥ ईमौसक्थ्यावित्यस्य चत्वारःपादा
इत्यनेनतात्पर्यमुक्तंभवति । असौचासौचेत्यादेः कोणसंस्थिताइत्यनेन । अंडोदेकोणसंस्थिताश्चत्वारःपादाःअप्सुसंस्थिताइ
तिसंबंधः । आद्यहिशब्दःअप्सुसंस्थितत्वस्य द्वितीयस्तुकोणसंस्थितत्वस्य प्रसिद्धिद्योतकः । इयमुरइत्येतद्व्याचष्टे ॥ उर
स्त्विति ॥ ननु शिरआद्यवयवानामपिभूमिसंश्लिष्टत्वात्किंविशिष्योच्यतेउरस्तुभूमिसंश्लिष्टमित्यतआह ॥ अतिरिच्येति ॥
पार्श्वेनपुच्छेनचसहशिरश्चभूमिमतिरिच्यैवोदकसंस्थितमित्यर्थः । अंतरिक्षमुदरमित्येतद्व्याचष्टे ॥ आकाशमिति ॥ द्यौःपृष्ट

भाष्यं ॥ तत्संबंधात्तुतन्नामसूर्यस्याग्नेस्तथैवच । सएषकूर्मरूपेणवायुरंडोदकेस्थितः । विष्णुनाकूर्मरूपेणधारितोनंतधारकः । अप्सुपादाहि
चत्वारोहांडोदेकोणसंस्थिताः।उरस्तुभूमिसंश्लिष्टमतिरिच्यभुवंपुनः । पार्श्वतःपृष्ठतश्चैवशिरश्चोदकसंस्थितं।आकाशमुदरेतस्यद्यौःपृष्ठेसंस्थिताविभोः॥

मित्येतद्व्याचष्टे ॥ द्यौरिति ॥ यत्रक्कचैतीत्यादिव्याचष्टे ॥ एवंविद्वानिति ॥ तदेवेत्यस्यार्थः । तत्रैवेति ॥ गमनेच्छायामप्यन्यत्रगमन प्रतिबंधकत्वेनकथमस्यविज्ञानफलत्वमित्यतस्तदभिप्रायमाह ॥ स्थानेच्छेति ॥ वायुज्ञानस्योक्तफलमानुषंगिकंअधिकमन्यत्फलमस्ती तिभावेनोभयविषयंप्रमाणंपठति ॥ उपास्तइति ॥ लोकंचावृत्तिवर्जितंइत्यनेनयत्रक्कचस्वयोग्यमुक्तस्थानंगच्छति तत्रैवप्रतितिष्ठति नपुनरावर्तते इतिप्रकारांतरेणव्याख्यातंभवति । नन्वत्राग्निशब्दश्रवणादश्वमेधक्रतूपयोग्यग्निप्रकरणमेवेदंकिंनस्यादित्यत्रआंतरो पपत्तिमप्याह ॥ सइति ॥ चशब्दः पूर्वोक्तप्रमाणसमुच्चायकः ॥ वायुः एतत्प्रकरणप्रतिपाद्यइतिशेषः । कूर्मस्वरूपेणविष्णुनाधारितः कूर्म रूपोवायुः अंडोदकस्थः शेषधारकः इत्येतत्प्रमाणांतरेणापिद्रढयति ॥ बिभर्तीति ॥ तस्यप्राचीदिक्शिरोसौचासौचेमौअसौचासौचस क्थ्यौइतिवाक्यत्रयंस्पष्टप्रमाणेनव्याचष्टे ॥ वायोरिति ॥ पूर्वतः पूर्वस्यांदिशि ॥ ३ ॥ ततश्चायंखंडार्थः ॥ सः अग्निनामकोवायुः आ त्मानं त्रेधात्रिप्रकारं व्यकुरुतव्यभजत् । कथं आदित्यंतृतीयं अग्निवाय्वपेक्षयात्रित्वसंख्यापूरकं । वायुंतृतीयं आदित्याग्न्यपेक्षया

भाष्यं ॥ एवंविद्वांस्तुयत्रैतितत्रैवप्रतितिष्ठतीतिप्रभंजने । स्थानेच्छाचेत्तत्रैवप्रतितिष्ठति । उपास्तेकूर्मरूपंयोवायुंसंस्थितिमाप्नुयात् । इच्छयावि निवृत्तिंवालोकंचावृत्तिवर्जितमित्यध्यात्मे । सएषप्राणस्त्रेधाविहितइतिवचनाच्चवायुः । बिभर्त्यंडंहरिः कूर्मस्त्वंडेचाप्युदकंमहत् । उदकेकूर्मपृष्ठस्थवायुः पुच्छंसमाश्रितः । वायोः पुच्छंसमाश्रित्यशेषस्तुपृथिवीमिमां । बिभर्तितस्यांजगदिदंसर्वंप्रतिष्ठितमितिवैभवे ॥ वायोस्तुकूर्मरूपस्यपूर्वतस्त्वेन्द्रकेमुखं । आग्नेयेशानगौबाहूपादौनिर्ऋतिवायुगावितिप्रकृष्टे ॥ ३ ॥

बृ० भा० ३ उप० ॥ सत्रेधाऽऽत्मानंव्यकुरुताऽऽदित्यंतृतीयंवायुंतृतीयं सएषप्राणस्त्रेधाविहितः । — अग्निं तृतीयं

त्रित्वसंख्यापूरकं। एवमग्निंतृतीयं आदित्यवाय्वपेक्षयात्रित्वसंख्यापूरकमितिग्राह्यं । सएषमृत्युनोत्पन्नोग्निनामकःप्राणोमुख्यवायुः उक्तप्रकारेणत्रेधाविहितोमृत्युना । वायोर्जगद्धारकंकूर्मरूपंनिरूपयति॥तस्येति॥रूपांतरनिरूपणारंभज्ञापकतयाऽथास्येत्यत्रत्याथशब्दःप्रथमतोयोज्यः। तस्य बुद्धिसन्निहितस्य कूर्मरूपस्यवायोःशिरः प्राचीदिक् प्राच्यांदिशिवर्तते । ईर्मौबाहू असौचासौचआग्नेयेशानगौ । चशब्दावितरेतरयोगे। अस्यपुच्छंप्रतीचीदिक्प्रतीच्यांदिशिस्थितं । सक्थ्यौपादौ असौचासौचनैर्ऋतवायव्यगौ। पार्श्वेदक्षिणाचोदीचीच । चशब्दावितरेतरयोगे । दक्षिणोत्तरदिग्गते। द्यौःद्युलोकः पृष्ठंपृष्ठेस्थितः। अंतरिक्षंआकाशः उदरंउदरेस्थितः। उरःवक्षस्थलं इयंभूमिः। तत्संश्लिष्टं। एतादृशंवायोःकूर्मरूपंकुत्रतिष्ठतीत्यतआह॥सइति ॥ यस्त्रेधाविहितः सएषकूर्मरूपोवायुः अप्सुअंडोदके प्रतिष्ठितः। एवंविद्वान्आदित्यवाय्वग्निरूपस्यजगत्पालकत्वादिना कूर्मरूपस्यतुजगद्धारकत्वेनज्ञानीयत्रक्कचदेशे एतिगच्छति अवस्थानेच्छाचेत्तदेवतत्रैव प्रतितिष्ठति।यद्वाएवंविद्वान्विष्णवपरोक्षज्ञानद्वारायत्रक्कचयोग्यमुक्तस्थानेगच्छति तत्रैवप्रतितिष्ठति । नपुनरावर्ततइति ॥ ३ ॥ अथभाष्यार्थः ॥ सोकामयतद्वितीयोमआत्माजायेतइतिवाक्यंपरैःसमृत्युरकामयत । किं द्वितीयः मेमम आत्माशरीरं येनाहंशरीरीस्यां तत्जायेतेत्येवमकामयतइतिव्याख्यातं । तदसत् । उदाहरिष्यमाणप्रमाणविरोधादितिभावेनस्वयंव्याचष्टे ॥ आत्मेति ॥ द्वितीयोवाय्वपेक्षया । अनेनसइत्यकामयतेत्यन्वयोदर्शितः।

उप० ॥ तस्यप्राचीदिक्शिरोऽसौचासौचेर्मौ अथास्यप्रतीचीदिक्पुच्छमसौचासौचसक्थ्यौदक्षिणाचोदीचीचपार्श्वेद्यौःपृष्ठमन्तरिक्षमुदरमियमुरः सएषोऽप्सुप्रतिष्ठितोयत्रक्कचैतितदेवप्रतितिष्ठत्येवंविद्वान् ॥ ३ ॥

भाष्यं ॥ आत्माब्रह्मामेद्वितीयोजायेतेत्यकामयत ।

26

ननु आगमेक्वचिद्ब्रह्मणासह क्वचिद्ब्रह्मानंतरंवायोर्जन्मोक्तेः कथमत्रब्रह्मजन्मोक्तेःपूर्ववायुजन्मोक्तिरित्यतआह ॥ **वायुरेवेति** ॥ उक्तार्थेप्रमाणमाह ॥ **वायुरेवेति** ॥ वदेत्श्रुतिरितिशेषः । ननूभयोःसहजननेपिअस्तूक्तनिमित्तेनक्वचिद्वायुजन्मोक्तेःप्राथम्यं । क्वचिद्ब्रह्मजन्मोक्तेःप्राथम्येकिंनिमित्तमित्यतआह ॥ **क्वचिदिति** ॥ आत्माब्रह्मेतिव्याख्यानमभिधानेननिगमयति ॥ **आत्मेति** ॥ यःपूर्वजःप्रजापतिरित्यन्वयः । दक्षादिव्यावृत्त्यर्थंपूर्वजइतिविशेषणं । यद्वापूर्वजइत्येतच्चतुर्मुखश्चेतीतिशब्दात्पूर्वंयोज्यं । समृत्यु मनसापूर्वोत्पन्नेन वाचंत्रयीलक्षणां मिथुनंद्वंद्वभावंसमभवत्संभवनंकृतवानित्यादिनासमनसावाचंमिथुनंसमभवदित्येतत्परैरन्यथाव्याख्यातं । तदसदितिभावेनव्याचष्टे ॥ **सइति** ॥ द्वितीयइतिसमनसेत्यनयोर्वाक्ययोःस्वकृतंव्याख्यानंद्रढयन्खंडंप्रमाणेनव्याचष्टे ॥ **ममेत्यादिना** ॥ ब्रह्माद्वितीयोजायेतेतीत्यन्वयः । वाचमित्यस्यार्थो वेदाभिमानिनीमिति । श्रियामिथुनीभावंविनाब्रह्माणमुत्पादयितुमशक्तत्वेस्वेच्छयेतिव्यर्थमित्यतआह ॥ **यतइति** ॥ तद्यद्रेतआसीत्ससंवत्सरोभवदित्येतद्व्याचष्टे ॥ **ततइति** ॥ ततोरेतसः मिथुनीभावानंतरंवा । अनेन नहपुराततःसंवत्सरआसेत्येतदुक्ततात्पर्यंभवति । तमेतावंतंकालमविभ

भाष्यं ॥ वायुरेवब्रह्माभवतीतिदर्शयितुंवायोःसृष्टिःप्रथममुक्ता । वायुरेवयतोब्रह्मपदंनियमतोव्रजेत् । सहैवजननेप्यस्मात्पूर्ववायोर्जनिंवदेत् । कचित्तुब्रह्मणःपूर्वप्राधान्यात्तत्पदस्यचेतिब्रह्मतर्के । आत्माविरिंचःसुमनाःसुधौतश्चेतिकथ्यते । ब्रह्माचतुर्मुखश्चेतिपूर्वजोयःप्रजापतिरितिशब्दनिर्णये । समनसास्वेच्छया वाचंश्रियंदेवीं मिथुनंसमभवत् । ममद्वितीयोजायेतब्रह्मेतिभगवान्परः । वेदाभिमानिनींदेवींश्रियंसमभवत्प्रभुः । स्वेच्छयैवयतःशक्तिस्तांविनापिहरेःसदा । ततःसंवत्सरोनामब्रह्मासमभवत्प्रभोः ।

यीवान्संवत्सरइत्येतद्व्याचष्टे ॥ तंगर्भमिति ॥ तंजातमभिव्याददादित्येतद्व्याचष्टे ॥ तमिति ॥ सभाणमकरोत् सऐक्षतेति वाक्यद्वयादर्थतःसिद्धस्यार्थस्यकथनं श्रुत्वारावमिति । स्तुतिरूपंशब्दमित्यर्थः । सतयावाचातेनात्मनेदंसर्वमसृजतेत्युत्तरखंडस्थवाक्यतात्पर्यकथनंव्यदधादिति । तमित्यनुवर्तते । अतएवतत्वप्रकाशिकायांभाष्योदाहृतप्रमाणगतसृष्टिकर्मण्ययोजयदिति वाक्यव्याख्येयत्वेनसतयेतिवाक्यमुदाहृतं । श्रुतावशनायांवाचमित्यन्वयभ्रांतिंवारयितुंव्याचष्टे ॥ विंदुलोपेनेति ॥ द्वितीयाविभक्त्यर्थाविवक्षयेत्यर्थः । तथैवान्वयःकिंनस्यादित्यतआह ॥ अशनायाहीति ॥ हियस्मादुक्तमित्यर्थः । तथात्वेऽशनायात्वस्यप्रमाणप्रसिध्यामृत्युविशेषणत्वोक्तिविरोधःस्यादितिभावः । द्वितीयार्थाविवक्षायांकिमर्थंविंदुप्रयोगइत्यतआह ॥ सर्वेति ॥ विंदुप्रयोगात्कथमेतल्लब्धमित्यतआह ॥ आधिक्यइति ॥ अर्थाधिक्येविवक्षितेधिकंशब्दरूपंभवतीत्यर्थः । संवत्सरकालंधृतगर्भगतत्वेनैवसंवत्सरशब्दवाच्यत्वंचतुर्मुखस्येतिप्रतीतिंनिवारयन्संवत्सरशब्दंचतुर्मुखेनिर्वक्ति ॥ सम्यगिति ॥ यद्वा संवत्सरकालनिर्मातासंवत्सरःप्रजापतिरितिपरेषांव्याख्यानमसत् । जन्यवाचकशब्देनजनकग्रहणेलाक्षणिकत्वापत्तेरितिभावेन संवत्सरशब्दस्यचतुर्मुखेयोगमाह ॥ सम्यगिति ॥ सभाणमकरोत्सैववागभवदित्येतद्वाक्शब्दस्यशब्दमात्रार्थत्वप्रतीतिंवारय

भाष्यं ॥ तंगर्भमुदरेबिभ्रद्यावत्संवत्संररमा । तंजातमत्तुंस्वमुखंविदार्यपुरुषोत्तमः । श्रुत्वारावंपुनस्तस्यव्यदधात्सृष्टयेप्रभुरितिचकारण विवेके । विंदुलोपेनाशनायामृत्युरित्यर्थः । अशनायाहिमृत्युरित्युक्तं । सर्वाशनत्नेतेत्यर्थेविंदुः । आधिक्येधिकमितिसूत्रात् । सम्यगात्मनो वत्सभूतान्देवादीत्रसयतीतिसंवत्सरः ।

न्प्रमाणेनन्व्याचष्टे ॥ ब्रह्मणइति ॥ ब्रह्मणोमुखादितिसंबंधः । तांसरस्वतीमपिवागीश्वरीतिहेतोःवाचंचाहुरितिसंबंधः । ननु यदिवाक्शब्दःसरस्वतीपरःतर्हिकथंसैववागितितस्याःभाण्शब्दाभेदेनोक्तिरित्यतआह ॥ **तदभिमानित्वादिति** ॥ महतश्च तुर्मुखादित्यादिवदितिभावः । भाणितिरोदनमकरोदित्यन्यथाप्रतीतिनिरासायभाण्शब्दार्थमाह ॥ **भारूपइति** ॥ ज्ञानरूपः प्रकाशरूपश्च । णरूपःसुखरूपः । ननुयदिभाण्शब्दोभगवत्परःतर्हिसभाणमकरोदितिकथं । नहिभगवत्करणंसंभवतीत्यतआह ॥ **तद्व्यंजकत्वादिति** ॥ तज्ज्ञानजनकत्वादित्यर्थः । सभाणमितिभाण्शब्दस्यभणनशब्दसमानार्थताज्ञापनायभणनमित्युक्तं । तथाचोक्तयोगेनभाण्शब्दोमुख्यतोभगवत्परस्तद्व्यंजकत्वेनतत्संबंधाद्वाक्परइतिभावः ॥ ४ ॥ **ततश्चायंखंडार्थः** ॥ समृत्यु नामाभगवा न्सेमम आत्माब्रह्मा द्वितीयोवाय्वपेक्षया जायेत इत्यकामयत । तदनंतरं अशनायांसर्वाशननेता समृत्यु र्मनसा स्वेच्छयैव वाचंवेदाभिमानिनींश्रियं मिथुनंद्वंद्वभावं समभवत् । तत् तेन मिथुनीभावेन यद्रेतआसी त्सःतदुपादानकदेहवा न्संवत्सरःसम्यगात्मनोवत्सान्देवादीन्रमयतीतिसंवत्सरनामकश्चतुर्मुखो ऽभवत् । ततोमिथुनीभावात् पुरा देहयोगराहित्येन देवादिरमणहेतुत्वायोगात्संवत्सरनामकोनास हयस्मात्तस्मात्संवत्सरोभवदितिसंबंधः । तंरेतउपादानकंगर्भं यावान्संवत्सरःद्वा

भाष्यं ॥ ब्रह्मणोभाणितिवचोनिःसृतंभयतोमुखात् । तस्याभिमानिनीदेवीतदैवोत्थाचतुर्मुखात् । वागीश्वरीतितामाहुर्वाचंचापिसरस्वती मितिभावतत्वे । तदभिमानित्वात्सैववागित्युच्यते । भारूपोणरूपश्चेतिभगवान्भाण् । तद्व्यंजकत्वाद्गणनंवाक् ॥ ३ ॥

उप० ॥ सोऽकामयतद्वितीयोमआत्माजायेतेतिसमनसावाचंमिथुनꣳसमभवदशनायांमृत्युस्तद्यद्रेतआसीत्ससंवत्सरोऽभवत् । नह्पुराततः संवत्सरआस

29

दशमासात्मकःकालः एतावंतंकालं अविभःअबिभ्रत् वाङ्गाम्नीरमेतिशेषः । तंगर्भस्थं एतावतःसंवत्सरात्मकस्य कालस्य पर स्तादनंतरं असृजतअसूत जातंतंसंवत्सरं अभिअभिलक्ष्य अत्तुमितियावत् व्याददात्विददार । स्वमुखंमृत्युरितिशेषः । ससं वत्सरो भयात् भाणंभाणितिवचः अकरोत्निःसारितवान् । यद्भाणितिवचःसैवतदभिमानिनीज्ञानप्रकाशसुखरूपभगवद्व्यंजक त्वेनभाण्शब्दाभिधेया वाक्वागभिमानिनीसरस्वती अभवत् अभिमन्यमानशब्दोच्चारणकालएवाभिमानिनीदेव्यभवदितिया वदिति ॥ ४ ॥ **अथभाष्यार्थः** ॥ अप्रतीतेरभिमंस्यइत्येतदनूद्यव्याचष्टे ॥ **अभिमंस्यइति** ॥ अभिपूर्वोमन्यतिःहिंसार्थइति व्याख्यानमसत् । मन्यतेरेवलयवाचकत्वस्यप्रामाणिकत्वेउपसर्गस्यधात्वर्थबाधकत्वस्यानाश्रयणीयत्वादितिभावेनतत्राभिधान माह ॥ **मानमिति** ॥ ऋचः समानाक्षरपादबंधसमन्वितमंत्रविशेषाः । यजूंषि अनियताक्षरपादाः । ऋचएवस्तोभाक्षरसं युक्ताःसामानीत्यादिनाऋगादिशब्दाःप्रसिद्धार्थत्वेनैवपरैर्व्याख्यातास्तदसदितिभावेनसतयावाचेत्यादिकंप्रमाणेनव्याचष्टे ॥ **वे दाभिमानिनइति** ॥ अदितिशब्दस्यदेवमातरिप्रसिद्धेस्तत्परत्वभ्रमंवारयितुंसयद्यदेवेत्यादिव्याचष्टे ॥ **यद्यदिति** ॥ तत्तद त्तीत्यनेनसर्ववात्तीत्यनुवादान्यथानुपपत्त्याश्रुतावादच्चेतिपूरणीयमितिसूचितं । सर्ववाअत्तीतितददितेरदितित्वमित्येतत्तात्पर्यं

उप० ॥ तमेतावंतंकालमबिभर्यावान्संवत्सरस्तमेतावतःकालस्यपरस्तादसृजत । तंजातमभिव्याददात्सभाणमकरोत्सैववागभवत् ॥ ४ ॥

भाष्यं ॥ अभिसंस्येलीनंकरिष्येचेत् । मानंज्ञानंलयश्चैवमर्यादाचैवकथ्यते । उत्पादनंचसंख्यानंवलंचक्वचिदुच्यतइतिशब्दनिर्णये । वेदा भिमानिनःसर्वास्तथायज्ञाभिमानिनः । गायत्र्यामसृजद्ब्रह्मास्वभार्यायांप्रजास्तथेतिप्रकाशिकायां । यद्यद्ब्रह्मासृजत्पूर्वंतत्तदत्तिजनार्दनः ।

तोव्याचष्टे ॥ अदितिरिरिति ॥ तेनब्रह्मसृष्टसर्वात्तृत्वेन । अदितिशब्दस्यदेवमातृपरत्वेसर्वंवात्तीतिसर्वात्तृत्वविरोधःस्यादिति भावः । सर्वस्यैतस्यात्ताभवतीत्येतत्परैर्यएतददितेरदितित्वंवेदउपासीत सःसर्वात्माभूत्वाअदितिवत्सर्वस्यैतस्यात्ताभवतीतिव्या ख्यातं तदसत् । तत्प्रतिपादकाभावात् । जीवाभेदस्यनिरसिष्यमाणत्वाच्चेतिभावेनज्ञानमात्रेणसर्वेषामपिसर्वात्तृत्वंभवतीतिप्र तीतिमपिवारयंस्तद्वाक्यंप्रमाणेनव्याचष्टे ॥ उपास्तइति ॥ सर्वदोपास्तइतिवा । सर्वदाप्रतिकल्पमेवमत्तीतिवासंबंधः । उतो पास्त्यनंतरं । योग्यतामेवदर्शयति ॥ ब्रह्मेति ॥ अत्तृत्वंफलत्वेनोक्तं सर्वात्तृत्वंब्रह्मादीनांइंद्राद्यपेक्षयाविशेषतः सर्वात्तृत्वंचेंद्रा दीनांप्रायः अत्तृत्वमन्येषांबहुलस्यदर्शनादिकमित्यनेकप्रकारं । नतुसर्वेषामेकप्रकारं । कुतः योग्यताभेदादित्यर्थः । नन्वितरे षांकथंसर्वात्तृत्वध्यायिनांबहुलदर्शनादिकंफलं तस्यध्यानाननुगुणत्वात् इत्यतस्तेषांनसर्वात्तृत्वध्यानं किंतुतथास्मरणमतोनोक्त दोषइत्याह ॥ आत्मनइति ॥ यथामनुष्याणांसर्वात्तृत्वस्मरणमात्रं तथाकिंकेषांचिद्देवानामपीत्यतआह ॥ दैवतानामिति ॥ ५ ॥ ततश्चायंखंडार्थः ॥ समृत्युः कृतरवंकुमारमालोक्य ऐक्षतविचारमकरोत् किमिति यदीमंजातंसंवत्सरं अभिमंस्येली

भाष्यं ॥ अदितिर्नामतेनासौभगवान्पुरुषोत्तमः । उपास्तेयःपरंदेवमेवमत्तीतिसर्वदा । स्वयोग्यतानुसारेणसर्वात्तासौभवत्युत । ब्रह्मरुद्र सुपर्णानांसर्वात्तृत्वंविशेषतः । प्रायेणात्तृत्वमिंद्रादेरन्येषांदर्शनादिकं । बहुलस्येतियोग्यत्वभेदादत्तृत्वमिष्यतइतिमानसंहितायां । आत्मनोयादृशा भोगाभोक्तुंयोग्याहितादृशान् । भोक्ताविष्णुरितिध्यायेत्सर्वात्तृत्वंहरेःस्मरेत् । दैवतानांचसर्वेषांसर्वात्तिध्यानमिष्यतइतिप्रवृत्ते ॥ ५ ॥

नंकरिष्ये तदा कनीयोल्पं अन्नंकरिष्ये अतोवह्वन्नंभवत्वित्यालोच्य समृत्युः तयापूर्वोत्पन्नया वाचागायत्र्या तेनात्मनाचतुर्मुखेन यदिदंकिंचेदंसर्वं मसृजतजनयामास । तदेवविवृणोति॥ऋचइत्यादिना॥ऋचोऋगभिमानिनीरित्यादिद्रष्टव्यं।ससंवत्सरः ब्रह्मा यद्यदेवासृजत तत्तत् अत्तुं समृत्युनामाजनार्दनः अध्रियत । मनइतिशेषः आदच्चेतिशेषः । कुतःसर्वात्तृत्वंमृत्योः सर्वमत्तीतियत् तद्वैतदेव अदितेरदितिशब्दवाच्यस्यपरमात्मनः अदितित्वंअदितिशब्दप्रवृत्तिनिमित्तं यस्मात् । यएवमुक्तप्रकारेण अदितेरदितित्वं वेदउपास्ते सएतस्यस्वयोग्यस्यसर्वस्यअत्ताभवति । अस्योपासकस्य सर्वस्वयोग्यं अन्नंभवतीतिपुनर्वचनंतात्पर्यद्योतनायेति ॥ ५ ॥ अथभाष्यार्थः ॥ यजनेच्छायाःश्रमादिहेतुत्वायोगेनकथंतदनंतरंश्रमाद्युक्तिरित्यतःसाक्षाच्छ्रमादिहेतुं प्रदर्शयन्सोकामयतेतिवाक्यंप्रमाणेनव्याचष्टे ॥ इच्छतइति ॥ साधनास्मृतेःयःश्रमःतस्मात् । सतपोतप्यतेत्यनंतरंअध्याहारंसूचयति ॥ देहंतमिति ॥ तस्यश्रांतस्यतप्तस्ययशोवीर्यमुदक्रामदित्येतद्व्याचष्टे ॥ इच्छयेति ॥ चशब्दःश्रमतापयोरनुकर्षणार्थः । अपिशब्दःसमुच्चये । अनेनतप्तस्येत्यनंतरंशरीरत्यागेच्छावतइत्यपिग्राह्यमितिसूचितं । स्वावस्थानेप्राणनिर्गमनायोग

उप० ॥ सऐक्षतयदिवाइममभिमꣳस्येकनीयोऽन्नंकरिष्यइतिसतयावाचातेनाऽऽत्मनेदꣳसर्वमसृजतयदिदंकिंचर्चोयजूꣳषिसामानिच्छन्दाꣳसियज्ञान्प्रजाःपशून् । सयद्यदेवासृजततत्तदत्तुमध्रियतसर्वंवाअत्तीतितददितेरदितित्वꣳसर्वस्यैतस्यात्ताभवतिसर्वमस्यान्नंभवतियएवमेतददितेरदितित्वंवेद ॥ ५ ॥

भाष्यं ॥ इच्छतोविष्णुयजनंब्रह्मणःसाधनास्मृतेः । श्रमात्तापाच्चदेहंतंत्यक्तुमिच्छावभूवह । इच्छयाचाप्युदक्रामत्

इत्यतउक्तं ॥ प्राणैःसहपितामहइति ॥ केननिमित्तेनप्राणानांयशोवीर्यशब्दार्थत्वमित्यतआह ॥ यशइति ॥ ननुसाधना
स्मृतिनिमित्तकाल्पश्रमतापाभ्यांकथंब्रह्मणोदेहत्यागेच्छा तदिच्छयावाकथंप्राणैःसहनिःसरणं लोकेअदर्शनादित्यतआह ॥ अ
त्यल्पइति ॥ यद्यपिश्रमेतापेचात्यल्पेसंजातेपिनलोकेदेहत्यागस्येच्छा तदिच्छयापिनप्राणानिःसरंति । तथापिसा साधनास्मृ
तिनिमित्तकश्रमतापजन्येच्छा चशब्दात्तदिच्छयाप्राणैःसहनिःसरणं विभोःसमर्थस्यचतुर्मुखस्य क्रीडास्मृतेत्यर्थः । शरीरंश्वयि
तुमध्रियतइत्येतदनंतरमध्याहार्यमाह ॥ वृंहमाणमिति ॥ वृंहमाणमित्यनुवादेनैवशरीरंश्वयितुमध्रियतइत्येतदुक्ततात्पर्यं । श्व
यितुमितिवृद्ध्यर्थकस्यटुओश्विगतिवृद्ध्योरितिधातोरूपं । तस्यशरीरएवमनआसीदित्येतद्व्याचष्टे ॥ प्रवेष्टुमिति ॥ ६ ॥ सोका
मयतमेध्यंमइदंस्यादात्मन्व्यनेनस्यामित्येतद्व्याचष्टे ॥ पुनरिति ॥ तस्मिन्विवेशचेतिशेषपूरणं । ततोऽश्वःसमभवदित्येतद्व्या
चष्टे ॥ तस्मिन्निति ॥ अनेनततइत्येतत्प्रवेशानंतरमितिव्याख्यातं । सब्रह्मा तस्मिन्प्रवेश्यप्रविश्य तस्मिन्प्राणान्प्रवेश्यवा
प्रविश्येतिक्वचित्पाठः । महायज्ञेऽपायंदृष्ट्वा अथदर्शनानंतरं अश्वाकारंद्वितीयंवपुरग्रहीत् इतियोजना । ततोश्वःसमभवदिति

भाष्यं ॥ त्प्राणैःसहपितामहः । यशोवीर्यनिमित्तत्वात्प्राणास्तन्नामकाःस्मृताः । अत्यल्पेचापिसंजातेश्रमेपिनतदिच्छया । तापेप्राणानिःसरंतिसा
चक्रीडाविभोःस्मृता । वृंहमाणशरीरंतुपुनर्दृष्ट्वापितामहः । प्रवेष्टुंतच्छरीरंचकामयामाससप्रभुः ॥ ६ ॥ पुनस्तस्मिन्प्रवेशायशवरूपस्यमेध्यतां ।
ऐच्छत्तेनैवदेहीस्यामितितस्मिन्विवेशच। तस्मिन्प्रवे(वि)श्यसब्रह्माद्वितीयंवपुरग्रहीत् । दृष्ट्वोपायंमहायज्ञेथाश्वाकारंपितामहः ।

वाक्यं यदश्वदित्येतत्संबंधित्वेनापिव्याचष्टे ॥ श्वैतीभावादिति ॥ यदश्वत्तन्मेध्यमभूदितितदेवाश्वमेधस्याश्वमेधत्वंइतिवा क्यंव्याचष्टे ॥ यदर्थमिति ॥ तद्देहःचतुर्मुखदेहः यदर्थंयज्ञाद्यर्थं श्वेततांमेध्यतामप्याप तेनशरीरेणतदाकृतःसयज्ञोनाम्नाश्वमे धोभूदित्यन्वयः । एवमश्वमेधशब्दस्यक्रतुपरत्वमभ्युपगम्यव्याख्यातं । इदानींयज्ञकर्तृचतुर्मुखपरत्वमभ्युपेत्यापितदेववाक्यंप्र कारांतरेणव्याचष्टे ॥ श्वैतीभावमिति ॥ शुभानिचत्वारिमुखानियस्यासौशुभचतुर्मुखः अनेनास्यकर्तृरूपत्वंसूचयतिब्रह्मेति विशेष्यस्यपृथगुक्तेः । अश्वमेधशब्दस्ययागीयाश्वरूपचतुर्मुखपरत्वमभ्युपेत्यापितदेववाक्यंव्याचष्टे ॥ अश्वइति ॥ स्मृतअ श्वमेधनामेत्यन्वयः । मेध्यःसोभवदित्युक्तमेध्यशब्दार्थमाह ॥ मेधइति ॥ ननुमेध्यंमइदंस्यादित्यादौमेध्यशब्दस्यशुद्धेप्रयो गात्कथमेतदित्यतआह ॥ शुद्धमिति ॥ अथेतिपक्षांतरे शुद्धमपीत्यन्वयः । अनेन शवरूपस्यमेध्यतामिति मेध्यतामपीति पुनर्मेध्येइत्येतदपिव्याख्यातं । एषहवाअश्वमेधंवेदयएनमेवंवेदेतिवाक्यंव्याचष्टे ॥ एवंविदिति ॥ एवं यदर्थमित्याद्युक्तप्रका रेण यइत्यनंतरमेषइतिशेषः । अश्वमेधविद श्वमेधशब्दार्थवित् ॥ ७ ॥ तमनवरुध्येवामन्यतेत्येतद्व्याचष्टे ॥ तमिति ॥ दे शविशेषानुक्त्यासर्वस्मिन्भुवनइति संवत्सरस्यपरस्तादित्युत्तरवाक्यानुरोधेनाब्दमितिचोक्तं । तंसंवत्सरस्यपरस्तादात्मनआल

भाष्यं ॥ श्वैतीभावात्परंयस्मात्तज्जज्ञेतोश्वनामकं । यदर्थंश्वेततामापतद्देहोमेध्यतामपि । अश्वमेधःसयज्ञोभून्नाम्नातेनतदाकृतः । श्वैतीभावं गतेदेहेपुनर्मेध्येयतःस्थितः । अतोश्वमेधनामासौब्रह्माशुभचतुर्मुखः । अश्वोभूत्वायतोमेध्यःसोभवत्तेनवास्मृतः । मेधोयज्ञःसमुद्दिष्टोयाज्ञीयंमेध्यमु च्यते । शुद्धंमेध्यमथापिस्यादेवंविद्योश्वमेधवित् ॥ ७ ॥ तमश्वरूपमात्मानमनिवारितवद्विभुः । चारयामासरूपेणतदन्येनपुमात्मना ।

भतइत्येतत् आत्मनेआत्मार्थंमितिप्रतीतिंनिवारयन्व्याचष्टे ॥ तदंतइति ॥ स्वस्मिन्स्थितायपरमात्मनेइत्यात्मशब्दस्यैवार्थद्व
यं । पशून्देवताभ्यःप्रत्यौहदित्येतद्व्याचष्टे ॥ अजादिकानिति ॥ ब्रह्मास्वयमेवकुतःपशुर्जातइत्यतआह ॥ कर्तृत्वेनेति ॥
स्यादेतद्यदियज्ञपशोःफलंस्यात्तदेवकुतइत्यतआह ॥ अबुद्धीति ॥ इतिभावेनाजोश्वरूपमधारयदितिसंबंधः । नकेवलंब्रह्मा
दिरश्वमेधशब्दाभिधेयः अपितर्हिंसूर्योपीत्युक्तंएषहवाइति । तद्व्याचष्टे ॥ एवमिति ॥ सूर्यस्याश्वमेधशब्दवाच्यत्वंकेननिमि
त्तेनेत्यतःप्राप्तंतस्यसंवत्सरआत्मेतिवाक्यंव्याचष्टे ॥ संवत्सराभिधइति ॥ संवत्सराभिधस्यब्रह्मणःसूर्येस्थितत्वेपिअश्वमेध
नामासूर्यःकथमित्यतआह ॥ अश्वमेधाभिधःस्वयमिति ॥ ननुसंवत्सरआत्मेतिसूर्यस्यसंवत्सररूपत्वोक्तेःकथंसूर्येस्थितइत्यु
क्तमित्यतआह ॥ सूर्येइति ॥ ततत्वाद्व्याप्तत्वादित्यर्थः । अश्वमेधनाम्नोब्रह्मणोमहिमोक्तःअयमग्निरित्यादिना । तत्राभेदप्रती
तिंनिवारयन्व्याचष्टे ॥ अग्नाविति ॥ अर्कः अर्कस्थोब्रह्मा । आत्मशब्दस्यस्वरूपार्थत्वप्रतीतिंनिवारयितुंतस्येमेलोकाआत्मा
नइत्येतद्व्याचष्टे ॥ ब्रह्माततइति ॥ ब्रह्मणःसूर्यादिषुस्थित्युक्त्याप्राप्तांसर्वोत्तमत्वशंकांपरिहर्तुंप्रवृत्तंतावेताविति वाक्यं अर्का

भाष्यं ॥ सर्वस्मिन्भुवनेचाव्दंतदंतेपरमात्मने । स्वस्मिन्स्थितायसंकल्प्ययज्ञआलभतात्मवान् । अजादिकान्पशून्न्यदेवस्थपरमात्मने
कर्तृत्वेनपशुत्वेनयत्फलंतदशेषतः । ममस्यादितिमन्वानःसोश्वरूपमधारयत् । अबुद्धिपूर्वमरणात्स्वर्गश्चापिपशोर्भवेत् । ज्ञानपूर्वपशोःपुंसः
किमुवक्तव्यमित्यजः । एवंसूर्योप्यश्वमेधनामासंवत्सराभिधः । सूर्येस्थितोयतोब्रह्माह्यश्वमेधाभिधःस्वयं । सूर्येततत्वात्सूर्यात्माब्रह्मासौपरिकीर्तितः
अग्नौस्थितोयतःसोर्कस्तस्मादग्निरितीर्यते । ब्रह्माततायतोलोकास्तदात्मानस्ततोमताः ।

श्वमेधशब्दयोरग्निलोकोपलक्षकत्वमभिप्रेत्यव्याचष्टे ॥ ब्रह्मेति ॥ ब्रह्मेत्यश्वमेधशब्दार्थकथनं । अपपुनर्मृत्युंजयतीतिफलाभिधायकंवाक्यं सर्वाधिकारिपरत्वप्रतीतिंनिवारयन्व्याचष्टे ॥ तादृशमिति ॥ मृत्युरेवेत्यनंतरंयएनमेवंवेदेतिवाक्यमनुवर्तनीयमेवेतिभावः । ब्रह्मादिषुव्याप्तंमृत्युंअपमृत्युं । एकदाअपमृत्युप्राप्त्यभावात्पुनरपमृत्युंजयतीतिकथमुक्तमित्यतआह ॥ पुनर्मृत्युरिति ॥ तथाचापपुनर्मृत्युमित्यस्यापमृत्युमित्यर्थउक्तोभवति । ननुनैनंमृत्युराप्नोतीतिकथं मृत्युशब्देनप्रकृतपरमात्मनःसदाचतुर्मुखव्याप्तेरित्यतस्तद्व्याचष्टे ॥ नैनमिति ॥ मृत्यात्मकःअपमृत्यात्मकः । ननुयद्येनंमृत्युर्नाप्नोतितर्हिकथमस्यात्मास्यादित्याशंकांमृत्युशब्दस्यार्थांतरकथनेनपरिहरन्मृत्युरस्यात्माभवतीतिवाक्यंहेतुप्रतिपादकतयाव्याचष्टे ॥ यस्मादिति ॥ अनेनास्यमृत्योर्मृत्युर्नरसिंहोऽस्यचतुर्मुखस्यात्माभवतीतियोजनादर्शिताभवति । ननुमृत्योर्मृत्युर्नरसिंहःसर्वेषामप्यात्माभवति तथाचकिंविशिष्याभिधीयतेएनंचतुर्मुखंमृत्यात्मकोमृत्युर्नाप्नोतीतितत्राह ॥ हरिसेवनादिति ॥ अन्येत्वयमस्माकंआत्मेतिज्ञात्वातथानृहरिसेवनंनकुर्वंतीतिभावः । आत्मशब्दस्यस्वरूपार्थत्वप्रतीतिंनिवारयन्आत्मशब्दंनृसिंहेनिर्वक्ति ॥ आततत्वादिति ॥ आततत्वात्व्याप्तत्वात् अत्तृत्वात्संहर्तृत्वात् आदानात्भृत्यत्वेनचतुर्मुखादेरादानात् आत्तनिर्माणात् आत्तमुपात्तंव्याप्तंवातच्चनिर्माणंचतस्मात् आत्तज्ञानात्व्याप्तज्ञानात् तथाचशब्दौसमुच्चये एवशब्दःस्वरूपत्वव्यावृत्त्यर्थःप्रत्येकंसंबध्यते । आङ्पूर्वात्

भाष्यं ॥ ब्रह्मसूर्याग्निलोकेपुव्याप्तैकादेवताहरिः । तादृशंनृहरिंज्ञात्वापुनर्मृत्युंजयन्नसौ । सदैववर्ततेब्रह्मापुनर्मृत्युर्मृतिःस्मृता । नैनंमृत्यात्मकोमृत्युःप्राप्नोतिहरिसेवनात् । यस्मान्नृसिंहोमृत्योश्चमृत्युरात्मास्यवैभवत् । आततत्वात्तथात्तृत्वादात्मासौब्रह्मणःस्मृतः । आदानादात्तनिर्माणादात्तज्ञानात्तथैवच ।

तनोतेःड्मन् । तथाआङ्पूर्वाद्दत्तेर्दाणश्चड्मन् । उभयत्रापिदकारस्यतकारः । आङ्पूर्वाभ्यांतनुविस्तारेमानिर्माणेइतिधातुभ्यां
डन् । आङ्पूर्वाभ्यांतनुविस्तारेमाड्मानइतिधातुभ्यांडन्निति ज्ञातव्यं । एतासांदेवतानामेकोभवतिइत्येतद्व्याचष्टे ॥ एतासा
मिति ॥ ईशत्वेनेत्यनेनैकशब्दःप्रधानार्थकइत्युक्तंभवति । मृत्युरस्यात्माभवतीत्येतदत्रापिहेतुप्रतिपादकतयाव्याचष्टे ॥ नृसिं
हस्येति ॥ एतेनध्येयत्वेनज्ञेयत्वेनब्रह्मणाऽऽत्तत्वादात्मेतिव्याख्यातंभवति । भूयोयजेयेत्यत्रभूयःशब्दोजन्मांतरकरणापेक्षये
तिपरैरुक्तं तदसत् । अवश्यवक्तव्यस्यार्थांतरस्यसंभवेअगतिकस्यतस्यानाश्रयणीयत्वादितिभावेनतद्व्याचष्टे ॥ भूयःशब्दइति ॥
श्रुतौविशेष्यानुक्तेस्तत्प्रदर्शनपूर्वकमन्वयमाह ॥ परमेश्वरमिति ॥ अश्वोभूत्वायतोमेध्यइतिअश्वेअश्वमेधशब्दोनिरुक्तः तदु
पनिषदारूढंकर्तुंयदश्वत्तन्मेध्यमभूदित्येतद्व्याचष्टे ॥ अश्वादिति ॥ अश्वदित्यनूद्याश्वोभवदितिव्याख्यातं । जॄस्तंभ्वित्यङ् श्व
यतेरः पररूपत्वं अश्वत् । मेध्यमित्यनुवादेनयज्ञेआलंभनीयमितिव्याख्यानं । अश्वमेधः अश्वमेधशब्दवाच्यः । अश्वइतिशे
षः । ननुअश्वदित्यश्वोऽभवदितिकथंव्याख्यानं मूलेऽश्वरूपाप्रतीतेः । नचततोश्वःसमभवदितिवाक्यात्तत्प्रतीतिरितिवाच्यं ।
तत्राश्वशब्दस्यवृद्ध्यर्थत्वेनिर्णयासंभवादित्यतआह ॥ तामिति ॥ यतोतोश्वोभवदितिव्याख्यानंयुक्तमितिशेषः । श्वैतीभावमि

भाष्यं ॥ एतासांदेवतानांचब्रह्मेशत्वेनवर्तते । नृसिंहस्यसदाज्ञानाद्ध्यानाच्चतदनुग्रहादितिमहासंहितायां । भूयःशब्दःपूर्णत्ववाची । परमे
श्वरंपरिपूर्णयजेयेति । अश्वदित्यश्वोभवत्तदेवरूपंमेध्यंयज्ञआलंभनीयंचाभवदित्यश्वमेधः । तमनवरुध्येत्वामन्यतेत्यादिवाक्यशेषादश्वभावःप्रतीयते ।

त्यादिनाकृतंव्याख्यानंउपनिषदारूढंकुर्वन्यदश्वदितिवाक्यंप्रकारांतरेणव्याचष्टे ॥ अश्वदिति ॥ सचतुर्मुखः अश्वमेधःअश्वमेधशब्दवाच्यः । तमनवरुध्येवामन्यतेतिवाक्यस्यतमश्वरूपमात्मानंअनिवारितवद्भिर्भुश्चारयामासेतिव्याख्यानमयुक्तं । तत्र तावदर्थाप्रतीतेरित्यतःशेषपूरणेनव्याचष्टे ॥ निरोधमिति ॥ तथाचोदाहृतवचनंतमनवरुध्येवामन्यतेत्येतदनंतरभाविप्रमेयकथनपरमितिभावः । तर्हीवशब्दप्रयोगःकथमित्यतआह ॥ स्वेच्छयेति ॥ निरोध्यनिरोधकभेदाभावादिवशब्दःप्रयुक्तइत्यर्थः ॥ ८ ॥ इत्यश्वमेधब्राह्मणं ॥ २ ॥ ततश्चायंखंडार्थः ॥ ससंवत्सरनामाब्रह्मा भूयसाक्रतुश्रेष्ठेन यज्ञेनाश्वमेधनामकेन भूयःपरिपूर्णपरमात्मानं यजेययक्ष्ये इत्यकामयतऐच्छत् । सब्रह्मा यज्ञोपयोगिसाधनास्मरणादश्राम्यत्श्रमयुक्तोबभूव । ततएव सब्रह्मा तपःसंतापात्मकं अतप्यत । ततश्चस्वदेहत्यागमैच्छत्इतिशेषः । श्रांतस्यतप्तस्यदेहत्यागेच्छावतःतस्य यशोवीर्यमुदक्रामत् । किंतद्यशोवीर्यं । प्राणाश्चक्षुरादयः यशोवीर्यनिमित्तत्वाद्यशोवीर्यं यशोवीर्यनामानः । प्राणैःसहस्वयंशरीरादुत्क्रामदितियावत् । तत्प्राणेषु चतुर्मुखप्राणेषु । तेनसहितेष्वितियावत् । उत्क्रांतेषुसत्सु शरीरं श्वयितुंउच्छूनभावंगंतुं अध्रियतआरब्धं

भाष्यं ॥ अश्वत्वृंहितंपश्चान्मेध्यंचाभूद्यस्यशरीरंसोश्वमेधइतिच । निरोधमकृत्वाचारयिष्यामीत्यमन्यत । स्वेच्छयैवस्वरूपांतरत्वादश्वरूपस्य ॥ ८ ॥ इत्यश्वमेधब्राह्मणं ॥ २ ॥

उप० ॥ सोऽकामयतभूयसायज्ञेनभूयोयजेयेति । सोऽश्राम्यत्सतपोऽतप्यततस्यश्रांतस्यतप्तस्ययशोवीर्यमुदक्रामत् । प्राणावैयशोवीर्यंतत्प्राणेपूत्क्रांतेपुशरीरꣳश्वयितुमध्रियततस्यशरीरएवमनआसीत् ॥ ६ ॥

अमेध्यंचाभवत् । बृंहमाणंतच्छरीरंदृष्ट्वा तस्यचतुर्मुखस्य शरीरएव तस्मिन्नेवशरीरेप्रवेष्टुं मनआसीदिच्छाबभूव ॥ ६ ॥ सप्रवेशनेच्छावान्चतुर्मुखः तत्रप्रवेशाय मेमम इदंशवरूपंशरीरं मेध्यंशुद्धं स्यादित्यकामयतैच्छत् । देहांतरग्रहणसंभवात्किमितितस्यैवशुद्धीच्छाइत्यतउक्तं ॥ आत्मन्वीति ॥ अहमनेनैवविसृष्टेनैव देहेना त्मन्वीदेहवा न्स्यामित्यभिप्रायेणाकामयतेतिसंबंधः । ततस्तन्मेध्यमभूत् । तस्मिन्शरीरेविवेशच । ततःतत्प्रवेशानंतरं सइत्यनुवर्तते । यज्ञपशुत्वनिमित्तकफलस्यापिलाभार्थं अश्वःअश्वाकारः समभवत् । तद्द्वितीयरूपंकेननिमित्तेनाश्वनामकमित्यतउक्तं ॥ यदश्वदिति ॥ ततइत्यादिअत्रापिसंबध्यते । पूर्वप्रकृतंपुरुषशरीरंअश्वत्श्वैतीभावंगतं । ततःश्वैतीभावानंतरं द्वितीयमश्वरूपं अभवत्जज्ञे यद्यस्मात्ततस्तस्मात्सोश्वोश्वनामकः समभवदितियोजना। अत्राश्वमेधनामकश्चतुर्मुखो ऽश्वमेधनामकेनस्वकीयद्वितीयाश्वरूपेणपशुना ऽश्वमेधनामकंयज्ञमकरोदितिवक्तव्यं । तत्रत्रयाणामश्वमेधशब्दवाच्यत्वव्युत्पादनार्थंयदश्वदित्यादिप्रवृत्तं । तस्यैवंयोजना । ततब्रह्मशरीरं यत्यदर्थं यज्ञसाधनास्मृत्यानिःसृतप्राणमश्वत् श्वैतीभावंप्राप्तं ततश्चामेध्यंसद्ब्रह्मेच्छयापुनर्यज्ञार्थमेवमेध्यंशुद्धमभूत् इतियत्तदेवतच्छरीरेणतदाश्वैतीभावमेध्यताप्राप्त्यनंतरंकृतत्वमेव अश्वमेधस्यचतुर्मुखकृताश्वमेधनामकयज्ञस्य अश्वमेधत्वंअश्वमेधशब्दप्रवृत्तिनिमित्तमिति । तथायत्ततपुरुषशरीरमश्वत्बृंहितंपश्चान्मेध्यंचाभूदितियत् तदेवतच्छरीरेस्थितत्वमेव अश्वमेधस्याश्वमेधनामकस्यब्रह्मणोश्वमेधत्वंइति । तथाततत्चतुर्मुखस्यद्वितीयंरूपं अश्वत्अश्वोभवत् तदेवरूपंमेध्यंयज्ञआलंभनीयंचाभूदि

उप० ॥ सोऽकामयतमेध्यंमइदंस्यादात्मन्व्यनेनस्यामिति । ततोऽश्वःसमभवद्यदश्वत्तन्मेध्यमभूदितितदेवाश्वमेधस्याश्वमेधत्वं ।

तियत् तदेवाश्वाकारेणयज्ञीयत्वमेव अश्वमेधस्याश्वमेधनामकस्यचतुर्मुखद्वितीयरूपस्याश्वमेधत्वमिति । योधिकारी एनंयजमानं पशुरूपंचतुर्मुखं तत्कृतयज्ञंच एवमुक्तनिमित्तेनाश्वमेधशब्दवाच्यत्वेनवेदजानाति एषअश्वमेधंअश्वमेधशब्दार्थवेद । हवाइतिप्रमाणप्रसिद्धिंद्योतयति ॥ ७ ॥ यदर्थमश्वोभवत्तत्राश्वस्येत्थंभावपूर्वकंविनियोगमाह ॥ तमिति ॥ विभुस्तमश्वरूपं स्वात्मानं अनवरुध्यनिरोधमकृत्वेव स्वेच्छागृहीतरूपांतरत्वेननिरोध्यनिरोधकभावाभावादिवेत्युक्तं । चारयिष्यामीत्यमन्यत । सर्वस्मिन्भुवनेसंवत्सरपर्यंतंचारयामासच । तंसंवत्सरचारितमश्वं संवत्सरस्यपरस्तादंते आत्मनेस्वस्थितायपरमात्मने तदुद्देशेन यज्ञेआलभतआलंभनंकृतवान् । पशून्अजादिकान् देवताभ्योन्यदेवस्थपरमात्मोद्देशेन प्रत्यौहत्त्यक्तवान् । यस्मात्पशून्देवताभ्यःप्रत्यौहद्ब्रह्मा तस्मादेवाधुनातनायाज्ञिकाः प्राजापत्यंदेवताभ्योदीयमानत्वेनप्रजापतिज्ञापिततयाप्रजापतिसंबंधिनं प्रोक्षितंमंत्रपूतंपशुं सर्वदैवत्यंसर्वदेवतोद्देशेन आलभंते । नकेवलंब्रह्मादिरश्वमेधशब्दाभिधेयः अपितर्हि यएषदृश्यमानमंडलांतर्गतस्तपति एषसूर्योपि अश्वमेधनामा केननिमित्तेन यतःसंवत्सरःसंवत्सराभिधोश्वमेधनामाब्रह्मा तस्यसूर्यस्य आत्मासूर्येव्याप्ततयास्थितः । अस्याश्वमेधनाम्नोब्रह्मणोमहिमानमाह ॥ अयमित्यादिना ॥ अर्कःअर्केस्थितोयंसंवत्सराभिधोब्रह्मा अग्निरग्निस्थत्वेनाग्निशब्दवाच्यः । इमेलोकाभूरादयः तस्यसंवत्सरस्यात्मानःतेनव्याप्ताः । एवंसूर्याग्निलोकेषुचतुर्मुखस्यस्थित्युक्त्या

उप० ॥ एषहवाअश्वमेधंवेदयएनमेवंवेद ॥ ७ ॥ तमनवरुध्येवामन्यत । तꣳसंवत्सरस्यपरस्तादात्मनआलभत । पशून्देवताभ्यःप्रत्यौहत् । तस्मात्सर्वदैवत्यंप्रोक्षितंप्राजापत्यमालभंतएषहवाअश्वमेधोयएषतपतितस्यसंवत्सरआत्माऽयमग्निरर्कस्तस्येमेलोकाआत्मानः

प्राप्तांसर्वोत्तमत्वशंकांवारयति ॥ तावेताविति ॥ तावेतौपूर्वोक्तौ अर्काश्वमेधौसूर्यचतुर्मुखौ उपलक्षणमेतत्अग्निर्लोकाश्च यापुनरेकैवमुख्यैवदेवताभवति साऽसैव तदाश्रिताएवेतियावत् । कासा मृत्युरेवनृसिंहएव । यएनमेवंवेदेत्यनुवर्तते । योधिकारीएनंनृसिंहं एवंब्रह्मसूर्याग्निलोकेषु व्याप्तंवेद सचतुर्मुखः अपपुनर्मृत्युंअकालमृत्युंजयति पराजितोप्यपमृत्युःपुनःकदाचिदेनं प्राप्नोतिकिं नेत्याह ॥ नैनमिति ॥ एनंचतुर्मुखं मृत्युरपमृत्युः कदापिनाप्नोति । कुतः यस्मादस्य मृत्योर्मृत्युःनृसिंहो ऽस्यचतुर्मुखस्यात्माऽनेनचतुर्मुखेनज्ञेयत्वध्येयत्वादिनास्वीकृतोभवति । एतस्मादेवहेतो रेतासांदेवतानांअर्कादीना मेकःप्रधानभूतो भवति ॥ ८ ॥ इत्यश्वमेधब्राह्मणं ॥ २ ॥ अथभाष्यार्थः ॥ अश्वमेधादिषुवायुरेवोद्गाताकर्तव्यः तस्यैवतत्रप्राप्तविघ्नपरिहारक्षमत्वादितिभावेनतत्रोपयुक्तांकांचनकथामाह ॥ द्वयाइत्यादिना ॥ इदंब्राह्मणं द्वयाःद्विप्रकाराः प्राजापत्याःप्रजापतेर्हिरण्यगर्भस्ययजमानावस्थस्येमेऽपत्यभूताःगोलकावस्थावागादयःप्राजापत्याः केतेद्विप्रकाराः देवाश्चासुराश्च । शास्त्रीयज्ञानकर्मवासनावासिताद्योतनात्मकादेवाः । प्रत्यक्षानुमानजनितदृष्टप्रयोजनकस्वाभाविकज्ञानकर्मवासनाअसुराइत्यादिनापरैरन्यथा व्याख्यातं । तदसत् । देवासुरादिशब्दानांवागादिगोलकपरत्वेतेहोचुर्वाग्गुदगायत्तेविदुरित्यादिसंवादानुपपत्तेः । नहितेषांजडानांवागादिकरणमस्ति । सुखप्रतिपत्त्यर्थंश्रुत्यावागादेःकरणान्यारोप्यसंवादाद्युपदिश्यतइतिवदन्देवानांप्रियःश्लाघनीयप्रज्ञः ।

उप० ॥ तावेतावर्काश्वमेधौ । सोपुनरेकैवदेवताभवतिमृत्युरेवापपुनर्मृत्युंजयतिनैनंमृत्युराप्नोति । मृत्युरस्याऽऽत्माभवत्येतासांदेवतानामेको भवति ॥ ८ ॥ इतितृतीयाध्यायस्यद्वितीयंअश्वमेधब्राह्मणं ॥ २ ॥

29

तथात्वेकाव्यादिवदौत्प्रेक्षिकार्थत्वप्रसंगात् । देवासुरादिशब्दानांप्रसिद्धार्थपरित्यागेनअप्रसिद्धार्थकल्पनेमानाभावाच्चेतिभावे नप्रसिद्धार्थपरत्वेनैवब्राह्मणंप्रमाणेनव्याचष्टे ॥ द्वयाइत्यादिना ॥ देवाअसुराश्चेतिद्विविधाइत्यर्थः । ततःकनीयसाएवदेवाः ज्यायसाअसुराइत्येतद्व्याचष्टे ॥ तत्रेति ॥ ततइत्यस्यार्थस्तत्रेति । तयोःदेवासुरभागयोरित्यर्थः । ननुअसुराणांकेषांचित्कदाचित्साधनसंपत्त्यास्वभावाभिभवेनदेवत्वप्राप्तौदेवभागस्यज्यायस्त्वंअसुरभागस्याल्पत्वंचस्यादितिकथमेवमुक्तमित्यतआह ॥ **तमोरूपाःसत्वरूपाइति** ॥ स्वरूपस्यचानभिभवइतिभावः । तएषुलोकेष्वस्पर्धंतेत्यनंतरंअध्याहार्यमाह ॥ **बहुत्वादिति** ॥ देवानांस्वभावप्राबल्याद्बहुत्वंकथंजयेप्रयोजकमित्यतआह ॥ **शंकरस्येति** ॥ तेहदेवाऊचुर्हंतासुरान्यज्ञउद्गीथेनात्ययामेतीतिवाक्यंव्याचष्टे ॥ **यज्ञेनेति** ॥ १ ॥ तेहवाचमूचुरित्यादिखंडपंचकगतंवाक्यंवागादिशब्दानांप्रसिद्धार्थत्वप्रतीतिंनिवारयन्तात्पर्यतोव्याचष्टे ॥ **वन्ह्यादीनिति** ॥ वागादिशब्दानांप्रसिद्धार्थपरत्वेएतासांदेवतानामित्याद्युत्तरवाक्यविरोधइतिभावः । खंडपंचकगतस्यतमभिद्रुत्यपाप्मनाविध्यन्नितिवाक्यपंचकस्यार्थमाह ॥ **अग्निमुखाइति** ॥ सर्वेइंद्रियाभिमानिनः । ननुअग्निनासिक्यवायुदिक्पालादित्यचंद्राणाममुरैःपापविद्धत्वेपिदिक्पेषुश्रेष्ठस्येंद्रस्य मनसोमुख्याभिमानिनोरुद्रस्यचनवेधइत्यतआह ॥ **इंद्ररुद्रौ**

भाष्यं ॥ द्वयात्रह्मसुतास्तत्रदैतेयाबहवःस्मृताः । तमोरूपाःसत्त्वरूपाअल्पसंख्याःसुराःस्मृताः । बहुत्वात्तैर्जितादेवाःशंकरस्यवरेणच । यज्ञेनविष्णुमभ्यर्च्यतत्रोद्गातृबलेनच । जयामैनानितिस्मृत्वा ॥ १ ॥ वह्न्यादीनप्यचूचुदन् । औद्गात्रेऽग्निमुखाःसर्वेइंद्ररुद्रौचवेधितौ ।

चेति ॥ २–६ ॥ अथहेममासन्यंप्राणमूचुः इतिवाक्यंव्याचष्टे ॥ मुख्यवायुमिति ॥ तमभिद्रुत्येत्यादिविष्वंचोविनेशुरित्यंतं वाक्यंव्याचष्टे ॥ दैत्याइति ॥ नश्यत्येवेतिएवशब्दसंबंधः । सयथाश्मानमितिदृष्टांतोक्त्यासूचितमर्थमाह ॥ तस्मादिति ॥ असुराणांस्वतोवायुशक्तिखंडनासामर्थ्येपिशंकरवरादिनातत्स्यादित्यतआह ॥ शापैरिति ॥ तर्हिकथमजगरबंधनादिना भीमस्यशक्तिविस्रंसनादिदर्शनमित्यतआह ॥ स्वेच्छयैवेति ॥ ईश्वरसंकल्पानुसारेणस्वेच्छयैवशक्तिप्रतिहतिप्रदर्शनंनतुतया विनेत्यर्थः । भवत्यात्मनेत्यादिफलवाक्यंतात्पर्यतोव्याचष्टे ॥ एवमिति ॥ किमुदेवाइतिकैमुत्यार्थोपिशब्दः । भ्रातृव्यइत्यस्यार्थकथनंपापेभ्यइति द्विषन्नित्यस्यशत्रुभ्यइति ॥ ७–९ ॥ सावाएषादेवताएतासामित्यादिगमयांचकारेत्यंतंवाक्यंव्याचष्टे ॥ सवायुरिति ॥ एषेत्यस्यार्थोवासुदेवबलाश्रयइति । रुद्रशक्रादेःसकाशात् विमुच्यमोचयित्वा विमोच्येतिक्वचित्पाठः । पापसंघातमित्येतत्अवाक्षिपदित्यत्रापिसंबध्यते ॥ १० ॥ एतासांदेवतानामित्यादिअवहदित्यंतंवाक्यंव्याचष्टे ॥ उन्मुच्येति ॥ ११ ॥ सवैवाचमेवप्रथमामत्यवहदित्यादिखंडपंचकतात्पर्यमाह ॥ अग्निरिति ॥ दिशइत्यस्यार्थोदिक्पाइति । केतइत्यतउक्तं ॥ इंद्रा

भाष्यं ॥ असुरैःपापपूगेन ॥२–६॥ मुख्यवायुंततोऽब्रुवन् । दैत्यास्तंवेद्धुमीप्संतोध्वस्तानेशुश्चसर्वशः । पांसुपिंडोयथावज्रशिलांप्राप्यैवनश्यति । तस्मादखंडशक्तिःसमुख्यवायुरुदाहृतः । शापैरथवरैर्वापिनास्यप्रतिहतिर्भवेत् । स्वेच्छयैवानुसारेणविनाकुत्रापिपुत्रकाः । एवंविदपिपापेभ्यःशत्रुभ्योपिप्रमुच्यते ॥७–९॥ सवायूरुद्रशक्रादेर्वासुदेवबलाश्रयः । विमुच्य(विमोच्य)पापसंघातंदिशामंतेष्वथाक्षिपत् ॥ १० ॥ उन्मुच्यमृत्योस्तांश्चैवाथोर्ध्वलोकेपुचावहत् ॥ ११ ॥ अग्निर्नासिक्यवायुश्चदिक्पाइंद्रादयोखिलाः ।

दयइति ॥ रुद्रोपिमनोभिमानी ॥ १२–१६ ॥ १७–१९ ॥ वाग्वैबृहतीत्यत्रवाक्शब्दस्यप्रसिद्धार्थत्वप्रतीतिंनिवारयन्बृहती शब्दनिर्वचनपूर्वकंतद्व्याचष्टे ॥ स्त्रीगुणैरिति ॥ सर्वपूर्णत्वात्सर्वात्मनापूर्णत्वात् । वाग्वैब्रह्मेत्येतत्पूर्ववद्द्वेधाव्याचष्टे ॥ अनंतेति ॥ तस्याएषपतिरितिवाक्यद्वयंव्याचष्टे ॥ तत्पतिरिति ॥ २० ॥ २१ ॥ वाग्वैसेत्येतत्व्याचष्टे ॥ सारत्वादिति ॥ वागेवगीथेत्येतत्व्याचष्टे ॥ सामरूपतःगीथेत्युक्तेति ॥ सामवेदाभिमानित्वात्इत्यर्थः । नमीयतइत्यमइतिस्पष्टत्वादुच्छब्दस्योपनिषदैवनिरुक्तत्वात्नैतद्व्याख्यातं । ननुयदिसामोद्गीथशब्दांतर्गतसेतिगीथेतिशब्दवाच्यासरस्वती तर्हिवायोःसामोद्गीथशब्दवाच्यत्वाभावात् एषउएवसामैषउएवोद्गीथइतिचकथमुक्तंइत्यतआह ॥ तदिति ॥ तत्तस्मात्सरस्वत्याःसेतिगीथेतिशब्दवाच्यत्वात्तयार्धतनुर्वायुःउद्गीथसामाख्यइतिसंबंधः । अतएवसाचामश्चेति उच्चगीथाचेति द्वंद्वसमासोक्तिरितिभावः ॥ विष्णोरर्धनारीनरात्मकत्वंप्रमाणप्रसिद्धं तत्कथंवायोरित्यतआह ॥ अर्धनारीति ॥ कुत्रचित्एषउएवसामेत्यादौ ॥२२॥ २३॥ वाचाचह्येवसप्राणेनचोदगायदितिवाक्यं अपेक्षितंपूरयन्व्याचष्टे ॥ अथास्यइति ॥ तेनार्धनारीनरात्मकेन । अनेन वाचाप्राणेनेत्युभयोक्तेस्तात्पर्यमुक्तंभवति ॥ २४ ॥ तस्यवैस्वरएवस्वमित्येतद्व्याचष्टे ॥ गृहेति ॥ तद्रूपीतदभिमानी अस्योद्गातुः॥२५॥

भाष्यं ॥ सूर्यःसोमश्चरुद्रश्चतेनैवस्वपदेस्थिताः ॥ १२–१६ ॥ १७–१९ ॥ स्त्रीगुणैःसर्वपूर्णत्वाद्बृहतीतुसरस्वती । अनंतवेदरूपत्वात्सैवब्रह्मेतिकीर्तिता । विष्णुनाबृंहितत्वाद्वातत्पतिर्वायुरीश्वरः ॥२०॥२१॥ सारत्वात्स्त्रीपुसादेवीसेत्युक्तासामरूपतः । गीथेत्युक्तातदुद्गीथःसामाख्योर्धतनुस्तथा । अर्धनारीनरवपुर्वायुःकुत्रचिदीरितः ॥२२॥२३॥ अयास्योविश्वसृग्यज्ञेतेनाविष्टोन्वगायत॥२४॥ गृहकोशादिकंयत्स्वंतद्रूप्यस्यस्वरेस्थितः २५

तस्यवैस्वरएवसुवर्णमित्येतद्व्याचष्टे ॥ भूषणेति ॥ सएववायुरेव भूषणस्वर्णरूपीच सोपिस्वरस्थितइतियोजना ॥ २६ ॥ तस्यवैवागेवप्रतिष्ठावाचिहिखल्वेषएतत्प्राणःप्रतिष्ठितोगीयतइत्येतद्व्याचष्टे ॥ वागिंद्रियमिति ॥ वागिंद्रियंगानकालेतस्यदेवस्य वायोःपीठरूपंसंस्थितमित्यन्वयः । गानकालइत्यनेनैतदुक्तार्थं । अन्नइत्युहैकआहुःइत्येतद्व्याचष्टे ॥ अन्यदात्वन्नमिति ॥२७॥ ननुवायोरेकत्वात्पवमानानामित्युक्तिःकथमित्यतआह ॥ पवमानाइतीति ॥ योगिनोयोग्याः योग्यताचनागंतुकेत्याह ॥ अनादीति ॥ इदानीमथातइत्येतद्व्याचष्टे ॥ सर्वेति ॥ विमुक्तिगमित्यनेनाथेत्युक्ततात्पर्यं । सवैखलुप्रस्तोतेत्यादिजपेदित्यंतंव्याचष्टे ॥ प्रस्तावेति ॥ प्रस्तावकालेजपेदितिसंबंधः । योग्यइत्यस्यपूर्वेणोत्तरेणचसंबंधः । यइतिश्रवणात्सइतिलभ्यते तुशब्दएवार्थे स्मरन्नेवेतिसंबंधः । ननुवायुत्वयोग्यानांकिंलक्षणं येनतेषांवायुपदयोग्यतांज्ञात्वोद्गातृत्वेनवरणमित्यतआह ॥ द्वात्रिंशदिति ॥ सरस्वतीव्यावृत्त्यर्थंसम्यगिति ॥ सरस्वत्यपेक्षयेतिशेषः । तेनैवशब्दसंबंधः । नियमेनवायुत्वयोग्यकाइतिसंबंधः । सम्यग्द्वात्रिंशल्लक्षणोपेतःकश्चिदपिवायुपदायोग्योनेत्यर्थः । ननुरामकृष्णादौविद्यमानमिदंलक्षणं कथंवायुपदयोग्यता

भाष्यं ॥ भूषणस्वर्णरूपीचसएवापिस्वरेस्थितः ॥ २६ ॥ वागिंद्रियंपीठरूपंतस्यदेवस्यसंस्थितं । गानकालेन्यदात्वन्नंप्राणपीठमितिस्मृतं ॥ २७ ॥ पवमानाइतिप्रोक्तामुख्यवायुत्वयोगिनः । अनादिकालसंबंधायोग्यतासाप्रकीर्तिता । सर्वाधिक्यारोहणंतुतेषामेवविमुक्तिगं । प्रस्तावकाले प्रस्तोतुंयोग्योवायुपदस्ययः । यजेद्यजूंषित्वेतानित्रीणिविष्णुंसदास्मरन् । असतोमासदित्यादिविष्णुप्रार्थनभांजिच । द्वात्रिंशल्लक्षणैःसम्यग्युक्ता वायुत्वयोग्यकाः ॥

ज्ञापकमित्यतआह ॥ **विष्णोरिति** ॥ प्रादुर्भावास्त्वितिसंबंधः । वायुपदयोग्यापेक्षयाविशेषतःसम्यग्द्वात्रिंशल्लक्षणैर्युताः ।
तथाचसरस्वत्यपेक्षयैवेत्युक्त्यातिव्याप्तिपरिहारइतिभावः । सर्वात्मनान्यानिष्टंभगवतोलक्षणांतरमाह ॥ **सहस्रारेणेति** ॥ स
रस्वत्याइवसम्यगित्यनेनैवरुद्रादेरपिव्यावृत्तिःकिं नेत्याह ॥ **अष्टाविंशादिति** ॥ षोडशादा षोडशपर्यंतं । षोडशादारभ्य
अष्टकादाअष्टकपर्यंतं ऋषयश्चोक्ताइत्यर्थः । असतइत्यादिमंत्रद्वयस्य मृत्योर्मामृतंगमयेतितात्पर्यकथनेन मंत्राणामेकार्थत्वंप्रती
यते तन्निरासाय मृत्युर्वाअसत्सदमृतं मृत्युर्वैतमोज्योतिरमृतमित्येतद्व्याचष्टे ॥ **असदिति** ॥ असन्मृत्युर्दुःखात्मकःइत्यादि
योज्यं । नात्रतिरोहितमिवास्तीत्यस्याभिप्रायमाह ॥ **मृत्योरिति** ॥ चशब्देनामृतंमोक्षमित्यपिग्राह्यं । एवेतिप्रसिद्ध्यर्थकं ।
तस्मादुतेषुवरंवृणीतेत्येतद्व्याचष्टे ॥ **एवंविदिति** ॥ एवंविदउक्तमंत्रार्थविदश्चतेवायुपदयोग्याश्चेतिविग्रहः । योग्याएवेतिसंबंधः ।
याजी यजमानः । सएषएवमित्यादिलोकजिदेवेत्यंतंवाक्यंव्याचष्टे ॥ **आत्मनइति** ॥ एवंविधउद्गाता आत्मनेस्वार्थं याजिनेपिवा
यदिफलमुद्दिश्योद्गायेत्तर्हितत्फलंभवेदेवात्राभीष्टेविचारणानकार्येतिहियस्मात्तस्मात्तेषुयाजीवृणुयाद्वरमितिपूर्वेणसंबंधः । लो

भाष्यं ॥ नियमेनैवविष्णोस्तुप्रादुर्भावाविशेषतः । सहस्रारेणचक्रेणचिह्नितादक्षिणेकरे । गदयाष्टाश्रयाचैवशतावर्तेनकंबुना । वामेकरेतथा
ब्जेनसहस्रदलशोभिना । अष्टाविंशल्लक्षणाश्चगिरीशपदयोगिनः । चतुर्विंशतिमारभ्यषोडशादासुराःस्मृताः । अष्टकादृषयश्चोक्तास्तदूनाश्चक्रवर्ति
नः । असद्दुःखात्मकोमृत्युःसदानंदोमृतंस्मृतं । तमोज्ञानात्मकोमृत्युर्ज्योतिर्ज्ञानात्मकंस्मृतं । मृत्योर्मामृतमित्यत्रमृत्युर्मरणमेवच । एवंविद्वायुपदयो
ग्याउद्गातारएवतु । यदाभवेयुस्तेपुतदायाजीतुवृणुयाद्वरं । आत्मनेयाजिनेवापिह्युद्गातैवंविधोयदि । आगायेत्तद्भवेन्नात्रकार्याभीष्टेविचारणा ।

46

कजिदेवेत्येवकाराभिप्रायोनात्रेति । नहैवालोक्यतायाइत्येतत्फलवाक्यंव्याचष्टे ॥ एवमिति ॥ नहैवालोक्यतायाआशास्तीत्य
स्यपूर्ववाक्यशेषत्वमप्यभिप्रेत्यतद्वाक्यार्थःकैमुत्यसिद्धइत्याह ॥ तस्मादिति ॥ तस्मात्सामनामकवायुरूपविदोलोकप्राप्तिनिय
मात् । यदातद्विदइष्टलोकराहित्येनाशाकार्या तदावायुपदयोग्यैर्येषांयजमानानांलोकाः प्रकीर्तिताःगानकालेफलत्वेनोक्ता स्ते
षांनकेवलमरिणेष्टलोकराहित्येआशानकार्या किंत्वलोकशंकाचनैवकार्येतिकिमुवक्तव्यमितिभावः । तज्ज्ञानेनवातदुक्त्यावालो
कप्राप्तिनियमःकुतइत्यतआह ॥ यस्मादिति ॥ नारायणातिप्रियत्वमपिकुतइत्यतआह ॥ प्राणत्वेति ॥ नारायणप्रीतिकरण
युक्ताइत्यर्थः । श्रुतौसोयास्यआंगिरसइतिप्राणवाचकत्वेनोक्तशब्दद्वये अंगानांहिरसइति । प्राणेअंगिरसशब्दनिर्वचनवत् अ
यास्यशब्दनिर्वचनाभावात्स्वयंप्राणेतन्निर्वक्ति ॥ आस्यादिति ॥ अयतेगच्छति अयपयगतावितिधातोः । आस्यायइतिभवित
व्ये अयास्यइति धातोःपूर्वनिपातइतिभावः । मंत्रद्वयाभ्यामनतिरिक्तार्थत्वात्तृतीयमंत्रस्याव्याख्येयत्वमाहमृत्योरितीतिक
श्चित् । तदसत् । तथात्वेतृतीयमंत्रजपवैयर्थ्यापत्तेरित्यभिप्रेत्यनात्रतिरोहितमिवास्तीत्युक्तौनिमित्तमाह ॥ प्रसिद्धेति ॥ मृत्व्य
मृतशब्दार्थयोःमरणमोक्षरूपप्रसिद्धमृत्युअमृतत्वादित्यर्थः । अस्तीत्युक्तमितिशेषः । यएवंवित् उक्तप्रकारेणप्राणवित् । सएष

भाष्यं ॥ एवंतंसामनामानंवायुंयोवेदसादरं । तस्येष्टलोकराहित्येनाशाकार्यारिणाकचित् । तस्माद्वायुत्वयोग्यैर्हियेषांलोकाःप्रकीर्तिताः ।
तेषामलोकशंकाचनैवकार्याकदाचन । यस्मान्नारायणस्यातिप्रियाःप्राणत्वयोगिनइत्यादिमहासंहितायां । आस्यादयतइत्ययास्यः । प्रसिद्धमृत्व्यमृ
तत्वान्नात्रतिरोहितमिवास्ति ।

उद्गातेत्युद्गातुःप्राणादन्यत्वप्रतीतिनिरासायाह ॥ एषइति ॥ उच्यतइतिशेषः । पवमानशब्दवाच्यवायुत्वयोग्यानामेवतेषुव
रंवृणीतेत्युद्गातृत्वेनप्रकृतत्वादेवंविदित्यस्यपूर्वोक्तमंत्रार्थविदित्येवार्थोनतुप्राणस्वरूपविदिति । अतएवप्रमाणेमंत्रत्रयव्याख्याना
नंतरमेवएवंविदितिवायुपदयोग्यानामेवविशेषणमुक्तमितिभावः । ननुतस्मादुतेषुवरंवृणीतेत्यत्राथयानीतराणीत्यादिनोक्तस्यहे
तुत्वायोगेन तस्मादित्युक्तोहेतुःकइत्यतः सएषएवंविदित्यादिकमेवहेतुप्रतिपादकमित्यभिप्रेत्येतिशब्दाध्याहारेणयोजयति ॥ त
द्धैतदिति ॥ इतिशब्दःप्रकारार्थः । एवंरूपात् । तस्माद्धेतोरित्यर्थः । यद्वा इतिहेतोस्तस्माद्वायुपदयोग्याद्वराभियाचनंकर्तव्य
मित्यर्थः । अतएवसएषइत्यस्यवाक्यस्यान्यपरत्वे तेषुपवमानेषुसत्सुवरंवृणीतेत्यत्रहेतुप्रतिपादकत्वंनस्यादितिभावेनैषउद्गातेति
वायुत्वयोग्यइत्युक्तं ॥२८॥ ततश्चायंखंडार्थः॥प्रजापतेरिमेप्राजापत्याःब्रह्मसुताः देवाश्चासुराश्चेति द्वयाः द्विप्रकाराः।ततःतत्र
देवासुरभागयोः । देवाःकानीयसाःकनीयांसएव । असुराः ज्यायसाज्यायांसः । तेदेवासुराः एषुलोकेषु बहुवचनमाद्यर्थे लोका
द्यर्थे । अस्पर्धंतस्पर्धयायुद्धंकृतवंतः । बहुत्वादसुरैर्देवाजिताइतिवक्तव्यं । तेपराजिताः देवाःपरस्परमूचुर्ह किमिति हंतेत्यास्वा
दने । विष्णुपूजात्मकेयज्ञे उद्गीथेनउद्गातुरुद्गानबलेन । असुरान् अत्ययाम जयामेति ॥ १ ॥ तेदेवाः हनिश्चयेन वाचमब्रि

भाष्यं ॥ एषउद्गातेतिवायुत्वयोग्यः । तद्धैतल्लोकजिदेवेतितस्माद्वराभियाचनं ॥ २८ ॥ उद्गीथब्राह्मणं ॥ ३ ॥

उप० ॥ द्वयाहप्राजापत्यादेवाश्चासुराश्च । ततःकानीयसाएवदेवाज्यायसाअसुरास्तएषुलोकेष्वस्पर्धन्ततेहदेवाऊचुर्हन्तासुरान्यज्ञउद्गीथेना
त्ययामेति ॥ १ ॥

मूचुः । किमिति नोऽस्मदिष्टसिध्यर्थं उद्गायेतिऔद्गात्रंकर्मकुर्विति । तथेतितदुक्तमंगीकृत्य तेभ्योदेवेभ्यः तदभिमतसिद्ध्यर्थं वागुदगायत् । तदेवाह ॥ योवाचीति ॥ योवाचिभोगोवेदपाठादिः तंतज्जनितंपुण्यं देवेभ्यः आगायत्उद्गानेनप्रापयामास । उद्गानंनकेवलंयजमानार्थमेव किंत्वात्मार्थमपीत्याह ॥ यदिति ॥ यत्कल्याणंतदतिरिक्तं वदति तत्तज्जनितंपुण्यं आत्मने आगायदितिसंबंधः । तेअसुराः अनेनैवाग्निनैव उद्गात्रा नोस्मान् देवाः अत्येष्यंतिजेष्यंतीति विदुः । एवंज्ञात्वा तमुद्गातारं अभिद्रुत्यवेगेनाभिगम्य पाप्मनापापेन अविध्यन्वेधितवंतः । अग्नेरसुरकृतपापवेधःकथंज्ञेयइत्यतआह ॥ सयइति ॥ योसुरप्रक्षिप्तः पाप्मा सः । सएवेति कः यदेवयस्मादेवपापात् इदमप्रतिरूपंअनृतंशास्त्रप्रतिषिद्धंवा वदति सएवपाप्मासइतियोजना । यद्वासअसुरप्रक्षिप्तःसपाप्मा । यः कः । यतश्चोदेतिसूर्यइत्यादेर्यच्छब्दस्यकिंशब्दार्थकत्वात् । इदमप्रतिरूपंवदतीतियत्ससपाप्मेतिवायोजना ॥ २ ॥ अथहप्राणमूचुरित्यादेःयदेवेदमप्रतिरूपंसंकल्पयतिसएवसपाप्मेत्यंतस्यग्रंथस्यैवमेवयोजनाद्रष्टव्या ॥ ७ ॥ अथाग्नेःपापवेधानंतरं । एवमुत्तरत्रापि । प्राणं(घ्राणं)नासिक्यवायुं । (घ्राणे)प्राणेभोगईश्वरसमर्पितगंधाघ्राणनं ।

उप० ॥ तेहवाचमूचुस्त्वंनउद्गायेतितथेतितेभ्योवागुदगायत् । योवाचिभोगस्तंदेवेभ्यआगायद्यत्कल्याणंवदतितदात्मने । तेविदुरनेनवैनउद्गात्राऽत्येष्यंतीतितमभिद्रुत्यपाप्मनाऽविध्यन्सयःसपाप्मायदेवेदमप्रतिरूपंवदतिसएवसपाप्मा ॥ २ ॥ अथहप्राणमूचुस्त्वंनउद्गायेतितथेतितेभ्यःप्राणउदगायद्यःप्राणेभोगस्तंदेवेभ्यआगायद्यत्कल्याणंजिघ्रतितदात्मने ।

यत्कल्याणंतदितरशुभगंधं ॥ ३ ॥ चक्षुःसूर्यं चक्षुषिभोगोविष्णुप्रतिमादिदर्शनरूपः कल्याणंतद्व्यतिरिक्तंशुभरूपादिकं ॥ ४ ॥ श्रोत्रंदिग्देवताः श्रोत्रेभोगोहरिकथादिश्रवणरूपः कल्याणंतदितरशुभशब्दं ॥ ५ ॥ मनश्चंद्ररुद्रादीन् मनसिभोगःविष्णुस्मरणादिरूपः कल्याणं तद्व्यतिरिक्तशुभकार्यं नकेवलमुक्तानामेवासुरकृतपापवेधःकिंतुत्वगाद्यभिमानिनांसर्वेषामपीत्याह ॥ एवमिति ॥ एवं उ एवमेव एताःत्वगाद्यभिमानिनीः देवताः पाप्मभिः उपासृजन्संयोजितवंतः । निगमयति ॥ एवमिति ॥ एवमुक्तप्रकारेण नाःमुख्यप्राणव्यतिरिक्ताःसर्वादेवताः पाप्मनाअविध्यन्निति ॥ ६ ॥ इमंसमर्थत्वेनप्रसिद्धं आसन्यंआस्येभवं

उप० ॥ तेविदुरनेनवैनउद्गात्राऽत्येष्यंतीतितमभिद्रुत्यपाप्मनाऽविध्यन्सयःसपाप्मायदेवेदमप्रतिरूपंजिघ्रतिसएवसपाप्मा ॥ ३ ॥ अथहचक्षुरूचुस्त्वंनउद्गायेतितथेतितेभ्यश्चक्षुरुदगायत् । यश्चक्षुषिभोगस्तंदेवेभ्यआगायद्यत्कल्याणंपश्यतितदात्मने । तेविदुरनेनवैनउद्गात्राऽत्येष्यंतीतितमभिद्रुत्यपाप्मनाऽविध्यन्सयःसपाप्मायदेवेदमप्रतिरूपंपश्यतिसएवसपाप्मा ॥ ४ ॥ अथहश्रोत्रमूचुस्त्वंनउद्गायेतितथेतितेभ्यःश्रोत्रमुदगायद्यःश्रोत्रेभोगस्तंदेवेभ्यआगायद्यत्कल्याणꣳशृणोतितदात्मने । तेविदुरनेनवैनउद्गात्राऽत्येष्यंतीतितमभिद्रुत्यपाप्मनाऽविध्यन्सयःसपाप्मायदेवेदमप्रतिरूपꣳशृणोतिसएवसपाप्मा ॥ ५ ॥ अथहमनऊचुस्त्वंनउद्गायेतितथेतितेभ्योमनउदगायद्योमनसिभोगस्तंदेवेभ्यआगायद्यत्कल्याणꣳसंकल्पयतितदात्मनेतेविदुरनेनवैनउद्गात्राऽत्येष्यन्तीतितमभिद्रुत्यपाप्मनाऽविध्यन्सयःसपाप्मायदेवेदमप्रतिरूपꣳसंकल्पयतिसएवसपाप्मैवमुखल्वेतादेवताःपाप्मभिरुपासृजन्नेवमेनाःपाप्मनाऽविध्यन् ॥ ६ ॥

मुखांतर्गतं प्राणंमुख्यवायुं । सवक्ष्यमाणोदृष्टांतो यथा लोष्टःपांसुपिंडः अश्मानंवज्रशिलां ऋत्वाप्राप्य विध्वंसेत नश्यत्येव एवमेवहखलु प्राणंवेऋुमीप्संतःअसुराः विध्वंसमानाःविस्रंसमानदेहाःसंतः विष्वंचःसर्वत्र विनेशुः अदर्शनंप्राप्ताः । ततोनंतरं देवाः प्राप्तपदाइतिशेषः अभवन् । असुराः पराभवन् । योधिकारी एवमुक्तप्रकारेण प्राणं वेद । अस्यद्विषन्शत्रुः आत्मना परमात्मना तत्प्रसादेन पराभवति । भ्रातृव्यःभ्रातृवत्सहस्थितः पाप्माच पराभवति ॥ ७ ॥ तेदेवाः यः इत्थंअसुरविध्वंसनादिकार्यकर्तृत्वेन नोस्मान् असक्तप्राप्तवान् सभगवान् क्वनुभूत्क्वस्थितः इतिऊचुर्ह । आस्ये अंतः इति अयंप्राणः उवाच । प्रकारांतरेणवायोर्महिमानमाह ॥ सइत्यादिना ॥ सःप्राणः आस्यादयतइत्ययास्यशब्दवाच्यः । आंगिरसशब्दंनिर्वक्ति ॥ अंगानांसिति ॥ ८ ॥ हियस्मात् अस्याःप्राणाख्यदेवतायाः मृत्युःपापरूपः दूरंदूरे तस्माद्दूरितिख्यातेतिसंबंधः ॥ ९ ॥ एषाविष्णुवलाश्रया साप्राणाख्यदेवताः यत्यस्मात् एतासां देवतानांरुद्राद्यानांसकाशात् पाप्मानंमृत्युं पापाख्यंमृत्युं अपहत्य मोचयित्वा यत्यस्मात् तासांप्रसिद्धानां दिशांअंत स्तत्तत्र गमयांचकार । आसांदेवतानां पाप्मनःपापानि तत्तद्दिगंतस्थित

उप० ॥ अथहेममासन्यंप्राणमूचुस्त्वंनउद्गायेतितथेतितेभ्यएषप्राणउद्गायत्तेविदुरनेनवैनउद्गात्राऽत्येष्यंतीतितमभिद्रुत्यपाप्मनाऽविव्यत्सन्स यथाऽश्मानमृत्वालोष्टोविध्वꣳसेतैवꣳहैवविध्वꣳसमानाविष्वञ्चोविनेशुस्ततोदेवाअभवन्पराऽसुराभवत्यात्मनापराऽस्यद्विषन्भ्रातृव्योभवतियएवंवेद ॥ ७ ॥ तेहोचुःक्वनुसोऽभूद्योनइत्थमसक्तेत्ययमास्येऽन्तरितिसोऽयास्यआंगिरसोऽङ्गानाꣳहिरसः ॥ ८ ॥ सावाएषादेवतादूर्नामदूरꣳह्यस्यामृत्युर्दूरꣳहवाअस्मान्मृत्युर्भवतियएवंवेद ॥ ९ ॥ सावाएषादेवतैतासांदेवतानांपाप्मानंमृत्युमपहत्ययत्तासांदिशामंतस्तद्गमयांचकारतदासांपाप्मनो

जने विन्यदधात् विशेषेणस्थापितवती । तस्मादहंपाप्मानंमृत्युं नेत्नैवा न्ववायानिप्राम्नवानीति मन्वानोधिकारिलोकः जनं पापाश्रयं नेयात् नगच्छेत् अंतं पापजननिवासस्थानंदिगंतरं नेयादिति ॥ १० ॥ मृत्युविमोचनानंतरंकिमकरोत्इतिजिज्ञासायांउक्तानुवादपूर्वकमाह ॥ **सेति** ॥ अथमृत्युविमोचनानंतरं एनाःरुद्रादिदेवताः मृत्युमति मृत्युमतिक्रम्यवर्तमानंतत्तद्देवतास्वामिकमूर्ध्वलोकं अवहत्प्रापयामास ॥ ११ ॥ एतदेवविवृणोति ॥ **सइत्यादिना** ॥ सवैमुख्यप्राणः प्रथमांपूर्वमेवोद्गातृत्वेन स्वीकृतां वाचमग्निमेव मृत्युंअत्यवहत् । सावाक् यदा मृत्युं अत्यमुच्यत तदा सोग्निरभवत् । स्वपदेस्थितः । स्वव्यापारंचाकरोदित्याह ॥ **सोयमिति** ॥ परेणप्राणेन एवमुत्तरत्रापि ॥ १२–१४ ॥ अतिक्रांताः स्वव्यापारंकुर्वंतीतिशेषः ॥ १५ ॥ अनेनदेवाअभवन्नितिप्रागुक्तमेवविवृतंभवति । यएवमुक्तमहिमाविशिष्टंप्राणं वेद एनं एषाप्राणाख्यदेवता एवंवाएवमेव अग्न्यादिदेवताइव मृत्युंपापं अतिअतिक्रामयित्वा तद्योग्योर्ध्वलोकं वहतिप्रापयति ॥ १६ ॥ अथदेवताकार्यसाधनानंतरं आत्मने

उप० ॥ विन्यदधात्तस्मान्नजनमियान्नान्तमियान्नेत्पाप्मानंमृत्युमन्ववायानीति ॥१०॥ सावाएषादेवतैतासांदेवतानांपाप्मानंमृत्युमपहत्याथैनामृत्युमत्यवहत् ॥ ११ ॥ सवैवाचमेवप्रथमामत्यवहत्सायदामृत्युमत्यमुच्यतसोऽग्निरभवत्सोऽयमग्निःपरेणमृत्युमतिक्रान्तोदीप्यते ॥ १२ ॥ अथप्राणमत्यवहत्सयदामृत्युमत्यमुच्यतसवायुरभवत्सोऽयंवायुःपरेणमृत्युमतिक्रान्तःपवते॥१३॥ अथचक्षुरत्यवहत्तद्यदामृत्युमत्यमुच्यतसआदित्योऽभवत्सोसावादित्यःपरेणमृत्युमतिक्रान्तस्तपति ॥१४॥ अथश्रोत्रमत्यवहत्तद्यदामृत्युमत्यमुच्यतत्तादिशोऽभवꣳस्ताइमादिशःपरेणमृत्युमतिक्रान्ताः ॥१५॥ अथमनोऽत्यवहत्तद्यदामृत्युमत्यमुच्यतसचन्द्रमाभभवत्सोसौचन्द्रःपरेणमृत्युमतिक्रान्तोभात्येवꣳहवाएनमेषादेवतामृत्युमतिवहतियएवंवेद ॥ १६॥

स्वार्थं अन्नंचतत्अद्यं अन्नाद्यं अन्नमितियावत् । उद्दिश्यागायत् गानफलंलब्धंचेत्याह ॥ यदिति ॥ यत्किंचान्नमद्यते प्राणिभिरितिशेषः तत्सर्वमन्नं अनेनप्राणेनैवाद्यते कथंप्राणिभिरद्यमानमन्नंअनेनाद्यतइत्युक्तिरित्यतआह ॥ इहेति ॥ इहप्राणिषु प्रतितिष्ठति प्राणः ॥ १७ ॥ तेदेवाअब्रुवन् किमिति यदिदंप्राणिभिरद्यमानं एतावद्वाएतावदेवान्नं इतोतिरिक्तमन्नंनास्ति तत्सर्वं आत्मनेआत्मार्थमेव त्वमागासीः । वयमप्यन्नंविनास्थातुंनशक्नुमइति । अनु त्वदनंतरं अस्मिन्नन्ने नःअस्मान् आभजस्व भागिनःकुर्विति तेदेवाःअब्रुवन्निितिसंबंधः । तेअन्नार्थिनोयूयं मा मां अभिसमंततः संविशत प्राणिदेहमितिशेषः इतिप्राणोऽब्रवीदितिशेषः । देवाःतथेतितदुक्तमंगीकृत्य तंप्राणमनु समंतं समंततः परिवारतया न्यविशंत । तस्माद्देवानन्नभागिनःकृत्वाप्राणिषुनिवेशितत्वात् । अनेनदेवतापरिवृतेनप्राणेनप्रेरितःप्राणी यदन्नमत्ति तेनान्नेनै तादेवताः तृप्यंति । य एवमुक्तमहिमानंप्राणं वेद यथादेवाःप्राणमभिसंविशंति एवंह एनंवेत्तारं स्वाज्ञातयः अभिसंविशंति आश्रयंते । आश्रितानांस्वानां भर्ता पोषकः तेषांमध्ये श्रेष्ठःसन् पुरःपुरतः एता गंता अन्नादोभोक्ता धिपतिश्चभवति । प्राणविद्विद्वेषिणोनिष्टमाह ॥ यइति ॥ एवंविदं प्रति स्वेषुज्ञातिषुमध्ये द्रव्यविषयेवा यउयःकश्चि त्प्रति प्रतिकूलो बुभूषतिभवितुमिच्छति सभार्येभ्योभर्तव्येभ्यः

उप० ॥ अथाऽऽत्मनेऽन्नाद्यमागायद्यद्धिकिंचान्नमद्यतेऽनेनैवतदद्यतइहप्रतितिष्ठति ॥ १७ ॥ तेदेवाअब्रुवन्नेतावद्वाइदꣳसर्वंयदन्नंतदात्मनआगासीरनुनोऽस्मिन्नन्नआभजस्वेतितेवैमाऽभिसंविशतेतितथेतितꣳसमन्तंपरिण्यविशन्त । तस्माद्यदनेनान्नमत्तितेनैतास्तृप्यन्त्येवꣳहवाएनꣳस्वाअभिसंविशन्तिभर्तास्वानाꣳश्रेष्टःपुरएताभवत्यन्नादोऽधिपतिर्यएवंवेदयउहैवंविदꣳस्वेषुप्रतिप्रतिबुभूषतिनहैवालंभार्येभ्यो

तद्धरणार्थमितियावत् । अलंसमर्थो नैवभवतिह । प्राणविदनुकूलस्येष्टमाह ॥ अथेति ॥ एतंप्राणविदं यएवानुभवति अनुकू
लोभवति योवायश्चै तंप्राणविदमन्वेवानुवर्तयन्नेव भार्यान्भर्तव्यान् बुभूषतिभर्तुमिच्छति सएव भार्येभ्योलंभवतिह ॥ १८ ॥
सोयास्यःआंगिरसोंगानांहिरसइत्युक्तं प्राणएवोपपादयितुंअनुवदति ॥ सइति ॥ उपपादयितुंप्रतिजानीते ॥ प्राणोवाइति ॥
वैशब्दोवधारणार्थे । अंगानांरसइतिप्रागुक्तःप्राणएवेत्यर्थः । कुतइत्यतःतत्प्रसिद्धमित्याह ॥ प्राणोहीति ॥ प्राणएवांगानांश
रीरावयवानां रसोनियामकइति प्रसिद्धमित्यर्थः । तन्नियामकत्वमेवकुतइत्यतस्तदुपपादनपूर्वकंहेतुसिद्धिंदर्शयति ॥ तस्मादि
ति ॥ प्राणोयदा यस्मात्कस्माच्चिदंगादुत्क्रामति तदेवतदेव तदंगंशुष्यति हियस्मात्तस्मात् एषप्राणएवां गानांनियामकइत्यर्थः।
यद्वा तामेवप्रसिद्धिंव्यतिरेकेणदर्शयति ॥ तस्मादिति ॥ तस्मादेवप्राणस्यैवांगानांरसत्वादेव प्राणोयदायस्मात्कस्माच्चांगात
उत्क्रामति । तदेव तदेव । तदंगंशुष्यति । अन्यथातन्नस्यादित्यर्थः । निगमयति ॥ एषइति ॥ १९ ॥ प्राणस्यमहिमाधिक्य
लाभायतत्रबृहस्पत्यादिशब्दान्प्रतिज्ञापूर्वकंनिर्वक्ति ॥ एषइति ॥ उशब्दश्चशब्दार्थे बृहस्पतिश्चेतिसंबंधः वाग्वैवागेव सरस्व
ती स्त्रीगुणैर्बृंहितत्वाद्बृहती ॥ २० ॥ वाक् अनंतवेदाभिमानित्वात् विष्णुनाबृंहितत्वाद्वा ब्रह्म ॥ २१ ॥ वाग्वै सा स्त्रीषुसार

उप० ॥ भवत्यथयएवैतमनुभवतियोवैतमनुभार्यान्बुभूपतिसहैवालंभार्येभ्योभवति ॥१८॥ सोऽयास्यआङ्गिरसोऽङ्गानाꣳहिरसःप्राणोवाअ
ङ्गानाꣳरसःप्राणोहिवाअङ्गानाꣳरसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राणाउत्क्रामतितदेवतच्छुष्यत्येपहिवाअङ्गानाꣳरसः ॥ १९ ॥ एपउएवबृहस्पतिर्वा
ग्वैबृहतीतस्याएपपतिस्तस्मादुबृहस्पतिः ॥ २० ॥ एषउएवब्रह्मणस्पतिर्वाग्वैब्रह्मतस्याएषपतिस्तस्मादुब्रह्मणस्पतिः ॥ २१ ॥

54

त्वात् । एषप्राणः अमः अमेयत्वात् । साचामश्चेतियदर्धनारीनरात्मकत्वं तत्साम्नः सामशब्दवाच्यस्यवायोः सामत्वंसामशब्द प्रवृत्तिनिमित्तं प्रकारांतरेणसामशब्दंनिर्वक्ति ॥ यद्वेवेति ॥ यत् उ एवेतिपदच्छेदः । उशब्दएवार्थः यस्मादेवप्लुषिणासम एव । तदंतर्गतरूपेणतत्तुल्यपरिमाणकएवेत्यर्थः । एवमुत्तरत्रापि । तस्मात् उ एवेतिपदच्छेदः । उशब्दोवाशब्दार्थः । तस्मा देववा साम सामशब्दवाच्यः । यएवं उक्तनिर्वचनपूर्वकं साम सामनामकं एतदर्धनारीनरात्मकंवायुरूपं वेद स साम्नोवायोः। सायुज्यमश्नुतेतद्योग्यः । अन्यस्तुसलोकतामश्नुते ॥ २२ ॥ एषउएवेत्यादिपूर्ववद्व्याख्येयं ॥ २३ ॥ अर्धनारीनरात्मकस्यवायोः विश्वसृग्यज्ञोद्गात्रयास्यादिप्रेरकत्वरूपमहिमानमाख्यायिकयाह ॥ तद्धेति ॥ तत्अयास्यादिप्रेरकत्वं हापिप्रसिद्धमपि ब्रह्म दत्तोनामतः चैकितानेरपत्यंचैकितानेयः राजानंसोमं भक्षयन्नुवाच लताभिमानित्वेनेयमुक्तिः । विश्वसृग्यज्ञेअयास्यआंगिरस श्चऋषिः इतःप्राणात् अन्येनप्रेरितःसन् उदगायदितियदिस्यात् तदायं राजामयाभक्ष्यमाणसोमाभिमानीचंद्रः अस्यप्राणेनैव प्रेरितउदगायदितिवदतः मेमूर्धानंशिरः विपातयतात् विस्पष्टंपातयतु इत्युवाच । श्रुतिःशपथकरणेर्थत्त्सवंहेतुमाह ॥ वाचा

उप० ॥ एषउएवसामवाग्वैसामैषसाचामश्चेतितत्साम्नःसामत्वं । यद्वेवसमःप्लुषिणासमोमशकेनसमोनागेनसमएभिस्त्रिभिर्लोकैःसमोऽनेनस र्वेणतस्माद्वेवसामाश्नुतेसाम्नःसायुज्यꣳसलोकतांयएवमेतत्सामवेद ॥ २२ ॥ एषउवाउद्गीथःप्राणोवाउत्प्राणेनहीदꣳसर्वमुत्तब्धंवागेवगीथोच्चगीथाचे तिसउद्गीथः ॥ २३ ॥ तद्धापिब्रह्मदत्तश्चैकितानेयोराजानंभक्षयन्नुवाचायंत्यस्यराजामूर्धानंविपातय

चेति ॥ चशब्दावितरेतरयोगे । सोयास्यादिर्हियस्मात् वाचाचप्राणेनचार्धनारीनरात्मकवायुनैव प्रेरितःसन् उदगायदिति ॥ २४ ॥ अर्धनारीनरात्मकस्यवायोःगृहकोशसुवर्णाभिमानिरूपेणोद्गातृस्वरस्थितत्वलक्षणंमहिमांतरंवक्तुंतात्पर्यद्योतनायवेत्तुः फलमाह ॥ तस्येति ॥ तस्यएषउएवसामेत्यादिनाप्रकृतस्यै तस्यायास्याद्युद्गातृप्रेरकत्वेनोक्तस्य साम्नोर्धनारीनरात्मकस्यवायोः स्वंगृहकोशाद्यभिमानिरूपविशेषं योवेद अस्य स्वंगृहकोशादिकं भवतिह ! यत्स्वंगृहकोशाद्यभिमानिरूपंतत् तस्योद्गातुः स्वरएवस्थितंवै । यस्मादुद्गातृस्वरेवायुरूपंस्थितं तस्मादार्त्विज्यंऋत्विग्भावंउद्गातृत्वं करिष्यन् वाचि स्वरंइच्छेतइच्छेत् तस्मादेव वायुरूपस्योद्गातृस्वरेस्थितत्वादेव यज्ञे उद्गातारंकर्तुमितिशेषः । स्वरवंतंदिदृक्षंतेयजमानाः । वायुरूपस्यस्वरेस्थितत्वेपितद्वंतंकुतोदिदृक्षंतइत्यतउक्तं ॥ अथोइति ॥ यस्मात् यस्यस्वरशब्दवाच्यगृहकोशाद्यभिमानिवायुरूपाधिष्ठितस्वरवदुद्गातुःसकाशात् स्वंगृहकोशादिकं भवति यजमानस्य अथोतस्मात् तंदिदृक्षंतइत्यर्थः । उक्तमेवफलंनिर्धारयति ॥ भवतीति ॥ सुवर्णभूषणस्वर्णाभिमानिरूपं शिष्टंपूर्ववत् । अनेनायास्यादीनामभावेप्राणस्वरवानेवोद्गाताकर्तव्यइत्युक्तंभवति ॥ २६ ॥ प्रतिष्ठांपीठं वाक्

उप० ॥ ताद्यदीतोऽयास्यआङ्गिरसोऽन्येनोदगायदितिवाचाचह्येवसप्राणेनचोदगायदिति ॥ २४ ॥ तस्यहैतस्यसाम्नोयःस्वंवेदभवतिहास्यस्वंतस्यवैस्वरएवस्वंतस्मादार्त्विज्यंकरिष्यन्वाचिस्वरमिच्छेततयावाचास्वरसंपन्नयाऽऽर्त्विज्यंकुर्यात्तस्माद्यज्ञेस्वरवन्तंदिदृक्षन्तएव। अथोयस्यस्वंभवति भवतिहास्यस्वंयएवमेतत्साम्नःस्वंवेद ॥ २५ ॥ तस्यहैतस्यसाम्नोयःसुवर्णवेदभवतिहास्यसुवर्णंतस्यवैस्वरएवसुवर्णंभवतिहास्यसुवर्णंयएवमेतत्साम्नःसुवर्णंवेद ॥ २६ ॥

वागिंद्रियं हियस्मा द्वीयतेयदेतिशेषः एतदेतस्मिन्गानकाले एषःप्राणः वाचिप्रतिष्ठितः तस्माद्वागेवप्रतिष्ठेतिसंबंधः । अन्यदातु एषप्राणअन्नेप्रतिष्ठितइत्येकेआहुः ॥ २७ ॥ अतःपूर्वोक्तमहिमाविशिष्टत्वा दकारवाच्यविष्णुप्रसादाद्वा अथमुक्त्यनंतरं पवमानानामेवमुख्यवायुत्वयोग्यानामेव अभ्यारोहःसर्वाधिक्यारोहणं स्वसहमुक्तसर्वनियमनादि । अयास्यादीनांतत्प्रेरणयैवोद्गातृत्वात्सवैवायुत्वयोग्यएव प्रस्तोताप्रस्तोतुंयोग्यइति सएवसामप्रस्तौति । सप्रस्तोता यत्रयदा । प्रस्तूयात्प्रस्तावमारभेत तत्तदा प्रस्तावकाले एतानिवक्ष्यमाणानि विष्णुप्रार्थनरूपाणियजूंषिस्तोत्राणि जपेत् । तान्युदाहरति ॥ असतइति ॥ तिरोहितार्थत्वादुदाहृतमंत्रमनूद्यव्याचष्टे ॥ सइति ॥ समंत्रोयदाह तत्रमृत्युर्वाअसदित्यादियोजना । मृत्युर्दुःखात्मकः अमृतंआनंदात्मकं । पदार्थमुक्त्वावाक्यार्थमाह ॥ मृत्योरिति ॥ तात्पर्यमाह ॥ अमृतमिति ॥ तद्वाक्यमित्येवाहेत्यर्थः । एवमुत्तरत्रापि । मृत्युरज्ञानात्मकः अमृतंज्ञानात्मकं । तिरोहितमिवतिरोहितमेव नैवेतिवान्वयः । अतोनव्याख्येयमितिभावः । इतरा

उप० ॥ तस्यहैतस्यसान्नोयःप्रतिष्टांवेदप्रतिहतिष्ठतितस्यवैवागेवप्रतिष्टावाचिहिखल्वेषएतत्प्राणःप्रतिष्ठितोगीयतेऽन्नइत्युहैकआहुः ॥ २७ ॥ अथातःपवमानानामेवाभ्यारोहःसवैखलुप्रस्तोतासामप्रस्तौतिसयत्रप्रस्तूयात्तदेतानिजपेत् । असतोमासद्गमयतमसोमाज्योतिर्गमयमृत्योर्माऽमृतंगमयेतिसयदाहासतोमासद्गमयेतिमृत्युर्वाअसत्सदमृतंमृत्योर्माऽमृतंगमयामृतंमाकुर्वित्येवैतदाहतमसोमाज्योतिर्गमयेतिमृत्युर्वैतमोज्योतिरमृतंमृत्योर्माऽमृतंगमयामृतंमाकुर्वित्येवैतदाहमृत्योर्माऽमृतंगमयेतिनात्रतिरोहितमिवास्ति ।

णिउदाहृतमंत्रव्यतिरिक्तानि उद्गानेवायुनाविनियुक्तानि आत्मनेआत्मार्थं । वायुपदयोग्यस्यैवाभिमतफलसाधकत्वेनवरार्थसएवप्रार्थनीयइत्याह ॥ तस्मादिति ॥ एवंवित्उदाहृतमंत्रार्थवित् अतएववायुपदयोग्य उद्गाता यजमानायवाआत्मनेवा । यं कामंकाम्यं फलत्वेनकामयते तमुद्दिश्यागायति । तत्वायुपदयोग्यकृत मेतदुद्गानं लोकजिदेव कामितलोकादिफलसाधनमेव हनिश्चितं । यस्मा त्तस्मा त्तेषुवायुपदयोग्येष्वेवोद्गातृषुसत्सु यजमानो यंकामंकामयते तंवरंवृणीतेतिसंबंधः । यएवमुक्तप्रकारेण सामनामकंवायुंवेद तस्यवेत्तुः अलोक्यतायाः लोकस्यायंलोक्यः नलोक्यःअलोक्यः तस्यभावस्तथा । लोकराहित्यस्येति यावत् । आशानास्ति अरिणानकार्येतिभावः ॥ २८ ॥ इत्युद्गीथब्राह्मणं ॥ ३ ॥ सतयावाचातेनात्मनेदंसर्वमसृजतेत्युक्तसृष्टिप्रकारंदर्शयति ॥ आत्मैवेत्यादिना ॥ तद्वाक्यंपरैरिदंदृश्यमानंशरीरभेदजातं अग्रेशरीरांतरोत्पत्तेःप्राक् आत्मैवप्रजापतिरेवासीदितिव्याख्यातं । तदसत् । शरीरांतरोत्पत्तेरित्यध्याहारप्रसंगात् । शरीरभेदजातस्यजडस्यप्रजापतिमात्रत्वायोगाच्चेति भावेनतद्वाक्यंव्याचष्टे ॥ इदमिति ॥ एतस्येतिवदतापष्ठचर्थेद्वितीयेत्युक्तंभवति । पुरुषविधइत्येतदात्मनोविशेषणं इतिपरेषां व्याख्यानमप्रामाणिकमितिभावेनतद्व्याचष्टे ॥ ततइति ॥ अनेनासीदित्यस्योत्तरत्रापिसंबंधः ततइत्यध्याहारइत्युक्तंभवति ।

उप० ॥ अथयानीतराणिस्तोत्राणितेष्वात्मनेऽन्नाद्यमागायेत्तस्माद्वुतेषुवरंवृणीतयंकामंकामयेततश्सएषएवंविदुद्गाताऽऽत्मनेवायजमानायवायंकामंकामयतेतमागायतितद्धैतल्लोकजिदेवनहैवालोक्यतायाआशाऽस्तियएवमेतत्सामवेद ॥ २८ ॥ इत्युद्गीथब्राह्मणं ॥ ३ ॥

भाष्यं ॥ इदमग्रेएतस्याग्रेपरमात्मैवासीन । ततःपुरुषविधोत्रह्मासीत् ।

पुरुषविधः पुरुपाकारशिरःपाण्यादिलक्षणइत्यन्यथाप्रतीतिनिरासायाह ॥ पुरुषइति ॥ अप्रामाणिकत्वात्प्रमाणविरुद्धत्वाच्चनप
रकीयंव्याख्यानंयुक्तमितिभावेनब्राह्मणंप्रमाणेनव्याचष्टे ॥ एतस्येति ॥ आत्मैवेत्येवकाराभिप्रायमाह ॥ एकएवेति ॥ त
र्हिश्रियासार्धमित्युक्तिःकथमित्यतःउक्तं ॥ परइति ॥ सर्वोत्तमइत्यर्थः । ननुश्रुतावात्मेतिश्रवणान्नारायणइत्युक्तिःकथंइत्यत
आह ॥ तमिति ॥ पुरुषेत्यपीतिपुरुषविधशब्दगतपुरुषशब्दार्थकथनं । तस्मात्प्रभोरितिसंबंधः । ननुपुरुषसादृश्यस्यसर्वसा
धारण्यात्विशिष्यकिमुच्यतेपुरुषविधोब्रह्मेतीत्यतआह ॥ ब्रह्मादेरिति ॥ एतस्मादेवेतिसंबंधः । यथाविष्णुश्चेतनवर्गेउत्तमस्त
थाधिकारिवर्गेब्रह्मोत्तमइत्यनेनप्रकारेणसर्वोत्तमतैवब्रह्मणःपुरुषविधतेतिभावः । सोनुवीक्ष्यनान्यदात्मनोपश्यदित्येतद्व्याचष्टे ॥
सइति ॥ दिग्दर्शनस्यान्यादर्शनपूर्वकालीनत्ववत् अन्यादर्शनस्यापिव्याहरणपूर्वकालीनत्वात् नान्यदृष्ट्वेत्युक्तं । सविराडात्मा
हमस्मिसर्वात्मेत्यग्रेप्रथमंव्याहरत्ज्ञातवानितिव्याख्यानमसत् । विशिष्टैक्यानंगीकारात् चैतन्यैक्यस्यचप्रमाणविरुद्धत्वात्
इतिभावेनसोहमस्मीतिवाक्यंव्याचष्टे ॥ अब्रवीदिति ॥ स्वसंबंधिनोन्यस्याप्यहेयत्वात् किंविशिष्योच्यते स्वाहेयत्वमिती
त्यतस्तदेवविशदयति ॥ हातुमिति ॥ किंस्वसंबंधिदेहेंद्रियादिकंवास्वाहेय मुतपुत्रवित्तादिकंवा नाद्यइत्याह ॥ हातुंशक्य

भाष्यं ॥ पुरुषोविष्णुस्तद्विधत्वात्पुरुषविधः । एतस्यजगतोह्यग्रआसीन्नारायणःपरः । एकएवश्रियासार्धंतमात्मापुरुषेत्यपि । आहुस्तस्मात्पु
रुषविधोब्रह्मासमभवत्प्रभोः । ब्रह्मादेश्चश्रियश्चैवनित्यंविष्णुर्गुणाधिकः । यथातथैवरुद्रादेर्ब्रह्मायस्माद्गुणाधिकः । एतस्मात्पुरुषविधताब्रह्मणःसंप्रकी
र्तिता । सतुसर्वादिशोदृष्ट्वानान्यदृष्ट्वापितामहः । अब्रवीदहमस्मीतिस्वाहेयत्वमनुस्मरन् । हातुंशक्यमिदंसर्वमासीदेकोभवंयतः ।

मिति ॥ अस्वाभाविकत्वादितिभावः । नेतरः तेपामधुनाप्यनुत्पन्नत्वात्इत्याह ॥ एकइति ॥ उत्पत्स्यमानमपीदंपुत्रादिकंहा
तुंशक्यमेवेत्याह ॥ हातुमिति ॥ ततःस्वरूपस्यैवस्वाहेयत्वंसमचिंतयदितिसंबंधः । सएवमितिपाठेएवमित्यस्यततइत्यर्थः । त
तोहंनामाभवदित्येतद्व्याचष्टे ॥ ततइति ॥ यतोब्रवीत्ततइतिसंबंधः । सयत्पूर्वइत्येतद्वाक्योक्तःकइतिनज्ञायते अतआह ॥ स
चेति ॥ नकेवलंनारायणःपुरुपाभिधः ब्रह्माचेतिसमुच्चयार्थश्चशब्दः । पुरुषाभिधश्चेतिवा । तद्व्याचष्टे ॥ ओषणादिति ॥
पुरुइत्यस्यार्थः पूर्वइति । अथवापुरुइत्यस्यार्थः सचेति । उपइत्यस्यार्थः ओषणादिति । नारायणप्रसादेनौषणादितिसंबंधः ।
तेनोक्तप्रवृत्तिनिमित्तेनपुरुपशब्दाभिधेयत्वंनारायणस्यैवमुख्यतइतिसूचयति । ओपतिहवाइतिफलवाक्यंव्याचष्टे ॥ यएवमि
ति ॥ पुरुपाभिधंब्रह्माणमितिशेपः । सवेत्ता यस्तुशत्रुः स्वाभिमतंअधिकार्यभिमतं पूर्वंप्राप्तुमभीप्सति तंब्रह्मविष्णुप्रसादतः
स्वयमतुष्टःसन्ओपेत्ओपतीतियोजना ॥ १ ॥ सोबिभेत्तस्मादेकाकीबिभेतीत्येतद्व्याचष्टे ॥ तस्येति ॥ निर्विवेकमितिक्रिया
विशेपणं । सहायमीक्षांचक्रेइत्येतद्व्याचष्टे ॥ विममर्शेति ॥ यद्यस्मान्मत्तोन्यद्वस्त्वंतरंकिमपिनास्ति तस्मादहंप्रत्यक्चैतन्याद्वि
तीयब्रह्मरूपःकस्मान्नुबिभेमीतिपरकीयव्याख्यानमसत् । चैतन्यैक्यस्याप्रामाणिकत्वादितिभावेन यन्मदन्यदित्यादिवीयायेत्यंतं

भाष्यं ॥ अहेयत्वंस्वरूपस्यसततः(सएवं)समचिंतयत् । ततोभवदहंनामासचाभूत्पुरुपाभिधः । ओषणात्सर्वपापानांपूर्वःपुरुपउच्यते । ना
रायणप्रसादेनयएवंपुरुपाभिधं । वेदस्वाभिमतंयस्तुपूर्वंप्राप्तुमभीप्सति । ओपेत्सर्वमतुष्टःसन्ब्रह्मविष्णुप्रसादतः ॥ १ ॥ तस्यत्वेकस्यसहसायतो
भीःसमजायत । तस्माद्यापिचैकस्यनिर्विवेकंभयंभवेत् । विममर्शततोब्रह्मायस्मान्मेबाधकोनहि ।

57 60

वाक्यंव्याचष्टे ॥ यस्मादिति ॥ पंचममुखच्छेत्तृत्वेनहरस्यैवबाधकत्वंस्यादित्यतआह ॥ इतइति ॥ द्वितीयाद्वैभयंभवति नतुस्वस्मात् द्वितीयंचाविद्याकल्पितंइतिव्याख्यानमसत् । अविद्याकल्पितत्वस्याप्रामाणिकत्वादितिभावेनकस्मादितिवाक्यं व्याचष्टे ॥ विष्णोरिति ॥ द्वितीयादित्येतत्त्रेधाव्याचष्टे ॥ समानादिति ॥ विरोधिनइत्येतदत्रापिसंबध्यते । पारवश्यतःहीनस्यस्वानधीनत्वतः । पारवश्यतःस्वस्यहीनाधीनत्वतोनेत्यर्थः । प्रकृतेत्रयाणामप्यभावादितिपक्षधर्मताद्रष्टव्या । तत्राद्यस्योपपादनंतदन्येषांपितृत्वतइति द्वितीयस्योपपादनंविष्णोरिति तस्येत्येतदत्रोभयत्रापिसंबध्यते । तृतीयमुपपादयति ॥ हीनमेवेति ॥ यतःसर्वंहीनंजगत् तस्यैव वशेएव नपुनःसतद्वशः तद्वाएतदवशमित्यर्थः । एवंहीनसद्भावमभ्युपेत्यतस्यस्वानधीनत्वाभावेन भयहेतुत्वंनास्तीत्युक्तं । इदानींहीनंनास्त्येवतदाऽनुत्पन्नत्वादित्याह ॥ नचेति ॥ जातंचनेतिसंबंधः । अधिकस्यविष्णोरतिप्रियत्वेपिअन्यस्मादधिकाद्भयंकिंनस्यादित्यतआह ॥ हरिरेवेति ॥ परःअधिकः ॥ २ ॥ सवैनैवरेमेतस्मादेकाकीनरमतइत्येतद्व्याचष्टे ॥ नेति ॥ ततएकत्वात् । सद्वितीयमैच्छदित्येतद्व्याचष्टे ॥ अथापीति ॥ अथशब्दोहेत्वर्थे अपिशब्दएवार्थे । रत्यभावादेवेत्यर्थः । सहैतावानासयथास्त्रीपुमांसौसंपरिष्वक्ताविति वाक्यंव्याचष्टे ॥ सइति ॥ पूर्वदेहंपरित्यज्यतावद्देहोभवदिति

भाष्यं ॥ मयासृज्यायतःसर्वेइतःपश्चात्तनोहरः । अतःकस्माद्बिभेमीतितस्यभीतिरपोहिता । विष्णोरतिप्रियत्वात्तुतदन्येषांपितृत्वतः । कस्माद्भयंभवेत्तस्यसमानाद्धिभयंभवेत् । विरोधिनोधिकाद्वापिहीनाद्वापारवश्यतः । हीनमेवयतस्तस्यसर्वमेवजगद्वशे । नचजातंतदासर्वंहरिरेवयतःपरः ॥ २ ॥ नरेमेसततोत्रह्यातस्मादेकस्यनोरतिः । अथापिपत्नीमैच्छच्चसस्थूलत्वमुपागतः ।

62

प्रतीतिनिरासार्थंसस्थूलत्वमुपागतइत्युक्तं । यत्किंचिद्दंपतीदेहद्वयसमपरिमाणकदेहेनसरस्वत्युत्पादनायोगाद्ब्रह्माचैवसरस्वती त्युक्तं । ब्रह्मासरस्वतीचेतिदंपती सएवतदेहवानेवस्थूलत्वमुपागतःसन्नित्यन्वयः । सइममेवात्मानंद्वेधापातयदित्येतद्व्याचष्टे ॥ तदेति ॥ ततःपातनात्पतिर्मन्वाख्यःपत्नीशतरूपाचाभवतामिपितरकीयव्याख्यानं अप्रामाणिकमितिभावेनततःपतिश्चपत्नी चाभवतामित्येतद्व्याचष्टे ॥ पातनादिति ॥ द्वंद्वात्परस्त्वप्रत्ययःउभयत्रापिसंबध्यते । शब्दइतिजात्यपेक्षयैकवचनं । पतित्व पत्नीत्वनिमित्तकःपतिरितिपत्नीतिशब्दःएनोरेतयोरजायतेत्यर्थः । पत्नीचेतिपाठेपतिःपत्नीचेतिशब्दइत्यर्थः । अन्यव्याख्यानेतु कथंनुमाऽऽत्मनएवजनयित्वेत्युत्तरवाक्यविरोधः । प्रजापतिनाशतरूपोत्पत्तिस्वीकारान्मनोश्चसंभोगकर्तृत्वादितिभावः । त स्मादिदमर्धबृगलमिवस्वइतिवाक्यंव्याचष्टे ॥ तस्मादिति ॥ तस्मात्द्विधाभूतैकदेहत्वात् तयोर्जायमानंसुखं । सप्तम्यर्थेवतिः । पात्रार्धद्वयस्थितघृतवदित्यर्थः । ततोमनुष्याअजायंतेत्येतद्व्याचष्टे ॥ ततइति ॥ मनुष्यशब्दोमनुष्येषुप्रसिद्धः अतःकथंदेवा नित्यादिव्याख्यानं इत्यतआह ॥ बोधस्येति ॥ मनुष्यतामनुष्यशब्दप्रवृत्तिनिमित्तं । अन्यथा सैषाब्रह्मगोतिसृष्टिर्यच्छ्रेय सोदेवानसृजतेत्युत्तरवाक्यविरोधःस्यादितिभावः ॥ ३ ॥ सोहेयमीक्षांचक्रेकथंनुमात्मनइत्यत्रसरस्वत्याअज्ञानाभक्त्यादिप्रती

भाष्यं ॥ दंपतीसहितौयावद्ब्रह्माचैवसरस्वती । तावद्देहोभवद्ब्रह्मातदादेहंद्विधाकरोत् । पातनात्पतिपत्नीत्व(पत्नीच)शब्दएनोरजायत । त स्मात्तयोरेकसुखंभवत्येवार्धपात्रवत् । ततस्तस्यामुमेशादीन्देवान्सर्वान्मनूनपि । जनयामासबोधस्यप्राधान्यंहिमनुष्यता ॥ ३ ॥

यते तांनिवारयंस्तिरोभावस्यप्रयोजनमाह ॥ **सर्वज्ञापीति** ॥ पुरुषेआगतेस्त्रियस्तिरोभवंतीतिस्त्रीस्वभावंदर्शयंती । ब्रह्मसृ-ष्टायाःस्वस्याःतत्संभोगमधर्ममिवेत्यर्थः । सरस्वतीब्रह्मणोर्गोत्वादिभावेप्रयोजनमाह ॥ **नानेति** ॥ ४ ॥ सोवेदहंवावसृष्टिरस्म्यहंहीदंसर्वमसृक्षीतिवाक्यंव्याचष्टे ॥ **सर्जनादिति** ॥ सृष्ट्यांहास्येतिफलवाक्यंव्याचष्टे ॥ **तद्विदिति** ॥ तत्पुत्रतांसाक्षात्पुत्रतां परंपरयापिपीलिकादिजन्मनोज्ञानफलत्वायोगात् ।: एतस्यामित्यस्यार्थःपिपीलिकांतरुद्रादाविति ॥ ५ ॥ अथेतीतिपदद्वयमपेक्षितपूरणेनव्याचष्टे ॥ **अथेति** ॥ अन्नमपीतिसंबंधः । अभ्यमंथदित्येतच्छेषंपूरयन्व्याचष्टे ॥ **ओष्टद्वयमिति** ॥ अंतरेवेतिसंबंधः । चशब्देनयोनेरपिसमुच्चयः । एवमेवमुखाच्चेवेत्येवकारचशब्दयोरर्थोज्ञेयः । समुखाच्चेत्यादिव्याचष्टे ॥ **तन्मुखादिति** ॥ एतस्यैवसाविसृष्टिरेषउह्येवसर्वेदेवाइतिवाक्यस्यहियस्माद्यःसर्वोपिदेवभेदएतस्यैवप्रजापतेःसाविसृष्टिस्तस्मादेषएवहिरण्यगर्भःसर्वेदेवाःनान्यद्देवतांतरमस्तीतिपरव्याख्यानंअसत् । विशिष्टैक्यस्यानंगीकारात् चैतन्यैक्यस्यवाधितत्वादितिभावेनसामानाधिकरण्यव्यपदेशोनिमित्तमाह ॥ **एवमिति** ॥ अनेनश्रौतोहिशब्दोहेत्वर्थइत्युक्तंभवति । नन्वेवंसतिसर्वेदेवाइ

भाष्यं ॥ सर्वज्ञापितुसादेवीविरिंचेभक्तिमत्यपि । तद्भार्यतामात्मनश्चनितरांधर्ममीक्षती । अनाद्यनंतसंबंधमुभयोरपिजानती । स्त्रीस्वभावंदर्शयंतीसाऽधर्ममिवचैक्षत । नानासृष्टिप्रसिद्ध्यर्थंसागोत्वादिकमाव्रजत् । वृषादिरूपतांसोपिप्राप्यसृष्टेदमंजसा ॥ ४ ॥ सर्जनात्सृष्टिनामाभूत्तद्वित्तत्पुत्रतांव्रजेत् । पिपीलिकांतरुद्रादौयथायोग्यत्वमात्मनः ॥ ५ ॥ अथान्नादमथाप्यन्नंस्रक्ष्यामीतिविचिंतयन् । ओष्टद्वयंममंथांतर्हस्तौचैवपरस्परं । तन्मुखाच्चैवहस्ताभ्यामंतरग्निरजायत । एवंसर्वस्यहेतुत्वात्सर्वस्यापिपवित्वतः ।

तिप्रयोगस्यामुख्यत्वंस्यात् मुख्येसत्यमुख्यग्रहणायोगात् इत्यतआह ॥ स्वतंत्रेष्विति ॥ स्वतंत्रेष्वेवेतिसंबंधः । अथयत्किं चेत्यादिसोमइत्यंतंवाक्यंव्याचष्टे ॥ सइति ॥ श्रेयसइतिदेवानांश्रेयस्त्वोक्त्यार्थाच्चतुर्मुखस्यावमत्वंसूचितं । तदुभयंचनपरस्परावधिकं किंतुकयाचनविवक्षयेतिवक्तुं अथयन्मर्त्यःसन्नितिवाक्यंप्रवृत्तमित्यभिप्रेत्यतद्वाक्यद्वयंव्याचष्टे ॥ सर्वेति ॥ पुरापूर्वं सरस्वत्यामिथुनीभावादिमर्त्यधर्मतयावमइत्यनेनश्रुतौमर्त्यःसन्नित्येतत्पूर्ववाक्यसूचितावमत्वोपपादकमिति । आयुर्मात्रतोधिकानित्यनेनामृतानित्येतत्श्रेयसइत्युक्तश्रेयस्त्वोपपादकमित्युक्तंभवति । अन्यथायच्छ्रेयसोदेवानसृजतेत्यनेनैवातिसृष्टत्वस्योपपादितत्वात् अस्यवाक्यस्यवैयर्थ्यंस्यादितिभावः । ननुपरस्परावधिकत्वेनैवब्रह्मणोदेवानांचावमत्वश्रेयस्त्वेकिंनस्यातां इत्यत उक्तं सर्वाधिकोऽप्ययोग्यत्वादितियोग्यताहीनानितिच । अतिसृष्ट्यामितिफलवाक्यंव्याचष्टे ॥ एवमिति ॥ यःपुरुषःएवं सृष्टिंवेद सविष्णुप्रसादतोदेवलोकेजायतइतिसंबंधः । देवलोकेजननमात्रेणनदेववत्तस्यसुखमित्याह ॥ आत्मेति ॥ यद्वा तदयोग्यानांफलमाह ॥ आत्मेति ॥ ननुततोमनुष्याअजायंतेत्यस्य ततस्तस्यामुमेशादीन्देवान्सर्वान्मनूनपि । जनयामासेतिव्याख्यानमयुक्तं । तथासतितद्यदिदमाहुरित्याद्युत्तरग्रंथस्यदेवतासृष्टिप्रतिपादकस्यवैयर्थ्यापत्तेरित्यतस्तस्यप्रयोजनमाह ॥

भाष्यं ॥ सर्वेदेवाएपएवेत्याहुर्वेदविदोजनाः । स्वतंत्रेपुयतःशब्दावर्तेयुःसर्वएवच । सरेतसःपुनःसोममसृजद्ब्रह्मविद्वरः । सर्वाधिकोपियोग्यत्वान्मर्त्यधर्मतयापुरा । अवमोयोग्यताहीनानप्यायुर्मात्रतोधिकान् । यतोस्मागतिसृष्टिस्तंदेवंयोवेदपूरुषः । विष्णोःप्रसादतःसृष्टिंदेवलोकेसजायते । आत्मयोग्यानुसारेणसुखज्ञानादियुक्ततेतित्रह्मतर्के ।

॥ ३२ ॥

देवं

भगवदिति ॥ एतत्प्रागुक्तंसृष्टिकर्तृत्वं तथाचैतस्यैवसाविसृष्टिरितिपूर्वोक्तमेवसृष्टिकर्तृत्वमनूद्यतत्तस्माद्भगवदुपासनादिति तस्यभगवदुपासनानिमित्तकत्वमुच्यते नतुदेवसृष्टिःपुनरुच्यतइति नवैयर्थ्यमितिभावः ॥ ६ ॥ इतिप्राजापत्यब्राह्मणं ॥४॥ ततश्चायंखंडार्थः ॥ इदमग्रेएतस्याग्रे परमात्मैवासीत् । ततःपुरुषविधोब्रह्मासीत् । सब्रह्मासर्वादिशोऽनुवीक्ष्यदृष्ट्वा आत्मनोन्यन्नापश्यत् । सब्रह्मा स्वरूपस्यस्वाहेयत्वंस्मरन् अहमस्मीति अग्रेपूर्वं व्याहरत् ततोहंनामाभवत् । यस्मादेवंतस्मात्तत्सृष्टोपिलोकः एतर्हिएतस्मिन्काले आमंत्रितःकस्त्वमितिपृष्टो ऽहमयमित्येव अग्रेप्रथममुक्त्वा ऽथानंतरं अन्यत्पिंडविषयं यदस्य पुरुषस्यमातापितृकृतंभवति तन्नामप्रब्रूतेकथयति । सब्रह्मा यद्यस्मात् सर्वस्मादस्मादधिकारिवर्गात् पूर्वोमुख्यःसन् सर्वान्पाप्मनः औषत्ददाह तस्मात्पुरुषःपुरुषशब्दवाच्यः । यएवमुक्तप्रकारेण पुरुषाभिधंब्रह्माणं वेद सःतं ओषतिदहति । तंकं योस्मादधिकारिणः पूर्वःसन् बुभूषतिभवितुमिच्छति तदभिमतंस्वयंप्राप्तुमिच्छतीतियावत् तमितिसंबंधः ॥ १ ॥ सब्रह्मा ऽबिभेत्भीतवान् एकाकित्वात् यस्मादेवंतस्मात् अद्यतनोयः कोपि एकाकी निर्विवेकंबिभेति । सोयंब्रह्मा ईक्षांविमर्शं चक्रेह ।

भाष्यं ॥ भगवदुपासनामाहात्म्यमेतदितिदर्शयितुंतद्यदिदमाहुरित्याद्यारंभः ॥ ६ ॥ इतिप्राजापत्यब्राह्मणं ॥ ४ ॥

उप० ॥ आत्मैवेदमग्रआसीत्पुरुषविधःसोऽनुवीक्ष्यनान्यदात्मनोऽपश्यत्स्योऽहमस्मीत्यग्रेव्याहरत्ततोऽहंनामाभवत्तस्माद्प्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्रउक्त्वाऽथान्यन्नामप्रब्रूतेयदस्यभवतिसयत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मनऔषत्तस्मात्पुरुषओषतिहवैसतंयोऽस्मात्पूर्वोबुभूषतियएवंवेद ॥ १ ॥ सोऽबिभेत्तस्मादेकाकीबिभेतिसहायमीक्षांचक्रे

किमिति यद्यस्मादन्यत्मद्बाधकं नास्ति अतःकस्माद्बिभेमीति । ततएवविमर्शनादेव अस्यभयंवीयायविस्पष्टंगतवत् । तत्रोप
पत्तिमाह ॥ कस्मादिति ॥ हियस्मा द्वितीयाद्विरोधिनःसमाना द्विरोधिनोधिकात् स्वानधीनहीनाद्वा भयंभवति तच्चात्रना
स्ति अतःकस्मादभेष्यत् ॥ २ ॥ सवाइत्येतत्पूर्ववद्व्याख्येयं । सब्रह्मा एकस्यरमणाभावात् द्वितीयंपत्न्याख्यमैच्छत् । स्त्रीपुमांसौस
रस्वतीब्रह्माणौ संपरिष्वक्तौसहितौ यथायावत् तद्देहद्वयंमिलितंयावत्परिमाणकं एतावान्एतद्देहवानास । सइममेवस्थूलमेवात्मानं
देहं द्वेधापातयत् । ततःपातनात् ब्रह्मसरस्वत्यौ पतिश्चपत्नीचपतिपत्नीशब्दवाच्यौ अभवतां । तस्मादेतयोरेकदेहविभक्तदेह
वत्त्वात् इदंएतद्देहद्वयनिमित्तकं अनयोर्जायमानं स्वःसुखं अर्धवृगलमिवएकपात्रार्धद्वयस्थितघृतवत् । अत्राभियुक्तसंमतिमाह
॥ इतीति ॥ तस्मादर्धांगित्वादेव अयंपुरुषदेहसन्निहितः आकाशःप्रदेशः स्त्रियापूर्यतएव । तांसरस्वतींसमभवत् । ततःसं
भोगानंतरं मनुष्यावोधप्रधानकादेवाद्याः अजायंत ॥ ३ ॥ साऽहइयंइतिपदच्छेदः । यानादिकालतोब्रह्मणःस्त्रीसैवेयंसरस्वती
ईक्षांविचारं चक्रेह किमिति । मामां आत्मनःस्वस्मादेव जनयित्वा कथंनुसंभवतिसंभोगंकरोति । हंतेत्यश्चार्ये । तिरोसानीति

उप० ॥ यन्मदन्यन्नास्तिकस्मान्नुविभेमीति । ततएवास्यभयंवीयायकस्माद्ध्यभेष्यद्द्वितीयाद्वैभयंभवति ॥ २ ॥ सवैनैवरेमेतस्मादेकाकी
नरमतेसद्वितीयमैच्छत् । सहैतावानासयथास्त्रीपुमांसौसंपरिष्वक्तौसइममेवाऽऽत्मानंद्वेधापातयत्ततःपतिश्चपत्नीचाभवतांतस्मादिदमर्धवृगलमिव
स्वइतिहस्माऽऽहयाज्ञवल्क्यस्तस्मादयमाकाशःस्त्रियापूर्यतएवतांसमभवत्ततोमनुष्याअजायन्त ॥ ३ ॥ सोहेयमीक्षांचक्रेकथंनुमाऽऽत्मनएवजन
यित्वासंभवतिहन्ततिरोऽसानीति

तिरोभूतासानीति । एवंलौकिकस्त्रीस्वभावंदर्शयित्वागवादिनानासृष्ट्यर्थं सासरस्वती गौरभवत् । इतरश्चतुर्मुखः वृषभःसन् तांसमभवत् । ततोगोवृषसंयोगेन गावोऽजायंत । इतरासरस्वती वडवाऽश्वाअभवत् । इतरः अश्ववृषःअश्वश्रेष्ठः । तांसम भवदितिसंबंधः । इतरागर्दभीअभवत् । इतरोगर्दभः तामेवगर्दभीमेव समभवत् । ततोबडवाश्ववृषादिसंभोगेन एकशफं अश्वगर्दभाद्येकशफोपेतजातीयमजायत । बस्तःच्छागः शिष्टंपूर्ववत् । एवमेवोक्तप्रकारेणसन्ब्रह्मा आपिपीलिकाभ्यःपिपीलिकापर्यंतं यदिदंकिंचमृगकीटादिकं मिथुनंमिथुनसृष्टियोग्यं तत्सर्वमसृजत ॥ ४ ॥ सब्रह्माऽवेत्व्यजानात् । किमिति अहमेव सृष्टिःसृष्टिनामकोस्मि । कुतः हियस्मादहं इदंदेवादिपिपीलिकांतं सर्वं असृक्षिसृष्टवान् इति । ततःसृष्टिकर्तृत्वेनप्रवृत्तिनिमित्तेनसृष्टिरस्मीतिब्रह्मणोज्ञाना त्सृष्टिःसृष्टिनामको ऽभवदितिवेदपुरुषःस्वयमाह । योयोग्यः एवमुक्तनिमित्तेनसृष्टिनामानंब्रह्माणं वेद सोस्यचतुर्मुखस्य कर्तरिषष्ठी एतस्यांरुद्रादिपिपीलिकांतविषयायां सृष्ट्यांभवति । साक्षाद्ब्रह्मसृष्टानामेतेषांमध्येस्वयोग्यतानुसारेणतत्पुत्रोभवतीत्यर्थः ॥ ५ ॥ भोक्तृसृष्टिमुक्त्वापाचकसृष्टिमाह ॥ अथेति ॥ अथभोक्तृसृष्टयनंतरं । अन्नमन्नादंच स्रक्ष्यामीतिचिंतयन् मुखस्यओष्ठद्वयंहस्तद्वयंयोनिंचअंतःपरस्परमभ्यमंथत् । समुखाद्योनेश्चहस्ताभ्यांचाग्निमसृजत । तस्मा

उप० ॥ सागौरभवदृषभइतरस्तांसमेवाभवत्ततोगावोऽजायन्तवडवेतराऽभवदश्ववृषइतरोगर्दभीतरागर्दभइतरस्तांसमेवाभवत्ततएकशफमजायताजेतराऽभवद्बस्तइतरोऽवितरामेषइतरस्तांसमेवाभवत्ततोऽजावयोऽजायन्तैवमेवयदिदंकिंचमिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत ॥ ४ ॥ सोऽवेदहंवावसृष्टिरस्म्यहंहीदंसर्वमसृक्षीतिततःसृष्टिरभवत्सृष्ट्यांहास्यैतस्यांभवतियएवंवेद ॥५॥ अथेत्यभ्यमन्थत्समुखाच्चयोनेर्हस्ताभ्यांचाग्नि

दाहकाग्न्युत्पत्तिस्थानत्वात् हस्तद्वयंमुखंचेत्येतदुभयं अंतरतःअलोमकं । योनिअंतरतः अलोमकाहीतिप्रसिद्धं । पूर्वोक्तदेवता
स्रष्टृत्वंकिंस्वसामर्थ्यादित्यतो भगवदुपासनाजनितप्रसादादित्याह ॥ तद्यदिदमिति ॥ एकैकंदेवमुद्दिश्य अमुंरुद्रं अमुंइंद्रं
यजेतियत् साविसृष्टिःविशिष्टसृष्टिः । एतस्यैवचतुर्मुखस्यैव हियस्मा दुतस्मादेव सर्वेदेवाएषएवेतियदाहुर्वेदविदः इदं तत्तस्मात्
भगवदुपासनाजनितप्रसादादिति । अथपाचकसृष्ट्यनंतरं यत्किंचेदं आर्द्रद्रवात्मकं अन्नं तत्रेतसोसृजत । तदार्द्रं सोमएवसो
माभिमन्यमानकमेव । स्रष्टव्यांतरशंकांवारयति ॥ एतावद्वाइति ॥ इदंसृज्यंसर्वं एतावद्वाएतावदेव । कियदित्यतआह ॥
अन्नमिति ॥ प्रजाश्चेत्यपिग्राह्यं । किमन्नंकोन्नादइत्यतआह ॥ सोमएवेति ॥ यद्वाअन्नान्नादयोःसृष्टेःप्रागनुक्तत्वात्कथमेत
दित्यतआह ॥ सोमएवेति ॥ सैषाप्रागुक्ता ब्रह्मकर्तृकादेवसृष्टिः अतिसृष्टिः । कथं यद्यस्मात् अवमोब्रह्मा श्रेयसः अधिका
न्देवानसृजत तस्मादतिसृष्टिरितिसंबंधः । देवोत्तमस्यब्रह्मणःकथमवमत्वं देवानांचकथंश्रेयस्त्वं इत्यभिप्रेत्यशंकते ॥ अथेति॥
ब्रह्मणोदेवानांचयदवमत्वंश्रेयस्त्वंच नतत्परस्परावधिकं किंतुकयाचनविवक्षयेतिभावेनोत्तरमाह ॥ यदिति ॥ यद्यस्मान्मर्त्यः
सन्मर्त्यधर्मोपेतःसन् अमृतान्अमृताइवामृतान्बहुकालंजीवतः असृजत तस्माच्छ्रेयसोदेवानसृजतेतिसंबंधः । तथाचब्रह्माम

उप० ॥ मसृजततस्मादेतदुभयमलोमकमन्तरतोऽलोमकाहियोनिरन्तरतःतद्यदिदमाहुरमुंयजामुंयजेत्येकैकंदेवमेतस्यैवसाविसृष्टिरेषउह्येव
सर्वेदेवाः । अथयत्किंचेदमार्द्रंतद्रेतसोऽसृजततदुसोमएतावद्वाइदꣳसर्वमन्नंचैवान्नादश्चसोमएवान्नमग्निरन्नादःसैषाब्रह्मणोऽतिसृष्टिः । यच्छ्रेयसो
देवानसृजताथयन्मर्त्यः

र्त्यधर्मतएवावमोनतुस्वरूपयोग्यतया । देवाश्चायुर्मान्तएवाविकानतुस्वरूपेणेतिभावः । वेत्तुःफलमाह ॥ अतिसृष्ट्यामिति ॥ योधिकारी एवमुक्तप्रकारेणअतिसृष्टिंवेद सोस्यब्रह्मणः एतस्यां अतिसृष्ट्यांदेवसंबंधिन्यांसृष्ट्यां भवति देवलोकेजायतइति यावदिति ॥ ६ ॥ इतिप्राजापत्यब्राह्मणं ॥ ४ ॥ आत्मैवेदमग्रआसीदित्युक्तस्यात्मनस्तद्धेदंतर्ह्याहुरित्यनेनयोपासनोक्तात स्याःप्रकारंदर्शयन्प्रागुक्तांचतुर्मुखात्सृष्टिंप्रपंचयत्यनेनाव्याकृतब्राह्मणेन । अत्रविश्वंभरइत्येतत्विश्वंभरोग्निःजाठरत्वेनसर्वंभर णादित्यग्निपरत्वेनपरैर्व्याख्यातंतदसत् । अग्नेर्जाठरत्वेनपाचकत्वेपिभरणहेतुत्वाभावात् । वायोस्तुनसस्कंधगतोलोकान्योबिभ र्तिमहाबलः वायुनावैगौतमसूत्रेणेत्यादिश्रुत्याभरणहेतुत्वस्यप्रमितत्वादितिभावेनाह ॥ विश्वंभरइति ॥ एतेनविश्वंभरशब्द स्यभगवतिप्रसिद्धत्वात्कथंतस्यैव सएषइहप्रविष्टइत्यत्रदृष्टांतत्वमुच्यते अभेदादित्येतदपिपरास्तं । ननुशरीरांतःप्रविष्टस्यभगव तोपूर्णत्वाभावात्कथमकृत्स्नोहिसइत्युक्तमित्याशंकापरिहारकत्वेनसयोतइत्येतद्वाक्यंप्रवृत्तमित्याह ॥ अकृत्स्नइति ॥ इत्यादि वाक्यं । अभिप्रायःअभिप्रायप्रदर्शकं तथाचप्राणत्वाद्येकैकभागमात्रोपासकस्याकृत्स्नोपासकत्वेनतदुपासनाविषयत्वाभिप्रायेणै वाकृत्स्नोहिसइत्युक्तं नत्वपूर्णत्वाभिप्रायेणेतिभावः । तान्येतान्यस्यात्मनःकर्मनामान्येवनतुवस्तुमात्रविषयाणीतिपरेषांव्याख्या नमसत् । आत्मशब्दस्यापिवस्तुमात्रविषयकत्वाभावात् इत्यभिप्रायेणतान्यस्यैतानिकर्मनामान्येवेतिवाक्यसेवकारव्यावर्त्यंप्रदर्श

> उप० ॥ सन्नमृतानसृजततस्मादतिसृष्टिरतिसृष्ट्यांहास्यैतस्यांभवतियएवंवेद ॥ ६ ॥ इतिप्राजापत्यब्राह्मणं ॥ ४ ॥
>
> भाष्यं ॥ विश्वंभरोवायुः । अकृत्स्नोहिसइत्यस्याभिप्रायःसयोतएकैकमुपास्तेनसवेदेत्यादि ।

यन्व्याचष्टे ॥ प्राणइत्यादीति ॥ कस्तर्हिगुणसंपूर्णत्ववाचकइत्यतोऽत्रह्येतइतिवाक्यतात्पर्यमाह ॥ आत्मशब्दएवेति ॥ आत्मेत्येवेत्यादिवाक्यस्यात्मेत्येवोपासीत नकेनचिद्विशेषणेनविशिष्टतया । तत्रहेतुमाह । अत्रेति । अत्रास्मिन्निरुपाधिकेआत्मनि एतेसर्वेप्राणाद्युपाधिकृताविशेषाः एकमभिन्नाभवंति तस्मादात्मेत्येवोपासीत । अनात्मनोपिविद्यमानत्वात्कथमात्मोपासने नियमविधानमित्यतआह । तदेतदिति । तदेतत्तदेव पदनीयंगमनीयं किंतत् अस्यसर्वस्य निर्धारणेषष्ठी अनात्मपदार्थेषु यद्
42 यदात्मेतिपरेषांव्याख्यानमसत् । ब्रह्मणोनिर्विशेषत्वस्यएकीभावस्यचनिराकरिष्यमाणत्वादितिभावेनतद्वाक्यत्रयंव्याचष्टे ॥ अस्येति ॥ ननुआत्मशब्दस्यगुणसंपूर्णवाचकत्वेपितेनशब्देनपरमात्मोपास्तिःकुतःअन्योपास्तिःकुतोनस्यादित्यतउक्तं ॥ अस्येति ॥ आत्मनःसर्वगुणाश्रयत्वेपिआत्मशब्देनैवतदुपासनंकुतःप्राणादिशब्देनकुतोनेत्यतउक्तं ॥ सर्वगुणवाचकेनेति ॥ अत्र हीतिवाक्यार्थस्यहेतुत्वेनानुवादोयं । अनेनह्येतत्सर्ववेदेतिवाक्यंतस्यैवपदनीयत्वेहेतुमाह । अनेनात्मज्ञानेन हियस्मादेतत्सर्वं अ
43 नात्मजातंवेदजानातीतिपरेषांव्याख्यानं । तदसत् । एकविज्ञानेनसर्वविज्ञानस्यतदभिप्रेतस्यदूष्यमाणत्वात् इतिभावेनतद्वाक्यं अनूद्यपूर्ववाक्यार्थेहेतुत्वेनव्याचष्टे ॥ अनेनेति ॥ हिशब्दार्थोयस्मादिति । उपासकस्येतिशेषः । यस्मात्सर्वज्ञानप्रदःतस्मात्स

भाष्यं ॥ प्राणइत्यादिनामानिपरमेश्वरस्यनसर्वगुणसंपूर्णतांवदंति । किंतुप्राणनादिकर्मकर्तृत्वमेववदंति । आत्मशब्दएवसर्वगुणसंपूर्णत्वंवदति । अस्यसर्वस्यगुणजातस्यायमात्मैवपदनीयआश्रयोयस्मादतस्तंसर्वगुणवाचकेनात्मशब्देनैवोपासीत । अनेनह्येतत्सर्वंवेदयस्मात्सर्वज्ञानप्रदस्तस्मात्सर्वगुणसंपूर्णइत्येवोपासनंतस्ययुक्तं ।

॥ ३५ ॥

र्वगुणः यस्मात्सर्वगुणःतस्मात्सर्वगुणइत्येवोपासनंतस्ययुक्तमितियोज्यं । ननुभगवतःसर्वज्ञानप्रदत्वेपिसर्वगुणवत्त्वंकुतः तेनस र्वज्ञमात्रलाभेपीतरगुणानामलाभादित्यतोहेतुहेतुमद्भावंस्पष्टयति॥तदुपासनादेवेति॥ अनेनोत्तरफलवाक्यानुसारेणश्रुतौसर्वं वेदेत्येतदुपलक्षणमित्युक्तंभवति।यथाहवैलोकेपदेनगवादिखुरांकितेनदेशेनान्विष्यमाणोनष्टंविवक्षितंगोसुवर्णादिवस्तु विंदेतलभे त एवंश्रुत्यादिनाऽत्मनिलब्धेतुसर्वंलभेतइतियथाहवैपदेनेतिवाक्यंपूर्ववाक्यान्वितत्वेनपरैर्व्याख्यातं तदसत् । यथैवंशब्दाभ्यांय थेत्यादेःफलवाक्येनान्वयस्यस्पष्टंप्रतीतेः पदशब्दस्यखुरांकितप्रदेशार्थकत्वेलाक्षणिकत्वापत्तेश्चेतिभावेनपदशब्दस्यार्थंवदन्यथे त्यादिवाक्यंव्याचष्टे ॥ पद्यतइति ॥ एवंवेदेत्यत्रज्ञानमात्रंनविवक्षितं आत्मेत्येवोपासीतेत्युपक्रमानानुगुण्यादितिभावेनोक्तं ॥ भगवदुपासनादिति ॥पुनरुक्तिपरिहाराय श्लोकस्त्रिष्टैःसहसंघातमितिश्लोकशब्दोव्याख्यातः।तदसत् ।अपदार्थत्वादितिभा वेनविग्रहप्रदर्शनपूर्वकंश्लोकशब्दार्थमाह ॥ शमिति ॥ शकारस्याकारलोपोनिर्वचनत्वात् । सुखज्ञानयोरात्मानुपासकानामपि सत्त्वात्कथंतत्फलमित्यतउक्तं ॥ परमेति ॥ लोकशब्दस्यज्ञानार्थत्वेधातुंपठति ॥ लुगिति ॥ धातोर्धातुव्याख्यानात् । स्वकृ तंव्याख्यानंद्रढयन्खंडद्वयंप्रमाणेनव्याचष्टे ॥ आसीदित्यादिना ॥ आत्मैवेदमग्रइति ब्रह्मवाइदमग्रइति पूर्वोत्तरवाक्यानु रोधेनतावदादिवाक्यंव्याचष्टे ॥ आसीदिति ॥ तर्हीत्यस्यार्थःपूर्वमिति । तदिदमव्याकृतंविकाररहितमित्यस्य हरिरिति दे

भाष्यं ॥ तदुपासनादेवसर्वज्ञत्वादयोभवंतिकिमुतस्येति । पद्यतेअनेनेतिपदंसाधनं । यथातत्साधनेनतत्तत्फलंप्राप्नुयादेवंसर्वगुणयुक्तत्वेनभ गवदुपासनात्कीर्तिंश्लोकंचविंदते । शंलोकःश्लोकः । परमानंदंपरमंज्ञानंचेत्यर्थः । लुक्प्रकाशइतिधातोः । आसीदेकोहरिःपूर्वंदेवीनारायणीतथा ।

वीतिचार्थद्वयं । तदेववाक्यंप्रकारांतरेणव्याचष्टे ॥ **अन्यदिति** ॥ तदिदमित्यस्यार्थोन्यदिति । अव्याकृतमित्यस्याव्यक्ततांया तामिति । तन्नामरूपाभ्यामेवेत्येतत् तदव्याकृतंनामरूपाभ्यांस्वयमेवव्याक्रियतेतिप्रतीतिनिरासायव्याचष्टे ॥ **तद्व्यक्तमिति** ॥ सएषइहप्रविष्टइत्येतद्व्याचष्टे ॥ **सृष्ट्वेति** ॥ आनखाग्रेभ्यइतिवाक्यानुरोधाद्देहांश्चेत्युक्तं । देवांश्चेत्यपिक्वचित्पाठः । अनेनेहेति सृष्टेजगतीतिव्याख्यातंभवति । यथाक्षुरइत्यादिवाक्यद्वयंव्याचष्टे ॥ **यथेति** ॥ यद्यपिश्रुतौक्षुरस्यक्षुरधानेअव्याप्यवर्तमान त्वात्परमात्माप्यव्याप्यवर्ततेकिमित्याशंकापरिहारायविश्वंभरइत्यनंतरंप्राणदृष्टांतोक्तिः । तथापिप्राधान्यज्ञापनायात्रादौतदुक्ति रितिज्ञेयं । सर्वेतंनपश्यंतीत्यन्यथाप्रतीतिनिरासाय तंनपश्यंतीत्येतद्व्याचष्टे ॥ **प्रविष्टमिति** ॥ पृथग्जनाःमूर्खाः । अकृत्स्नोहि सइत्यस्य सयोतइत्युत्तरवाक्यानुसारेणतात्पर्यमाह ॥ **प्रविष्टइति** ॥ प्राणनादिकर्तेत्यपिवक्तव्यं । तस्मादयंप्रवेशः प्राणना दिच तद्गुणभागस्तस्मा ज्जानंश्चजानन्नपि प्रविष्टइत्यादिकमेवजानन् । सर्वशःसाकल्येन नजानातीतिसंबंधः । अनेनाकृत्स्नवि द्वेदनविषयत्वादकृत्स्नोहीत्युक्तइत्युक्तंभवति । तान्यस्यैतानिकर्मनामान्येवेत्येतद्व्याचष्टे ॥ **प्राणादीति** ॥ तुशब्दएवार्थे कर्म नामान्येवेतिसंबंधः । अकृत्स्नोह्येपोतएकैकेनभवतीतिवाक्यंव्याचष्टे ॥ **तस्मादिति** ॥ यस्मात्प्राणादिनामानिकर्मनामान्येवत

भाष्यं ॥ अन्यदव्यक्ततांयातंतद्व्यक्तमकरोद्धरिः । सृष्ट्वाजगदिदंसर्वंसृष्ट्वादेहां(वां)श्चसर्वशः । आकेशादानखाग्रेभ्यःप्रविष्टःपुरुषोत्तमः । यथाप्राणःशरीरेषुक्षुरोयद्वत्क्षुरस्तुके । प्रविष्टमपितंविष्णुंनपश्यंतिपृथग्जनाः । प्रविष्टइतिजानंश्चनैनंजानातिसर्वशः । यस्मात्तद्गुणभागोयंप्रवेशःप्राणनादिच । तस्मात्प्राणादिनामानिकर्मनामानितस्यतु ।

स्मादित्यर्थः । अनेनहिशब्दातःशब्दादुक्तार्थौभवतः । प्राणादिनाम्नोपासकोकृत्स्नोपासकःकुतइत्याशंकापरिहारकत्वेनसयोतए
कैकमुपास्तेनसवेदेतिवाक्यंव्याचष्टे ॥ यस्मादिति ॥ अनेननवेदेत्यत्रसर्वशइतिशेषइतिसूचितं । ननुपरमात्मनःप्राणनादिमा
त्रगुणकत्वेकथंतद्वेत्तालद्गुणभागवित्तिदितिस्यादित्यतआह ॥ पूर्णत्वेपीति ॥ अतएवैकैकमितिएकैकेनेतिचोक्तमितिभावः । क
स्तर्हिकृत्स्नवेत्तेत्यतउत्तरवाक्यानुसारेणाह ॥ कृत्स्नस्येति ॥ आत्मेत्येवेत्येवशब्दसंबंधः यच्छब्दश्रवणात्सइतिग्राह्यं । तेनचै
वशब्दसंबंधः । आत्मेत्येवोपासीतात्रह्येतेसर्वएकंभवंतीतिवाक्यद्वयंव्याचष्टे ॥ चिदिति ॥ यस्माच्चिदानंदादयोगुणाःयस्यस
दैवाप्ताः सहरिः तस्मात्गुणानामाप्तित आत्मेतिप्रविज्ञेयइतिसंबंधः । प्रवीत्युपसर्गाभ्यांज्ञानविशेषरूपोपासनोक्ता । यथाप्राणा
दिशब्दस्यचिदानंदादिसर्वगुणानभिधायित्वं तथात्मशब्दस्यापिप्राणनादिकर्मानभिधायित्वेतत्प्रहाण्यात्मेत्युपास्तौकिंनियामक
मित्यतआह ॥ प्राणनादीनीति ॥ चिदानंदादिगुणसमुच्चयार्थश्चशब्दः । प्राणनत्वादिविशेषरूपेणेतिविशेषार्थकस्तुशब्दः ।
अनेनात्रह्येतइतिवाक्यंप्रकारांतरेणोक्ततात्पर्यं । तदेतत्पदनीयमित्येतद्व्याचष्टे ॥ तदिति ॥ अनेनह्येतत्सर्वंवेदेतिवाक्यंव्याचष्टे
॥ यतइति ॥ हिशब्दार्थोयतइति सर्वविदित्युपलक्षणं यतइतिश्रवणात्ततइतिग्राह्यं तस्यज्ञेयस्य आत्मनामीश्वरः

भाष्यं ॥ तस्मात्प्राणादिनाम्नायउपास्तेहरिमव्ययं । अकृत्स्नोपासकःसस्याद्यस्मात्तद्गुणभागवित् । पूर्णत्वेपिपरेशस्ययस्तुतद्गुणभागवित् ।
अकृत्स्नवित्स्यात्कृत्स्नस्यवेत्तात्मेतिविदेवयः । चिदानंदादयोयस्यगुणाआप्ताःसदैवतु । सआत्मेतिप्रविज्ञेयोगुणानामाप्तितोहरिः । प्राणनादीनिकर्मा
णिचात्मशब्दोदितानितु । तदेतदात्मरूपंहिगुणनाम्नाश्रयत्वतः । पदनीयमितिप्रोक्तंयतस्तज्ज्ञोपिसर्ववित् । सार्वज्ञादिगुणास्तस्यकिमुतात्मेश्वरस्यतु ।

आत्मा चासावीश्वरश्चेति वा । प्रग्रहीत्रपेक्षयादातरि विशेषद्योतनाय तु शब्दः । यथाह वैपदेनेत्यादि फलवाक्यं व्याचष्टे ॥ एवमिति ॥ वेदोपास्ते आत्मेत्येवोपासीतेत्युक्तेर्वेपानम्यधिकारः । न चैवं ब्रह्मादिव्यतिरिक्तानां सर्वगुणोपास्त्ययोग्यानां उपास्त्यभावापत्तिः । आत्मशब्दस्य तत्तद्योग्यतानुसारेणैव गुणाभिधायकत्वात् । अत एवोत्तममंदाधिकारिविवक्षया सर्वगुणैर्युक्तं सर्वजीवेश्वरमिति चोक्तम् ॥ १ ॥ तदेतत्प्रेय इत्येतद्वाक्यं स्वात्मनो जीवस्य प्रियत्वमुच्यत इति प्रतीतिं निवारयन्व्याचष्टे ॥ सइति ॥ सप्रलयाग्रवर्ती एषः सर्वत्र प्रविष्ट इत्यर्थः । अनेन तदेतदित्युक्तार्थं । यद्यपि श्रुत्यनुसारेणान्यस्मादित्यनेनैवात्मनोपि संग्रहः तथापि उत्तरग्रंथोपक्षेपाय तथात्मन इति पृथगुक्तं । ननु पुत्रवित्तादीनामात्मार्थत्वेन स्वभावतः प्रेष्ठत्वाभावेपि स्वस्यैव स्वभावतः प्रेष्ठत्वात् विष्णुः कथं स्वभावतः प्रेष्ठ इत्यत आह ॥ आत्मनोपीति ॥ पुत्रादिभ्यः आत्मनः प्रियत्वे विशेषद्योतनार्थस्तु शब्दः । ननु स्वात्मनः प्रियत्वं तेन कृतमिति तदा स्यात् यद्यप्रियत्वं कदाचित्स्यादित्यपेक्षायामाह ॥ आत्मनइति ॥ कुर्यात्करोति स्वाप्रियत्वं चेति संबंधः । निरयायकर्माणि करोतीत्युक्त्याप्रातांत्स्वाप्रियत्वस्य स्वाधीनत्वशंकां परिहरति ॥ सचेदिति ॥ आत्मानमप्रियं करोतीत्यप्रियकृत् । नन्वेवं स्वात्मादेः प्रियत्वस्य विष्णुकृतत्वेनास्वाभाविकत्वेपि विष्णोः स्वभावतः प्रेष्ठत्वं कुतः इत्यत आह ॥ अ

भाष्यं ॥ एवं सर्वगुणैर्युक्तं सर्वजीवेश्वरं हरिं । यो वेद तत्तत्साध्यं तु यथातैस्तैस्तु साधनैः । प्राप्नुयादेवमेवासौ कीर्तिं च परमं सुखं । ज्ञानं च परमां विंदेन्मुक्तः सन्नात्र संशयः ॥ १ ॥ स एष विष्णुर्भगवान्पुत्राद्वित्तात्तथात्मनः । अन्यस्मादपि सर्वस्मात्प्रेष्ठ एव स्वभावतः । आत्मनोपि प्रियत्वं तु तेनैव कृतमंजसा । आत्मनो निरयायैव कुर्यात्कर्माणि नित्यशः । यतोतः स्वात्मनश्चापि स्वाप्रियत्वमुदाहृतं । सचेदप्रियकृद्विष्णुर्नात्मापि प्रियतां व्रजेत् ।

स्मिन्निति ॥ यस्मादितिशेषः । अस्मिन्हरौ एकोमुख्यः स्वभावतइतिशेषोवा । ननुअयमात्मेतिमूलानुसारात् सएपआत्माभगवानितिवक्तव्यं विष्णुरितिकथमुक्तमित्यतआह ॥ सचेति ॥ सयोन्यमात्मनइत्यादिव्याचष्टे ॥ अतइति ॥ विष्णोरेवनिरुपाधिकप्रियत्वादित्यर्थः । विष्णोरन्यमितिशेषः । प्रियरोधंत्वदीयसुखनाशं । ईश्वरोहेत्येतदपेक्षितंपूरयन्व्याचष्टे ॥ एवमिति ॥ ननुविष्णवन्यस्यात्मादिप्रियत्वोक्त्यैवनरकादिदुःखप्राप्तेःशापःकिमर्थः इत्यतआह ॥ तस्येति ॥ तदुक्त्यैवदुःखिनोपितस्य तदुक्त्या वैष्णवशापरूपोक्त्याविशेषेणचदुःखंस्यादितियोजना । अनेनतथास्यादित्येतदुक्तार्थं । सयआत्मानमेवप्रियमुपास्तेइत्यादिवाक्यंव्याचष्टे ॥ तस्मादिति ॥ हरेर्निरुपाधिकप्रियत्वात्प्रियःसन् । विष्णोरितिशेषः । इदानींसयआत्मानमेवप्रियमुपास्तेइतिपूर्ववाक्यंव्याचष्टे ॥ तस्मादिति ॥ विष्णुमेवेतिसंबंधः । अन्योपिफलार्थीतिशेषः ॥ २ ॥ ७ ॥ ततश्चायंग्रंडार्थः ॥ तर्हितदाप्रलये तत्पूर्वोक्त सिदं अव्याकृतंविकारशून्यंनारायणाख्यंपरंब्रह्मलक्ष्मीश्चासीत् । हेतिप्रसिद्धिमाह । (तदि 75

भाष्यं ॥ अस्मिन्प्रियेप्रियंसर्वंतस्मादेकःप्रियोहरिः । सचात्मशब्देनोद्दिष्टोयस्मादाप्तगुणःप्रभुः । अतोविष्णोःप्रियंब्रूयाद्यःस्वात्मादंदुरात्सवान् । प्रियरोधंकरोपीतितंब्रूयाद्वैष्णवोसहान् । एवंवदन्वैष्णवस्तुसमर्थःप्रियरोधने । तस्यस्याच्चविशेषेणतदुक्त्यैवापिदुःखिनः । तस्मात्सर्वप्रियोविष्णुरित्युपास्तेसदाप्रियः । नास्यप्रियमनित्यंस्याद्स्यप्रीतिःसदाभवेत् । तस्मात्सर्वप्रियंविष्णुमुपासीतैवनित्यशः । नित्यप्रियकरोविष्णुर्भवेत्तस्याप्यजःस्वयमित्यध्यात्मे ॥ २ ॥

उप० ॥ तद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियत

दंतदन्यत् चेतनाचेतनरूपजग दव्याकृतंअव्यक्तमासीत् ।) तदव्यक्तं नामरूपाभ्यामेवव्याक्रियत हरिणाव्यक्तमकारि । तदे
वविवृणोति ॥ असौनामेति ॥ अयंब्रह्मादिर्महत्तत्वादिश्चपदार्थः । अदो हिरण्यगर्भोमहानित्यादि नाम वाचकं यस्यसः
असौनामा । इदं चतुर्मुखत्वादि अहंकाराद्यपेक्षयापरिमाणविशेषोपेतत्वादि रूपं यस्यसः इदंरूप इतिव्याक्रियत इतिसंबंधः ।
तस्मात्विष्णुनाब्रह्मादेर्महदादेश्चनामरूपाभ्यामेवव्याकृतत्वादेव एतर्ह्यपिइदानीमपि इदंदेवदत्तघटादिवस्तु अदोदेवदत्तोघट
इत्यादिनामयस्यासावसौनामा इदंशिरःपाण्यादिकंपृथुबुध्नोदराकारादि रूपंयस्यासाविदंरूप इतिनामरूपाभ्यामेवव्याक्रियते ।
सप्रलयाप्रवर्ती एषजगत्सर्जकःपरमात्मा इहस्वसृष्टेदेवादौ आनखाग्रेभ्यः उपलक्षणमेतत् । आकेशात्सर्वशरीरादिकंअभिव्या
प्येतियावत् । प्रविष्टोंतर्गतः यथाक्षुरः क्षुरधानेक्षुरस्तुके यथाविश्वंभरोवायुः विश्वंभरकुलायेस्ववासस्थलेशरीरे अवहितःप्र
विष्टः स्या त्तथासएषइहप्रविष्टइतिसंबंधः । तंत्वशरीरप्रविष्टमपि नपश्यंति पृथग्जनाइतिशेषः । सप्रविष्टोहरिः अकृत्स्नोऽनु
च्यतेहि भगवतोकृत्स्नत्ववचनेनिमित्तंवकुमाह ॥ प्राणन्नेवेति ॥ प्राणनक्रियामात्रंकुर्वन्नित्यर्थः । एवमुत्तरत्रापि । तान्येत
निप्राणइत्यादिनामानि अस्यकर्मनामान्येवप्राणनादिकर्मकर्तृत्वमात्रवाचकानि नसर्वगुणपरिपूर्णताभिधायकानि । ततःकिमि
त्यतोभगवतोकृत्स्नत्वोक्तौनिमित्तंलब्धमित्याशयेनाह ॥ स इति ॥ हियस्मात्प्राणादिनामानिकर्मनामान्येव अतःएकैकेनप्राणा

उप० ॥ असौनामाऽयमिदंरूपइतितदिदमप्येतर्हिनामरूपाभ्यामेवव्याक्रियतेऽसौनामाऽयमिदंरूपइतिसएषइहप्रविष्टः । आनखाग्रेभ्यो
यथाक्षुरःक्षुरधानेऽवहितःस्याद्विश्वंभरोवाविश्वंभरकुलायेतंनपश्यन्ति । अकृत्स्नोहिसप्राणन्नेवप्राणोनामभवतिवदन्वाक्पश्यंश्चक्षुःशृण्वंश्रोत्रंमन्वानो
मनस्तान्यस्यैतानिकर्मनामान्येव । सयोऽतएकैक

दिनाम्ना तंयउपास्ते एषअकृत्स्नःअकृत्स्नोपासकोभवति । कुतः यतःसप्रसिद्धोयएकैकंप्राणनादिकमेवोपास्ते सःसाकल्येनन वेद अतोकृत्स्नोपासकइतिसंबंधः । तथाचाकृत्स्नोपासकोपास्तिविषयत्वादकृत्स्नोहीत्युक्तमित्युक्तंभवति । तर्हिकःकृत्स्नोपासक इतिजिज्ञासायामात्मत्वोपासकएवेतिभावेनाह ॥ आत्मेत्येति ॥ प्राणइत्याद्युपासनान्यावृत्त्यर्थमेवकारः । नन्वात्मशब्दस्या पिस्वाभित्वमात्रार्थकत्वेप्राणादिशब्दसमानयोगक्षेमत्वात्तथैवोपास्तिःकुतइत्यतआह ॥ अत्रेति ॥ अत्रआत्मशब्दार्थे एतेचि दानंदादयोगुणाःप्राणनादिकर्माणिच एकंभवंतिअंतर्भवंति हियस्मात्तस्मात्तथैवोपासीतेतिसंबंधः । आत्मशब्दस्यसर्वगुणवाच कत्वेपिपरमात्मनःसर्वगुणाभावेतथोपास्तिर्मिथ्योपास्तिःस्यादित्यतआह ॥ तदेतदिति ॥ यदयंयोयमुपास्यत्वेनोक्तः आत्मा तदेतदात्मरूपं अस्यआत्मशब्दार्थस्यसर्वस्यगुणजातस्य पदनीयमाश्रयः कुतःसर्वगुणाश्रयइत्यतआह ॥ अनेनेति ॥ हियस्मा दनेनोपासितेनपरमात्मना एतत्स्वयोग्यं सर्ववेद आनंदादिकंचप्राप्नोतीत्यपिग्राह्यं । तस्मात्सर्वगुणाश्रयइति । तात्पर्य द्योतनायवेत्तुःफलमाह ॥ यथेत्ति ॥ यथापदेनतत्तत्साधनेन तत्तत्फलमनुविंदेत्प्राप्नुया देवंयोधिकारी एवंसर्वगुणयुक्तमात्मानं वेदोपास्ते सकीर्तिं शंलोकःश्लोकः तं परमानंदंपरमज्ञानंच विंदते ॥ १ ॥ आत्मत्वेनोपासनंप्रेमयुक्तंचेत्पुरुषार्थहेतुरितिवक्तुमाह ॥ तदेतदिति ॥ तदेतदंतरतरंशरीरांतर्गतजीवांतःप्रविष्टं सर्वांतःप्रविष्टंवा पुत्रात्प्रेयः अतिशयेनप्रियं । अतिशयश्चनिरुपा

उप० ॥ मुपास्तेनसवेदाकृत्स्नोह्येषोऽतएकैकेनभवत्यात्मेत्येवोपासीतात्रह्येतेसर्वएकंभवन्ति । तदेतत्पदनीयमस्यसर्वस्ययदयमात्माऽनेनह्येतत्सर्वंवेद । यथाहवैपदेनानुविन्देदेवंकीर्तिंश्लोकंविन्दतेयएवंवेद ॥ १ ॥ तदेतत्प्रेयःपुत्रात्प्रेयोवित्तात्प्रेयो

धिकत्वं । अन्यस्मात्सर्वस्मात्स्वात्मादेः किंतत् यदयमात्मा यश्चासावयंचेतियदयं आत्मासर्वगुणवाचकात्मशव्दवाच्यः । यो वैष्णवः आत्मनःपरमात्मनोन्यंस्वात्माद्यं प्रियंब्रुवाणं दुरात्मानंप्रति प्रियंत्वदीयंसुखं रोत्स्यतिनाशयतिभवानिति ब्रूयात् । एवंब्रुवन्सवैष्णवःतस्यप्रियरोधने ईश्वरोहसमर्थएव । कुतः यतस्तदुक्त्या तथैवस्यात् । यदर्थमेतदुक्तंतदाह ॥ आत्मानमेवेति ॥ प्रियत्वेनात्मोपासकस्यफलमाह ॥ सप्रसिद्धइति ॥ प्रमायुकं(क्तं)विनाशयुक्तं ॥ २ ॥ अथभाष्यार्थः ॥ भगवज्ज्ञानादेवपरमसुखज्ञानप्राप्तिर्भवतीत्युक्तं तदेतदाक्षेपपरिहाराभ्यांसमर्थितमित्याह ॥ तदाहुरिति ॥ इदंवाक्यजातंमायावादिन एवंव्याचक्षते तद्वक्ष्यमाणंनित्यनिरतिशयश्रेयःप्रतिपित्सवःआहुः किंतत् यद्ब्रह्मविद्ययाब्रह्मस्वात्मतादात्म्यविद्ययासर्वनिरवशेषंभविष्यंतोभविष्यामःइत्येवंमनुष्याःमन्यंतेसंभावयंति । तत्किंब्रह्म । किंवावेत् । कोवासर्वभावः । इतिपृच्छति ॥ किमिति ॥ यस्माद्विज्ञानात्तत्ब्रह्मसर्वमभवत् तद्ब्रह्म किमु किमात्मस्वरूपमतिरिक्तंवा । किंवावेत् स्वरूपंतदतिरिक्तंवा । यस्मात्तत्सर्वमभवदिति सर्वभावापत्तिरपि किंविद्यमानैवाभिव्यज्यते किंनूतनैवोत्पद्यतेइत्यर्थः । तत्राद्यस्योत्तरमाह ॥ ब्रह्मवाइति ॥ अग्रे शास्त्रजन्यप्रवोधादपिप्राक् इदंशरीरस्थंप्रमात्रादिसाक्षिभूतंत्वंपदलक्ष्यं ब्रह्मैवासीदित्यर्थः । द्वितीयस्योत्तरमाह ॥ तदात्मानसिति ॥ तदविद्याविशिष्टाधिकारिस्वरूपभूतंब्रह्म नासित्वंसंसारी किंतुसकलसंसारधर्मरहितं चिदानंदैकरसंब्रह्मैवासीतिदया

उप० ॥ ऽन्यस्मात्सर्वस्मादन्तरतरंयदयमात्मा । सयोन्यमात्मनःप्रियंब्रुवाणंब्रूयात्प्रियꣳरोत्स्यतीतीश्वरोहतथैवस्यादात्मानमेवप्रियमुपासीत सयआत्मानमेवप्रियमुपास्तेनहास्यप्रियंप्रमायुकं(क्तं)भवति ॥ २ ॥

लुनाचार्येण... ...त्मानमेव अहंब्रह्म प्रमात्रादिसाक्ष्यशनायाद्यतीतादिलक्षणमस्मिभवामीत्येवमवेदित्यर्थः । तृतीयस्योत्तर
माह । तस्मादिति ॥ तस्मादहंब्रह्मास्मीतिविज्ञानादेव । तत्ब्रह्म सर्वमभवत् । ब्रह्मात्मापरोक्षेणाविद्यापगमात् तत्कार्यस्या
सर्वत्वस्यनिवृत्तौ... .भाविकंसर्वत्वंप्राप्तमितियावदिति । तदेतदसत् । आदिवाक्येप्रतिपित्सवइत्यध्याहारप्रसंगात् । किमाहुरि
त्यस्योत्तरत्रप... हारानुपलंभाच्च । नहियद्ब्रह्मविद्ययासर्वंभविष्यतोमनुष्यामन्यंतइत्यत्रेदमाहुरितिप्रतीयते । ब्रह्मविद्ययेत्यस्यब्र
ह्मणःस्वात्मता...त्म्यसाक्षात्कारेणेतिव्याख्यानमसत् । अपदार्थत्वात् वक्ष्यमाणरीत्याऽप्रामाणिकत्वात् प्रमाणविरुद्धत्वाच्च । अत 79
एवसर्वंनिरवशेषमित्येतदप्ययुक्तं निराकरिष्यतेचैतत् । भविष्यंतइत्यस्यभविष्यामइतिविपरिणामायोगाच्च । प्रश्नवाक्यस्यसंग
त्यभावाच्च । किमुतद्ब्रह्मावेत् यस्मात्तत्सर्वमभवदित्यस्यैकवाक्यत्वेनैवस्पष्टमन्वयप्रतीतेरुक्तरीत्यावाक्यभेदायोगाच्च । तृतीयप्र
श्नवाक्यस्यसर्वथाप्यश्रुतस्यैवकल्पनीयत्वाच्चेतिभावेनतद्वाक्यजातंयथावद्व्याकुर्वन् आहुर्यंद्ब्रह्मविद्ययासर्वंभविष्यंतइत्येतद्वाक्य
मन्वयंदर्शयन्व्याचष्टे ॥ ब्रह्मविद्ययेति ॥ परब्रह्मापरोक्षज्ञानेन । सर्वमित्यस्यार्थःपूर्तिमिति । निरुपचरितपूर्तेर्बाधादात्मयो
ग्यतेत्युक्तं । महांतोदेवाद्याइतिविशेष्याध्याहारः । यदाहुःकिंतदितिजिज्ञासानिवर्तकत्वेनब्रह्मविद्ययासर्वमित्येतदेवापेक्षिताध्या
हारेणव्याचष्टे ॥ ब्रह्मविद्ययेति ॥ ननुमुक्तावागंतुकसुखाद्यभावात्कथंसर्वंप्राप्यतइत्युक्तिरित्यतःतदेवविवृणोति ॥ नित्येति ॥

भाष्यं ॥ ब्रह्मविद्ययासर्वंभविष्यंतआत्मयोग्यतापूर्तिमाप्नुवंतोमहांतोयदाहुः । ब्रह्मविद्ययास्वयोग्यंसर्वंप्राप्यतइति । नित्यनिर्दुःखानंदानुभ
वरूपोहिस्वतउत्तमोजीवः ।

अभिव्यक्तिःसतएव नत्वसतःइत्यतइदमुक्तं । आनंदश्चानुभवश्चेतिद्वंद्वः । नित्यौनिर्दुःखौदुःखासंभिन्नौआनंदानुभवौरूपंस्वरू
पंयस्यतथोक्तः । अहंदुःखीत्याद्यनुभवविरोधपरिहारायोक्तं स्वतःस्वभावतइति । दुःखादिकमविद्याकामकर्मनिमित्तकंनस्वाभा
विकमितिभावः । उत्तमइति तमोयोग्यादिव्यावृत्त्यर्थं । अनुपलंभवाधपरिहारायोक्तं अज्ञानात्तिरोहितमिति । अभिव्यज्यत
एव ननूतनंप्राप्यतइत्यर्थः । ब्रह्मविद्ययैवेत्यपिएवशब्दसंबंधः । तद्व्यावर्त्यमाह ॥ **नचेति** ॥ अन्यथा कर्मादिमात्रेण । तत्तत्रे
त्यस्यसंबंधप्रतीत्यर्थंयदाहुरितिपुनरनुवादः । नन्वेवंव्याख्यानेपिमहांतइत्यध्याहारः ब्रह्मविद्ययासर्वमित्यस्यावृत्तिः प्राप्यतइत्य
ध्याहारश्चकर्तव्यइतिचेत् तथापित्वत्पक्षवत्बहुदोषाभावात् । एतावन्मात्राध्याहारादेरपि यदाहुर्ब्रह्मविज्ञानादित्युदाहरिष्य
माणप्रमाणसिद्धत्वेनत्वद्व्याख्यानवद्प्रामाणिकत्वाभावाच्च । तदाहुरितितच्छब्दस्यअभवदितीतिशब्दस्यचमनुष्यामन्यंतइत्यने
नसंबंधंदर्शयन्किंचिद्व्याचष्टे ॥ तत्त्रेति ॥ इतिशब्दार्थंस्फुटयन्किमुतद्ब्रह्मेत्येतद्व्याचष्टे ॥ **स्वरूपमपीति** ॥ ब्रह्मापीत्यने
नउशब्दोप्यर्थकइत्युक्तंभवति । यदिजीवस्वरूपाभिव्यक्तिर्ब्रह्मज्ञानसाध्या तर्हिब्रह्मणःपरिपूर्णत्वाद्यभिव्यक्तिरपिकिंब्रह्मज्ञान
साध्येतिप्रश्नाभिप्रायः ॥ ३ ॥ ब्रह्मणःपरिपूर्णत्वाद्यभिव्यक्तेःब्रह्मज्ञानसाध्यत्वाभावेपिज्ञानाविनाभावोस्त्येवेत्यभिप्रायकंतदा

भाष्यं ॥ तादृशंरूपमज्ञानात्तिरोहितंब्रह्मविद्ययाभिव्यज्यतएव । नचान्यथाभिव्यज्यतइतिसंतोयदाहुः । तत्तत्रकेचिन्मनुष्याइतिमन्यंते ।
स्वरूपमपिब्रह्मविद्ययाभिव्यज्यतेचेत्तद्ब्रह्मापियस्मात्सर्वमभवत्परिपूर्णमभवत्तस्मात्स्वरूपंज्ञात्वैवाभवत्किमिति ॥ ३ ॥

त्मानमेवावेत्तस्मात्सर्वमभवदित्येतद्व्याचष्टे ॥ **सत्यमित्यादिना** ॥ जानातिविषयीकरोति नित्यापरोक्षज्ञानेनापिविषयीकरणं नकादाचित्कमितिभावेनसर्वदेत्युक्तं । जानात्येवेत्यनेनावेदेवेतिसंबंधोदर्शितः । अतएवेत्यनेनज्ञानस्याभिव्यक्तिव्यापकत्वमाह ॥ परिपूर्णमिति ॥ अभिव्यक्तानंदादिपरिपूर्णमित्यर्थः । कादाचित्काभिव्यक्तिजन्यापरोक्षज्ञानयोरेवसाध्यसाधनभावइति भावः । एतेनैतदपिपरास्तं यत्केनचित्प्रलपितंमनुष्याअधिकारिणो ब्रह्मविद्ययाब्रह्मणःस्वात्मतादात्म्यलक्षणब्रह्मसाक्षात्कारेण सर्वंनिखिलं भविष्यंतोभविष्यामः इतियन्मन्यंतेमननंकुर्वंति तत्दुर्घटमित्याहुः विचारकाःब्राह्मणाः । तद्दौर्घट्योपपादनायोत्तरप्रश्नःक्रियतेइति । अत्रापिदुर्घटमित्यस्याध्याहारप्रसंगात् । किंचाधिकारिकृतमननप्रकारोवातत्वं विचारकब्राह्मणोक्तंदौर्घट्यं वा नाद्यः । अधिकारिमतार्थेदौर्घट्यापादकानांब्राह्मणानांविचारकत्वायोगात् । नद्वितीयःमननकर्तॄणांअधिकारित्वासंभवात् । दौर्घट्योपपादनायकृतप्रश्नानांब्रह्मवाइदमग्रआसीदित्यादिनापरिहारेदौर्घट्याभावाच्चेति । नन्ववेदभवदितिप्रयोगेणज्ञानस्यपूर्णत्वाभिव्यक्तेश्चकादाचित्कत्वप्रतीतेःकथंनित्यापरोक्षज्ञानेनेति सर्वदापरिपूर्णमितिचोक्तमित्यतआह ॥ **तदात्मानमिति** ॥ ब्रह्मसत्तासदातनत्वस्यप्रमितत्वेनासीदितिलङःसदातनसत्ताप्रतिपादकत्ववदवेदित्यादेरपिसदातनज्ञानादिप्रतिपादकत्वमित्यर्थः । यथोक्तं । प्रयोगएककालीनःसर्वकालेनुपज्यते । ददर्शविष्णुरित्यादौनित्यचिद्रूपतोहरेरिति । अतएवजानातीतिक्रियाप्रबंधवि 81

भाष्यं ॥ सत्यं तदपिस्वरूपंनित्यापरोक्षज्ञानेनसर्वदाजानात्येव । अतएवसर्वदापरिपूर्णमितितेषांपरिहारः । तदात्मानमेवावेत्तस्मात्तत्सर्वमभवदिति ।

हितलट्प्रयोगः । इदं त्वंपदलक्ष्यंचैतन्यंब्रह्मैवासीदिति व्याख्यानमसदितिभावेनव्याचष्टे ॥ इदमग्रइति ॥ इदमित्यस्यअ स्येतिव्याख्यानंकथमित्यतउक्तं ॥ षष्ठ्यर्थइति ॥ तदात्मानमेवावेदहंब्रह्मास्मीत्यस्य तदधिकारिस्वरूपभूतंब्रह्माचार्योपदिष्ट मात्मानंअहंब्रह्मास्मीत्यवेदिति व्याख्यानंदूपयितुंअहंब्रह्मास्मीत्यवेदित्येतद्व्याचष्टे ॥ अहमिति ॥ मेयत्वेप्रकारप्रदर्शनायास्ती तीतिशब्दः । अन्यथासर्वदास्तिमेयमितीत्येववक्तव्यं । कुतएवंव्याख्येयं परोक्तरीत्याप्रसिद्धार्थावेवाहमस्मिशब्दौकिंनस्याता मित्यतस्तद्व्याख्यानंदूषयति ॥ यदीति ॥ अस्मच्छब्दार्थवाची प्रत्यगर्थवाची । अहंब्रह्मास्मीत्यनेनैवात्मानंब्रह्मत्वेनावेदित्य स्यार्थस्यलाभात्किमितिकर्माकांक्षाभावेनतद्वैयर्थ्यमितिभावः । विपर्ययेपर्यवसानंसूचयन्स्वव्याख्यानंनिगमयति ॥ अतइति ॥ अर्थांतरस्यायोगादित्यर्थः । उक्तार्थावेव नत्वर्थांतरपरौ । अहमस्मिशब्दयोःअहेयत्वाद्यर्थकत्वेतु एतैर्विशेषणैःकमवेदितिकर्म कांक्षानिवर्तकत्वेनात्मानमित्येतदावश्यकमितिभावः । किंचाचार्योपदेशोप्यश्रुतएवकल्पनीयः । तत्परित्यागेचबाधितार्थकत्वा पत्तेः । नहितादृशोपदेशाभावेअहंब्रह्मास्मीतिवेदनमस्ति । नन्वतएवतदध्याहारःक्रियतइतिचेदन्यथोपपत्तेरुक्तत्वात् । ननुभ वद्व्याख्यानेपिब्रह्मवाइदमग्रआसीदितिव्यर्थं । किमुतद्ब्रह्मेत्यादिप्रश्नस्यतदात्मानमेवावेदित्यादिनैवपरिहारात् । अतोस्मद्व्याख्या

भाष्यं ॥ आत्मावाइदमेकएवाग्रआसीत् । सदेवसोम्येदमग्रआसीदित्यादिवत्सदातनज्ञानंपूर्णभावंचाह । इदमग्रेअस्याग्रइतिषष्ठ्यर्थेद्वितीया अहंअहेयंब्रह्मपरिपूर्णअस्मिसर्वदास्तीतिमेयमित्येतैर्विशेषणैरात्मानंस्वरूपमेवावेत् । यद्यहंशब्दोस्मच्छब्दार्थवाचीअस्मिशब्दश्चोत्तमपुरुषेतदाऽऽत्मा नमितिव्यर्थंस्यात् । अतोहमस्मिशब्दावुक्तार्थावेव ।

नमेवाश्रणीयमित्यतआह ॥ अग्रइति ॥ अग्रआसीदित्युक्तानादिकालविद्यमानत्वसमुच्चयार्थोजानातिचेतिचशब्दः । सर्वभवन समुच्चयार्थोवा । ब्रह्मणएवानादित्वाभावेऽवेदित्यस्याभवदित्यस्यचसदातनज्ञानसदातनपूर्णभाववाचकत्वानुपपत्तिरितिशंकापरिहारार्थंब्रह्मणोनादित्वमनेनकथ्यतइतिभावः । नन्वहमहेयमित्यत्र स्वाहेयत्वं सर्वाहेयत्वंवा । नाद्यः । सर्वसाधारण्येनावक्तव्यत्वात् । नद्वितीयः । विशेषहेत्वभावादित्यतआह ॥ सर्वैति ॥ अहेयंसर्वैरितिशेषः । सर्वनियंतृराजादिवत्परिच्छिन्नत्वेसर्वाहेयत्वंनसिध्यतीत्यतःसर्वगतत्वादित्युक्तं । सर्वगतत्वमात्रस्यहातुमशक्यत्वरूपाहेयत्वेहेतुत्वंनसंभवति । अप्रयोजकत्वादित्यतःसर्वनियंतृत्वेनेत्युक्तं । अनेननियंतृहानेव्यापारमात्रोच्छेदइतिविपक्षेबाधकंसूचितं । किंचस्यादेव ब्रह्मवाइदमग्रइत्यादेःपरकृतव्याख्यानं । यदिजीवब्रह्मैक्यमेवप्रामाणिकंस्यात् । नचतत्रप्रमाणमस्ति । तद्योहंसोसौयोसौसोहंइत्यादिवाक्यमेवब्रह्मात्मैक्यप्रतिपादकमस्तीतिचेत्तत्राह ॥ तद्यइति ॥ नैतद्वाक्यबलेनजीवेश्वरैक्यमंगीकर्तुंशक्यं । एतद्वाक्यस्य तद्यःसयोबृहतीसहस्रसंस्थितोद्वासप्ततिसहस्ररूपःविष्णुः पुरुषेस्थितःअंतर्यामित्वेनपुरुषैरहेयत्वादहंनामकः । सएवासौ सूर्यसंस्थः । योसौसूर्यगतोविष्णुःद्वासप्ततिसहस्ररूपः सोप्यंतर्यामित्वेनसूर्यादिभिरहेयत्वादहंनामकइत्यर्थत्वात् । अन्यथायोहंसोसावित्येतावतापूर्णत्वेनयोसौसोहमित्यस्यवैयर्थ्यात् । नचयोहंसोसावित्यनेनसूर्यस्यपुरुषाभेदबोधनेपिपुरुषस्यसूर्याभेदबोधनाययोसौसोहमितिवाक्यमितिवाच्यं । सूर्यस्यपुरुषाभेदे

भाष्यं ॥ अग्रेअनादिकालतएवविद्यमानमात्मानंजानातिचतद्ब्रह्मेत्यर्थः । सर्वनियंतृत्वेनसर्वगतत्वादहेयं । तद्योहंसोसौयोसौसोहंयोसावसौ पुरुषःसोहमस्मीत्यादिष्वप्यहंशब्दोंतर्यामित्वेनाहेयत्ववाची ।

पुरुषस्यसूर्यभेदशंकायाएवानुदयेनवैयर्थ्यानिस्तारात् । नचायमभ्यासइतियुक्तं । प्रयोगद्वैविध्यदर्शनात् । एकप्रकारासकृदुक्तेरेवा
भ्यासत्वात् । अस्मत्पक्षेतुनराहेयत्वं सुराहेयत्वं चोच्यतइतिनवैयर्थ्यमिति । योसावसौपुरुषइतिवाक्यंतुसप्तमाध्यायेव्याख्यास्यते ।
नन्वथापितत्सत्यंसआत्मातत्वमसीतिवाक्यमेवजीवब्रह्मैक्यप्रतिपादकमस्ति तथाचैतद्वाक्यबलेनब्रह्मवाइदमग्रआसीदित्यादेस्त
द्योहंसोसावित्यादेश्चैक्यपरत्वंवक्तुंशक्यं । इत्यतआह ॥ तत्सत्यमिति॥ सआत्माऽतत्वमसि सएवपरमात्मा त्वंतुअतत् तस्मादन्य
इत्यसीत्युद्दालकेनपित्रापुत्रंश्वेतकेतुंप्रतिभेदस्यैवोपदिष्टत्वेननैतद्वाक्यबलेनापिजीवेश्वरैक्यसिद्धिरितिनतेषामप्यैक्यपरत्वं प्रत्यु
तैतद्वाक्यविरोधेनतेषामुक्तार्थत्वमितिभावः । नचास्यस्वार्थेतात्पर्याभावःशंकनीयः । नवकृत्वोभ्यासात् । अभ्यासस्यतात्पर्यलिं
गत्वादितिभावेनोक्तं ॥ नवकृत्वोभ्यासादिति ॥ तथाचनिश्चिततात्पर्यकत्वेनप्राबल्यात्तद्विरोधेनतद्योहमित्याद्यंतर्याम्यैक्य
परमेवेतिभावः । यद्यप्यसंदिग्धानिजीवेश्वरभेदवाक्यानिसंति तथाप्यैक्यस्यागमप्रमाणासिद्धत्वंतद्विरुद्धत्वंचोपपादयितुं अस्य
वाक्यस्योदाहरणं । ननुयद्यस्यवाक्यस्यातत्वमसीतिपदच्छेदेनभेदप्रतिपादकत्वं तर्हीदंऐक्यप्रतिषेधपरमित्युक्तंस्यात् । नचैवं
युक्तं । जीवेश्वरैक्यस्याप्राप्तत्वेनप्रतिषेधानुपपत्तेरित्यतःप्राप्तिंदर्शयति ॥ तद्यइति ॥ सम्यगर्थः श्रुतितात्पर्यविषयीभूतः । त
दपरिज्ञानात्योत्पन्नाभ्रांतिः तयाप्राप्तइत्यर्थः । श्रुतितात्पर्यापरिज्ञानोत्थभ्रमप्राप्तंश्रुत्यैवनिराक्रियतइत्येतत्कुत्रदृष्टमित्यत ॥ ४२ ॥

भाष्यं ॥ तत्सत्यंसआत्माऽतत्वमसीतिभेदस्यनवकृत्वोभ्यासात् । तद्योहंसोसौअहंब्रह्मास्मीत्यादिवाक्यानांसम्यगर्थापरिज्ञानात्भ्रांतिप्राप्तोऽ
भेदोऽतत्वमसीतिनवकृत्वोनिराक्रियते ।

आह ॥ तद्धैकइति ॥ एकमेवाद्वितीयमित्यस्यानंतरंयस्मादसतःसदजायतेतिवाक्यमुदाहर्तव्यं । एवमनूदितंमतंदूषयति ॥ कुतइति ॥ एव मासीदितिकुतस्तुस्या न्नकुतोपि । व्याहतत्वात् । कथमसतःसज्जायेत असतःकारणत्वादर्शनादित्यर्थः । ब्रह्मवाअसत् सद्भावप्राण इत्यादिश्रुत्युक्तोब्रह्मणःप्रलयाग्रभूतित्वंप्राणस्तज्जातत्वमित्येवंरूपोयोर्थःतदपरिज्ञानोत्थभ्रमो भ्रम प्राप्तमसतःप्रलयाग्रवर्तित्वं सतःतज्जन्यत्वंचेत्यर्थः । निरंतरवाक्येनाप्यभेदप्राप्तिंदर्शयति ॥ सइति ॥ सएषोणिमैतदात्म्यमि त्यत्रप्रकृतोयःसआत्माजीवइतिआत्मशब्दाच्च । भ्रांतिप्राप्तस्त्वभेदइतिपूर्वेणसंबंधः । नन्वात्मशब्दस्यपरमात्मनिमुख्यत्वात्क थंततोजीवब्रह्मैक्यभ्रांतिरित्यतआह ॥ आत्मशब्दस्येति ॥ आत्मशब्दस्यपरमात्मनिमुख्यत्वेपितदप्रतीतिदशायांजीवेएत द्वाक्यगतात्मशब्दवाच्यत्वभ्रांतिरुपपद्यते । जीवस्याप्यमुख्यतआत्मशब्दवाच्यत्वादित्यर्थः । अस्त्वेवंनिरंतरवाक्येनाप्यभेद प्राप्तिः किंततइत्यतआह ॥ तन्निवृत्त्यर्थमिति ॥ नन्वैतदात्म्यमिदंसर्वमितिजीवेश्वरैक्यंप्रतीयते एततसत्आत्माययस्यसर्वस्यत देतदात्म तस्यभावऐतदात्म्यंइति । तत्कथमतत्वमसीतिअभेदनिराकरणंयुक्तमित्यतआह ॥ यच्चेति ॥ यद्यस्मा दाप्नोतिव्याप्नो

भाष्यं ॥ तद्धैकआहुरसदेवेदमग्रआसीदेकमेवाद्वीतीयंकुतस्तुखलुसोम्यैवंस्यात्कथमसतःसज्जायतेत्यादिनाअसद्वाइदमग्रआसीदसतःसदजा यतेत्यादिश्रुत्यर्थापरिज्ञानोत्थभ्रमोयथानिवार्यतेएवमतत्वमसीतिवाक्येनापि । स आत्मेतिशब्दाच्च । आत्मशब्दस्यपरमात्मनिमुख्यत्वेपिजीवेभ्रां तिरुपपद्यते । तन्निवृत्त्यर्थंवाऽतत्वमसीत्याह । यच्चाप्नोतियदादत्तेयच्चात्तिविषयानिह । यच्चास्यसंततोभावस्तस्मादात्मेतिभण्यतइत्यादिनाह्यादिकमै तदात्म्यमिदंसर्वमित्यनेनोच्यते ।

ति । सर्वमितिशेषः । आदत्तेस्वीयतयासर्वान् सर्वाधिपतिरित्यर्थः । भावःसत्ता संततोनित्यः आङ्पूर्वाभ्यांतनुविस्तारेसाङ्मा नेइतिधातुभ्यांडन् । तथाचाङोर्थःसमिति । तनुविस्तारइत्यस्यकालतोविस्तृतिमभिप्रेत्यततइत्युक्तं । उत्पादनंचसंस्थानमित्यु दाहृतवचनानुसारेणमानंसत्तेत्यभिप्रेत्यभावइत्युक्तं । इत्यादिनाऽऽत्मशब्दस्यव्याप्त्याद्यभिधायकत्वावगमादितिशेषः । आहृयादि कंव्यात्यादिकं । ऐतदात्म्यमित्येतदंतर्गतात्मशब्देनेत्यर्थः । तथाचैषचासावात्माचैतदात्मा विचित्राहितद्धितगतिरिति एतदा त्मनइदंइत्यर्थेतद्धितोयमितिभावः । सआत्माजीवइत्यर्थोनचेत्कस्तदर्थइत्यतआह ॥ पूर्णत्ववाचीति ॥ आत्मशब्दःपूर्णत्व वाची हरिश्चपूर्णः अतःपूर्णत्वतोहरिरात्मेतियोजना । इत्यादिनाआत्मशब्दस्यपूर्णत्वाभिधायकत्वावगमादितिशेषः । स्यादेत त्सर्वंखल्विदंब्रह्मेतिसर्वस्यप्रपंचस्यब्रह्मात्मैकत्वमुक्त्वा तत्कथमित्याकांक्षायांतज्जलानितिशांतउपासीतेति तज्जत्वात्तल्लत्वात्तदन त्वादितिसर्वस्यब्रह्मोपादानत्वंप्रागुक्तं । उपादानत्वंचनपरिणामित्वेन । निर्विकारत्वश्रुतिविरोधात् । किंतुजगदारोपाधिष्ठानत्वेन यथाशुक्तिकायाःरजतारोपाधिष्ठानत्वं । तद्वज्जगतोब्रह्मोपादानत्वंप्रपंचयितुंषष्ठस्यपूर्वार्धःप्रवृत्तः । तत्रश्वेतकेतुंप्रत्युद्दालकेन यत तमादेशमप्राक्ष्योयेनाश्रुतंश्रुतंभवत्यमतंमतंअविज्ञातंविज्ञातंइत्येकस्यब्रह्मणोज्ञानेनसर्वस्यज्ञानंभवतीत्युक्तं । नतद्युक्तंअन्यज्ञाने नान्यज्ञानस्यक्वाप्यदर्शनात् । इत्यभिप्रायेण कथंनुभगवःसआदेशोभवतीतिश्वेतकेतुनाक्षिप्ते कार्यस्य उपादानादनन्यत्वाभावानुपप त्तिरित्याशयवतोद्दालकेनमृत्पिंडादिदृष्टांताःकथिताः । तस्यचायमर्थः । एकेनमृत्पिंडेनपरमार्थतोमृदात्मनाविज्ञातेनसर्वंमृण्म

भाष्यं ॥ पूर्णत्ववाच्यात्मशब्दआत्मापूर्णत्वतोहरिरित्यादिनासआत्मेतिपूर्णत्वमभिधीयते ।

यंघटादिकंमृदात्मकत्वाविशेषात्विज्ञातंभवेदित्यादि । तथाचब्रह्मातिरिक्तस्यजगतोमिथ्यात्वंषष्ठाद्यार्धस्यनिश्चितं । तत्कथंपूर्वार्धविरुद्धभेदपरत्वंउत्तरार्धस्योच्यते । किंनाम तस्मादुहैवंविद्यद्यपिचंडालायोच्छिष्टंप्रयच्छेदात्मनिहैवास्यतद्वैश्वानरेहुतंस्यात् इत्युक्तार्थस्योपपत्तयेसर्वजीवानांब्रह्मणाऽभेदएवोत्तरार्धेनप्रतिपाद्यतइतियुक्तमिति । मैवं । साद्दश्यप्राधान्याभ्यासेवैकविज्ञानेनसर्वविज्ञानंप्रतिज्ञायतनैवमृत्पिंडादिदृष्टांतानामुक्तत्वेनोत्तरार्धस्यभेदपरत्वांगीकारेपूर्वार्धविरोधाभावात् । ननुसाद्दश्यस्यैवात्रहेतुत्वेनविवक्षितत्वेदृष्टांतत्रयंव्यर्थमितिचेत् विकारमिथ्यात्वस्यहेतुत्वेनविवक्षायामपित्रैयर्थ्यंसममेव । दुर्गमत्वात्तत्वस्यानेकदृष्टांतोपादानमितिचेत् सममस्मन्मतेपि । अस्तिचात्रविवक्षाविशेषइत्याह ॥ **यथेत्यादिना** ॥ विकारविकारिणोरभेदाभावेपीत्यपिशब्देनद्योतयति । ननुप्रधानवाचकपदाभावात्प्रधानविज्ञानेनेतिकथमुक्तइत्यतउक्तं ॥ **मणिशब्दादिति** ॥ लोहप्रधानसुवर्णविज्ञानेनाप्रधानंसर्वं तदन्यत्लोहमयमित्यर्थः ॥ भवतीतीति ॥ उक्तमित्यनुवर्तते । **मणिशब्दस्यप्रधानवाचकत्वंकुतइतिचेत्** मणिप्रधानशब्दयोःपर्यायत्वात् । तदपिकुतइत्यतआह ॥ **मणिरिति** ॥ **अभ्यासस्तात्पर्यार्थइति** ॥ अभ्युपेत्यचेदमुदितं । अत्यल्पेपिहिविज्ञातेसदृशेतादृशंबहु । ज्ञायतेनखकृंतन्यायथासर्वमयोमयं । किमुविष्णोर्बहोर्ज्ञानादत्यल्पंजगदीदृशं । इतिच्छां 87

भाष्यं ॥ यथासोम्यैकेनमृत्पिंडेनेतिसदृशविज्ञानेनसदृशांतरंविज्ञातंभवतीत्युक्तं । लोहमणिनेतिमणिश[illegible]प्रधानविज्ञानेनाप्रधानंसर्वंविज्ञातंभवतीति । मणिर्मुखंप्रधानंचउत्तमस्यवचोभवेदितिवचनात् । यथासोम्यैकेननखनिकृंतनेनसर्वंकार्ष्णायसंविज्ञातंस्यादितिपुनरपिसदृशेनविज्ञातेनसदृशांतरंविज्ञातंभवतीत्यभ्यासस्तात्पर्यार्थः ।

ब्दात् वचनोच्च

दोग्यभाष्येऽत्रापिविवक्षाविशेषस्योक्तत्वात् । ननुदृष्टांतवाक्यत्रयेअधिष्ठानत्वादिरूपोपादानत्वादिकमेवविवक्षितमितिकिंन
स्यात् । उपादानोपादेययोरेकत्वेनतद्विज्ञानेनतद्विज्ञानस्यसंभवादित्यतस्तदनूद्यतत्रानुपपत्तिमाह ॥ उपादानेति ॥ एकत्वे
ति ॥ उपादानोपादेययोरितिशेषः । व्यर्थानि विगतप्रयोजनानिविरुद्धार्थानिचेत्यर्थः । विगतप्रयोजनकत्वंतावदुपपादयति ॥
तस्मिन्निति ॥ विरुद्धार्थत्वंचोपपादयति ॥ नहीत्यादिना ॥ नचतेनेति ॥ सर्वमृण्मयस्यैकमृत्पिंडविकारत्वाभावादेवेत्यर्थः ।
एवमुत्तरत्रापिसर्वंकार्ष्णायसमित्यनंतरंनचतेनैकीभूतमित्यपिवक्तव्यं । नन्वेतद्दृष्टांतत्रयोपपादनायत्रयाणामपिवाक्यानांशेषाः
संति । वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं । वाचारंभणंविकारोनामधेयंलोहमणिरित्येवसत्यं । वाचारंभणंविकारोनाम
धेयंकार्ष्णायसमित्येवसत्यं इति । तत्रविकारस्यमिथ्यात्वमुच्यते । वाचारंभणंवागालंबनंविकारोनामधेयंनामैवकेवलं । नविका
रोनामवस्त्वस्तिपरमार्थतोमृत्तिकेत्येवमृत्तिकैवसत्यंवस्तु । अतःकारणव्यतिरिक्तस्यकार्यस्यमिथ्यात्वाद्यथासोम्येत्युक्तमुपपन्नामि
ति । एवंश्रुत्यास्वयमेवविकारमिथ्यात्वस्यैकविज्ञानेनसर्वविज्ञानहेतुत्वेनोक्तत्वात्कथंसादृश्यादेर्हेतुत्वमुच्यते । श्रुत्यभिप्रायेणे

भाष्यं ॥ उपादानविवक्षायामेकत्वविवक्षायांचैकेनेतिविशेषणं पिंडेनेति एकेनमणिनेति पुनरेकेनेतिचविशेषणानि व्यर्थानिभवेयुः । तस्मि
न्पक्षेमृदाविज्ञातयालोहेनविज्ञातेनकार्ष्णायसेनचविज्ञातेनसर्वविज्ञातंभवतीतिवक्तव्यं । नह्येकमृत्पिंडविकारभूतंसर्वमृण्मयं । नचतेनैक्यंसर्वस्य
विद्यते । नचैकलोहमणिकार्यंसर्वंलोहमयं । नचतेनैकीभूतं । नचैकनखनिकृंतनकार्यंसर्वंकार्ष्णायसं ।

श्चितेपदवैयर्थ्यादिकंनदोषःइत्यतस्तद्वाक्यत्रयतात्पर्यमाह ॥ **वाचारंभणमिति** ॥ प्रधानेपरिज्ञातेगुणभूतंसर्वंविज्ञातंभवतीत्य
नुपपन्नं । प्रधानभूतराजादिपरिज्ञानेपिभृत्यादीनामविज्ञानादित्यतउक्तं ॥ **ज्ञातमिवेति** ॥ ज्ञातफलकंभवतीतिभावः । यथासो
म्येतिदृष्टांतस्योक्तत्वाद्दृष्टांतांतरमित्युक्तं । दृष्टांतांतरप्रतिपादकमित्यर्थः । ननुकथमुक्तार्थेदृष्टांतप्रतिपादकमिदंवाक्यं अप्रतीतेः इ
त्यतउपलक्षणत्वेनप्रथमवाक्यंव्याचष्टे॥**वाचेति**॥वाचावागिंद्रियेण नाम्नांसंस्कृतातिरिक्तानां यदारंभणमुत्पादनं तद्विकारः । वि
कारशब्दार्थमाह॥**विविधत्वेनेति**॥सांकेतिकनामोत्पादनस्यपुरुषेच्छाधीनत्वादितिभावः । ततएवसांकेतिकनाम्नांविनाशश्चेतिल
भ्यते । सत्यशब्दार्थंवदन्नामधेयंमृत्तिकेत्येवसत्यमित्येतद्योजयति ॥ **सत्यमिति** ॥ नन्वस्तुसांकेतिकनाम्नामुत्पत्तिविनाशवत्त्वं
संस्कृतनाम्नामनादिनित्यत्वंच । तथापिकथमेतद्वाक्यंप्रधानविज्ञानेनाप्रधानविज्ञानेदृष्टांतांतरप्रतिपादकं इत्यतआह ॥ **संकेत
रूपेणेति** ॥ शक्यंतइत्यनंतरं तथाचनानाविधतत्तन्नामपरिज्ञानाद्विद्व्यवहारगोचरत्वादिकंभवतियद्यपीतिवाक्यशेषः । तथा
पीत्यनंतरंसांकेतिकनामापरिज्ञानेपियथेतिशेषः । तत्तन्नामविद्भवति तत्तन्नामवेदनप्रयोजनवान्भवतीत्यर्थः । प्राधान्योपपादनार्थं
नित्यासाम्येत्यादि । सर्ववित्सर्वज्ञानफलवान् अतएववक्ष्यतिसर्वंज्ञातमिवेति । अनेनश्रुतौयथासोम्यतेनतद्विज्ञातंस्यादितिप्रकृ

भाष्यं ॥ वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमित्यादिप्रधानपरिज्ञानेगुणभूतंपरिज्ञातमिवभवतीत्यत्रदृष्टांतांतरं । वाचानाम्नामारंभणं
विकारःविविधत्वेनकर्तुंयोग्यमितिविकारः । सत्यंसर्वदाविद्यमानंनामधेयंमृत्तिकेत्येव । संकेतरूपेणनानाविधानिनामानिकर्तुंशक्यंते । तथापिशास्त्रप्र
योगसिद्धमृत्तिकादिनामपरिज्ञानात्तत्तन्नामविद्भवति । एवंनित्यासाम्यातिशयसर्वगुणपरिपूर्णपरमेश्वरपरिज्ञानात्सर्वविद्भवतीति ।

तमनुवर्तनीयमित्युक्तंभवति । तथाचप्राकृतत्वादनित्यत्वाच्चपरापेक्षत्वेनसांकेतिकंनामाप्रधानं । **अनादिनित्यत्वात्परानपेक्षत्वेनसंस्कृतंप्रधानं** । तत्रयथाप्राधान्यात्संस्कृतज्ञानमात्रेणसांकेतिकंज्ञातफलंभवति । एवमनित्यत्वादिनाऽप्रधानस्यदेवताकर्मादिमिश्रस्यसकलस्यापिजगतोज्ञानेयत्फलंतत्समस्तमपिनित्यत्वादिनाप्रधानस्यपरमात्मनोज्ञानाल्लभ्यते तत्फलंतर्भवतीतिभावः । नन्वेवंतर्हियेनाश्रुतमित्यत्रोपचारइत्युक्तंस्यात् । विज्ञातशब्दस्यविज्ञातेसतियत्फलंतदर्थत्वांगीकारात् । तथाचोपचारप्रयोगेप्रयोजनंवक्तव्यमित्यतोनिरूढत्वादस्यप्रयोगस्यनप्रयोजनापेक्षेतिभावेनतादृशलौकिकवैदिकप्रयोगप्रदर्शनपूर्वंप्रकृतेयोजयति ॥ **यथेत्यादिना** ॥ नाशितेत्यत्रशशासेत्यत्रचप्रधानपुरुषनाशरक्षणयोरप्रतीतेस्तदुदाहरणंप्रकृतानुपयुक्तमित्यतःस्वयमुभयत्रयथाचेत्यादिपूरितं । नन्वेकविज्ञानेनसर्वविज्ञानेमुख्येसंभवत्यमुख्यग्रहणंकिमर्थंकार्यमित्यतोमुख्यत्वेबाधकमाह ॥ **नचेति** ॥ **एतदेवोपपादयति** ॥ **तथासतीति** ॥ ज्ञातेजिज्ञासाविरहादितिभावः । ननुयदिविकारमिथ्यात्वमत्रनप्रतिपाद्यंस्यात्तदा **सदेवसोम्येदमग्रआसीत् तत्तेजोसृजत सन्मूलाःसोम्येमाःसर्वाःप्रजाःइत्यादिनायदादौब्रह्ममात्रावस्थानं तस्मादेवजगतःसृष्टिः सदायतनत्व मित्याद्यु**

भाष्यं ॥ यथैकस्मिन्जनपदेप्रधानपुरुषेपुपरिज्ञातेष्वाहूतेष्वागतेपुविनाशितेपुरक्षितेपुवासर्वोजनपदःपरिज्ञातआहूतआगतोविनाशितोरक्षितइत्युच्यते । यथाचराजसुनाशितेपुनाशिताप्रथिवीसर्वाधार्तराष्ट्रेणदुर्नयैरिति। यथाचकेपांचित्पुरुषाणांरक्षणेन । शशासपृथिवींसर्वांसशैलवनकाननामिति । एवंसर्वोत्तमस्यपरमेश्वरस्यविज्ञानात्सर्वंविज्ञातमिवभवति । नचमृन्मात्रविज्ञानाद्घटशरावादिसंस्थाविज्ञाताभवंतिमुख्यतः । तथासतिदृष्टमृदःपुरुषस्यघटशरावादिजिज्ञासानस्यात् ।

क्तं तदसंगतंस्यात् । तद्धिजगतोब्रह्मविवर्तत्वोपपादनेनकार्यस्यपृथगसत्त्वपरंभवतीत्यतआह ॥ सृष्टीति ॥ आदौब्रह्ममात्राव स्थानादिसमुच्चयार्थश्चशब्दः । अवधारणार्थकः प्राधान्यार्थमेवेतिवासंबध्यते । प्राधान्यज्ञापनार्थमित्यर्थः । स्यादिदमसंगतंसृ ष्ट्यादिकथनमस्मन्मतेयदिब्रह्मविवर्तादिपरंतत्स्यात् । नचैवं । किंनाम यद्वाचारंभणादिदृष्टांतेनप्राधान्यात्ब्रह्मज्ञानेनाप्रधानप्र पंचज्ञानमुक्तं तत्रकथंजगदपेक्षयाब्रह्मणःप्राधान्यमित्यपेक्षायांजगन्निमित्तकारणत्वादिनातज्ज्ञापनार्थमेवेतिकथमसंगतिरितिभा वः । नन्वपागादग्नेरग्नित्वं वाचारंभणंविकारोनामधेयंत्रीणिरूपाणीत्येवसत्यं इत्युत्तरवाक्येविकारमिथ्यात्वमुक्त्वोपादानभूतते जोवन्नानांत्रयाणामेवसत्यत्वोक्त्याकारणव्यतिरेकेणकार्याभावावगमात् । तदनुसारेणवाचारंभणमितिपूर्ववाक्यत्रयस्यापितदर्थ त्वमेवयुक्तं । नतुप्रधानेपरिज्ञातेगुणभूतंज्ञातमिवभवतीत्यत्रदृष्टांतकथनपरत्वमित्यतआह ॥ त्रीणीति ॥ यद्वाप्राधान्यज्ञापना र्थसृष्टिकथनमितिनयुक्तं । अपागादग्नेरग्नित्वमित्युत्तरवाक्येविकारमिथ्यात्वमुक्त्वोपादानभूततेजोवन्नानांत्रयाणामेवसत्यत्वोक्त्या तत्तेजोसृजतेत्यादिकथनस्यकारणव्यतिरेकेणकार्यासत्वेतात्पर्यावगमादित्यतस्तद्वाक्यस्यतात्पर्यमाह ॥ त्रीणीति ॥ किमपेक्षया विष्णोःप्राधान्यज्ञापनार्थमिदंवाक्यमित्यतउक्तं ॥ अभिमानिदेवतापेक्षयेति ॥ स्यादेतदेवं यदित्रीणिरूपाणीतिउपादानभू ततेजोवन्नान्युच्येरन् । नचैवं । तथासतीतिशब्दवैयर्थ्यात् । किंतुतत्तेजोसृजत तदपोसृजत ताअन्नमसृजंतेति परमात्मसृष्टत्व

भाष्यं ॥ सृष्टिकथनंचप्राधान्यार्थं । त्रीणिरूपाणीत्येवसत्यमित्यपिप्राधान्यार्थमेवाभिमानिदेवतापेक्षया । तेजोभिमानवान्ब्रह्मावायुश्चावभिमान वान् । रुद्रःक्षित्यभिमानीचाप्येतन्मयमिदंजगत् । अभिमन्यमानसहितास्त्रयएतेभिमानिनः । विष्णोर्जाताःक्रमेणैवपूर्वस्मादुत्तरोत्तरं ।

नोक्तानांतेजोबन्नाभिमानिदेवतानांत्रीणिरूपाणीतिनामधेयं । उपलक्षणमेतत् अग्न्यादिनामधेयंच सत्यंमुख्यमिति त्रीणिरूपाणीत्यादिशब्दमुख्यार्थत्वोक्त्यातत्स्रष्टुर्भगवतःतदपेक्षयाप्राधान्यलाभेनेदमपिवाक्यंप्राधान्यज्ञापनार्थमेवप्रवृत्तमित्यर्थः । प्रतीतार्थपरित्यागेनोक्तार्थपरत्वंवाक्यानांकुतइत्यतस्तत्तेजोसृजतेत्यादिव्याख्यानरूपंप्रमाणंपठति ॥ **तेजइत्यादिना** ॥ कास्ताअभिमानिदेवताइत्यतआह ॥ **तेजइति** ॥ अनेनतत्तेजोसृजत तदपोसृजत ताअन्नमसृजंतेति वाक्यत्रयगततेजोबन्नशब्दाव्याख्याताः । तेजोभिमानवान्ब्रह्मेत्यवांतराभिमानिव्यपेक्षया । तेनसोसृजत्प्रथमंदेवींतेजआख्यांश्रियंसतीं । इत्यनेननविरोधः । तेषां खल्वेषांभूतानांत्रीण्येवबीजानिभवंति अंडजंजीवजमुद्भिज्जमित्येतद्वाक्यतात्पर्यमाह ॥**अपीति**॥ जगदप्येतत्कारणकमित्यर्थः । नकेवलंतेजआदिशब्देनतदभिमानिनएवग्राह्याः किंतुभूतमपीतिभावेनतत्तेजोसृजतेतिवाक्यत्रयंव्याचष्टे ॥ **अभिमन्यन्नाप्ेति** ॥ तदपोसृजत ताअन्नमसृजंतेति अवन्नयोस्तेजोऽजन्यत्वोक्तेः कथंविष्णोर्जाताइत्यतउक्तं॥ **क्रमेणैवेति** ॥ साक्षाद्विष्णोरेव क्रमेणजातत्वेकथमुक्तशंकानिरासइत्यतस्तदेवविशदयति ॥ **पूर्वस्मादिति** ॥ जातमितिसंबंधः । अभिमान्यभिमन्यमानयोः किंसमप्रधानभावेनतेजआदिशब्दवाच्यत्वंनेत्याह ॥ **तेजइति** ॥ तस्मादभिमानित्वात् एषामेवमुख्येतिशेषः । नामधेयंत्रीणिरूपाणीत्येवसत्यमित्येतद्व्याचष्टे ॥ **एतइति** ॥ चोवधारणे । मुख्यतइतिशेषः । तेनत्रीणिरूपाणीतिनामधेयंसत्यंमुख्यमितिव्याख्यातंभवति । सेयंदेवतेमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरोत् इतिवाक्यतात्पर्यमाह ॥ **ब्रह्मेति** ॥ य

भाष्यं ॥ तेजोबन्नाभिधातस्मादेषामेवप्रकीर्तिता । एतेचत्रीणिरूपाणीत्यभिधागोचराःसुराः । ब्रह्मवायुगिरीशेभ्यस्तेभ्योजातमिदंजगत् ।

दग्नेरोहितंरूपंतेजसस्तद्रूपं यदादित्यस्यरोहितरूपं यच्चंद्रमसोरोहितंरूपं यद्विद्युतोरोहितंरूपं इत्यादिवाक्यचतुष्टयंव्याचष्टे ॥
अतइति ॥ अग्न्यादिरूपाणांजगदंतर्गतत्वात्इत्यर्थः । अपिशब्देनविद्युतोग्रहणं । तेभ्यउद्भवोयस्यरूपस्येतिव्यधिकरणबहुव्री
हिः । अग्निसोमसूर्यविद्युतांरोहितंरूपंब्रह्मोद्भवं शुक्लंरूपंवायूद्भवं कृष्णंरूपंरुद्रोद्भवमित्यर्थः । अपागादग्नेरग्नित्वमित्यादिवाक्य
चतुष्टयतात्पर्यमाह ॥ अतइति ॥ अग्न्यादिरूपाणांब्रह्मादिजन्यत्वेनाग्न्यादिशब्दप्रवृत्तिनिमित्ताग्नित्वादिकंअग्न्यादिषुमुख्य
तोना[illegible] ब्रह्मादिष्वेवमुख्यतोवर्ततेयतइत्यर्थः । एषामेवमुख्यतइतिशेषः । यथोक्तंछांदोग्यभाष्ये अतोयल्लोहितंरूपंश्रियस्तद्रूप
संभवं । यच्छुक्लंवायुजंविंद्यात्कृष्णंचैवशिवोद्भवं । तस्मादग्नेर्यदग्नित्वंअग्निनामप्रवर्तकं । लक्ष्म्यादिदेवतानांतन्नैवाग्नेरग्निताततः
इत्यादि । कुतोग्न्यादिशब्दप्रवृत्तिनिमित्तमग्नित्वादिकंअग्न्यादितोपगतंब्रह्मादावेववर्तते इत्याशंकापरिहारकत्वेनत्रीणिरूपाणीत्ये
वसत्यमित्येतद्वाक्यंप्रकारांतरेणव्याचष्टे ॥ सादनादिति ॥ इत्येवेत्यस्यार्थःसादनाद्यमनाच्चेति । एतेषामग्न्यादीनांसादनादि
तिसंबंधः । यद्वाऽतइत्युक्तमेवहेतुंदर्शयितुंत्रीणिरूपाणीत्येतद्वाक्यंव्याचष्टे ॥ सादनादिति ॥ ननुयोदेवानांनामधाइत्यग्न्या
दिनाम्नांविष्णावेवमुख्यत्वोक्तेःकथंब्रह्मादीनांतन्मुख्यमित्यतआह ॥ तेषामिति ॥ एतेचत्रीणिरूपाणीत्यत्रसत्यशब्दोमुख्या
र्थोभिप्रेतः तत्कथमित्यतआह ॥ प्रधानइति ॥ यथासोम्यैकेनलोहितमणिनेतिवाक्यंव्याचष्टे ॥ यथैवेति ॥ एवकारःप्रसिद्ध्य

भाष्यं ॥ अतोग्निसूर्यसोमानामपिरूपंतदुद्भवं । अतोग्निसूर्यसोमानांनामाप्येषांप्रकीर्तितं । सादनाद्यमनाच्चैवसत्यमेषांत्रयःसुराः ।
तेषांसत्यंहरिःसाक्षाद्यतस्तेषांनियामकः । प्रधानेसत्यशब्दोयंश्रुतिभिःसमुदाहृतः । यथैवसर्वलोहानांप्रधानंकांचनंस्मृतं ।

र्थकः । यथासोम्यैकेनमृत्पिंडेन यथासोम्यैकेननखनिकृंतनेनेतिवाक्यद्वयंव्याचष्टे ॥ **यथेति** ॥ यथैवेतिसंबंधः । कार्ष्णायसां
तरे कार्ष्णायसांतरेण । दार्ष्टांतिकमाह ॥ **एवमिति** ॥ एवमेवेतिसंबंधः । श्रेष्ठएवनत्वभिन्नइतिवा । किंततइत्यतोयेनाश्रुतं
श्रुतंभवतीत्यादिव्याचष्टे ॥ **तेनत्विति** ॥ तुशब्दोवधारणे । नतुजगतोब्रह्मण्यारोपितत्वेन । सन्मूलाइत्यादिव्याचष्टे ॥ **स
इति** ॥ संहर्तेत्यनेन सत्आयतनंप्रलयेयासांताःसदायतनाइत्यर्थउक्तोभवति । नियंतेत्यनेनसतआयतनानियम्यतयाधिष्ठान
भूताइत्यर्थउक्तोभवति । रक्षितेत्यनेनसत्प्रतिष्ठारक्षकंयासांताःसत्प्रतिष्ठाइत्यर्थउक्तोभवति । ऐतदात्म्यमिदंसर्वमित्येतद्व्याचष्टे ॥
तेनेति ॥ सआत्मेत्येतदनूद्यव्याचष्टे ॥ **सइति** ॥ सएषोणिमेत्यणिमशब्दार्थमाह ॥ **ससूक्ष्मइति** ॥ सूक्ष्मत्वेतेनव्या
प्तमितिविरुद्धमित्यतआह ॥ **सर्वगइति** ॥ परिमाणद्वयस्यापिसद्भावेननविरोधइतिभावः । यद्वाऽऽत्मशब्दस्यार्था
तरमाह ॥ **सर्वगइति** ॥ तत्सत्यमित्येतद्व्याचष्टे ॥ **सर्वोत्तमत्वादिति** ॥ अप्राप्तप्रतिषेधस्यायोगादादौजीवाभेदस्यवा
दिप्राप्तिंदर्शयति ॥ **जीवाभिन्नमिति** ॥ तत्ब्रह्म । अतत्वमसीत्यस्यतत्वंनासीत्यर्थमभिप्रेत्यतदभिप्रायमाह ॥ **नत्व**

भाष्यं ॥ यथामृत्पिंडसदृशामृण्मयाःसर्वएवच । यथाकार्ष्णायसंसर्वसमंकार्ष्णायसांतरे । एवंसर्वस्यजगतःसदृशःश्रेष्ठएवच । हरिस्ते
नतुतज्ज्ञानाज्जगज्ज्ञातमिवाखिलं । सस्रष्टाचैवसंहर्तानियंतारक्षिताहरिः । तेनव्याप्तमिदंसर्वमैतदात्म्यमतोविदुः । सआत्मापूर्णगुणतःससूक्ष्मःसर्व
गःसदा । सर्वोत्तमत्वात्सत्यंतज्जीवाभिन्नंतदासुराः । विदुर्नत्वंतथाविद्धिश्वेतकेतोकदाचन । किंतुविष्णुःपृथक्सर्वदेवदेवेश्वरःप्रभुः । पृथगेवाहमत्यल्प
शक्तिज्ञानसुखादिकः । इत्येवविद्धिसततमतोमोक्षमवाप्स्यसि । सर्वोत्तमइतिज्ञातोविष्णुर्मोक्षमिमंनयेत् । जीवरूपतयाज्ञातस्तमोंधंप्रापयेत्प्रभुः ।

मिति ॥ तर्हिकथंज्ञेयमितिपृच्छति ॥ **किंत्विति** ॥ तदुत्तरत्वेनत्वमतत्तस्मादन्योसीत्यर्थमभिप्रेत्यतदभिप्रायमाह ॥ **विष्णु**
रिति ॥ कुतोभेदःप्रतिपत्तव्यइत्यतः सर्वेतिअत्यल्पेतिचभेदकधर्मोक्तिः । पृथगेवेतिभेदाभेदनिरासायैवकारः । किमर्थमेवंज्ञा
तव्यमित्यतआह ॥ **असइति** ॥ सर्वदेवेश्वरत्वादिनाभेदज्ञानादित्यर्थः । एवंसतिमोक्षसाधनेज्ञानस्यैवस्वातंत्र्यंनमंतव्यमित्या
ह ॥ **सर्वोत्तमइति** ॥ इमंज्ञातारं नत्वंतथाविद्धीत्युक्तं तथाज्ञानेऽनिष्टमाह ॥ **जीवेति** ॥ ननुविष्णुत्वप्राप्तिरूपोमोक्षःकथंभे
दज्ञानात्स्यादित्यतआह ॥ **विष्णोरिति** ॥ सुप्तेरपिमोक्षत्वपरिहारायोक्तंदासतयेति । दासत्वज्ञानेनेत्यर्थः । इत्थंभावलक्षणे
तृतीया । मुक्तियोग्यसंसारिणामपिविष्णुदासत्वज्ञानस्यमोक्षत्वप्रसंगपरिहारायविष्णोःसामीप्यमित्युक्तं । विष्णुत्वमेवकुतोनमो
क्षइत्यतआह ॥ **एषोहमिति** ॥ यदिविष्णुत्वंमोक्षःस्यात्तदैषविष्णुरहमितिमुक्तेनप्रतिसंधीयेत । नचतत्प्रतिसंधानमस्ति ।
अतोनविष्णुत्वंमोक्षइत्यर्थः । वाशब्दःप्रमाणांतरसमुच्चयार्थः । ननुविद्यमानमपिविष्णुत्वंनज्ञायतइतिचेत् न । तथासतिइष्ट
त्वाविशेषेणप्रतिबंधकाभावाविशेषेणचसंसारतीर्णत्वमुक्तत्वयोरपिज्ञानाभावप्रसंगात् । अस्तुतदपीतिचेत्तत्राह ॥ **संसारेति** ॥
विमोक्षेणकिंफलंतदनुभवस्यैवपुरुषार्थत्वादितिभावः । ननुविशिष्टवस्तुत्वापत्तेरेवपुरुषार्थत्वोपपत्तौकिंतज्ज्ञानेनेत्यतआह ॥ **य**
थेति ॥ तथाविष्णुत्वंप्राप्तोपिनसुखीभवेदितिशेषः । अनेनयथासोम्यमधुमधुकृतोनिस्तिष्ठंतीतिखंडतात्पर्यमुक्तं । ननुमास्तुवि

भाष्यं ॥ विष्णोर्दासतयाविष्णोस्सामीप्यंमोक्षउच्यते । नविष्णुत्वंतुमोक्षःस्यादेषोहमितिवाऽस्मृतेः । संसारसागरात्तीर्णोमुक्तोहमितिवाऽस्मृ
तिः । यदातदाविमोक्षेणकिंफलंज्ञानिनोभवेत् । यथामधुकरैर्नानाविधपुष्परसैःसह । मधुत्वंप्रापितःसंविदभावान्नसुखीभवेत् ।

शिष्टवस्तुत्वंमोक्षः किंतुविशिष्टप्राप्तिरेव । तथाचतत्प्राप्तेरेवपुरुषार्थत्वोपपत्तौकिंतत्रज्ञानेनेतिचेन्न । किंविशिष्टयत्किंचिद्वस्तुप्रा
प्तिर्मोक्षउतविष्णुप्राप्तिरेव । नाद्यइत्याह ॥ यथेति ॥ अज्ञानादित्येववक्तव्येइयमस्मीतिचाज्ञानादितियदुक्तंतद्यतिरेकेणभेदज्ञान
स्यमोक्षसाधनत्वोपपादनार्थं । अनेनइमाःसोम्यनद्यइतिखंडतात्पर्यमुक्तं । नद्वितीयइत्याह ॥ यथासुप्तइति ॥ हरिंप्राप्तोपीतिसं
बंधः । पृथक्त्वज्ञानवर्जनादित्यस्यपूर्वोक्तएवाभिप्रायः । अनेनसतासोम्यतदासंपन्नोभवतीतिवाक्यतात्पर्यमुक्तं । भेदज्ञानाभा
वेमोक्षाभावइतिव्यतिरेकमुक्त्वान्वयमाह ॥ एवमिति ॥ सदोच्चतामेवेतिसंबंधः । उपसंहरति ॥ तस्मादिति ॥ नकेवलंज्ञा
नाभावेमोक्षस्यपुरुषार्थत्वाभावः किंत्वनिष्टरूपत्वंचस्यादित्याह ॥ मग्नस्येति ॥ परेअज्ञानेमग्नस्य । सर्वथामुक्तस्यज्ञानाभानां
गीकारइतियावत् । दुःखतरंदुःखातिशयो नभवेत्किं भवेदेव । अंधादौदर्शनादित्यर्थः । ननुभेदश्रुतीनामाविद्यकभेदपरत्वान्नत
द्विरोधेनाहंब्रह्मास्मि तद्योहमित्यादीनांअद्वैतश्रुतीनांअन्यार्थताव्याख्येयेत्यतोनभेदस्याऽऽविद्यकत्वं मुक्तावप्यनुवर्तमानत्वोक्ते
रित्याह ॥ तस्माइति ॥ यत्रेत्यस्यमुक्तस्थानपरत्वप्रदर्शनायोक्त्वेत्यंतंउक्तं । नचसमानकर्तृकत्वाभावः । भागवतेउक्तत्वादि

भाष्यं ॥ यथानद्योनमुक्ताहिसमुद्रंप्रापिताअपि । इयमस्मीतिचाज्ञानाद्यथासुप्तोनमुच्यते । प्रलयेपिहरिंप्राप्तःपृथक्त्वज्ञानवर्जनात् । एवंजीवे
शयोर्भेदज्ञानाद्विष्णोःसदोच्चतां । ज्ञात्वैवमुच्यतेतस्मादेवंजानीहिपुत्रकेतिब्रह्मांडे । मग्नस्यहिपरेऽज्ञानेकिंनदुःखतरंभवेदितिमोक्षधर्मे । तस्मैस्वलो
कंभगवान्सभाजितःसंदर्शयामासेत्युक्त्वा । नवर्ततेयत्ररजस्तमस्तयोःसत्वंचमिश्रंनचकालविक्रमः । नयत्रमायाकिमुतापरेहरेरनुव्रतायत्रसुरासुरा
र्चिताइतिभागवते ।

त्यध्याहारात्।यन्नलोके सत्त्वशब्दोनेकार्थः क्वचित्प्रकृतिपरिणामविशेषस्यवाचकः क्वचित्साधुभावस्य तत्रसत्त्वंचनविद्यतइत्युक्ते नज्ञायतेकस्यप्रतिषेधइति।अतस्तयोरजस्तमसोर्मिश्रंसहचरितमित्युक्तं । रजआदिप्रकरणात्ज्ञास्यतइतिचेत् श्रुत्यभावेप्रकरणाद्य न्वेषणात्।रजःप्रभृतीनामप्रवृत्तिर्नामप्रतिबंधकतयाव्यापाराभावः । कालविक्रमःकालसामर्थ्यंकृतोभावविकारः । मायाप्रकृतिः । अपरेमहदादयोनवर्ततइतिकिमुवक्तव्यं।हरेरनुव्रतायत्रवर्तंते । असुराःसाधवःसंति।एवंभूतंलोकंसंदर्शयामासेतिपूर्वेणान्वयः।अत्र हरेरनुव्रताइतिजीवेशभेदोक्तिः।ननुतस्मैस्वलोकमित्यस्ययत्परमुत्तमंनेतिवाक्यशेषबलेनगौणमोक्षपरत्वप्रतीतेःकथंनुपरममुक्तौभे दसद्भावइति प्रतिपादनायतद्वाक्योदाहरणमित्यतःसमाख्यारूपप्रमाणमुदाहृत्यवाक्यशेषंव्याचष्टे ॥अदर्शयदिति ॥ हरिवंशेषु उक्तंयतइतिशेषः । यदित्यस्ययस्मादित्यर्थत्वेअभिधानंचवक्ति ॥यत्तादिति ॥ नकेवलंप्रथमार्थाः पंचम्यर्थाश्च । ननुभेदज्ञानस्यमि- थ्याज्ञानत्वात्कथंश्रुतीनांऐक्यपरत्वाभावइत्यतआह ॥ विद्येति ॥ नचभिदायाअबोधइतिव्याख्येयं । अज्ञानस्यविद्यात्वाभा- वात् । इतोपिनश्रुतीनामैक्यपरत्वमित्याह ॥ क्ष्मेति ॥ भूतानामादिर्भूतादिः क्ष्मादिपदैःपंचानांभूतानांमनसोदशानामिंद्रिया णांपंचानांविषयाणांभूतादिपदोपलक्षितस्यत्रिविधस्याप्यहंकारस्याभिमानिनोदेवाउच्यंते । अव्याकृतंपरमेश्वरं यर्हियदा गुणत्र

भाष्यं ॥ अदर्शयत्स्वकंलोकंब्रह्मणेविष्णुरव्ययः । यस्मात्पदात्परंनास्तियत्रमुक्ताउपासतइतिहरिवंशेषु । अतःपरंनयत्पदमित्यत्रापियच्छ ब्दस्ययस्मादित्यर्थः । यत्तदित्यादयःशब्दाःपंचम्यर्थाश्चकीर्तिताइतिच । विद्यात्मनिभिदाबोधः । क्ष्मांभोनलानिलवियन्मनइंद्रियार्थैर्भूतादिभिः परिवृतःप्रतिसंजिवृक्षुः । अव्याकृतंविशतियर्हिगुणत्रयात्माकालंपरंस्वमनुभूयपरः स्वयंभूः ।

यस्यात्माभिमानी परंपरसंख्योपेतं परःक्ष्मादिभ्यः । एवंतदाभगवंतमितितदीयंलोकं । अगताभिमानाःअगतजीवभावाः । अत्राव्याकृतंविशतिप्रधानंब्रह्मोपयांतीतिभेदोक्तिः । आविष्पदेनकर्तृत्वात्सगुणंब्रह्मपुरुषंपुरुषर्षभ । ससंगत्यपुनःकालेकालेनेश्वर मूर्तिना । जातेगुणव्यतिकरेयथापूर्वंप्रजायतेइतिवाक्यशेषग्रहणं । तस्यचायमर्थः । आद्यःस्थिरचराणांयोवेदगर्भःसहऋषिभिर्योगेश्वरैर्जीवभेदज्ञानेनाभिमानेनेश्वरबहुमानेननिवृत्तकर्मणाचजगत्कर्तृत्वात्सार्वज्ञादिगुणोपेतंपरमपुरुषाख्यंपरंब्रह्म संगत्यमुक्तःसन्प्रविश्य पुनःकालाख्यपरमेश्वरमूर्त्या सृष्टिकालेजातेसति अगुणव्यतिकरेसत्वादिगुणविक्रियाहीनेविष्णुलोकेपूर्ववत्सर्वमुक्ताधिपतिर्जायतइति । अत्रमुक्तौभेदःस्फुटएव । हिरण्यगर्भमुक्तित्वादेवपरममुक्तित्वंचसिद्धं । मुक्तौभेदप्रतिपादकप्रमाणांतरमाह ॥ आधिपत्यमिति ॥ सर्वेपितेमुक्ताआधिपत्यंजगद्व्यापारादिकमृते स्वरूपभूतेनानंदेन कर्मणाच विषयेणचविषयनिमित्तक भोगेन ब्रह्मणःतुल्याएवनत्वभिन्नाइतियोजना । तदामुक्तिदशायां तत्कालभाविना मुक्तावप्यनुवर्तमानेन नानात्वेनभेदेन अभिसंवद्धाःसम्यग्युक्तावभूवुः । प्रकृतौकरणातीताःप्रकृतिनिमित्तेंद्रियरहिताः स्वात्मन्येवस्वरूपभूतदेहादावेव व्यवस्थिताः

भाष्यं ॥ एवंपरेत्यभगवंतमनुप्रविष्टायेयोगिनोजितमरुन्मनसोविरागाः । तेनैवसाकममृतंपुरुषंपुराणंब्रह्मप्रधानमुपयांत्यगताभिमानाः । भेददृष्ट्याभिमानेननिःसंगेनापिकर्मणेत्यादिच । आधिपत्यमृतेचैवआनंदेनापिकर्मणा । सर्वेतेब्रह्मणस्तुल्याभोगेनविषयेणच । नानात्वेनापिसंवद्धास्तदातत्कालभाविना । प्रकृतौकरणातीताःस्वात्मन्येवव्यवस्थिताः । प्रदर्शयित्वाह्यात्मानंप्रकृतिस्तेपुसर्वशः ।

येमुक्तास्तेषुप्रकृतिःसर्वशोनप्रवर्तते । कुतः हियस्मादात्मानंपरमात्मानं प्रदर्शयित्वास्वयंचप्रतीता । प्रकृतिपुरुषविवेकज्ञानादि तियावत् । तर्हिप्रकृतिर्निर्व्यापाराकिंनेत्याह । सापुरुषान्यवहुत्वेनसर्गेप्रवर्ततीति । साप्रकृतिर्मुक्तेभ्योन्येषांसंसारिणांपुरुषाणां वहुत्वेनकारणेनसर्गेसृष्टिकालेसृष्ट्यर्थंवाप्रवर्ततिप्रवर्ततइत्यर्थः । तेषांमुक्तानांपुनर्नप्रवर्तते । तदेवविवृणोति ॥ **संयोगइति** ॥ कुतइत्यतआह ॥ **तत्वेति** ॥ ननुसर्वेषांमुक्तानांप्रकृतिवंधाभावः कुतइत्यतआह ॥ **समेति** ॥ यदिकेषांचिन्मुक्तानांप्रकृतिवंधः स्यात्तर्हिप्रकृतिवंधनिमित्तकंदुःखंस्यात् । तथासतिदुःखाभावःपरानंदोलिंगभेदःसमामताइत्यादिविरोधः । अतःप्रकृतिवंधाभावः सर्वेषामपिसमइतिभावः । तर्हितारतम्यश्रुतिविरोधइत्यतआह ॥ **मानुषादीति** ॥ ऐक्यज्ञानिनांनिंदितत्वाच्चनजीवेश्वरैक्यं श्रुत्यर्थइत्यभिप्रेत्याह ॥ **ऐकात्म्यमिति** ॥ एकश्चासावात्माचएकात्मातस्यभावऐकात्म्यं सर्वात्मनांब्रह्मैक्यमितियावत् । यदैकात्म्यंनामेदंअनैपुणाअविद्यमाननैपुणाःकेचिद्ब्रूयुः । एवंवचनेकिंमूलमित्यतआह ॥ **शास्त्रेति** ॥ अहंब्रह्मास्मीतिशास्त्राणांतत्वंअभिप्रेतार्थंअविज्ञायब्रूयुः । कथमविज्ञानमात्रेणतदुक्तिरित्यतउक्तं ॥ **तथेति** ॥ ऐक्यप्रतिपादकसदृशोयोवादःएकविभक्तिमत्त्वादिरूपः सःवलमेषांतेतथोक्ताः । अहंब्रह्मास्मीतिवाक्यानांअभिप्रेतार्थमविज्ञायआपाततःप्रतीतएवार्थेभ्रांताइत्य

भाष्यं ॥ पुरुषान्यवहुत्वेनप्रतीतानप्रवर्तते । प्रवर्ततिपुनःसर्गेतेषांसानप्रवर्तते । संयोगःप्रकृतेर्नैवमुक्तानांतत्वदर्शनात् । समादुःखनिवृत्तिस्तुमुक्तानामपिसर्वशः । मानुषादिविरिंचांतंसुखंमुक्तौशतोत्तरमित्यादिवायुप्रोक्ते । ऐकात्म्यंनामयदिदंकेचिद्ब्रूयुरनैपुणाः । शास्त्रतत्वमविज्ञायतथावादवला[illegible]ः ।

र्थः । सर्वेषामविद्यमानंशास्त्रतत्वाज्ञानादिकमेतेषामेवकिंनिमित्तमित्यतउक्तं ॥ कामेति ॥ यथोक्तं इच्छाद्वेषसमुत्थेन द्वंद्वमोहेनभारतेति । ननुद्वासुपर्णेत्यादिषुशास्त्रेषुविरोधिषुसत्सुकथमैक्यंब्रूयुरित्यतआह ॥ याथातथ्यमिति ॥ भेदपराणांशास्त्राणांयाथातथ्यमविज्ञाय शास्त्रदस्यवःतानिशास्त्राण्यतत्वावेदकानिइतिमन्यमानाइत्यर्थः । एवमैक्यंमन्यमानाःब्रह्मस्तेनाः । कामादीनामागंतुकत्वात्मूलकारणमाह ॥ निरानंदाइत्यादि ॥ एतेनाधमस्वरूपयोग्यतांलक्षयति । तथापि सर्वज्ञत्वाल्पज्ञत्वादिविरुद्धमैक्यंकथंब्रूयुरित्यतआह ॥ वैगुण्यमेवेति ॥ जीवब्रह्मणोस्तत्वतोनिर्गुणत्वमेवपश्यंतोगुणानिसार्वज्ञादिगुणान् ननियुंजतेतत्स्वरूपेणनयोजयंति । एवंभूतानांफलमाह ॥ तेषामिति ॥ तमोगुणप्रचुरशरीराणां तमोनरकविशेषः परायणंप्राप्यं । ऐकात्म्यंनचेत्किंतर्हितत्वमित्यतउक्तं ॥ अन्यइति ॥ ननुविष्णुसर्वोत्तमत्वज्ञानस्यमोक्षहेतुत्वात् । भेदः कुतोज्ञेयइत्यतआह ॥ आधिक्यज्ञानमिति ॥ अन्यत्वेनअन्यत्वज्ञानेनेत्यर्थः । नन्वहंब्रह्मास्मीत्यादिनास्फुटमैक्यंप्रतिभासते अतस्तद्बलात्भेदशास्त्रादेरतत्वावेदकत्वादिकल्पनंयुक्तमेवेत्यतआह ॥ यतइति ॥ स्वरूपतःपरिमाणभेदतः जातितोजीवत्वादिजातिभेदतः श्रुतितोद्वासुपर्णेत्यादेः अर्थतःप्रयोजनभावाभावाभ्यां यतःसभगवानन्यःप्रतीयते । अतःसोस्मीति संबं

भाष्यं ॥ कामक्रोधाभिभूतत्वादहंकारवशंगताः । याथातथ्यमविज्ञायशास्त्राणांशास्त्रदस्यवः । ब्रह्मस्तेनानिरानंदाअपक्वमनसोशिवाः । वैगुण्यमेवपश्यंतोनगुणान्निनियुंजते । तेषांतमःशरीराणांतमएवपरायणं । अन्यईशस्तथान्योहमितिज्ञानंविपश्चितां । आधिक्यज्ञानमीशस्ययतोन्यत्वेनयुज्यते । यतःस्वरूपतश्चान्योजातितःश्रुतितोर्थतः । कथमस्मिसइत्येवंसंबंधःस्याद्संहितः ।

धोन्वयोऽसंहितोयोग्यः कथमेवस्यात् । अहंब्रह्मास्मीत्यादीनांवाक्यानामैक्यपरत्वेनिश्चितेअन्येपामतत्वावेदकत्वकल्पनंयुक्तंस्यात् । नचैवं । अनुमानागमविरोधेनप्रतीतान्वययोग्यताविरहात् । सिंहोदेवदत्तइत्यादौयोग्यताविरहस्याकांक्षासंनिधिवाधकत्वस्योपलंभात् । अन्यथान्योन्याश्रयात् । भेदवाक्यादेरतत्वावेदकत्वादौसिद्धेयोग्यतादिसंपत्त्याहमादिवाक्यानांऐक्यार्थतानिश्चयः । सतितस्मिन्नतत्वावेदकत्वादिनिश्चयइति । एवमहंब्रह्मास्मि तद्योहंसोसावित्यादिवाक्यमंतर्यामिपरत्वेनव्याख्यायविशिष्टैक्यार्थतयाचस्मृत्याव्याख्याति ॥ बहवइति ॥ यद्वाभेदस्यमीमांसयासमर्थितत्वाच्चनैक्यंश्रुत्यर्थइत्यभिप्रेत्याह ॥ बहवइति ॥ उभयविधप्रमाणोपलंभादितिभावः । बहवइतिपक्षेपिसर्वेपांसमत्वायोगादेकःश्रेष्ठोवक्तव्यः । सचकः । कथंचश्रेष्ठचमित्याशयेनपृच्छति ॥ कोह्यंति ॥ अत्रवहूनांपुरुपाणांमध्ये । आद्यप्रश्नोत्तरमाह ॥ नैतदिति ॥ एतदित्यस्यविवरणंपुरुपमेकमिति । यद्वाएतस्मिन्जगति । सकलश्रुत्यादिविरुद्धत्वादितिभावः । किंतुवहवइत्यर्थः । एवंपुरुपैक्यंनिराकृत्याद्वैतश्रुतिविरोधपरिहारायतदर्थत्वेनविशिष्टैक्यंवदन्द्वितीयप्रश्नोत्तरमाह ॥ बहूनामिति ॥ तेपांवहूनांपुरुपाणांमध्ये यायोनिःयःकारणभूतःश्रेष्ठोयथाचश्रेष्ठस्तंपुरुपंतथाऽऽख्यास्यामि । विश्वंव्याप्तं । गीतायामपिजीवभिन्नस्यविष्णोःसर्वोत्तमत्वस्यैवसर्वसच्छास्त्रप्रतिपाद्यतयाभिहितत्वात्तदेववेदादिप्रतिपाद्यंनात्मब्रह्मैक्यमित्याह ॥ द्वाविमाविति ॥ द्वावेवेतिसंबंधः । इमौप्रमितौ पुरुपौचेतनौ । लो

भाष्यं ॥ वहवःपुरुपाब्रह्मन्नुताहोएकएवतु । कोह्यत्रपुरुपश्रेष्ठस्तंभवान्वक्तुमर्हति । वैशंपायनउवाच । नैतदिच्छंतिपुरुपमेकंकुरुकुलोद्वह । वहूनांपुरुपाणांहियथैकायोनिरुच्यते । तथातंपुरुपंविश्वमाख्यास्यामिगुणाधिकमित्यादिचमोक्षधर्मे । द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच ।

केपर्यालोचनेसति । अथवाद्वाविवेत्यस्योपपत्तयेपरमपुरुषंव्यावर्तयितुंलोकइत्युक्तं । ईशितव्यवर्गइत्यर्थः । सर्वाणिभूतानिब्रह्मा दयोजीवाःक्षराःशरीरक्षरणात् । कूटस्थोमहालक्ष्मीः । अक्षरःअक्षरदेहत्वात् । यदर्थंपुरुषद्वयनिरूपणंकृतंतदाह **॥उत्तमइति॥** अन्यःक्षराक्षराभ्यां । नपुनरेतयोरेवमध्येकश्चित्पुरुषोत्तमःकल्पनीयः । तत्रश्रुत्यादिसंमतिमाह ॥ **परमात्मेति** ॥ आत्मशब्दो हि चेतनपर्यायः । युक्तिमप्याह ॥ **यइति** ॥ लोकत्रयमितिसर्वोपलक्षणं । योहियस्यधारणपोषणकर्तासतस्मादुत्तमोयुक्तः । तदाविष्टस्यतन्नाशेनाशप्रसंगइत्यतउक्तं ॥ **अव्ययइति** ॥ तत्कथंऐश्वर्यादित्याह ॥ **ईश्वरइति** ॥ सचकइत्यपेक्षायांअहमेवे तिसप्रमाणकमाह ॥ **यस्मादिति** ॥ क्षरंचेत्यन्वयः । लोकेपौरुषेयागमे । अत्रात्मनस्तात्पर्यद्योतनायवेत्तुःफलमाह ॥ **योमामि ति** ॥ एवं नत्वश्वकर्णादिशब्दवत्संज्ञात्वेन । एतच्चपुरुषोत्तमत्वंअपारमार्थिकमितिसंमोहवर्जितः । सर्ववित् अस्यैवसर्वशा स्त्रार्थत्वात् । सर्वभावेनसर्वप्रकारेण । एतच्चनायोग्यायवाच्यमितिभावेनाह ॥ **इतीति** ॥ सर्वविदित्युक्तं ततःकिमित्यतआ ह ॥ **एतदिति** ॥ बुद्धिमानपरोक्षज्ञानी । कृतकृत्योमुक्तः । अत्रसर्वविदित्युक्तत्वात्सर्वेषांपौरुषेयापौरुषेयागमानांविष्णोःसर्वो त्तमत्वएवतात्पर्यंस्फुटंप्रतीयते । ऐक्यज्ञानिनामनर्थोक्तेर्विष्णुसर्वोत्तमत्वादिज्ञानिनांमोक्षोक्तेश्चनैक्यंश्रुत्यर्थइतिभावेनपैंगिश्रुतिं

भाष्यं ॥ क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यते । उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः । योलोकत्रयमाविश्यविभर्त्यव्ययईश्वरः । यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः । अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः । योमामेवमसंमूढोजानातिपुरुषोत्तमं । ससर्वविद्भजतिमांसर्वभावे नभारत । इतिगुह्यतमंशास्त्रमिदमुक्तंमयानघ । एतद्बुध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारतेतिच ।

पठति ॥ ब्रह्मणइत्यादिना ॥ महातमस्त्रिधाप्रोक्तंऊर्ध्वंमध्यंतथाधरमित्युक्तेरितिभावः । तुशब्दएवार्थे । ईषद्भेदप्रदर्शी ब्रह्म गुणाद्विविधाःस्वरूपभूताभिन्नाश्चेतिप्रदर्शीत्यर्थः । तर्हिकथंज्ञेयमित्यतआह ॥ विजानीयादिति ॥ ततोन्यथाज्ञानेऽनर्थसद्भावात् । ननुगुणात्मकत्वेब्रह्मणःआनंदंब्रह्मणइत्यादिव्यवहारोगुणगुणिभावश्चकथमित्यतआह ॥ गुणानामिति ॥ तच्छरीरो गुणात्मकशरीरः। भूतदेहंभौतिकदेहं। अधरंतमो विशेयुरितिशेषः।तथा अधरंतमोविशेयुरित्यर्थः।प्रकृतिदेहज्ञाःप्राकृतदेहज्ञाः कर्मनिर्मितदेहविदः । आनंदचिद्देहमित्युक्तमेवविशदयति ॥ चिदानंदेति ॥ गुणानामपिपरस्परभेदंनिवारयति ॥ प्रत्येकमिति ॥ सन् उत्तमः । प्रकृतमाह ॥ जीवाभेदमिति ॥ जगताजडजगता । प्रकृत्यालक्ष्म्या। ततःकिमित्यतआह ॥ तस्मादि

भाष्यं ॥ ब्रह्मणस्तद्गुणानांचभेददर्श्यधरंतमः । भेदाभेदप्रदर्शीचमध्यमंतुतमोविशेत् । ईषद्भेदप्रदर्शीचतमएवोत्तरंविशेत् । विजानीयात्ततो ब्रह्मसदासर्वगुणात्मकं । गुणानांचविशेषोस्तिनविभेदःकथंचन । तेचसर्वेगुणाःपूर्णास्तच्छरीरःपरःस्मृतः । आनंदज्ञानशक्त्यादिदेहंविष्णुंतुयेजनाः । अदेहंभूतदेहंवाविदुस्तेचाधरंतमः । तथाप्रकृतिदेहज्ञाःकर्मदेहविदोपिवा । तस्मादानंदचिद्देहंचिदानंदशिरोमुखं । चिदानंदभुजंज्ञानसुखैकपदसांगुलिं । आकेशादानखाग्रेभ्यःपूर्णचित्सुखशक्तिकं । प्रत्येकंतुगुणांस्तांस्तुसदासर्वगुणात्मकान् । ज्ञात्वाविमुच्यतेविष्णोःप्रसादान्मानुषोपिसन् । जीवाभेदंतथाऽभेदंजगतोयेविदुःप्रभोः । तेपियांतितमोघोरमधरंब्रह्मतस्कराः । भेदाभेदंविदुर्येचजीवैस्तुजगतापिवा । परस्यब्रह्मणोयांतितमस्तेप्युत्तरंसदा । अभेदज्ञाःप्रकृत्यापिभेदाभेदविदस्तथा । तेपियांतितमोघोरमधरंचोत्तरंक्रमात् । तस्मात्सर्वोत्तमंविष्णुंपूर्णसर्वगुणोच्छ्रितं । विजानीयाद्विमुक्त्यर्थंसर्वतश्चविलक्षणं ।

नति ॥ चिदानंदात्मकस्यापिदेहस्यतस्माद्भेदादिज्ञानेऽनर्थमाह ॥ अंधंतमइति ॥ प्रादुर्भावान्मत्स्यादीन् सर्वभूतस्थितान्
अंतर्यामिरूपविशेषान् भिन्नाभिन्नविदोपिचांधंतमःप्रविशंतीतिपूर्वेणान्वयः । तदन्यान्पृथ्व्यादीन् । तर्हिकेप्रादुर्भावाः येषांज्ञाने
नान्येषांप्रादुर्भावत्वाभावज्ञानंसुकरमितिजिज्ञासायामाह ॥ मत्स्येति ॥ धन्वंतरिश्चैवेतिएवशब्दउत्तरेणान्वितः । तापसोमनुः
तापसाख्योमनुः । चशब्दोपिशब्दार्थः । एवमाद्याएवहरेःसाक्षादेवप्रादुर्भावाइतिसंबंधः । नन्वेतेषामेवविष्णोःप्रादुर्भावत्वेक
थंप्रकृत्यादेःप्रादुर्भावत्वोक्तिः इत्यतस्तस्यागतिंवदन् यदुक्तमभेदज्ञाःप्रकृत्याचेति यच्चोक्तंजीवाभेदमितितदुभयसिद्ध्यर्थंप्र
कृतिजीवस्वरूपमाह ॥ श्रीरित्यादिना ॥ तेनचाविष्टेत्यनेनक्वचिदवतारत्वोक्तेर्गतिरुक्ताभवति । एवमुत्तरत्रापि । हरिःस्वयंत
द्वशोनभवति । यद्वास्वयंसाक्षाद्धरिर्नेत्यर्थः । एवंतर्हिश्रियोत्यंतनीचतयानित्यमुक्तत्वमपिनस्यात्इत्यतआह ॥ तथापीति ॥

भाष्यं ॥ अंधंतमःप्रविशंतियेदेहंपरमात्मनः । भिन्नंविजानतेविष्णोर्भिन्नाभिन्नविदोपिवा । अंधंतमःप्रविशंतिप्रादुर्भावांस्तुयेपिवा । सर्व
भूतस्थितान्वापिभिन्नान्जानंतियेखिलान् । भिन्नाभिन्नविदोवापिशिरःपाण्यादिकंतथा । भिन्नंमिथोविजानीयुर्भिन्नाभिन्नविदोपिवा । तेपियां
तितमोघोरंयतोनैवोत्थितिःक्वचित् । प्रादुर्भावतयायेचतदन्यान्जानतेविभोः । तेपियांतितमोघोरंतस्मान्नैवंविदोविदुः । मत्स्यकूर्मक्रोडसिंहवटु
भार्गवराघवाः । कृष्णबुद्धौकल्किदत्तहयशीर्षैतरेयकाः । पाराशर्यश्चकपिलोवैकुंठऋषभस्तथा । यज्ञोधन्वंतरिश्चैवस्त्रीरूपस्तापसोमनुः । नारायणो
हरिःकृष्णउपेंद्रःसर्वएवच । एवमाद्याहरेःसाक्षात्प्रादुर्भावाःप्रकीर्तिताः । श्रीर्भूर्दुर्गाम्भृणीश्रीश्चमहालक्ष्मीश्चदक्षिणा । सीताजयंतीसत्याचरु
क्मिणीत्यादिभेदिता । प्रकृतिस्तेनचाविष्टातद्वशानहरिःस्वयं । ततोनंतांशहीनाचबलज्ञप्तिसुखादिभिः । गुणैःसर्वैस्तथाप्यस्यप्रसादाद्दोषवर्जिता ।
सर्वदासुखरूपाचसर्वदाज्ञानरूपिणी ।

105

तद्वशत्वादौसत्यपि दोषवर्जितावंधादिदोषरहिता । सर्वदाऽऽविर्भूतसुखरूपा सर्वदासर्वात्मनाविर्भूतज्ञानरूपिणीत्यर्थः । महान्महत्तत्त्वाभिमानी । चित्तमित्यादिनातदभिमानिरूपमुच्यते । ब्रह्मवाय्वोःस्वरूपेणसमानत्वात्इत्यादिवहुरूपिणोहिरण्यगर्भाः इत्युक्तं । विमुक्त्यनंतरंविष्णुवशाःब्रह्माणःकिंश्रीसमानाः नेत्याह ॥ एभ्यइति ॥ कोटिगुणेतिगुणशब्दोगणनार्थः । ज्ञानानंदवलादिभ्यइतिपंचमीतृतीयार्थे । तुशब्दश्चशब्दार्थः । सर्वेभ्योहिरण्यगर्भेभ्योभिन्नाचेति । तेतुसर्वेब्रह्माणःपरस्परंचभिन्नाः । कुतइत्यतआह ॥ अभिमानइति ॥ क्वचित्तेषांब्रह्मणाऽभेदोक्तेर्गतिमाह॥आनंदइति ॥ विभक्तिविपरिणामेनतैरित्यनुवर्तते । आनंदःस्वस्वरूपभूतः ब्रह्मणःसहभोगनिमित्ताभेदोक्तिरितिभावः । नन्वभेदोक्तेःसहभोगनिमित्तत्वमेवकुतः अभेदएवार्थः किंनस्यादित्यतआह ॥ तेत्विति ॥ भिन्नाएवेतिसंबंधः । नित्यंसंसारेमोक्षेच । प्रसंगादाह ॥ श्रियोन्येभ्यः ॥ शेषादिभ्यइति ॥ तथाचशब्दौपरस्परसमुच्चये । यद्वातेतुब्रह्माणःपरस्परंभिन्नाअभिन्नाश्चक्वचिदुदिताःतन्निमित्तमाह ॥ अभिमानइति ॥ तेषामभिमानःपृथगितिभिन्नाः। परमात्मनिप्रविश्यस्वस्वरूपभूतएवानंदःसर्वैःसहभुज्यतेइत्यभिन्नाश्चेत्युच्यंतेइत्यर्थः । तेतु

भाष्यं ॥ प्राणःसूत्रंमहान्ब्रह्माचित्तंवायुर्बलंधृतिः । स्थितिर्योगश्चवैराग्यंज्ञानंप्रज्ञास्मृतिःसुखं । मेधामुक्तिर्विष्णुभक्तिरादिगोपोमहान्प्रभुः । ऋजुःसमानोविज्ञातामहाध्यातामहागुरुः । हनूमान्भीमआनंदइत्यादिवहुरूपिणः । हिरण्यगर्भायेतीतायेभाव्यायश्चवर्तते । सर्वेविष्णुवशानित्यंविमुक्तेरप्यनंतरं । एभ्यःश्रीस्तुविमुक्तेभ्योगुणैःकोटिगुणोत्तरा । ज्ञानानंदवलादिभ्यःसर्वेभ्यःसर्वदैवहि । भिन्नाभिन्नाश्चतेसर्वेब्रह्माणस्तुपरस्परं । अभिमानःपृथक्तेषामानंदःसहभुज्यते । तेतुभिन्नाहरेर्नित्यंश्रियोन्येभ्यस्तथैवच ।

भिन्नाइत्यादिकंतत्स्वरूपकथनं । क्वचिद्विष्ण्ववतारत्वोक्तेर्गतिमाह ॥ आविष्टइति ॥ एतेषुहिरण्यगर्भेषु । विष्णुनाहि
रण्यगर्भाणांअत्यंतभेदे कतमोध्यर्धइतियोयंपवतइत्यादावध्यर्धत्वोक्तिःकथमित्यतआह ॥ विष्णोरिति ॥ हिशब्दः
प्रसिद्धिद्योतकः । तेषांश्रियोप्यतिप्रियत्वप्रतीतिनिरासार्थमाह ॥ शेषादिभ्यइति ॥ कुतइत्यतआह ॥ विष्णोरिति ॥
यतइत्यत्राप्यनुषज्यते । तेब्रह्माणःविष्णोःप्रियत्वेश्रियोवराःकुतइत्यतउक्तं ॥ तद्भक्तौतज्ज्ञानेचावराइति ॥ आद्येतिमूर्त्यंतरं
प्रथमोत्पन्नेतिवा । प्रीतिरित्यादिशब्देनतदभिमानिन्युच्यते । याअतीतानागतवर्तमानाःसरस्वत्यस्तास्तेभ्यश्चसर्वब्रह्मभ्यःशत
गुणावराईरिताइतिसंबंधः । अहंकारोहंकाराभिमानी ताभ्यःसरस्वत्यादिभ्यः नकेवलंवर्तमानसरस्वत्यादिभ्यःएववर्तमान
शेषादयएवावराः किंत्वित्यतआह ॥ अतीतेति ॥ ताभ्यइत्येतदत्राप्यनुवर्तते । अतीतानागताश्चयेशेषादयःतेसर्वशो

भाष्यं ॥ आविष्टोविष्णुरेतेपुनविष्णुस्तत्स्वरूपकः । विष्णोरतिप्रियत्वात्तेह्यध्यर्धाइतिचोदिताः । विष्णोःकेवलभेदेपिशेषादिभ्यःप्रियायतः ।
विष्णोःप्रियत्वेतद्भक्तौतज्ज्ञानेचश्रियस्तुते । मुक्ताअप्यवरानित्यंसर्वेकोटिगुणेनच । सरस्वतीचगायत्रीश्रद्धाद्याप्रीतिरेवच । सर्ववेदात्मि
काबुद्धिरनुभूतिःसुखात्मिका । गुरुभक्तिर्हरौप्रीतिःसर्वमंत्रात्मिकाभुजिः । शिवकन्येंद्रसेनाचद्रौपदीकाशिजातथा । चंद्रेत्यादिस्वरूपायास्तेभ्यः
शतगुणावराः । विष्णुभक्तौचतत्प्रीतौज्ञानानंदादिकेष्वपि । मुक्तेःपश्चादपिगुणैःसर्वैर्ब्रह्मभ्यईरिताः । शेषःसदाशिवश्चोर्ध्वस्तपोहंकारएवच । न
रोऽपटोलक्ष्मणश्चरौहिणेयःशुकस्तथा । सद्योजातोवामदेवश्चाघोरस्तत्पुमानपि । दुर्वासाद्रौणिरौर्वश्चजैगीषव्यादिरूपकाः । पूर्वोक्तैश्चगुणैःसर्वैस्ता
भ्यःशतगुणावराः । मुक्तेःपश्चादपिसदाअतीतानागताश्चयाः । अतीतानागतायेचसर्वशोप्यवराःसदा ।

ष्यवराइतिसंबंधः । एवंसरस्वत्याशतावराःकुतइत्यतआह ॥ समाइति ॥ तद्भार्याःशेषसुपर्णसदाशिवभार्याः । ननु विष्णुवाय्वोःउत्तमयोःयमप्रभृतीनांअत्यवराणांचेंद्रपदेस्थितत्वेनेंद्रत्वात्ताभ्यांशतावरास्त्विंद्राइतिकथमुक्तमित्यतआह ॥ पुरंदरइति ॥ अन्ये विष्णुवायुपुरंदरव्यतिरिक्ताः इंद्राः अन्याश्चदेवताःपर्जन्यमित्राद्याः शतशब्दो ऽर्थः अन्यादेवताःपरस्परं समाःकिंनेत्याह ॥ द्वीति ॥ अत्रविशेषः पर्जन्यमित्रशिखिनोभूतवायुस्तथैवच । द्विगुणाएवानिरुद्धोनिलात्पंचगुणाधिकाः । पादोनोवरुणादग्निरध्यर्धोनःससोमतइत्यादिप्रमाणविशेषादवगंतव्यः । अन्याश्चदेवताइत्युक्तस्यापवादमाह ॥ सनत्कुमाराइति ॥ सनत्कुमारप्रसंगात्सनकादिस्वरूपमाह ॥ सनकाद्याइति ॥ देवावराःपुरंदरावराः । मनवस्तापसव्यतिरिक्ताः । तेष्ववांतरविशेषमाह ॥ त्रीति ॥ इंद्रकामस्वरूपविशेषानाह ॥ वालीति ॥ इत्येकएवव्यवस्थितइत्येतत्पुरंदरइत्येतदनंतरमपियोजनीयं । सनकाद्यानारदश्चेत्यत्रदक्षादीनामिंद्रावरत्वमुक्तं तत्सूर्यादिसाधारण्येननभवतीत्याह ॥ स्वायंभुवइति ॥ स्पर्शाधिपोवायुरुक्तेभ्योऽवरोज्ञातव्यः । प्रोक्तेभ्यःस्वायंभुवादिभ्यः । अन्यदेवेभ्योवरुणादिभ्यःपरस्परंसमाश्चेतिशेषः । का

भाष्यं ॥ एवंसुपर्णाःसर्वेपिसमाःशेषैःसदैवतु । सर्वैर्गुणैस्तथामुक्तौतद्भार्यास्तच्छतावराः । ताभ्यःशतावरास्त्विंद्राःपुरंदरइतीरिताः । तेभ्यःशतावरास्त्वन्येइंद्राश्चान्याश्चदेवताः । द्वित्रिपंचादिगुणतःपरस्परविशेषिणः । सनत्कुमारास्तुसदापुरंदरसमामताः । सनकाद्यानारदश्चदक्षभृग्वादयोपिच । देवावरायथातद्वन्मनवोपिप्रकीर्तिताः । त्रिचतुर्भागभेदेनतेप्यन्योन्यविशेषिणः । वालीगाधीविकुक्षिश्चपार्थइंद्रपुरंदरः । सुदर्शनश्चभरतः प्रद्युम्नःस्कंदएवच । सनत्कुमारःकामश्चेत्येकएवव्यवस्थितः । स्वायंभुवोमनुर्दक्षोवायुःस्पर्शाधिपस्तथा । बृहस्पतिश्चानिरुद्धए ोदितोधिकाः । सूर्यश्चचंद्रमाश्चैवयमश्चैतेत्रयःसुराः । प्रोक्तेभ्यस्त्ववराश्चान्यदेवेभ्योपिसदाधिकाः ।

र्तवीर्यादीनांविष्णवतारत्वोक्तेर्गतिंवदन्तत्स्वरूपमाह ॥ कार्तवीर्यइति ॥ देवेभ्यःअग्न्यादिभ्यः कार्तवीर्याद्यनंतरकक्ष्यमाह ॥ तुंबुरुप्रमुखाइति ॥ ब्रह्मपुत्रान्मरीच्यादीन् अखिलाअपीतिसंबंधः । येचतुंबुरुप्रमुखागंधर्वाः तथाउर्वश्यादिकाअपिअप्सरसो विश्वामित्रब्रह्मपुत्रव्यतिरिक्ताअखिलाअपिऋषयश्च देवभृत्याश्चसूर्यादिभ्यःतथामन्वादिभ्यश्चकार्तवीर्यादिराजभ्यश्च शतावराएवाधमाइतियोजना। तापसोमनुर्विष्णुः स्वायंभुवोमनुःसूर्यादधिकइत्युक्तं तर्हितदन्यमनूनामेकप्रकारत्वंकिं इत्यत आह ॥ वैवस्वतइति ॥ ततइतरमनुभ्यः देवभृत्याःकइत्यतआह ॥ आजानदेवाइति ॥ देवकुलोत्पन्नाःअनाख्यातदेवा इत्यर्थः । तेभ्यःआजानदेवादिभ्यः पितरःशतावराइतिसंबंधः । तत्रापवादमाह ॥ पितृणामिति ॥ कर्मदेवाःकार्तवीर्याद यः । विश्वामित्रस्यब्रह्मपुत्रसमत्वेकचितिपितृभिःसहपाठःकथमित्यतआह ॥ आचार्यइति ॥ यद्वाचिरपितृषुअपवादोक्त्यव सरेविश्वामित्रस्यब्रह्मपुत्रसमत्वोक्तिरसंगतेत्यतआह ॥ आचार्यइति ॥ एवंसतिपितरःकतिवर्जयित्वाऽऽजानेभ्योऽवराइत्यत

भाष्यं ॥ कार्तवीर्यःपृथुश्चैवदौष्यंतिर्भरतस्तथा । शशबिंदुश्चमांधाताककुत्स्थाद्यास्तथापरे । सर्वेतेविष्णुनाविष्टाविष्णोर्भिन्नाःसदैवतु । शतावराश्चदेवेभ्यःकर्मदेवाइतिस्मृताः । तुंबरुप्रमुखायेचतथोर्वश्यादिकाअपि । विश्वामित्रब्रह्मपुत्रानृतेचाप्यृषयोखिलाः । सूर्यादिभ्योधमाश्चैवमन्वादिभ्यस्तथैवच । वैवस्वतोमनुर्नित्यंविष्णवावेशीततोधिकः । कार्तवीर्यादिराजभ्योदेवभृत्याःशतावराः । आजानदेवास्तेप्रोक्तास्तेभ्यश्चपितरश्चिराः । पितृणांसप्तकंयत्तत्कर्मदेवसमंमतं । विश्वामित्रोब्रह्मपुत्रैःसमोमुनिरुदाहृतः । आचार्यःपितृणांचासौपितृभिःसहपठ्यते ।

आह ॥ आजानेभ्यइति ॥ सप्तपितरःविश्वामित्रइत्यष्टभ्यइत्यर्थः । तुंबुरुप्रमुखाइतिदेवगंधर्वाणांकर्मदेवावरत्वमुक्तं तत्राप वादंवदन्पित्रनंतरकक्ष्यमाह ॥कर्मदेवेति ॥ अष्टगंधर्वाःकर्मदेवगणाःतत्समाः । तत्परे तेभ्योष्टभ्यःपरे । शतंगंधर्वाःआजानदेवाः तत्समाः । तेभ्योष्टोत्तरशतगंधर्वेभ्योन्येयेगणाःदेवैःसर्वदास्वमुखेनैवाऽऽज्ञाप्यंतेअतएवदेवगंधर्वाःइत्याख्याताः । तेपितृभ्यः शतावराइतियोजना । देवगंधर्वानंतरकक्ष्यमाह ॥ येत्विति ॥ तेभ्योदेवगंधर्वेभ्यः । तदनंतरकक्ष्यमाह ॥ तेभ्यइति ॥ शतावराश्चदेवेभ्यःकर्मदेवाइतिस्मृताइत्यादिनागणशस्तारतम्यमुक्तं । तत्रतत्रगणेप्यवांतरवैचित्र्यमाह ॥ देवादिष्विति ॥ एषु पूर्वोक्तेषुसर्वेषुदेवादिषुमध्येसमत्वेनप्रोक्ताअपिस्वस्वजात्यांपंचांशतोदशांशाद्वापरस्परंविशेषिणइतिसंबंधः । देवादिस्त्रीणांस्वपतिभ्यस्तारतम्यमाह ॥देवस्त्रियइति ॥ परागंधर्वादिस्त्रियः । देवादीनामवतारेषुअत्यंतनिकृष्टस्त्रीणामपिश्रवणात्कथंदशांशोना इत्याद्युक्तमित्यतआह ॥ यासामिति ॥ निरूपिततारतम्यमागंतुकंनेत्याह ॥ अनादिश्चेति ॥ मानुषादिनां मानुषादीनां । अनादिरपिकेनचिन्निमित्तेनकदाचिदपोहितुंशक्यंकिंनेत्याह ॥ इयमिति ॥ नकेवलंतारतम्यमन्यथाकर्तुमिच्छंस्तमोत्रजेत् अपि

भाष्यं ॥ आजानेभ्यस्तुपितरोह्यष्टभ्योन्येशतावराः । कर्मदेवगणाअष्टगंधर्वास्तत्परेशतं । आजानदेवास्तेभ्योन्येपितृभ्यश्चशतावराः । स्वमुखेनैवदेवैर्येआज्ञाप्याःसर्वदागणाः । आख्यातादेवगंधर्वायेत्वन्यमुखगोचराः । मानुषास्तेतुगंधर्वास्तेभ्यस्तेचशतावराः । तेभ्यःशतावराश्चैवमनुष्येपूत्तमागणाः । देवादिष्वेषुसर्वेषुप्रोक्ताअपिविशेषिणः । पंचांशतोदशांशाद्वास्वस्वजात्यांपरस्परं । देवस्त्रियोदशांशोनाःस्वपतिभ्यस्तथापराः । अष्टांशोनाःप्रविज्ञेयायासांमुक्तौसहस्थितिः । अनादिश्चविशेषोयंसर्वेषांमानुषादिनां । इयंनीचोच्चताकापिनकेनापिह्यपोहितुं । शक्यतेयोन्यथाकर्तुमिच्छेत्सोपितमोत्रजेत् ।

तर्हीत्यतआह ॥ योपीति ॥ यश्चमानुषोत्तममारभ्यब्रह्मांतानांसाम्यमुदीरयेत्सोपितमोयातीत्यन्वयः । यासांमुक्तौसहस्थिति रित्यत्रप्रकृतामुक्तिःकेनस्यादित्यतआह ॥ मानुषेति ॥ ब्रह्मांतानामधिकारिणांविष्णोर्भक्तिज्ञानपूर्वंप्रयत्नतोनिवृत्तकर्मानुष्ठान श्रवणादिलक्षणादुत्पन्नभक्तिज्ञानपूर्वंविष्णोःप्रसादतोमुक्तिर्भवेदितियोजना । ननुश्रवणादिरूपप्रयत्नसाध्यभक्तिज्ञानादेःकथंत त्साधनत्वंअन्योन्याश्रयादित्यतआह ॥ भक्तीति ॥ ननुभक्त्यादेरनादित्वेकथंश्रवणादिसाध्यत्वं इतःपूर्वमेवकुतःसर्वेनमु क्ताश्चेत्यतआह ॥ अनादीति ॥ तत्तद्योग्यतयोत्तरोत्तरंवृद्धानांभक्तिज्ञानादीनांपूर्ताविल्यन्वयः । तत्तद्योग्यतयेत्येतद्दृष्टांतकथ नपूर्वकंविवृणोति ॥ यथेत्यादिना ॥ अल्पेनमहतावोदकेनेतिशेषः । भक्त्याद्यैःपूर्तिर्योग्यतयाभवेदित्युक्तमेवाल्पेनमहतावे तिदृष्टांतवाक्यानुसारेणविशदमाह ॥ अल्पैरिति ॥ यद्वा यद्युक्तरीत्योत्तरोत्तरेषांपूर्वपूर्वापेक्षयाशताद्यवरत्वं तर्हिनीचानामपू र्तिप्रसंगेनमोक्षस्यापुरुषार्थत्वप्रसंगइत्याशंकांदृष्टांतोक्तिपूर्वकंपरिहरति ॥ यथेति ॥ जीवानामपीत्यपिशब्दसंबंधः । पूर्तिःस्वरू पानंदादिलक्षणफलेनेतिशेषः । पूर्ववदेवविशदयति ॥ अल्पैरिति ॥ अल्पैर्महद्भिर्भक्त्याद्यैःसाधनैस्तथाअल्पैर्महद्भिश्चानंदा

भाष्यं ॥ योपिवेदसमल्लेनसर्वान्नीचोच्चतःस्थितान् । सोपियातितमोवोरंयश्चसाम्यमुदीरयेत् । मानुषोत्तममारभ्यब्रह्मांतानांप्रयत्नतः । विष्णोर्भक्तिज्ञानपूर्वंभवेन्मुक्तिःप्रसादतः । भक्तिज्ञानादिकाःसर्वेसर्वेषामप्यनादयः । अनादिकालादारभ्यवृद्धानामुत्तरोत्तरं । तत्तद्योग्यतयापूर्तौ विष्णोर्दृष्टिःप्रजायते । यथोदंचनकुंभादेःसरित्सागरयोरपि । अल्पेनमहतावापिपूर्तिर्योग्यतयाभवेत् । एवंनरादिब्रह्मांतजीवानांसाधनैरपि । अना दिसिद्धैर्भक्त्याद्यैःपूर्तिर्योग्यतयाभवेत् । अल्पैःपूर्तिस्तथाल्पानांमहद्भिर्महतामपि । भक्त्याद्यैर्जायतेतेषांसाधनैर्नान्यथाक्वचित् ।

दिभिःअल्पानांचमहतामपिपूर्तिर्जायतइतियोजना । साधनैरित्युक्तसाधनान्याह ॥ श्रवणमिति ॥ उक्ताविशेषादेवत्वादयोये
षांतेउक्तविशेषाः । तेषांसर्वेषामधिकारिणां । उक्तायेविशेषास्तारतम्योपेतानंदादयःतेषांज्ञानंचसाधनंमोक्षस्येतिशेषः । यद्वास
र्वेषांब्रह्मसदासर्वगुणात्मकमित्यादिनापूर्वोक्तानांविशेषणांज्ञानमित्यर्थः । कारणताग्राहकव्यतिरेकमाह ॥ त्यक्त्वेति ॥ भक्ति
स्वरूपमाह ॥ सर्वोत्तमतयेति ॥ योग्यतोयोग्यत्वतः उत्तमतयाज्ञानपूर्वकःस्नेहएवतदन्येषांभक्तिरितिसंबंधः । भक्तेःश्रव
णादिसाम्यनिरासायाह ॥ विष्णिवति ॥ अनादिकालतोभक्तेःसद्भावेपिमुक्त्यनुदयात्कथंसातत्रनियतसाधनंइत्याशंकांपरिहर
न्नियतत्वोपपादकावन्वयव्यतिरेकावाह ॥ भक्तीति ॥ भक्त्यादेःसाधनत्वोक्त्याफलप्राप्त्यनंतरंअभावशंकांनिवारयति
॥ भक्तिरिति ॥ कुतोनहीयंतइत्यतआह ॥ मुक्तानामिति ॥ ननुभक्तेरिवश्रवणादेरपिमुक्तौनियतसाधनत्वात्कोविशेषोभ
क्तेरित्यतआह ॥ साधनानीति ॥ श्रवणादिवद्भक्तेरप्यन्यसाधनत्वेपुनस्तदवस्थोदोषइत्यतआह ॥ नैवेति ॥ यतोन्यसाधना
नांफलरूपाऽतोन्यसाधनंनैवेत्यर्थः । भक्तेर्मोक्षसाधनत्वेइत्थंभावांतरंवक्तुमाह ॥ स्वात्मेति ॥ द्वेषस्वरूपमाह ॥ गुणानामि

भाष्यं ॥ श्रवणंमननंचैवध्यानंभक्तिस्तथादृशिः । ज्ञानंचोक्तविशेषाणांसर्वेषांसाधनंभवेत् । त्यक्त्वैतानिनकस्यापिभवेन्मोक्षःकदाचन ।
सर्वोत्तमतयाज्ञानपूर्वकःस्नेहएवतु । भक्तिर्विष्णौसमुद्दिष्टातदन्येषांचयोग्यतः । विष्णुभक्तिर्देवभक्तिर्गुरौभक्तिस्तथैवच । तत्तच्छ्रेष्ठ्यानुसारेणमुक्तौ
नियतसाधनं । भक्तिपूर्तौभवेन्मुक्तिस्तदभावेचनोभवेत् । भक्तिर्ज्ञानंतथाध्यानंमुक्तानामपिसर्वशः । नियमेननहीयंतेमुक्तानांतेस्वरूपकाः । साधना
नितुसर्वाणिभक्तिज्ञानप्रवृद्धये । नैवान्यसाधनंभक्तिःफलरूपाहिसायतः । स्वात्मोत्तमेपुविद्वेषात्तमोनियमतोव्रजेत् । गुणानामल्पताज्ञानंतत्स्त्री
रागस्तथैवच । तत्प्रतीपेचयाबुद्धिस्त्रिविधोद्वेषउच्यते ।

ति ॥ यदर्थमेतदुक्तंतदाह ॥ द्वेषोज्झितेति ॥ मोक्षस्यपुरुषार्थत्वंदर्शयितुंवादिविप्रतिपत्तेःमोक्षस्वरूपंदर्शयति ॥ निर्दुःख
मिति ॥ सुखस्यवैषयिकत्वशंकानिरासायनित्यमित्युक्तं । मोक्षस्यनित्यसुखाभिव्यक्तिरूपत्वमंगीकुर्वद्भिरपिमुक्तानांनिराकारत्वां
गीकारात्तन्निरासायाह ॥ चिदानंदेति ॥ क्रीडंतीत्युक्त्याख्रियाक्रीडनंसूचितं । तत्किंसर्वेषांसर्वाभिरित्याशंकांपरिहरति ॥
अनादीति ॥ नियममेवदर्शयति ॥ नेति ॥ अरतिःसंभोगराहित्यं ॥ ७ ॥ ७ ॥ यदुक्तंजीवात्मैक्यस्याप्रामा
णिकत्वाद्ब्रह्मवाइदमग्रआसीत्तदात्मानमेवावेदित्यादेरैक्यपरतयाव्याख्यानमयुक्तमिति तन्न । एकमेवेत्यादिश्रुतेर्विद्य
मानत्वात्इत्यतआह ॥ एकमेवेति ॥ एकमेवाद्वितीयमितिछांदोग्यवाक्यं । नेहनानेत्यारभ्यध्रुवमित्यंतमेतदुपनिषद्गतं ।
मृत्योःसमृत्युमित्यादिकाठकवाक्यं । तत्रैकधैवानुद्रष्टव्यमित्येतन्माध्यंदिनशाखागतं । मृत्योःसमृत्युमित्यादिशाखांतरगतंवा । इ
त्यादिच नजीवब्रह्मैक्येमानमितिशेषः । नन्विहब्रह्मणि किंचनकिंचिदपि नानाभेदः परमार्थतोनास्तीतिसर्वभेदप्रपंचनिषेधः

भाष्यं ॥ द्वेषोज्झिताचयाभक्तिःसामोक्षंनियमान्नयेत्। निर्दुःखंतुसुखंनित्यंमोक्षइत्यभिधीयते। चिदानंदशिरोदेहपाणिपादात्मकाःसदा। सर्वदोषवि
निर्मुक्तामुक्ताःक्रीडंतिनित्यशः । अनादिकालादारभ्ययाभार्यास्ताःसदैवतु । ब्रह्मादीनांविमुक्तौचभार्याःस्युर्नियमात्सदा । नकदाचिद्विमुक्तानांभार्याः
काश्चित्स्युरन्यगाः । नकदाचिद्वियोगश्चनविद्वेषोनवाऽरतिः । मोदंतेसहिताःसर्वेसदाविष्णुपरायणाइतिपैंगिश्रुतिः॥७॥एकमेवाद्वितीयं । नेहनानास्ति
किंचन । मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यति । एकधैवानुद्रष्टव्यमेतदप्रमयंध्रुवं । मृत्योःसमृत्युंगच्छतियइहनानेवपश्यति । एकधैवानुद्रष्टव्यंने
हनानास्तिकिंचन । मृत्योःसमृत्युंगच्छतियइहनानेवपश्यति । यथोदकंदुर्गेवृष्टंपर्वतेषुविधावति । एवंधर्मान्पृथक्पश्यंस्तानेवानुविधावतीत्यादिच ।

श्रूयते । अतःकथंजीवब्रह्मैक्येइयंश्रुतिर्नमानं इत्यतस्तद्वाक्यंयथावद्व्याचष्टे ॥ इहेति ॥ इहेत्यस्यवाक्यस्यइत्यर्थइतिसंबंधः । निर्धारणसप्तमी । किंचनरूपावयवधर्मादिकं नानाभिन्नं ब्रह्मणिनानावयवगुणकर्मादिनिषेधेननानात्वमेवनिषिद्धंभवति । स विशेषणेहीतिन्यायात् । उभयनिषेधेगौरवात् । विशेषणस्यप्रथमप्राप्तत्वात् । अन्यथातदुपादानवैयर्थ्यात् । नजीर्णमलवद्वासाःस्नातकःस्यादित्यादेर्दर्शनाच्चेतिभावः । नन्वेकमेवाद्वितीयमित्यत्रसजातीयविजातीयस्वगतभेदनिषेधःप्रतीयते । यथोक्तं वृक्षस्यस्वगतोभेदःपत्रपुष्पफलादिभिः । वृक्षांतरात्सजातीयोविजातीयःशिलादितः । तथासद्वस्तुनोभेदत्रयंप्राप्तंनिवार्यते । ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिःक्रमात्इति । तथाचकथमिदंनैक्येमानंइत्यतस्तदनूद्यव्याचष्टे ॥ एकमेवेति ॥ एकमेवेत्युक्तसर्वोत्तमत्वमुख्यत्वलक्षणस्वतंत्रत्वरूपार्थद्वयोपपादकत्वेनाद्वितीयशब्दस्यार्थद्वयकथनमित्येतदितिज्ञेयं ॥ सतात्पर्यमिति ॥ सदेवसोम्येदमग्रआसीत् । एकमेवाद्वितीयंब्रह्म । सत्वेवसोम्येदमग्रआसीदेकमेवाद्वितीयंइतिछांदोग्येचअभ्यासात् । एकएवाद्वितीयोसावितिवक्ष्यमाणसमाख्यानाच्च । अभ्यासादेश्चतात्पर्यलिंगत्वादितिभावः । कुतःश्रुतेरेवमर्थत्वमितिचेत् । सदृष्टांतंस्मृतौतथाव्याख्यातत्वादित्याह ॥ एकएवेति ॥ वाशब्दःउपमायां । दृष्टांतवाक्यत्रयेपियोजनीयः । लौकिकप्रयोगाच्चोक्तार्थत्वंश्रुते

भाष्यं ॥ इहेतिपरमेश्वररूपेपुअवयवेपुधर्मेपुचकिंचननानानास्तीत्यर्थः । एकमेवाद्वितीयमितितत्समोधिकोवातदनधीनोवानास्तीतिसतात्पर्यं निषिध्यते । एकएवाद्वितीयोसौहरिर्वेदेपुसर्वदा । एकएवाद्वितीयोसावश्वमेधःक्रतुष्वपि । एकैववाऽद्विवीयासाविष्णुभक्तिर्हिसाधने । एकएवाद्वितीयोसौप्रणवोमंत्रउच्यतेइत्यादिवचनात् । यथैकमुत्तमंपुरुषमपेक्ष्यतस्मिन्पुरेएकएवनान्योस्तीत्युक्तेपितत्सदृशस्तदधिकोवान्योनास्तीत्युक्तंभवति ।

रित्याह॥यथेति॥ द्वितीयपुरुषाभावाभिप्रायेणप्रयुक्तैवंविधवाक्यस्यैतदर्थत्वालाभात् उक्तमेकमुत्तममिति। अत्राद्वितीयइतिवक्त व्येनान्योस्तीतीत्युक्तेपीत्युक्त्या एवंस्पष्टप्रयोगेपितात्पर्यलिंगबलात्उक्तार्थत्वमवसीयते किमु अद्वितीयइतिसाधारणशब्दप्रयोगे इतिकैमुत्यंसूचितं। सतात्पर्यमित्युक्ततात्पर्यनिश्चायकसमाख्यामाह ॥ एकएवेति ॥ कुतोनेहनानेतिश्रुतेरुक्तार्थत्वं नानात्वमा त्रनिषेधएवार्थःकिंनस्यादित्यतआह ॥ स्वगतेति ॥ परमेश्वररूपावयवधर्मप्रतियोगिकपरमेश्वरधर्मिकेत्यर्थः । नानात्वमात्रनि षेधविवक्षायांचेत्यपिग्राह्यं । सर्वात्मनाऽविद्यमानार्थनिषेधेऽधिकरणविशेषोक्तिर्व्यर्था । नहिभूतलेशशविषाणंनास्तीतिनिषिध्य तइतिभावः। उपलक्षणंचैतत् भावप्रधानत्वकल्पनाचेत्यपिग्राह्यं । ननुमनसैवेदमाप्तव्यमितिपूर्ववाक्येनद्रष्टृद्रष्टव्यादिभावोक्त्या भेदशंकायांतन्निषेधार्थमिदंवाक्यं । तत्रेदंशब्देनद्रष्टव्यत्वेनोक्तंब्रह्मइहेत्यधिकरणत्वेननिर्दिश्यतत्रभेदमात्रंनिषिध्यतइतिनवैय र्थ्यमितिचेन्न । इहघटोनास्तीतिवदधिकरणविशेषसंबंधित्वेनभेदनिषेधेऽन्यत्रभेदसत्त्वावश्यंभावेनसर्वथाभेदनिषेधपरत्वेइहेति विशेषणवैयर्थ्यानिस्तारात् । ब्रह्मणःजगदुपादानत्वंजगदारोपाधिष्ठानत्वंवाअसिद्धमेवेति यइहब्रह्मणिनानेवभेदंपश्यतिसमृत्यो र्मृत्युंगच्छतीतिसर्वथाभेददर्शिनिंदापरत्वेनपरकीयव्याख्याननिरासायतांश्रुतिंव्याचष्टे ॥ नानेवेतीति॥ इवशब्दप्रयोगात्कथमे तल्लब्धमित्यतआह ॥ विरुद्धेति ॥ यदुक्तंपूर्वपदेन तद्विरुद्धद्वितीयसंयोगइत्यर्थः । अत्रचनानोक्त्वाप्रयुक्तइवशब्दस्तद्विरुद्धा

भाष्यं ॥ एकएवाद्वितीयोसौतदतंत्रस्यवर्जनात् । तत्समस्याधिकस्यापिह्यभावात्पुरुषोत्तमइतित्राह्मे । स्वगतभेदाविवक्षायामिहेतिविशेषणं व्यर्थंस्यात् । नानेवेतिभेदाभेदनिराकरणार्थं । विरुद्धोभयसंयोगइवशब्दःप्रदृश्यतइतिशब्दतत्वे ।

नानात्वंसंगृह्णातीतिभेदाभेदाख्यमुभयंनिराकृतंभवतीतिभावः । ननुयथोदकंदुर्गेवृष्टमितिवाक्यंभगवद्भेदादिधर्मदर्शिनामनर्थोक्त्याभेदनिराकरणपरमितिचेत् न । इदमपिवाक्यंनजीवब्रह्मभेदनिराकरणपरं किंतुभगवद्गुणादीनांभगवताभेदनिराकरणपरं । भगवद्गुणानांभेददर्शिनामनर्थोक्तेरितिभावेनयथोदकमितिवाक्यंदुर्गमार्थत्वादन्वयंदर्शयन्व्याचष्टे ॥ पर्वतेष्विति ॥ तानित्यस्यार्थःपृथग्दृष्टान्धर्मानिति । पृथग्दृष्टधर्मानंतर्यैकथमधोविधावनस्येत्यतस्तात्पर्यमाह ॥ तदनंतरमेवेति ॥ धर्माणांपार्थक्यदर्शनानंतरमेवेत्यर्थः । परोक्तार्थेपृथगित्यस्यवैयर्थ्यापत्तेरितिभावः । श्रुतेःस्वोक्तार्थेप्रमाणमाह ॥ भेदेनेति ॥ मुखादिनां मुखादीनां । एवमैक्यस्याप्रामाणिकत्वान्नतत्परतयाब्रह्मवाइत्यादेर्व्याख्यानंयुक्तमित्युक्तं । इदानींप्रमाणविरुद्धत्वाच्चनतत्परतयाव्याख्यानंयुक्तमित्याह ॥ जुष्टमिति ॥ यद्वा ननुसमाख्याबलेनैकमेवेत्यादिश्रुतेर्भवदुक्तार्थत्वेपि अनेकार्थत्वाच्छ्रुतेरस्मदुक्तोप्यर्थःकिंनस्यादित्यतस्तस्यप्रमाणबाधितत्वात् इत्यभिप्रायेणभेदेश्रुत्यादिप्रमाणमाह ॥ जुष्टमिति ॥ इति तदेतत्सत्यमित्यादि प्रागुक्तप्रकारेण । अस्यमहिमानंयदापश्यतितदामुक्तोभवतीत्यर्थः । संयुक्तौसखायौद्वौसुपर्णरूपौजीवेशौदेहाख्यपिप्पलंआलिंगतुः । तयोःसुपर्णयोर्मध्ये अन्योजीवोऽश्वत्थफलरूपंदेहजनितंकर्मफलं अस्वाद्वेवस्वादुत्वेनात्ति । अन्यईश्वरः तदनश्नन्

भाष्यं ॥ पर्वतेपुदुर्गेपर्वताग्रेवृष्टंयथाधोविधावतिएवंपृथक्दृष्टान्धर्मानन्वेवतदनंतरमेवाधोधेतमसिविधावति । भेदेनदर्शनाद्वापिभेदाभेदेनदर्शनात् । विष्णोर्गुणानांरूपाणांतदंगानांमुखादिनां । तथादर्शनकालात्तुक्षिप्रमेवतमोव्रजेदितिब्रह्मांडे । जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमिति वीतशोकः । द्वासुपर्णासयुजासखाया ।

अभितःप्रकाशतइत्यर्थः । नन्विदंवाक्यद्वयंसांसारिकभेदपरमित्याशंकानिरासायमुक्तावपिभेदप्रतिपादकंप्रमाणंपठति ॥ यइ
त्यादिना ॥ ब्रह्मणासहेति उपसंक्रम्येतिचभेदोक्तिः । साहित्यस्यसमीपप्राप्तेश्चभेदसापेक्षत्वात् । आरभ्य सएकोब्रह्मणआनंद
इत्यंतेनेतिशेषः । तारतम्यस्यभेदसापेक्षत्वादितिभावः । नन्वस्याःसांसारिकजीवतारतम्यप्रतिपादिकायामुक्तौभेदेकथंप्रमाणत
योदाहरणमित्यतआह ॥ मुक्तानांचेति ॥ नकेवलंसंसारिणामितिचशब्दः । कुतइत्यतआह ॥ श्रोत्रियस्येति ॥ अत्रकेचि
द्वदंतिनश्रोत्रियत्वादिविशेषणबलादयंविशेषोमुक्तानांइतिवक्तुंशक्यं । श्रोत्रियस्येत्यस्यपुरुषांतरविषयत्वेनमुक्तविषयत्वाभावात् ।
तथाहिमनुष्येभ्योमनुष्यगंधर्वाणांशतगुणस्तावदानंदः । यश्चापरःश्रोत्रियोकामहतःमनुष्यगंधर्वपदेकामरहितश्च तस्यापिमनुष्ये
भ्यःशतगुणोमनुष्यगंधर्वसमानएवानंदोभवतीत्येवंतेषुतेषुपदेषुअकामहतस्यतत्तत्समानानंदत्वमत्रोच्यते । नचवाच्यंविरक्तानां
सर्वत्रकामाभावात्कथमियंतारतम्योक्तिरिति । तदतिरिक्तपदेषुकामसद्भावस्यविवक्षितत्वात् । योयावदायासान्मुक्तोसावसौता
वदानंदवानित्यर्थोह्यत्रप्रतिपाद्यतइति । तदसत् । श्रोत्रियत्वादिगुणविशिष्टास्तेकिंब्रह्मादिविजातीयास्ततस्ततोहीनाः उतब्रह्मा
दिसमास्तत्तन्नामानएवेतिविकल्पंहृदिनिधायाद्यपक्षंदूषयति ॥ नहीति ॥ हिशब्दोहेतौ । उपलक्षणंचैतत् । अविद्यमानमका

भाष्यं ॥ योवेदनिहितंगुहायांपरमेव्योमन् । सोश्नुतेसर्वान्कामान्त्सह । ब्रह्मणाविपश्चितेति । एतमानंदमयमात्मानमुपसंक्रम्यइमांल्लोका
न्कामान्नीकामरूप्यनुसंचरन् । अथातआनंदस्यमीमांसाभवतीत्यारभ्यमनुष्यादिब्रह्मांतानांमुक्तानामानंदेशतगुणविशेषश्चोच्यते । मुक्तानांचायं
विशेषः । श्रोत्रियस्यचाकामहतस्येतिविशेषणात् । नहिब्रह्मादीनामनधिगतःश्रुत्यर्थःकेषांचिदस्ति ।

महतत्वंचेतिग्राह्यं । केषांचि दधिगतइतिशेषः । श्रोत्रियत्वंहिअधिगतश्रुत्यर्थत्वं । तच्चेदपरस्यविशेषणं । तर्हिप्रकृतब्रह्मादीनां तन्नास्तीत्यर्थादुक्तंस्यात् । अन्यथातद्व्यावर्तकत्वासिद्धेः । तच्चबाधितमितिभावः । द्वितीयंदूषयति ॥ **नचेति** ॥ अकामहताः श्रोत्रियाइत्यपिग्राह्यं । पूर्वोक्तएवाभिप्रायः । किमतोयद्येवमित्यतआह ॥ **तस्मादिति** ॥ अन्येतु नश्रोत्रियस्यचाकामहतस्येतिमुक्तसंग्रहार्थं । किंनाम प्रकृतब्रह्मादिविषयमेव । नचतत्रासंभवः । श्रोत्रियंश्छंदोधीतइतिस्मरणात्श्रोत्रियशब्दस्यच्छंदोधिगतिनिमित्तत्वात् । ब्रह्मादीनांचसर्वज्ञकल्पत्वात् । विषयवैराग्योपेतत्वेनाकामहताश्चभवंतीतिव्याचक्षते । तन्निरासायप्राप्तश्रुतिफलत्वादिति मुख्यमितिचोक्तं । श्रोत्रियाकामहतशब्दावुक्तार्थावेवकिंनस्यातामित्यतआह ॥ **प्राप्तेति** ॥ तुशब्दएवार्थः । प्राप्तमोक्षिणइतिकर्मधारयात्प्रशंसायामिनिः । चशब्दएवार्थः । आप्तकामत्वादेवेतिसंबंधः । तथाशब्दःसमुच्चये । संसारिषुमुख्यमकामहतत्वंनास्तीत्यत्रप्रमाणंपठति ॥ **ब्रह्मणोपीति** ॥ परामुख्या । अपिशब्देनान्येषांनास्तीतिकिमुवक्तव्यमित्याह । ननुकेयंकामहतता यदभावोमुक्तेष्वेवमुख्यो नब्रह्मणोपीत्यतआह ॥ **कामेति** ॥ उपद्रवोदुःखं । ननुब्रह्मणःकामेनोपद्रवःकुतःसिद्धइत्यतआह ॥ **ब्रह्मणइति** ॥ दुःखहीनतयाप्रसिद्धस्यापीत्यर्थः । व्याघातपरिहारायाह ॥ **तदपीति** ॥ अल्पमपीत्यर्थः ।

117

भाष्यं ॥ नचब्रह्माणएवकेचनकामहताःकेचनाकामहताइत्यत्रप्रमाणमस्ति । तस्माच्छ्रोत्रियइतिप्राप्तश्रुतिफलत्वान्मुक्तउच्यते । अकामहतत्वंचमुख्यंमुक्तस्यैव । प्राप्तश्रुतिफलत्वात्तुश्रोत्रियाःप्राप्तमोक्षिणः । तएवचाप्तकामत्वात्तथाकामहताःश्रुताःइतिचभारते । ब्रह्मणोपिह्यमुक्तस्यनाकामहततापरा । यतस्तस्यापिकामस्यक्षणव्यवहितिर्भवेदितिच । कामहतताकामेनोपद्रवः । ब्रह्मणोप्यल्पदुःखंस्यात्तदप्यनभिमानतः ।

अनभिमानतः कथंचनकष्टेन भोगाभावात् दुःखासंपीडितत्वात् आत्मसंबद्धतयानास्तीतिसंबंधः । यदुक्तंश्रोत्रियस्येत्यस्यपुरु
षांतरविषयत्वमिति तत्रदूषणांतरमाह ॥ नचेति ॥ कुतइत्यतआह ॥ ज्ञानमिति ॥ जगत्पतेरेवेतिसंबंधः । तेनान्येभ्यआ
धिक्यंसिध्यति । सहसिद्धंस्वभावसिद्धं । तथाचश्रोत्रियत्वादिनिमित्तंसुखमपितस्यैवान्येभ्योधिकमितिनतत्समंसुखमन्यस्येति
भावः । यदुक्तंतेषुतेषुपदेष्वकामस्यतत्तत्समानानंदत्वमत्रोच्यतइति तद्दूषयति ॥ नचेति ॥ तत्समं सुखमित्यनुवर्तते । ननु
इंद्रपदाकामइंद्रसुखसमसुखवान् तत्पदेविरक्तत्वात् योयत्रविरक्तःसतत्साधकसुखसमसुखवान् यथाकर्षणसाध्यदृष्टधान्यादौ
विरक्तःकृषीवलसुखसमसुखवानुपलब्ध इत्यनुमानस्यैवमानत्वात्कथंमानाभावइत्यतोसंप्रतिपन्नोदृष्टांतइत्याह ॥ दृष्टेति ॥ क
श्चिदेवनतुकृषीवलसुखसमइत्यर्थः । ननुनास्माभिःतत्पदविरक्तस्यतत्समसुखवत्त्वंसाध्यते येनदृष्टांतस्यसाध्यवैकल्यंस्यात् । किं
नाम पूर्वस्मादानंदोत्कर्षमात्रं । श्रुतेरपितत्रैवतात्पर्यमित्यतआह ॥ अन्यत्रेति ॥ दार्ष्टांतिकइत्यर्थः । यदितत्तत्पदेविरक्तस्य
पूर्वस्मादानंदोत्कर्षःसाध्यःस्यात्तर्हिइंद्रपदाद्विरक्तस्यसकाशाद्ब्रह्मपदाद्विरक्तस्यसुखविशेषःस्यात् । नचसोस्ति । लोकेराजपदा

भाष्यं ॥ नास्त्यात्मसंबंधतयाभोगाभावात्कथंचनेतिच । नचान्यस्यकस्यचिच्छ्रोत्रियस्याकामहतस्यचब्रह्मणासमंसुखंयुज्यते । ज्ञानमप्रतिघं
यस्यवैराग्यंचजगत्पतेः । ऐश्वर्यंचैवधर्मश्चसहसिद्धंचतुष्टयमित्यादिनाश्रोत्रियत्वादिगुणैस्तस्यैवान्येभ्यआधिक्यात् । नचेंद्रपदाद्विरक्तस्येंद्रसमंसुखं
ब्रह्मपदाद्विरक्तस्यतत्सममित्यत्रकिंचिन्मानमस्ति । दृष्टवस्तुनिविरागेआयासाभावात्कश्चित्सुखविशेषोदृश्यते । अन्यत्रब्रह्मपदाद्विरक्तस्येंद्रपदाद्विर
क्तस्यनकश्चिद्विशेषोदृश्यते ।

कामस्यामात्यपदाकामस्यचसुखविशेषादर्शनात् । तथाचबाधइतिभावः । नकेवलंप्रमाणाभावःकिंतुप्रमाणविरोधश्चेतिवदन्नुपसंहरति ॥ अतइति ॥ मानाभावादित्यर्थः । राज्यमकामयमानस्यराजसमानसुखानुभूतेरनुभवबाधितत्वस्यस्पष्टत्वादितिभावः । एतच्छ्रुतिव्याख्यानरूपस्मृतिबलाच्चास्मदुक्तएवश्रुत्यर्थइत्याह ॥ नरादीति ॥ नित्यानंदैकभोगिनामपीत्यन्वयः । (अध्वर्यूणां श्रुतौतैत्तिरीयश्रुतौ)ननुयदाहीतिश्रुतौभेदज्ञानिनोनर्थोक्त्यातन्निषेधावगमात्कथंमुक्तावपिभेदसत्त्वेनपारमार्थिकत्वमित्यतस्तस्यार्थमाह ॥ यदाहीति ॥ यदिसर्वात्मनाभेदनिषेधेतात्पर्यंतदांतरंभेदंकुरुतइत्येतावतापूर्तेःएतस्मिन्नितिअदृश्यत्वादिनाप्रकृतस्यपरमात्मनोधिकरणत्वेनोक्तिर्व्यर्थास्यादितिभावः । ननुस्वगतभेदपरत्वेपिउदरमितिविशेषणंव्यर्थंस्यादित्याशंकापरिहारंसूचयन्श्रुत्यर्थनिश्चायिकांस्मृतिमुदाहरति ॥ अभेदमिति ॥ भेदमपीतिसंबंधः । जीवेशयोर्भेदमित्यनेनोदरशब्दार्थउक्तः । अइत्युक्तःपरोविष्णुर्येभ्यउच्चःसएवतु । तउदाजीवसंघाःस्युरुदरंतद्गतांतरमितिवचनात् । एषयदायस्मादुदरंजीवगतमीश्वरप्रतियोगिकमंतरंभेद मेतस्मिन्परेविष्णौ करोतिजानाति अथतस्मादेव तस्यभयंभवतिहीतिश्रुत्यर्थः । मुक्तौभेदप्रतिपादकंश्रुत्यंतरमाह ॥ परमिति ॥ यद्यपिसतत्रेत्याद्येवोदाहर्तव्यं तस्यैवमुक्तौभेदप्रतिपादकत्वात् । तथापितस्यमुक्तपरत्वज्ञापनायादिवाक्योदाह

भाष्यं ॥ अतोनुभवविरुद्धत्वाद्यत्किंचिदेतत् । नरादिब्रह्मपर्यंतंविमुक्तानांशतोच्छ्रयः । निःशेषदुःखहीनानांनित्यानंदैकभोगिना । अप्यानंदोमिथोप्युक्तस्त्वध्वर्यूणांश्रुतौपृथगितिहरिवंशेषु । यदाह्येवैषएतस्मिन्नुदरमंतरंकुरुतइत्यत्राप्येतस्मिन्नितिविशेषणात्स्वगतभेदनिषेधएव । अभेदमीशरूपाणांभेदंजीवेशयोरपि । यःपश्येत्स्थिरयाबुध्याभक्तिमान्सविमुच्यतइतिभविष्यत्पुराणे।परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेसउत्तमःपुरुषः।

रणं । अन्यथास्वरूपाविर्भावोक्त्यनुपपत्तेरिति । ननुपूर्ववाक्यबलादपिसतत्रेत्यस्यनमुक्तपरत्वं । तत्रनिर्गुणोपासकस्यस्वरूपाविर्भावाभिधानात् । सतत्रेतिदहरविद्योपासकस्यामुक्तस्यैवभोगोक्तेरितिचेन्न । एकप्रकरणत्वेनप्रतीतस्यकारणंविनाभिन्नप्रकरणत्वकल्पनायोगादितिभावेनतद्वाक्यंप्रमाणेनव्याचष्टे ॥ यस्येति ॥ लोकंश्वेतद्वीपं । सतत्रपर्येतीत्यस्यव्याख्यानंजीवइति । तत्रेत्यस्यार्थोविष्णोःसमीपइति । सउत्तमःपुरुषइत्यस्यव्याख्यायत्प्रसादादिति । मुक्तौभेदप्रतिपादकंश्रुत्यंतरंउदाहृत्योत्तरार्धव्याख्यानरूपांस्मृतिंपठति ॥ अक्षण्वंतइति ॥ समग्रश्रुतिव्याख्यानंश्रुतेर्मुक्तविषयत्वंच श्रुत्वाविष्णुंकर्णफलं इत्याद्यागमांतरादवगंतव्यं । आदघ्नासउपकक्षासइत्यस्यव्याख्यादुग्धेति । अनेनत्वइत्येतत्अत्रउभयत्रापिसंबध्यतेइत्युक्तंभवति । उत्वेह्रदाइवस्नात्वेत्यस्यार्थः अमृतेति । अनेनोशब्दश्चशब्दार्थः । स्नात्वाइवेतिसंबंधः । तच्चामृतपानबाहुल्यसूचनाय । ह्रदाइतिप्रथमासप्तम्यर्थे । अर्थादमृतेत्यस्यलाभः । पिबंतीतिशेषइत्युक्तंभवति । उत्वेददृश्रेइत्यस्यार्थःकेचिदिति । केचिद्देवाएव सदेत्युक्त्यादुग्धसागरगाद्याःकदाचिदेवपश्यंतीतिसूचयति । उपत्वइत्यपिसंबंधमभिप्रेत्याह ॥ सदाकेचिदिति ॥ अनेनश्रुतौमनोजवेष्वसमाबभूवुरित्येतदादघ्नासइत्यादिनाविवृतमित्युक्तंभवति । मुक्तौभेदप्रतिपादकश्रुत्यंतरमुदाहृत्यतद्व्याख्यानरूपांस्मृतिमुदाहरति ॥

भाष्यं ॥ सतत्रपर्येतिजक्षन्क्रीडन्रममाणःस्त्रीभिर्वायानैर्वा । यस्त्वलोकंसमासाद्यस्वरूपमभिपद्यते । जीवःपर्येतिविष्णोश्चसमीपेतत्प्रसादतः । यत्प्रसादात्सपर्येतिसविष्णुःपुरुषोत्तमः । अक्षण्वंतःकर्णवंतःसखायोमनोजवेष्वसमाबभूवुः । आदघ्नासउपकक्षासउत्वेह्रदाइवस्नात्वाउत्वेददृश्रे । दुग्धसागरगाःकेचित्केचिदश्वत्थकक्षगाः । अमृतह्रदेषुकेचिच्चपिबंतिस्नातवत्सदा । केचित्पश्यंतितंदेवंसदाकेचित्समीपगाः ।

आणिम्मिति ॥ रथ्यंरथसंबंधिवस्तुजातं रथस्याणिंनयद्व त्सर्वदेवसंश्रित मेवंअमृताअमृतानिमुक्तभूतानि अब्जजेशपूर्वाण्य धितस्थुराश्रितानिवर्तंते । नैतत्प्रशंसामात्रं किंत्वयमर्थःसकलवेदतात्पर्यगोचरः । कुतः । यउयएव तदुक्तंप्रमेयं चिकेतत्पंचमो लकारः अभिपश्येदन्यथेतिशेषः । सइहममपुरतोब्रवीत्वित्यर्थः । इत्यादिचभेदेप्रमाणमितिशेषः ॥ ७ ॥ यदुक्तंजीवेशाभेदेप्र माणाभावइतितदसत् । सयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्येएकमेतदित्यवोचामेत्यभेदेप्रमाणस्यसत्त्वात् । नचेदमपिशरी रसूर्यांतर्गतविष्णोरेवाभेदप्रतिपादकमितिवाच्यं । तथात्वेतौयत्रविहीयेतेइतिद्विवचनानुपपत्तेरित्यतःतदुदाहृत्यतात्पर्यमाह ॥ ताविति ॥ परमात्मैव द्विरूपःपरामृश्यतइतिशेषः । कुतइत्यतःसयश्चायमित्यादिश्रुत्यर्थनिश्चायिकांस्मृतिंपठति॥ **शरीरेति**॥ हृदिसंस्थश्चेत्कथंअशरीरइत्यतउक्तं शरीरानभिमानीति । प्रज्ञात्मेत्यस्यार्थोऽभिमानवतइति । अनेनप्रज्ञस्यशरीराभिमानवतआ त्मेतिव्याख्यातं । यश्चासावादित्येएकमित्येतद्याचष्टे ॥ **सएवेति** ॥ यइत्युक्तः । तद्योहंसोसावितिपूर्ववाक्योक्तत्वंदर्शयति ॥ **हंसइति** ॥ तस्यैक्यपरत्वशंकाव्युदासायैवंपदच्छेदःप्रदर्शितः । हंसःसोहमितिपदद्वयस्यार्थमाह ॥ **हंतृत्वादिति** ॥ सारत्वा दित्यपिग्राह्यं । ननुसूर्यगतरूपस्यदेहगतत्वाभावेनततोविहानायोगात्कथंतौयत्रविहीयेतेइत्युक्तमित्यतआह ॥ **सएवेति** ॥ सूर्य

भाष्यं ॥ आणिंनरथ्यमसृताधितस्थुरिहब्रवीतुयउतच्चिकेतत् । रथ्यमाणिमिवाश्रित्यमुक्ताःसर्वेप्यवस्थिताः । यंविष्णुंदेवदेवेशंनमस्तस्मैस्वयं भुवइत्यादिच । तौयत्रविहीयेतेइत्यत्रापिपरमात्मैव । शरीरानभिमानीयोहृदिसंस्थोजनार्दनः । अभिमानवतोदेहेजीवस्यसनियामकः । सएवसूर्यसं स्थश्चहंसःसोहमितिश्रुतः । हंतृत्वाद्धंसनामासौसोहंचासावहेयतः । सएवसूर्यसंस्थेनरूपेणैवाक्षिणिस्थितः ।

संस्थितेनैवरूपेणात्रावस्थानंकथंइत्यतआह ॥ सूर्यसंस्थादिति ॥ एवंचतयोर्देहाद्गमनमुपपन्नमित्याह ॥ गच्छतइति ॥ तौ यत्रविहीयेतेचंद्रमाइवादित्योदृश्यतेइत्यादेस्तात्पर्यमाह ॥ तयोरिति ॥ सयत्करणीयंमन्येततत्कुर्वीतेत्यस्यतात्पर्यमाह ॥ तदेति ॥ अभिमानवतोदेहइत्यनेनप्रज्ञात्मेत्येतत्प्रज्ञस्यजीवस्यात्माविनियामकमितिव्याख्यातं तत्रप्रमाणांतरमाह ॥ क्षेत्रज्ञइति ॥ शुद्धःक्षेत्रज्ञोऽविशुद्धकर्तुर्जीवस्य मायारचिताःनिमित्तभूतस्वेच्छानिर्मिताः अतएवानित्याः आविर्हिताःस्पष्टाः तिरोहिताश्चास्पष्टाः मनसोविभूतीःविक्रियाएताःसुखदुःखाद्याः विचष्टइतिसंबंधः । कःक्षेत्रज्ञइत्यतआह ॥ क्षेत्रज्ञइति ॥ स्वमाययास्वाविद्यया ऽऽत्मन्स्वस्मिन् व्यवधीयमानो भिद्यमानइत्यन्यथाप्रतीतिनिरासायतत्प्रमाणेनव्याचष्टे ॥ स्वेच्छयैवेति ॥ स्वमाययेत्यस्यार्थःस्वेच्छयेति । आत्मन्नित्यस्यार्थोजीवइति । व्यवधीयमानइत्यस्यावृतइति । तिष्ठतीतिशेषोक्तिः । यद्यपिभागवतवचनेद्वितीयश्लोकएवोदाहर्तव्यः । तथापितत्रजीवस्थत्वोक्तावपितन्नियामकत्वस्यानुक्तत्वात्प्राचीनश्लोकोदाहरणं । यदुक्तंतौयत्रविहीयेतेइत्यत्रद्विरूपःपरमात्मैवपरामृश्यतइतितन्न । यश्चासावादित्यइत्यस्यपरमात्मपरत्वे

भाष्यं ॥ सूर्यसंस्थाद्विरूपात्सविभक्तोक्षिणिसंस्थितः । गच्छतोम्रियमाणस्यतावुभावपिदेहतः । तयोर्देहविहानेतुभवेतारिष्टदर्शनं । तदासंचिंतयेद्देवंतमेवपुरुषोत्तममित्यादिहरिवंशेपु । क्षेत्रज्ञएतामनसोविभूतीर्जीवस्यमायारचिताअनित्याः । आविर्हिताश्चापितिरोहिताश्चशुद्धोविचष्टेह्यविशुद्धकर्तुः । क्षेत्रज्ञआत्मापुरुषःपुराणःसाक्षात्स्वयंज्योतिरजःपरेशः । नारायणोभगवान्वासुदेवःस्वमाययात्मन्व्यवधीयमानइतिभागवते । स्वेच्छयैवावृतोविष्णुर्जीवेतिष्ठतिसर्वदा । योसौनियमयन्जीवंक्षेत्रज्ञइतिशब्दितइतिहरिवंशेपु ।

पिसयश्चायमशरीरःप्रज्ञात्मेत्यस्यजीवपरत्वात् । अतएवएकमेतदित्यवोचामेत्यनेनजीवेशाभेदःप्रतिपाद्यतइतिचेन्न । **सयश्चाय** मितिवाक्यस्यपरमात्मपरत्वेप्रमाणस्योक्तत्वात् । युक्तिंचाह ॥ **अशरीरइति** ॥ अशरीरत्वविशेषणेपिजीवःकिंनस्यादित्यतआह ॥ **नहीति** ॥ मुक्तजीवस्याशरीरंवावसंतमित्यशरीरत्वावगमादमुक्तस्येत्युक्तं । **सयश्चायमित्युक्तस्यजीवत्वांगी** कारेतौयत्रविहीयेतेइत्युत्तरवाक्यपर्यालोचनयाऽमुक्तत्वमंगीकार्यमितिभावः । अमुक्तस्यापिशरीरमिथ्यात्वेनाशरीरत्वोक्तिरित्ययुक्तं । प्रपंचसत्यत्वस्यसमर्थितत्वादितिभावः । ननुप्रज्ञात्मत्वविशेषणेपिपरमात्माकुतइतिचेत् प्रज्ञात्मत्वंहिजीवनियामकत्वं तच्चविष्णोरेवलिंगमितिभावेनतत्रश्रुतिमाह ॥ **एषइति** ॥ अतोंतर्यामिणो ऽन्यज्जीवजातं **अतःपरमात्मनएव आर्त्तं दुःखी** त्यर्थः । यद्यंतर्यामिणोन्यज्जीवादन्यज्जडंस्यात्तर्हिजीवजातस्यांतर्यामिनियम्यत्वेनेदंमानंस्यात्इत्यतआह ॥ **नहीति** ॥ आर्तिर्दुखं सर्वजीवनियामकत्वेउपसंहारवाक्यंचाह ॥ **सर्वेषामिति** ॥ भूतशव्दस्यजडभूतपरत्वप्रतीतिनिरासार्थमाह ॥ **ब्रह्मादय इति** ॥ सःमेमम आत्मारूपमित्यर्थप्रतीतिनिवारणायतद्व्याचष्टे ॥ **समइति** ॥ अनेनात्मासमइतिविद्यादित्यर्थउक्तोभवति । यदपिएकमेतदित्यवोचामेत्यनेनजीवेशाभेदउच्यतइति तदप्येतेनपरास्तं । **तस्यजीवेशाभेदपरत्वेक्षेत्रज्ञएताइत्यादिभेदप्रतिपाद**

भाष्यं ॥ अशरीरःप्रज्ञात्मेतिविशेषणाच्चपरमात्मा । नहिजीवस्याशरीरत्वममुक्तस्य । एषतआत्मांतर्याम्यमृतः । अतोन्यदार्तमितिच । नहिजीवादन्यस्यार्तिरुपपद्यते । सर्वेषांभूतानामंतरपुरुषःसमआत्मेतिविद्यादित्यादिश्रुतिभ्यश्च । ब्रह्मादयोहिभूतानितेषामंतर्गतोहरिः । समःससर्वभूतेपुयएवंवेदतत्वविदितिचभारते ।

कप्रमाणविरोधात् । तथाहि क्षेत्रज्ञएताइत्यत्राविशुद्धकर्तुः शुद्धइतिचभेदोक्तिः । क्षेत्रज्ञआत्मेत्यत्रआत्मनितिष्ठतीत्युक्त्या भेदोक्तिः । एषतआत्मेत्यादौतुस्फुटएवभेदः । उपपत्तिविरोधश्च । तथाहि सयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्यइत्यस्य भागत्यागलक्षणयाचैतन्यमात्रपरत्वमंगीकृत्यतदैक्यंएकमेतदित्यनेनबोध्यतइत्युच्यते अथवातस्यविशिष्टजीवेशपरत्वमंगीकृत्यतदैक्यंवा । नाद्यइत्याह ॥ नचेति ॥ सर्वात्मनामुख्यार्थासंभवेहिलक्षणांगीकार्या । अन्यथातिप्रसंगात् । तथाचोक्तरीत्यास्मदुक्तेमुख्येऽर्थांतरेसंभवतिसतिनलक्षणायुज्यतइत्यर्थः । द्वितीयंदूषयति ॥ नचेति ॥ कुतइत्यतआह ॥ प्रत्यक्षेति॥ यःसर्वज्ञःसर्वविदित्यादिश्रुत्यासार्वज्ञादिगुणविशिष्टमीश्वरमवगम्यतद्विरुद्धाल्पज्ञत्वादिगुणविशिष्टमात्मानंचपश्यतःतत्प्रतियोगिकभेदस्यप्रत्यक्षसिद्धत्वेनतद्विरोधादित्यर्थः। एवकारेणप्रत्यक्षविरोधस्यापरिहार्यत्वमाह । ईश्वरस्यजीवाद्भेदसाधकसर्वेश्वरत्वादिधर्मज्ञानस्यमोक्षहेतुत्वोक्तेश्चनजीवेशैक्यमित्याह ॥ तमेवंविदिति ॥ इत्यादेःप्रतीयतइतिसंबंधः । एवमितिपूर्वोक्तप्रकारःपरामृश्यते सचसहस्रशीर्षेत्यादिनोक्तःसहस्रशीर्षत्वादिरेवेतिभावेनोक्तं ॥ सहस्रेति ॥ प्रथमादिपदेनसहस्राक्षत्वादेर्ग्रहणं । पुरुषएवेत्यादेरर्थःसर्वेशत्वेति । ततोज्यायांश्चपुरुषइत्यस्यसर्वज्यायस्त्वेति । आदिपदेनभूतपादत्वद्युस्थत्वादेःसंग्रहः । नान्यःपंथाइत्यस्यार्थमाह ॥ अनन्येति ॥ नत्वैक्यज्ञानेनेत्यर्थः । ननुपुरुषएवेदंसर्वमितिपूर्वंब्रह्मणोजीवैक्यस्योक्तत्वेनतमेवमित्येवंशब्देनतदै

भाष्यं ॥ नचमुख्येसतिलक्षणानामयुज्यते । नचमुख्यतएवजीवेशयोरैक्यंयुक्तं । प्रत्यक्षविरोधादेव । तमेवंविद्वानमृतइहभवतिनान्यःपंथाअयनायविद्यतइत्यादेः । सहस्रशीर्षत्वादिसर्वेशत्वसर्वज्यायस्त्वादिज्ञानादेवमोक्षःप्रतीयते । अनन्ययोगेन ।

क्यपरामर्शेऐक्यज्ञानमेवमोक्षहेतुत्वेनोच्यतइतिकथमेतदैक्यबाधकमित्यतआह ॥ नचेति ॥ ऐक्यस्यपूर्वमनुक्तत्वादितिभावः। ननूक्तंपुरुषएवेदंसर्वमित्यत्रैक्यमुक्तमितितत्राह ॥ पुरुषइति ॥ यद्भूतंयच्चभव्यंयच्चभवदमुक्तमिदंसर्वंपुरुषएवपुरुषाधीनमेवेतिपुरुषस्यामुक्तसर्वेशितृत्वमेवोक्तं नतुसर्वैक्यमित्यर्थः। कुतइत्यतआह ॥ उतेति ॥ उत्तरार्धेमुक्तेशानत्वस्योक्तत्वात् पूर्वार्धेऽमुक्तसर्वेशितृत्वमेवोच्यते नतुसर्वत्वं । नहिकोपिवादीमुक्तौभेदममुक्तावभेदमंगीकरोति । नापियुज्यते। पूर्वमभिन्नस्य पश्चाद्भेदायोगात् । किंच यदिपूर्वार्धेसर्वत्वमुक्तंस्यात्तह्युत्तरार्धेउतशब्दोप्यर्थःस्यात् । अमुक्तसमुच्चयार्थोहिउतशब्दः। नचद्वयोरीशत्वस्यानुक्तौतत्समुच्चयोक्तेरवकाशोस्तीतिभावः । अर्थांतरस्यासंभवात् । ईशानश्चेत्यन्वयेभिन्नक्रमत्वप्रसंगात् । अतएवामृतत्वस्येशानइत्येवोदाहर्तव्येउतशब्दसाहित्येनतदुदाहरणं । नकेवलमुक्तयुक्त्यापुरुषएवेदमित्यस्योक्तार्थत्वं किंतुभारतेतथाव्याख्यातत्वादपीत्याह ॥ पुरुषइति ॥ अपिचेतिचशब्दोयस्मादित्यर्थे । यस्माद्भूतभव्यादिजातस्यामुक्तवर्गस्येश्वरः तस्मान्मुक्तानामपीश्वरइति । संसारेस्वाधीनंजगद्यदिमुक्तौस्वाधीनतांजह्यात् तदाप्रेक्षावान्नमोचयेत् । अतोमुक्तावपितदधीनमेव । श्रुतौ उतामृतत्वस्येशानोयदन्नेनातिरोहतीत्यस्यां । अनेनयद्यस्मादेवमन्नेनान्नंअदनीयं अमुक्तवर्गमतिरोहत्यतिक्रामति अमुक्ताधिपतिरितियावत् । तस्मादमृतत्वस्योत भावभवित्रोरभेदेनमुक्तवर्गस्यापि ईशानइतिश्रुतिर्व्याख्याताभवति । इतो

भाष्यं ॥ नचात्रैक्यज्ञानमुक्तं । पुरुषएवेदंसर्वमित्यत्रापिसर्वेशितृत्वमेवोक्तं । उतामृतत्वस्येशानइतिवाक्यशेषात् । पुरुषएवेदंसर्वंभूतंभव्यंभवच्चयत् । इत्युच्यतेतदीयत्वान्नतुसर्वस्वरूपतः । भूतभव्यादिजातस्यमुक्तानामपिचेश्वरः । इत्युच्यतेश्रुतौविष्णुःसर्वदापुरुषोत्तमइतिभारते ।

पिनैक्यज्ञानंमोक्षसाधनमित्याह ॥ सर्वस्मादिति ॥ ननुभक्तेरनादित्वादितःपूर्वमेवकुतोनमुक्ताइत्यतआह ॥ तयेति ॥ केयं भक्तेःपूर्णताइत्यतआह ॥ अपरोक्षेति ॥ स्नेहपूर्वकंरामकृष्णाद्यवतारदर्शिनांकुतोनमुक्तिरित्यतआह ॥ अपरोक्षेति ॥ महाचार्यःशिष्ययोग्यताभिज्ञः । महाचार्योक्तकामसाधनगुणविशिष्टगोपालादिरूपदर्शनस्यमोक्षहेतुत्वाभावादाह ॥ सोपीति ॥ मनसासुप्रसन्नधिया । ननु तस्याभिध्यानाद्योजनात्तत्वभावाद्भूयश्चांतेविश्वमायानिवृत्तिरित्यादिश्रुतौ सकृदभ्यर्च्यगोविंदंबिल्वपत्रेणमानवः मुक्तिभागीत्यादिस्मृतौच ध्यानादेरेवमोक्षसाधनत्वोक्तेर्नचान्यतइतिकथमुक्तमित्यतआह ॥ ध्यानंचेति ॥ ननुभवतुविष्णुभक्तिव्यतिरिक्तमोक्षसाधनाद्यर्थप्रतिपादकपाशुपतादिशास्त्रंकुवर्त्म वैष्णवपुराणेष्वेवतथोक्तेःकागतिरित्यतआह ॥ विष्णोर्भक्तिमिति ॥ तदेवविशदयति ॥ दैत्यानामिति ॥ कुतोनग्राह्यमित्यतआह ॥ विष्णिवति ॥ विप्राःऋषयः ।

भाष्यं ॥ सर्वस्मादुत्तमइतिसम्यक्स्नेहयुतामतिः । सुस्थिराभक्तिरुद्दिष्टातयामोक्षोनचान्यतः । तयामोक्षोभवत्येवसाचेत्पूर्णास्वयोग्यतः । अपरोक्षदृशायुक्तासापूर्णेत्यभिधीयते । अपरोक्षदृशिश्चापिमहाचार्योक्तदर्शनं । सोपियन्मोक्षनियतंमनसासमुदीरयेत् । तस्यदर्शनतोयातिमुक्तिंनास्त्यत्रसंशयः । ध्यानंचगुरुशुश्रूषानित्यनैमित्तिकाःक्रियाः । तीर्थदानजपाद्याश्चस्वाध्यायोहरिकीर्तनं । द्वादश्यादिव्रतंचैवतुलस्याद्यैरथार्चनं । सर्वंभक्त्यर्थमुद्दिष्टंनिष्फलंतुतयाविना । विष्णुभक्तियुतोमुक्तिंयातिनान्यःकथंचन । एतदन्यत्तुयच्छास्त्रंनतच्छास्त्रंकुवर्त्मतत् । विष्णोर्भक्तिमृतेमुक्तिर्जीवाभेदोहरेरपि । शिवब्रह्मादिसाम्यंचहरेर्मोहार्थमुच्यते । दैत्यानांमोहनार्थायविष्णोरन्यसमानता । हीनताचोच्यतेशास्त्रैर्नतद्ग्राह्यंमनीषिभिः । विष्णुवायुगिरीशेंद्रदेवविप्राःक्रमात्सदा । सामर्थ्यतोविहीनास्तुगुणैःसर्वैस्तथैवच । हीनोविष्णुर्नकस्यापिसर्वतश्चोत्तमोमतः ।

हेतुमुक्त्वासाध्यमाह ॥ एतदिति ॥ उपसंहरति ॥ तस्मादिति ॥ ध्यानादीनांभक्तिव्यतिरेकेणमोक्षसाधनत्वाभावेप्रमाणांतरमाह ॥ तुलेति ॥ सर्वभावैरित्यस्यसर्वात्मकत्वेनेत्यन्यथाप्रतीतिनिरासायार्थमाह ॥ भावइति ॥ नचैवंसर्वभावैरितिबहुवचनानुपपत्तिः । भजनंभक्तिरित्याद्याद्वितीयास्तुतिरूपिणी । तृतीयापरिचर्यास्याच्चतुर्थीप्रेमलक्षणेत्युक्तैर्भावैर्भक्तिभिरित्यर्थांगीकारात् । यद्वाश्रवणादिनवविधभक्तिविवक्षयाभावैरित्युक्तं । भक्तेरेवमोक्षसाधनत्वेप्रमाणांतरमाह॥मुक्तानामपीति ॥ मुक्तानांशरीराद्यभिमानरहितानां सिद्धानांज्ञानिनां कोटिष्वपिनारायणपरायणःप्रशांतात्मासुदुर्लभइतिभागवतवचनं नारायणायनत्वंविनानमुक्तिरित्यस्यद्योतकं।कुतःप्रशांतात्मनोमुक्तस्यचनारायणपरायणत्वविशेषणान्नारायणपरायणःप्रशांतात्मामुक्तःसुदुर्लभइत्युक्त्यासर्वेषामपिमुक्तानांनारायणायनत्वमस्तीतिज्ञायते । अन्यथाकेषांचिन्नारायणायनत्वाभावेनारायणायनःसुदुर्लभइत्येववक्तव्यतयापरायणइतिपरत्वविशेषणवैयर्थ्यापत्तेः । तथाच नारायणायनत्वंविनामुक्तिर्नास्तीतिलभ्यतइतिभावः ॥७॥ अत्रप्राभाकरावदं

भाष्यं ॥ एतदन्यत्तुयच्छास्त्रंतदासुरविमोहनं । तस्मात्सर्वोत्तमंविष्णुंनिश्चित्यपरमंत्रजेदितिहरिवंशेषु । तुलापुरुषदानाद्यैरश्वमेधादिभिर्मखैः। वाराणसीप्रयागादितीर्थस्नानादिभिःप्रिये । गयाश्राद्धादिभिःपित्र्यैर्वेदपाठादिभिर्जपैः । तपोभिरुग्रैर्नियमैर्यमैर्भूतदयादिभिः । गुरुशुश्रूषणैःसत्यैर्धर्मैर्वर्णाश्रमोचितैः । ज्ञानध्यानादिभिःसम्यक्चरितैर्जन्मजन्मभिः । नयांतितत्परंश्रेयोविष्णुंसर्वेश्वरेश्वरं । सर्वभावैरनाश्रित्यपुराणपुरुषोत्तममितिपाद्मे । भावोभक्तिःसमुद्दिष्टस्तद्वान्भावुकउच्यतइतिनारसिंहे । मुक्तानामपिसिद्धानांनारायणपरायणः । सुदुर्लभःप्रशांतात्माकोटिष्वपिमहामतइतिभागवतवचनं । परायणइतिविशेषणान्ननारायणायनत्वंविनामुक्तिद्योतकं ॥ ७ ॥ अथकार्यतावादः ॥

ति ॥ यदुक्तंतत्वमस्यादिवाक्यानांजीवेशभेदादिप्रतिपादकत्वमिति तदयुक्तं । समस्तस्यापिवेदस्यकार्यपरत्वेनसिद्धस्वरूपेजी
वेशभेदादौतात्पर्याभावात् । तथाहि । यज्ज्ञानात्पुरुषःप्रवर्ततेतत्रहितात्पर्यंशब्दस्यकल्प्यं। तादृशंचकृतिसाध्यत्वेसतिकृत्युद्देश्य
त्वरूपंकार्यत्वमेव । तत्रलिङादिप्रत्ययःकार्यस्वरूपमेवाभिधत्ते । प्रकृतिस्तद्विषयं पदांतराणिचप्रकृत्यर्थंतद्विशेषणंकारकंनामधे
यंनियोज्यंचाभिदधतिकार्यप्रतीतावेवव्याप्रियंते । यद्यपिसन्निपत्योपकारकांगवाक्यानिकार्यांतरशून्यानि । तथापि प्रधानका
र्यान्वितस्वार्थाभिधायकतयाकार्यप्रतीतावेवतात्पर्यवंति । मंत्राअपिकार्यांगभूतार्थस्मारकतयातत्रैवविनियुक्ताःकार्यएवव्यापार
वंतः । अर्थवादाअपितत्रैवरुचिमुत्पादयंतःउपयुज्यंते । वेदांतानामपिकर्तृस्वरूपप्रतिपादकत्वेनदेवताप्रतिपादकत्वेनवाकार्यपर
तैवेतिकृत्स्नस्यापिवेदस्यकार्येतात्पर्यमिति । तदेतत्प्रतिषेधति ॥ **नचेति** ॥ सिद्धे कार्यातिरिक्तेर्थे जीवेशभेदादावित्यर्थः । कु
तइत्यतआह ॥ **अस्तीति** ॥ इत्यादिषुप्रयोगेषु । आदिशब्देनास्त्यत्रतवमाता सुरूपोसीत्यादेर्ग्रहणं । योबाल्यएवकुतश्चित्का
रणान्मातापितृभ्यांवियुक्तोमातापितृमतोन्यानवलोक्यस्वात्मनोपितथाभावमनुमायकामेमाताकोमेपिताकीदृशौकुत्रवर्तेतेइतिजि
ज्ञासतेतंप्रतिकश्चिद्ब्रवीति । अत्रपाटलिपुत्रेतवपिताराजाभद्रसेनोस्ति । तेमाताभद्रसेनस्यमहिषीलीलावतीति । तत्रकार्योपदे
शाभावेपिसिद्धएवतात्पर्यदर्शनादित्यर्थः । ननुयथाद्वारमित्यादावस्तंगतःसवितेत्यादौचपिधेहि नगच्छेत्यध्याहृतकार्येतात्पर्यं ।
तथात्रापित्वंतत्रयाहीत्यध्याहृतेकार्येतात्पर्यंकल्प्यते । कार्यबोधमंतरेणनैराकांक्ष्यलक्षणस्यपर्यवसानस्याभावात् । नचगौरश्वःपु

भाष्यं ॥ नचसिद्धेर्थेतात्पर्याभावोवक्तुंयुक्तः । अस्त्यत्रतवपिताराजेत्यादिपुसिद्धएवतात्पर्यदर्शनात् ।

रुपोहस्तीतिवा देवदत्तःपचतीतिवा पदजातंपर्यवसितमनुभूयते । किंतुतृप्तिकामोदनंपचेति । पर्यवसानहीनस्यचन्यूनतयावा क्याभासत्वंस्यादितिचेत्तत्राह ॥ नचेति ॥ तर्हिकथंवाक्यस्यपर्यवसानमित्यतआह ॥ सुखेति ॥ पर्यवसानादिति ॥ तावतैवश्रोतुर्निराकांक्षत्वादितिभावः । ननुयदिवाक्यस्यस्वार्थमात्रेतात्पर्यपर्यवसानेनलिङादिरहितस्थलेकार्येतात्पर्याभाव स्तर्हि ततःप्रवृत्तिनिवृत्त्यभावेनवाक्यप्रयोगोव्यर्थःस्यात् । परप्रवृत्तिनिवृत्त्यभिप्रायेणैववाक्यप्रयोगात् । प्रवृत्त्यादिहेतुकार्यताज्ञानस्यततोऽजननात् । सिद्धज्ञानमात्रस्यप्रवृत्त्याद्यजनकत्वादितिचेत् । न । प्रवृत्त्याद्यर्थएववाक्यप्रयोगइतिनियमाभावात् । यत्रवाक्यार्थज्ञानमात्रेणसुखदुःखावाप्तिहानीभवतः तत्रप्रवृत्त्याद्यभावात् । यत्रापिप्रवृत्तिनिवृत्त्यभिप्रायेणवाक्यप्रयोगस्तत्रापिसिद्धपरत्वंयुक्तमेवेत्याशयेनोक्तं ॥ सुखेति ॥ सुखपदमिष्टपरं । दुःखाभावसाधनताज्ञानस्यापिप्रवर्तकत्वात् । उपलक्षणमेतत् । अनिष्टसाधनताज्ञानेनैवनिवृत्त्युपपत्तेरित्यपिग्राह्यं । एवशब्दःकार्यताज्ञानव्यावृत्त्यर्थः । यद्यपिसिद्धमात्रज्ञानंनप्रवृत्त्यादिहेतुः । तथापिसिद्धविशेषेष्टानिष्टसाधनत्वज्ञानंतुभवत्येव । बालस्यस्तनपानादाविष्टसाधनताज्ञानेनैवप्रवृत्तेर्दंशमशकदंशनादावनिष्टसाधनताज्ञानेनैवनिवृत्तेश्चदर्शनात् । नचतस्यकार्यताज्ञानमेवप्रवर्तकं इष्टसाधनताज्ञानंतुकार्यताज्ञानस्यकारणमितिवाच्यं । इष्टसाधनतातिरिक्तायांकार्यतायांप्रमाणाभावादितिभावः । नन्वेवंचंद्रमंडलादावपिप्रवृत्तिप्रसंगः । नचकृत्यसाध्यताज्ञानंप्रवृत्तिप्रतिबंधकमतोनप्रवृत्तिरितिवाच्यं । साक्षादविरोधिनोज्ञानस्यजलकीभूतज्ञानविघटकतयैवप्रतिबंधकत्वनियमेनकृतिसाध्यता

भाष्यं ॥ नचतत्रकार्येतात्पर्यंकल्पयितुंयुक्तं । सुखसाधनत्वविज्ञानेनैवप्रवृत्त्युपपत्तेर्वाक्यस्यस्वार्थमात्रेतात्पर्यपर्यवसानात् ।

ज्ञानस्यप्रवृत्त्यजनकत्वेकृत्यसाध्यताज्ञानस्यतत्प्रतिबंधकत्वायोगात् । अन्यथा(इष्टासाधनताज्ञानस्यापिप्रवृत्तिप्रतिबंधकत्वे)इष्ट
साधनताज्ञानस्यापिप्रवृत्त्यहेतुत्वापत्तेरितिचेत् मैवं । कृतिसाध्येष्टसाधनताज्ञानस्यैवप्रवर्तकत्वांगीकारात् । ननुतथापिकृतिसा
ध्यत्वबोधकंकिंलिङादिकंउतप्रमाणांतरं । नाद्यः । लिङाद्यर्थोपिसुखसाधनत्वमेवेतिलिङादेरिष्टसाधनत्वमात्रार्थकत्वस्यवक्ष्य
माणत्वात् । नांत्यः । प्रवर्तकज्ञानविषयस्यापिप्रमाणांतरबोध्यत्वेइष्टसाधनस्यापितथात्वप्राप्त्याविधिप्रत्ययस्यप्रवर्तकत्वाभावप्र
संगादितिचेन्न । इष्टसाधनत्वमात्रस्यैवलिङादिबोध्यत्वेपिकृतिसाध्यत्वस्यकृत्यन्वयव्यतिरेकलक्षणप्रमाणांतरगम्यत्वात् । नचै
वंइष्टसाधनतायाअपिप्रमाणांतरबोध्यत्वेलिङाद्यनभिधेयत्वंस्यादितिवाच्यं । स्वर्गापवर्गादीष्टंप्रतिक्रियायाअन्वयव्यतिरेकयोर्दु
र्ग्रहत्वेनतदिष्टसाधनत्वस्यमानांतरागोचरत्वेनतत्रलिङादिशक्तेरावश्यकत्वात् । क्रियांप्रतिकृतेरन्वयव्यतिरेकयोःसुग्रहत्वेनक्रि
यायाःकृतिसाध्यत्वस्यमानांतरलभ्यतयातत्रलिङादेःशक्तेरकल्पनात् । अनन्यलभ्यस्यैवशब्दार्थत्वात् । नहिविधिप्रत्ययःस्वर्ग
कामस्ययागःकृतिसाध्यइत्याह । किंत्विष्टसाधनमित्येव । तस्मिंस्तुबोधितेशक्तःप्रवर्तते अशक्तस्तुनेत्येवानुभवसिद्धं । अन्यथा
स्वर्गकामकृत्यसाध्यस्यापितस्यतत्कृतिसाध्यतयाबोधनेविधिप्रत्ययस्यबाधितार्थत्वप्रसंगात् । नचैवंयत्प्रवर्तकंकृतिसाध्येष्टसाध
नताज्ञानंनतद्विधिप्रत्ययजन्यं । यच्चविधिप्रत्ययजन्यमिष्टसाधनताज्ञानंनतन्मात्रंप्रवर्तकमितिकथंलिङादेःप्रवृत्तिपरत्वमितिवा
च्यं । लिङादिजन्येष्टसाधनताज्ञानस्यापिप्रवृत्त्युपयोगितयालिङादेःप्रवृत्तिपरत्वाव्याकोपात् । नहियावान्प्रवर्तकज्ञानविषयः
तावान्विधिप्रत्ययशक्यइतिशक्यमंगीकर्तुं । इदानींममेदमिष्टसाधनमितिप्रवर्तकज्ञानविषययोरपिकालस्वांशयोर्लिंङाद्यर्थत्वाभा

वात् । नचैवं कृतिसाध्यताज्ञानस्यापिप्रवर्तकत्वांगीकारेकृतिसाध्यताविशेषणस्यव्यर्थत्वादितिसुधाग्रंथविरोधइतिवाच्यं । तद्ग्रंथस्यातीतादौप्रवृत्तिप्रसंगस्येदानींममेष्टसाधनताभावादेवकृतिसाध्यत्वविशेषणेप्यावश्यकेनेदानींतनत्वविशेषणेनैवपरिहारेतदर्थं कृतिसाध्यत्वविशेषणंनदेयमित्येवंपरतयाचंद्रमंडलादौकृत्यसाध्येप्रवृत्तिप्रसंगवारणायतद्विशेषणदानानिषेधकत्वात् । अतएवतत्वनिर्णयटीकायां चंद्रमंडलादौप्रवृत्तिप्रसंगइतिचेन्न । कृतिसाध्येष्टसाधनतायाःकार्यतापरपर्यायत्वस्वीकारादित्युक्तं । नन्वेवमपिसविषान्नभोजनादौनिषिद्धेअगम्यागमनादौचप्रवृत्तिःस्यादितिचेन्न । विकल्पासहत्वात् । तथाहि किमगम्यागमनादिजन्ये सुखेरागौत्कट्येनतज्जन्येदुःखेयस्यद्वेषोनास्तितस्यप्रवृत्तिरापाद्यते यस्यतज्जन्येदुःखेद्वेषौत्कट्येनतज्जन्येसुखेनेच्छा तस्यवा । नाद्यः । रागांधस्यप्रवृत्तिदर्शनेनेष्टत्वात् । नद्वितीयः । इष्टसाधनत्वस्यैवाभावात् । इष्टसाधनत्वंहीच्छाविषयसाधनत्वं तत्कथं तज्जन्यसुखेइच्छाविरहेभवेत् । नचैवमिच्छाज्ञानस्यापिप्रवर्तकत्वापत्तिः । नह्यत्रेच्छाविषयसाधनमेतदितिज्ञानंप्रवर्तकं । येनोक्तदोषःस्यात् । किंनाम स्वरूपसतीयत्रेच्छातत्साधनताज्ञानंप्रवर्तकमिति । अगम्यागमनादेर्निषिद्धस्येष्टसाधनत्वाभावःआचार्याणामभिप्रेतएव । कथमन्यथा कार्यनहिक्रियाव्याप्यंनिषिद्धस्यसमत्वतइत्यादिनाक्रियाव्याप्यत्वादेर्निषिद्धसाम्येनकार्यतारूपत्वंनिराकृत्यस्वयं तदिष्टंसाधनंतथा । कार्यमितीष्टसाधनत्वयोःकार्यतारूपत्वमुक्तमितिदिक् । एवमप्युपपत्तावध्याहृतकार्यएवतात्पर्यकल्पनेदोषमाह ॥ अधिकेति ॥ अध्याहृतकार्यकल्पनायामित्यर्थः । अध्याहारोह्यश्रुतकल्पनं । तच्चकल्पकसद्भावे

भाष्यं ॥ अधिककल्पनायामश्रुतकल्पनाप्रसक्तिः ।

नदोषः । अन्यथातुदोषएव । कल्पिकाचान्यथानुपपत्तिरेव । प्रकृतेचसुखसाधनत्वविज्ञानेनैवप्रवृत्त्युपपत्तेरित्यन्यथोपपत्तेरुक्त
त्वात्कल्पकाभावइतिभावः । ननुयज्ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादौलिङादिःश्रूयतेतत्रतावन्नियोगापरपर्यायकार्यएवतात्प
र्यंसिद्धं । अन्यथालिङादिप्रत्ययस्यप्रवर्तकत्वासंभवात् । तथाचतद्वदन्यत्रापिकार्यपरलिङाद्यध्याहारःकर्तव्यइतिचेन्न । स्याद
तदेवं । यदियजेतेत्यादावेवनियोगापरपर्यायकार्येतात्पर्यंसिद्धंस्यात् । नचैतदस्तीत्याह ॥ यजेतेत्यादिष्वपीति ॥ लिङादि
नेतिशेषः । यजनादेर्धात्वर्थस्य । मात्रपदव्यावर्त्यमाह ॥ नेति ॥ शब्दस्यलिङादिरूपस्य । प्रेरकताप्रवर्तकज्ञानविषयीभूतका
र्यतावोधकता । नप्रतीयतइत्यर्थः । यद्वायदियजेतेत्यादिषुलिङादिनायजनादेर्धात्वर्थस्यसुखसाधनतैवप्रतीयतेनतुकार्यता त
र्हिलिङादेःप्रवर्तकत्वंनस्यात् । प्रवर्तकीभूतकार्यताज्ञानस्यततोजननादित्यतइष्टापत्तिमाह ॥ नेति ॥ शब्दस्यलिङादेःकार्यता
वोधकत्वेनप्रवर्तकतानेत्यर्थः । इष्टसाधनतावोधकत्वेनैवप्रवर्तकत्वंनतुकार्यतावोधकत्वेनेतिभावः । कार्यतावोधकत्वेनलिङादेः
प्रवर्तकत्वांगीकारेकिंबाधकमितिचेन्न । विकल्पासहत्वात् । तथाहि किंलिङादिःइष्टसाधनतांवोधयन्कार्यतांवोधयेत् अवोध
यन्वा । द्वितीयंतावद्दूषयति ॥ वाक्यमात्रस्येति ॥ यदिलिङाद्युपेतवाक्यस्येष्टसाधनतामवोधयतःकार्यतामात्रवोधकत्वेन
प्रवर्तकत्वं तर्हिविषंभुङ्क्ष्वेत्यादिनाविहितमनिष्टमरणादिसाधनंविषभोजनमपिसर्वैःक्रियेत । अतःपरेणतत्रेष्टसाधनताज्ञानाभा

भाष्यं ॥ यजेतेत्यादिष्वपियजनादेःसुखसाधनतामात्रंप्रतीयते । नशब्दस्यप्रेरकता । वाक्यमात्रस्यप्रेरकत्वेसर्वैर्विहितमनिष्टसाधनमपि
क्रियेत ।

येनकार्यतावोधएवनजायतइतिवक्तव्यं । अतएवपरेण किंतुस्वयंक्लेशरूपंकर्मयत्कार्यतांव्रजेत् । फलसाधनतातत्रकारणंतेनकार्यता । इतिकार्यताज्ञानंप्रतीष्टसाधनताज्ञानस्यकारणत्वमुक्तं । नचेष्टसाधनताज्ञानस्यकार्यताज्ञानकारणत्वेपिनेष्टसाधनत्वेलिङादिशक्तिःकल्पनीया । प्रमाणांतरेणापितज्ज्ञानसंभवादितिवाच्यं । तदसंभवस्यप्रागुक्तत्वात् । ततएवकार्यतावोधसंभवेलिङादेरनुवादकताप्रसंगाच्च । तस्मादाद्यएवांगीकार्यः । नचासौयुक्तः । लिङादेःसंप्रतिपन्नप्रथमप्राप्तेष्टसाधनत्वार्थत्वेनैवचारितार्थ्येतदन्यकार्यतावोधकत्वकल्पनेकल्पनागौरवादितिभावः । ननुवाच्यवाचकभावसंबंधज्ञानलक्षणव्युत्पत्त्यपेक्षोहिशब्दोर्थंवोधयति । नान्यथा । अन्वयव्यतिरेकाभ्यांतथावगमात् । व्युत्पत्तिश्चवृद्धव्यवहारदर्शनादेवभवति । वृद्धव्यवहारश्चकार्यप्रतिपत्तिनिबंधनइतिकार्यप्रतिपादकतैवयुक्ता । तथाहि । चैत्रजलमाहरेतिप्रयोजकवृद्धवाक्यश्रवणानंतरंप्रयोज्यवृद्धस्यजलाहरणविषयांप्रवृत्तिंदृष्ट्वापार्श्वस्थोवालएवमाकलयति । अस्येयंप्रवृत्तिर्वुद्धिपूर्वास्वतंत्रप्रवृत्तित्वात् । मदीयस्तनपानादिप्रवृत्तिवदिति । पुनश्चास्यप्रवृत्तिहेतुभूतावुद्धिःकिंविषयेतिजिज्ञासायामेवमवधारयति । वृद्धस्यप्रवृत्तिहेतुर्वुद्धिर्मदीयप्रवृत्तिहेतुभूतवुद्धिसमानविषया प्रवृत्तिहेतुवुद्धित्वात् । मदीयप्रवृत्तिहेतुवुद्धिवदिति । पुनरेवंनिश्चिनोति । यद्विषयासावुद्धिःप्रवृत्तिहेतुभूतातद्वस्त्वनेनशब्देनवोधितं । तद्भावभावित्वात् । ममतुप्रमाणांतरेणेत्यावयोर्विशेषः । तेनयद्वोधान्ममप्रवृत्तिस्तदनेनशब्देनवोध्यतइतिशब्दस्यप्रवृत्तिहेतुभूतार्थवोधकतेति । पुनःकोसौप्रवृत्तिहेतुभूतःशव्दवोध्योर्थइत्यवधारयितुंस्वात्मनिप्रतिपन्नंप्रवृत्तिहेतुमर्थमनुसंधत्ते ।
 तत्रनतावदहं क्रियामात्रं फलमात्रं क्रियाफलसंबंधमात्रं वावुध्वाप्रवृत्तः किंतुकार्यमेव । ममेदंकार्यमितिप्रतीत्याहिस्तनपानादा

वहंप्रवृत्तइतिस्वप्रवृत्तेःकार्यताबोधपूर्वकतांनिश्चित्यायमपिकार्यताबोधादेवप्रवृत्तइत्यनुमायवाक्यस्यतावत्सामान्यतःकार्यपरता मवधारयति । ततोलिङाद्यावापेकार्यावगमदर्शनात् तदुद्धारेचादर्शनात्तएवकार्यावगतिंकुर्वंति । शब्दांतराणिचतदन्वितांस्ता नर्थानवगमयंतीत्यावापोद्धाराभ्यांअधिगच्छति । एवंलोकेकार्यएवशब्दानांसंगतिग्रहणाद्वेदेपितदेवशब्दात्प्रतीयते । तथाचय जेतेत्यादिष्वपियजनादेःकथंसुखसाधनतामात्रंप्रतीयतइत्युक्तमित्यतआह ॥ व्युत्पत्तिरपीति ॥ अंगुलिशब्देनतत्प्रसारणंगृ ह्यते । अंगुलिसहितोनिर्देशःसांगुलिनिर्देशः । अत्यपूपांस्तवभ्रातेत्यादिरूपः । आदिपदेनच्छोटिकावादनभ्रूविक्षेपादेर्ग्रहणं । नव्युत्पत्त्यनुसारेणलिङादिशब्दानांकार्यपरताकल्प्या । व्युत्पत्तेरपिसिद्धएवार्थेसंभवात् । तथाहि छोटिकावादनादिनाऽव्युत्प न्नंबालनभिमुखीकृत्याऽपूपानदंतंतद्भ्रातरंअंगुलिप्रसारणादिनाप्रदर्श्यव्युत्पादयितावाक्यंप्रयुंक्ते । बालकतवायंभ्राताऽपूपानत्ती ति । तदावृद्धव्यवहारदर्शनंविनातेननिर्देशेनैवशब्दसमुदायस्यकार्यान्वयरहितएवतस्मिन्नर्थसमुदायेविषयविषयीभावंतावदवग च्छतिबालःइदमनेनायंबोधयतीति । पुनरयंतेपिताऽपूपंखादतीत्यादिवाक्यांतरेषुशब्दार्थयोरावापोद्धाराभ्यांशब्दविभागादिकं अवगत्यभ्रात्रादिपदानांयोग्येतरान्वितेभ्रात्रादौवाचकत्वमाकलयतीतिकिमनुपपन्नं । एतेनेदमपिनिरस्तं । यावर्तासिद्धार्थपरा दपिवाक्याद्व्युत्पत्तिःसासर्वाप्रथमभाविकार्यव्युत्पत्त्यनंतरभावित्वात्कार्यव्युत्पत्तिरेवेति । प्रथमव्युत्पत्तेरेवसिद्धार्थेसमर्थितत्वादि ति । एवंसिद्धेव्युत्पत्तिंप्रसाध्यकार्यान्वितेव्युत्पत्तिरितिपक्षंदूषयति ॥ **नचेति** ॥ विना कार्यमितिशेषः । कुत्रापिकार्यमेवनवि

भाष्यं ॥ व्युत्पत्तिरपिसिद्धेसांगुलिनिर्देशादिनायुज्यते । नचकुत्रचित्सुखसाधनंविनाकार्यान्वितंविद्यते ।

द्यतइतिकार्यान्वितंचनास्ति । अतःशब्दानांकार्यान्वितेव्युत्पत्तिरित्यनुपपन्नमित्यर्थः । ननुत्रयएतेधर्माःएकार्थसमवेताः । कृतिसाध्यत्वं कृत्युद्देश्यत्वं इष्टसाधनत्वंचेति । तत्राद्यौद्वौसंभूतौकार्यतासंज्ञौ । विषभक्षणादौचंद्रमंडलादौचप्रत्येकंतयोःसत्त्वेपिकार्यताबुद्ध्यभावात् । इष्टसाधनत्वंतुकृत्युद्देश्यतायांनिमित्ततयैवावतिष्ठते । तथाचकथंकार्याभावइत्यतउक्तं । सुखसाधनंविनाकार्यंनविद्यतइति । यद्यपिकृतिसाध्यत्वमिष्टसाधनतातिरिक्तमेव । तथापितदुद्देश्यत्वमिष्टसाधनत्वंविनान्यन्नास्ति । प्रमाणाभावात् । तथाचनिमित्तनैमित्तिकभावएवासिद्धइतिभावः । ननुयागादेरिष्टसाधनत्वातिरिक्तकृत्युद्देश्यत्वरूपकार्यतासत्वेलिङादिशब्दएवमानं । तस्यतत्रशक्तत्वादित्यतआह ॥ लिङाद्यर्थोपीति ॥ यन्मानत्वेनोच्यतेतस्यापिलिङादेरिष्टसाधनत्वमेवार्थोनतुकार्यत्वं । अतोतिरिक्तकार्यतासद्भावेनेदंमानमित्यर्थः । नचविमताप्रवृत्तिःइष्टसाधनत्वातिरिक्तकार्यताबोधपूर्विका स्वतंत्रप्रवृत्तित्वा दित्यनुमानंमानमितिवाच्यं । अप्रसिद्धविशेषणत्वात् । नहिकस्यांचित्प्रवृत्ताविष्टसाधनत्वातिरिक्तकार्यबोधपूर्वकत्वं दृष्टं । नचगवानयनादिप्रवृत्त्यन्यथानुपपत्तिर्मानं । कृतिसाध्यतैकार्थसमवेतेष्टसाधनताज्ञानादेवप्रवृत्त्युपपत्तेरतिरिक्तकार्यताभावेनुपपत्त्यभावादिति । एवंकुत्रापीष्टसाधनत्वातिरिक्तकार्याभावात्कार्यान्वितमेवनविद्यतइतिनकार्येव्युत्पत्तिरित्युक्तं । इदानींयदुक्तंप्रकृतिस्तद्विषयंपदांतराणिचेत्यादिनासर्वस्यापिवेदस्यकार्यान्वितएवस्वार्थेतात्पर्यमितितद्दूषयति ॥ **नचेति** ॥ नकेवलंप्रमाणाभावात्कार्यान्वितेतात्पर्याभावः किंतुप्रमाणविरुद्धत्वाच्चेतिभावेनप्रमाणमाह ॥ **सुखसाधनमिति** ॥ वेदोनृणांउत्तमाधि

भाष्यं ॥ लिङाद्यर्थोपिसुखसाधनत्वमेव । नचकार्यान्वितएवतात्पर्यमित्यत्रकिंचिन्मानं । सुखसाधनमेवैकंनृणांवेदःप्रदर्शयेत् ।

कारिव्यतिरिक्ताधिकारिणांसुखसाधनमेवप्रदर्शयेत् । तान्प्रतिवेदार्थेश्वरस्यसुखसाधनत्वात् । इतरेषांतुएकंप्रधानमिष्टमेवप्रति
पादयेत् । उत्तमाधिकारिणःप्रतिवेदार्थभूतस्यभगवतःइष्टरूपत्वादितिभावः । एवकारव्यावर्त्यमाह ॥ नेति ॥ नरंप्रतिकुर्विति
लोट्प्रत्ययादिबोध्यंकार्यंनबोधयतीत्यर्थः । यद्वाकुर्वितिकार्यताबोधकतयानरंकापिनप्रवर्तयतीत्यर्थः । तर्हिकथंप्रवृत्तिरित्यत
आह ॥ सुखेति ॥ इष्टसाधनताज्ञानादित्यर्थः । नकेवलमिष्टसाधनताज्ञानंप्रवर्तकंकिंतुफलेच्छापीत्याह ॥ सुखेति ॥ एवंच
निषिद्धेअगम्यागमनादौइष्टसाधनत्वांगीकारेपितज्जन्येदुःखेद्वेषौत्कट्येनतज्जन्येसुखेइच्छाभावादेवनप्रवृत्तिरितिभावः । ननुफले
च्छायानप्रवृत्तिहेतुत्वंयुक्तं । स्वरूपसतीयत्रेच्छातत्साधनताज्ञानस्यैवप्रवर्तकत्वांगीकारेणफलेच्छायाइष्टसाधनताज्ञानहेतुताव
च्छेदकतयान्यथासिद्धत्वादितिचेन्न । यत्रयत्साध्यताज्ञानंतत्रतदिच्छाप्रवर्तिका । तथाचेष्टसाधनताज्ञानस्यापिफलेच्छाप्रवृत्ति
हेतुतावच्छेदकतयान्यथासिद्धत्वेनप्रवृत्त्यहेतुत्वापत्तेः । तस्माद्विनिगमनाविरहादुभयोरपिदंडचक्रादिवद्धेतुत्वं । ननुफलेच्छाभि
न्नविषयिणी इष्टसाधनताज्ञानंतुप्रवृत्तिसमानविषयकमितिविनिगमकसत्त्वादिष्टसाधनताज्ञानमेवप्रवर्तकं नतुफलेच्छेतिचेन्न ।
प्रमाणबलेनभिन्नविषयिण्याअपीच्छायाःप्रवृत्तिहेतुत्वांगीकारेबाधकाभावात् । नचातिप्रसंगः । इच्छाविषयप्रवृत्तिविषययोःसा
ध्यसाधनभावस्यातिप्रसंगभंजकत्वात् । इच्छायाःप्रवृत्तिसमानविषयतानियमस्तुफलेच्छाव्यतिरिक्तस्थलएवास्तु । उक्तविनिग
मनेनफलेच्छायाइष्टसाधनताज्ञानप्रवृत्तिहेतुतावच्छेदकत्वमेव । इदंतुवचनंफलेच्छायाःप्रवृत्तिंप्रतिप्रयोजकत्वमात्रपरमित्याहुः ।

भाष्यं ॥ नकुर्वितिनरंकापिप्रेरयत्यत्रकंचन । सुखसाधनताज्ञानात्सुखप्राप्त्यर्थमिच्छया । प्रवर्ततेततोवेदःसिद्धस्यैवप्रदर्शकः ।

उपसंहरति ॥ ततइति ॥ सिद्धस्यसिद्धविशेपस्यैव । कारकतांकार्यतावोधकतयाप्रवर्तकतामित्यर्थः । ननुसर्वस्यापिवेदस्यका
र्यपरत्वेप्राभाकरवचनमेवप्रमाणमस्ति । अतःकथंमानाभावइत्यतआह ॥ अतइति ॥ वेदस्यसिद्धार्थपरत्वेकार्यपरत्वाभावेच
प्रमाणसद्भावात्तद्विरोधिकार्यपरत्वकल्पनंमिथ्याज्ञानादेव । तथाचतदीयवचनस्यमिथ्याज्ञानमूलत्वेनाप्रामाण्यात् । सर्वस्यापि
वेदस्यकार्यपरत्वेतन्नमानमित्यर्थः । एवमकार्यशेपतयास्वप्रधानेश्वरतद्भेदादौतात्पर्यमित्युक्तं । इदानीमस्तुवाकार्यपरत्वंवेदस्य
तथापिआत्मानमुपासीतेत्याद्युपासनाकार्येकर्मकारकतयाप्रतीतस्येश्वरस्यतद्भेदादेश्चस्वरूपंप्रतिपादयतां सत्यंज्ञानं द्वासुपर्णेत्या
दिवाक्यानांतत्रप्रामाण्यसंभवइतिपक्षांतरंसमर्थयमानःसिद्धपरेभ्योपिवाक्येभ्योवस्तुतत्वसिद्धिर्भवतीत्येतत्परेणाप्यंगीकर्तव्यमि
त्याह ॥ कार्यान्वितइति ॥ सिद्धवाक्यानांस्वार्थइतिशेषः । प्रामाण्यंतात्पर्यं । सिद्धवाक्यानांस्वार्थेतात्पर्यानंगीकारेबाधक
माह ॥ अन्यथेति ॥ इत्यादौवाक्येविधेयस्यवसंतादेर्लक्षणप्रतिपादकवाक्यानांमधुश्चमाधवश्चवासंतिकावृतूइत्यादिवाक्याना
मित्यर्थः । प्रथमादिपदेनयूपेपशून्वध्नातीत्यादिवाक्यग्रहणं । द्वितीयादिपदेनखादिरोयूपोभवति यूपमष्टास्त्रीकरोतीत्यादिलक्ष
णवाक्यप्रतिपाद्ययूपादिग्रहणं । एवंतृतीयादिपदेनापियूपादिग्रहणं । चतुर्थादिपदेनपशुबंधादिग्रहणं । विधिवाक्यप्रकरणपठि
तानांवाक्यानांकथंचित्कार्यमात्रेतात्पर्योपपादनसंभवेपिस्थानांतरस्थानांतदुपपादनमशक्यमित्याशयेनोक्तं ॥ **स्थानांतरस्था**

भाष्यं ॥ नतुकारकतांकापिवेदःप्राप्नोतिकस्यचिदितित्राह्ये । अतस्तद्विरोधिकथनंमोहतएव । कार्यान्वितेशक्तिरितिवदतासिद्धवाक्यानांप्रामा
ण्यमंगीकृतंच । अन्यथावसंतेवसंतेज्योतिपायजेतेत्यादौवसंतादिलक्षणवाक्यानां स्थानांतरस्थानांस्वार्थेप्रामाण्याभावाद्वसंताद्यसिद्धेर्यागाद्यसिद्धिः ।

नामिति ॥ इतोपिनसर्वपदानांकार्यान्वितेशक्तिरित्याह ॥ **कार्यान्वितइति** ॥ नसर्वेषांशब्दानांकार्यान्वितेस्वार्थेव्युत्पत्तिरितिवक्तुंयुक्तं । एवंहिवदतालिङादिकार्यपदस्यापिकार्यान्वितेस्वार्थेशक्तिरितिवक्तव्यं । नचतद्युक्तं । लिङादिकार्यपदस्यहिकार्यमेवस्वार्थः । नचतस्यकार्यस्यकार्यांतरेणान्वयोस्ति । गुणप्रधानभावेनखलुपदार्थानामन्वयोभवति । कार्यंचप्रधानतएवशब्देनबोध्यते । नचकार्यद्वयस्ययुगपद्गुणप्रधानताभावःसंभवति । अतःकार्यस्यकार्यान्वयाभावान्नलिङादिकार्यपदस्यकार्यान्वितेस्वार्थेशक्तिः । तथाचविधेःकार्यस्यासिद्धिःस्यात् । तस्यप्रमाणांतरागोचरत्वात् । तथासतिलिङादेरनुवादकताप्रसंगात् । ततश्चप्रवर्तकाभावेनप्रवृत्तिविलोपापातइतिभावः । प्रवृत्तिसंग्रहार्थंविध्यादेरित्यादिपदं । ननुलिङादिकार्यपदस्यस्वार्थेकार्यमात्रेशक्तिः । अन्येषांगवादिपदानांकार्यान्वितेस्वार्थेशक्तिरित्यंगीकारान्नायंदोषइत्याशंक्याह ॥ **कार्यपदस्येति** ॥ स्वतएवस्वार्थएव । प्रयोजकत्वंविध्यंगीकारादितिभावः । किंचलिङादिकार्यपदस्यकेवलस्वार्थेशक्त्यंगीकारेअन्विताभिधानवादपरित्यागेनापसिद्धांतःस्यात् । ननुलिङादिकार्यपदस्यसिद्धान्वितेस्वार्थेशक्तिरन्येषांकार्यान्वितेस्वार्थेशक्तिरित्यंगीकारान्नापसिद्धांतइत्यतोप्याह ॥ कार्यपदस्येति ॥ स्वतएव सिद्धान्वितएव । एकप्रयोजकालाभादितिभावः । ननुसर्वेषामपिशब्दानांकार्यान्वितिस्वार्थेशक्त्यंगीकारान्नकल्पनागौरवं । कार्येणसहयोन्वयःतद्वत्त्वंकार्यस्यचसिद्धस्यचास्तीत्येकप्रयोजकलाभात् । इति

भाष्यं ॥ कार्यान्वितेशक्तिरित्युक्तेकार्यपदस्यकार्यान्वयाभावादशक्त्याविध्यादेरसिद्धिश्च । कार्यपदस्यस्वतएवशक्तिरन्येषांकार्यान्वितत्वेनेत्यंगीकारेकल्पनागौरवं ।

चेन्न । अत्रापिकल्पनागौरवप्रसंगात् । कार्येणसहसिद्धस्ययोन्वयःसगुणभावएव । नचकार्यंप्रतिगुणभावःकार्यस्यास्ति । नचगुणेप्रधानेचानुगतमन्वयमात्रंशब्देनबोध्यते । अतःशब्दमात्रमत्रैकंनार्थइति । एतेनकार्यान्वयान्वयिनिशब्दानांशक्तिः । कार्यस्ययोन्वयःतदन्वयवत्त्वंकार्येइतरपदार्थेचास्तीत्येकप्रयोजकवर्णनमपिपरास्तं । कार्यपरपदार्थान्वितेशब्दानांशक्तिरितिचेन्न । अत्रापिकल्पनागौरवात् । कार्यपरंयत्पदंतस्ययोर्थःतेनान्वितइतिह्यस्यार्थः । नहिलिङादिकार्यपदस्यगवादिपदानांचकार्यपरत्वमनुगतं । लिङादीनांकार्यपरत्वंकार्यवाचित्वं गवादिपदानांतुतदुद्देशित्वमात्रमितिद्वैविध्यात् । तथाचकार्यपदस्यकार्योद्देशिमात्रपदार्थान्वितेस्वार्थेशक्तिरितरेषांकार्यवाचिपदार्थान्वितेस्वार्थेशक्तिरित्यंगीकारापत्त्याकल्पनागौरवमेवेति । योग्येतरान्वितस्वार्थेशक्तिरित्यंगीकारेत्वेकप्रयोजकलाभाल्लाघवमित्ययमेवपक्षःसमाश्रयणीयइत्याह ॥ स्वार्थइति ॥ सर्वेषांशब्दानांयोग्येतरान्वितइतिशेषः । नकेवलंस्थानांतरस्थानांवसंतादिलक्षणवाक्यानांविधिवाक्यस्थज्योतिष्टोमस्वर्गकामादिपदानामपिस्वार्थेज्योतिष्टोमादियागरूपेकर्मणिस्वर्गादिरूपप्रयोजनेतात्पर्यमंगीकार्यं । अन्यथातदसिद्धिप्रसंगादित्याह ॥ कर्तव्यतामात्रइति ॥ अस्त्वेवंस्थानांतरस्थवसंतादिलक्षणवाक्यानांविधिवाक्यस्थज्योतिष्टोमादिपदानांचसिद्धेस्वार्थेतात्पर्यं किंततः नचापसिद्धांतः कार्येपितात्पर्यांगीकारादितिचेत् एवंतर्हिउपासनाकर्मकारकात्मलक्षणप्रतिपादकानांस्थानांतरस्थानांसत्यज्ञानादिवा

भाष्यं ॥ स्वार्थेशक्तिरित्यंगीकारेनकश्चिद्विरोधः । कर्तव्यतामात्रवाक्यप्रामाण्यांगीकारेकर्मप्रयोजनेप्रमाणाभावात्तत्रापितात्पर्यमंगीकर्तव्यमेवेतिसिद्धमेवसिद्धेतात्पर्यं ।

क्यानांआत्मानमेवलोकमुपासीतेत्यादिविधिवाक्यस्थात्मादिपदानांचसिद्धेपिस्वार्थेकार्येचेत्युभयत्रतात्पर्यंसिद्धमितिब्रूमः।ननुयुक्तं स्थानांतरस्थवसंतादिलक्षणवाक्यानांविधिवाक्यस्थज्योतिष्टोमादिपदानांचसिद्धेपिस्वार्थेतात्पर्यं। अन्यथावसंताद्यसिद्ध्यायागाद्यसिद्धेः । नतुसत्यज्ञानादिवाक्यानामात्मादिपदानांचस्वार्थेतात्पर्यंयुक्तं । तदनंगीकारेबाधकाभावात् । नचोपासनासिद्धिः । असत्यस्यैवोपासनोपपत्तेरित्यतआह ॥ चित्रादीति ॥ आदिपदेनविशाखादिफल्गुन्यंततारकाग्रहणं।चित्रादितारकाणांहस्तस्वात्यादिपूर्वोत्तरतारकाभ्यांद्वंद्वभावोज्ञातव्यः । ततश्चचित्रादिविशाखाद्यव्यवहितपूर्वनक्षत्रंवोत्तरनक्षत्रंवातन्नक्षत्रंवायदायेपुमासेषु पूर्णेंदुसंयुतंतेमासाश्चैत्रादिमासाविज्ञेयाइत्यर्थः।इत्यादौचित्रादिपदानामितिशेषः। वस्तुयाथार्थ्येचित्रादितारकाद्वंद्वस्यतत्तन्मासेषु पूर्णेंदुसंयुतत्वस्याधुनापिज्योतिःशास्त्रसिद्धत्वादितिभावः । तज्ज्ञानेज्ञानकर्तव्यत्वेचेत्यर्थः । उपासनावाक्येष्वपिविद्यमानानां आत्मादिपदानामितिशेषः । उपासनायामुपासनाकर्तव्यत्वे । उक्तार्थेप्रमाणमाह ॥ उपासनायाइति ॥ तात्पर्यमस्तीतिशेषः । तेनैवकारसंबंधः । विधौ विधिवाक्यस्थात्मादिपदानां । किंततइत्यतआह ॥ तस्मादिति ॥यस्माद्विष्णोरात्मत्वेचतात्पर्यंवर्तत इत्यर्थः । असत्यंविष्णोरात्मत्वं। असत्यध्यानस्यानर्थहेतुत्वादितिभावः । ननुनामब्रह्मेत्युपासीतेत्यादौनामादीनांब्रह्मत्वेनोपासनं

भाष्यं ॥ चित्रादितारकाद्वंद्वंयदापूर्णेंदुसंयुतं । चैत्रादिमासाविज्ञेयाइत्यादौवस्तुयाथार्थ्येतज्ज्ञानेचोभयत्रतात्पर्यदर्शनात् । उपासनावाक्येष्वप्युपासनायांवस्तुयाथार्थ्येचोभयत्रतात्पर्ययुक्तं । उपासनायाःकार्यत्वेविष्णोरात्मत्वएवच । उभयत्रापितात्पर्यमात्मोपासादिकेविधौ । तस्मादसत्यंनध्यायेत्

श्रूयते नचनामादीनांब्रह्मत्वंसत्यं । अतोसत्यत्वैवध्यानंकर्तव्यमित्यतआह ॥ ध्यायेदिति ॥ तत्तन्नामब्रह्मत्वसत्यतायथायेनप्रकारेणाख्यातंतथाध्यायेदित्यर्थः। नाम्नोब्रह्मत्वंकथंसत्यंस्यादित्यतआह॥ विचार्येति॥ नाम्नोब्रह्मत्वंनाम नतावत्तदभेदःप्रमाणविरोधात् । किंतुनामादिपुब्रह्मणःस्थितत्वमेवेति । नामादिप्राणपर्यंतमुभयोःप्रथमात्वतः । ऐक्यदृष्टिरितिभ्रांतिरबुधानांभविष्यति । नामादिस्थितिरेवात्रब्रह्मणोहिविधीयते । इत्यादिभिर्बहुभिर्वाक्यैर्विचार्येत्यर्थः । विचारश्चनस्थूलदृश्वनःसंभवतीतिमतिमानित्युक्तं। ननुतेषामपिवाक्यानांस्वार्थेतात्पर्याभावेकथंतदुक्तार्थसिद्धिरित्यतआह ॥ स्वार्थवाचकैरिति ॥ ननुयद्यात्मादिपदानामुपासनाकर्तव्यत्वेविष्णोरात्मत्वेचेत्युभयत्रापितात्पर्यं तर्हिकार्यांगीकारप्रसंगइत्याशंकांपरिहारत्त्रुपसंहरति ॥ तस्मादिति ॥ इष्टसाधनतातिरिक्तकार्यताभावादित्यर्थः ॥४॥ अत्रतार्किकावदंति॥४॥ यदुक्तमीश्वरोज्ञानानंदादिस्वरूपोप्राकृतविग्रहोनंतगुणपरिपूर्णश्चेति तदयुक्तं । ईश्वरस्यस्वतोशरीरत्वात् । नचाशरीरात्कथंवेदघटादिशब्दव्यवहारसंप्रदायइतिवाच्यं ।सर्गादावदृष्टोपगृहीतभूतभेदान्मीनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वासकलवेदार्थगोचरज्ञानाद्विवक्षासहितान्मीनकंठताल्वादिक्रियातज्जन्यसंयोगाद्वेदोत्पत्तिः ।एवंकुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तद्बुद्धीच्छासहितात्घटोत्पत्तौसकलघटानुकूलव्यापाराद्घटोत्पत्तिः । एवंप्रयोज्यप्रयोजकभावाभिमतशरीरद्वयावच्छेदेनादृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेववाग्व्यवहारः । ततस्तद्दर्शीबालोव्युत्पद्यते । सोयंभूतावेशन्यायः । सचकर्तृत्वोपयुक्तैर्ज्ञानेच्छाप्रयत्नैःसंख्या

भाष्यं ॥ध्यायेत्तत्सत्यतायथा । विचार्यमतिमान्वाक्यैर्बहुभिःस्वार्थवाचकैरितिइरिवंशेपु । तस्मादिष्टसाधनमेवसर्ववाक्यार्थः ।

मुक्ता० दिपंचकिंचिद्विशिष्टइतिशिष्टपद्गुणायोग्यःकथमनंतगुणःस्यात् । यच्चोक्तं मुक्तानामपिज्ञानानंदादितारतम्यमितितदप्ययुक्तं । मु भावबो०
॥ ७१ ॥ क्तेर्दोषविशेषगुणोच्छेदरूपत्वेनतत्रज्ञानानंदादेरभावात्।नचैवमपुरुषार्थत्वापत्तिः। समानाधिकरणदुःखासमानकालीनदुःखध्वंस
रूपत्वेनतस्यपुरुषार्थत्वादिति । तदसत् । उदाहृतश्रुत्यादिविरोधादितिभावेनाह ॥ तार्किकाणामिति ॥ ननुयथाऽशरीरत्वा भाष्यार्थः
द्यंगीकारेउदाहृतश्रुत्यादिविरोधस्तथासशरीरत्वाद्यंगीकारेऽक्षपादादिवचनविरोधइतिचेन्न । उभयसंप्रतिपन्नप्रमाणभावश्रुत्या २ । ५
दिविरोधेनतद्वचनस्यभ्रममूलकत्वेनाप्रामाण्यादितिभावेनाह ॥ अतइति ॥ ननुनोदाहृतश्रुत्यादीनांयथाप्रतीतार्थत्वंवक्तुंयुक्तं।
अनुमानविरोधात् । तथाहि ईश्वरोऽशरीरः अजन्यज्ञानादिमत्वात् व्यतिरेकेणदेवदत्तवत् । नचाप्रयोजकोहेतुरितिवाच्यं । ज्ञान
जन्मन्येवशरीरस्योपयोगात्। ज्ञानस्येंद्रियजन्यत्वात्। इंद्रियाणांचशरीरसंयोगनियमात्। अजन्यज्ञानस्यचेश्वरस्यचशरीरांगीका 142
रेव्याघातादिति । तथादेवदत्तदुःखत्वंस्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्ति भावकार्यमात्रवृत्तिधर्मत्वात् । एतत्प्रदीपसं
ततित्ववदिति । एवंसुखत्वादावपिसाध्यं । तेनसकलोच्छेदोमोक्षःसिध्यतीत्यतआह ॥ अनुमायाइति ॥ प्रत्यक्षागमयोः
परस्परंविरोधेकिम्प्रमाणमित्यतआह ॥ आगमेति ॥ अप्रमाणतांगच्छेदित्यन्वयः । आगमद्विट्उपजीव्यागमविरुद्धार्थग्राहकं।
यथादेवक्यांदेवरूपिण्यांविष्णुःसर्वगुहाशयः । आविरासीदित्याद्यागमबाधितंविष्णुर्दोषवानितिप्रत्यक्षं । तस्मादितरप्रमाणापेक्ष ॥ ७१ ॥

भाष्यं ॥ तार्किकाणांतूक्तवचनानांप्रामाण्यंसिद्धमेव । अतस्तद्विरोधिकथनंमोहइतएव । अनुमायाविरोधश्चेत्प्रत्यक्षेणागमेनवा । सैवाप्रमाण
तांगच्छेदागमद्विट्तथाक्षजं । तस्मादागमएवैकोमानानामुत्तमोत्तमः ।

याप्राबल्यात् । प्रकारांतरेणोत्तमत्वमुपपादयति ॥ धर्मार्थेति ॥ अनुमादेरप्यागमार्थनिश्चायकत्वादिनापुरुषार्थहेतुत्वादित्यतउक्तं साक्षादेवेति । अनुमानविरोध आगमस्येतिशेषः । प्रबलप्रमाणविरोधेहिदुर्बलस्यप्रतीतार्थप्रच्यावनंकार्यं । नचानुमानस्यागमात्प्राबल्यं प्रत्युतागमस्यैवानुमानापेक्षयाप्राबल्यात्तद्विरुद्धमनुमानमेवनमानमितिभावः । किंचयदिज्ञानोत्पत्तावेवशरीरमुपयोगीत्यजन्यज्ञानस्यशरीरानंगीकारस्तर्हिप्रयत्नजन्मन्येवेच्छोपयोगिनीतिनित्यप्रयत्नस्येच्छापिनस्यात् । तथेच्छोत्पत्तावेवज्ञानमुपयुज्यतइतिनित्येच्छस्यज्ञानमपिनस्यात् । अथनप्रयत्नमात्रंकर्तृत्वं अपितर्हिज्ञानेच्छेअपि । परिदृष्टसामर्थ्यकारकप्रयोक्तृत्वंकर्तृत्वमितिहिवृद्धाइतिचेत् । तथापीच्छात्यागेबाधकाभावात् । कुतश्चैवंकल्पनीयं । कुलालादौतथादृष्टत्वादितिचेत्किंतत्रशरीरंनदृष्टं दृष्टमप्यनुपयुक्तमितिचेत् किंनियमाभावादेवमाश्रीयते अन्यत्रोपक्षयाद्वा । नाद्यः व्यभिचाराभावात् । शरीरप्रेरणेपरंशरीरंनास्तीतिचेत्न । तेनैवशरीरित्वात् । नद्वितीयः । निरस्तत्वात् । अन्यथाज्ञानादीनामप्यनुपयोगप्रसंगः । कुतश्चास्यनित्यज्ञानत्वसिद्धिः । क्षित्यादिकंसकर्तृकंकार्यत्वात्इत्यनुमानस्यागमासहकृतस्याप्रमाणत्वात् । आगमादेवतत्सिद्ध्यंगीकारेचान्योन्याश्रयात् । सिद्धेह्यागमप्रामाण्येनित्यज्ञानेश्वरसिद्धिः तत्सिद्धौचागमस्यतत्प्रणीतत्वेनतत्प्रामाण्यसिद्धिरिति । तथादुःखत्वमात्रस्यपक्षत्वेनित्यदुःखस्यापिसत्त्वेनदुःखत्वेकार्यमात्रवृत्तित्वाभावादसिद्धिः । जन्यदुःखत्वस्यपक्षत्वेतस्यस्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्तित्वेप्यजन्यदुःखाविरोधेननमोक्षेअजन्यदुःखापातात् । क्रममुक्तेरेवागमिकत्वेनयुगपत्सर्वमुक्त्यभावाद्बाधश्च । दे

भाष्यं ॥ धर्मार्थकाममोक्षाणांसाक्षादेवप्रदायकइतित्रायुप्रोक्तवचनान्नानुमानविरोधोवक्तुंयुज्यते ।

वदत्तदुःखत्वस्यपक्षत्वेपिदेवदत्तस्यमुक्त्ययोग्यत्वेऽसिद्धिः । तस्मिन्नित्यदुःखस्यापिसत्त्वात् । तदीयजन्यदुःखत्वस्यपक्षत्वेप्य जन्यदुःखाविरोधेनतत्रतत्सत्त्वापातात् । नचयोग्यायोग्यविभागएवासिद्धः । त्रिविधाजीवसंघाद्याइत्यादिप्रमाणसिद्धत्वात् । नचमुक्तियोग्यदेवदत्तदुःखत्वमेवपक्षइतिवाच्यं । तादृशदेवदत्तदुःखत्वस्यस्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्तित्वसाधने सिद्धसाधनत्वात् । अस्माभिरपिमोक्षेदुःखासमानकालीनदुःखध्वंसस्यांगीकारात् । यद्वक्ष्यति निःशेषदुःखमोक्षेनसुखैकानुभ वस्तुयः । मोक्षइत्युच्यतइति । नन्वेवंसुखत्वादावपिसाध्यं । तेनसकलोच्छेदोमोक्षःसिध्यतीत्युक्तमितिचेन्न । अस्मन्मतेमुक्तौ सुखज्ञानेच्छादीनामंगीकारेणसुखत्वादीनांकार्यमात्रवृत्तिधर्मत्वाभावेनासिद्धेः । जन्यसुखत्वादीनांपक्षत्वेप्यजन्यसुखादिसिध्य विरोधादिति । किंचेश्वरस्याप्राकृतविग्रहवत्त्वादेर्मोक्षस्यज्ञानानंदात्मकत्वादेश्चप्रतिपादकस्यागमस्यप्रतीतार्थेप्रामाण्याभावःकिं केवलानुमानविरोधात् आगममूलकानुमानविरोधाद्वा । नाद्यः । तस्यैवप्रतिपक्षग्रस्तत्वेनाप्रामाण्यादित्याह ॥ सर्वत्रेति ॥ अत्रप्रमाणमाह ॥ निर्णयस्त्विति ॥ नद्वितीयः । वेदादिरूपस्यतस्याभावात् । नन्वशरीरत्वाद्यनुमानस्यवेदाद्यागममूलक त्वाभावेपिअक्षपादादिप्रणीतागममूलकत्वमस्तीतिचेन्न । वेदादियुक्तानुमानस्यैवनिर्णयांगत्वेनग्राह्यतयातत्परित्यागेनाक्षपादा द्यागममूलकानुमानस्यग्रहणायोगादित्याह ॥ नचेति ॥ वेदशब्दस्यावृत्तिः । इतिहासपुराणःपंचमोवेदानांवेदइतिश्रुतेर्वेदात्म

भाष्यं ॥ सर्वत्रानिवार्यत्वाच्चप्रत्यनुमानतः । निर्णयस्त्वागमेनैवनानुमागमवर्जिता । क्वचिन्निर्णीतिहेतुःस्यादतःशास्त्राद्विनिर्णयइतिभारते । नचवेदात्मकेतिहासपुराणोक्तन्यायंपरित्यज्ययेनकेनचित्क्लृप्तन्यायोयुज्यते ।

कत्वमितिहासादेः । तच्चतत्प्रामाण्योपपादनार्थं । कुतोनयुज्यतइतिचेत् अक्षपादाद्यागमानांदुरागमत्वेनाप्रमाणतयातन्मूलन्यायस्याप्रामाण्यात् । वेदाद्यागमानांतुस्वागमत्वेनप्रामाण्यात्तन्मूलकन्यायस्यैवप्रमाणत्वादितिभावेनाह ॥ अक्षपादेति ॥ अक्षपादादिपदेनतत्प्रणीतंशास्त्रंग्राह्यं । धर्मोधर्मशास्त्रं । धर्मश्चेत्यतएवस्वागमाइत्यर्थः । कावितिहासपुराणकावित्यतआह ॥ पंचरात्रमिति ॥ वेदादीनामेवसदागमत्वेऽन्येषांदुरागमत्वेचप्रमाणांतरमाह ॥ वेदाश्चेति ॥ भागवतंभगवद्विषयंपुराणमित्येतएवमूलप्रमाणंमुख्यप्रमाणमित्यर्थः । उत्तराब्राह्मीमीमांसाच । तथामूलप्रमाणमित्यर्थः । तर्हिमन्वादिस्मृतीनामप्रामाण्यंस्यादित्यतआह ॥ एतेषामिति ॥ वेदादीनांसदागमत्वमक्षपादाद्यागमानांदुरागमत्वंचयुक्त्याप्रतिपादयत्प्रमाणंपठति ॥ विष्णोरिति ॥ वेदादिकंविष्णोःसर्वोत्तमत्वसाधकं अक्षपादादिशास्त्रंतुतद्विरोधीतिपक्षधर्मताचवक्तव्या । अत्रैवप्रमाणांतरमाह ॥ विष्णोरिति ॥ एवंचाप्राकृतशरीरेणैवेश्वरेणवेदोपदेशाद्युपपत्तौनाप्रामाणिकभूतावेशन्यायकल्पनंयुक्तमितिभावः ॥ ७ ॥

भाष्यं ॥ अक्षपादकणादौचसांख्ययोगार्हतास्तथा । शिवशक्तिमहायानलोकायतपुरःसराः । गाणपत्याश्चसौराश्चसर्वेप्रोक्तादुरागमाः । ऋग्यजुःसामाथर्वाश्चेतिहासपुराणकौ । स्वागमाइतिसंप्रोक्तामीमांसासर्वएवचेतिपाद्मे । पंचरात्रंभारतंचमूलरामायणंतथा । इतिहासइतिप्रोक्तोब्राह्माद्यंचपुराणकमितिप्रकाशिकायां । वेदाश्चैवेतिहासाश्चपुराणंभागवतंतथा । मूलप्रमाणमुद्दिष्टंमीमांसाचतथोत्तरा । एतेषामविरोधेतुमानमन्यदुदीरितं । एतेषांतुविरुद्धंयदप्रमाणंविदोविदुरितिव्यासस्मृतौ । विष्णोःसर्वोत्तमत्वस्यज्ञानार्थंशास्त्रमिष्यते । अतस्तत्साधकंशास्त्रंदुःशास्त्रंतद्विरोधियदितिब्रह्मांडे । विष्णोःसर्वोत्तमत्वंचतद्भक्त्यामोक्षएवच । शास्त्रार्थइतिनिर्दिष्टःसर्वशास्त्रार्थनिर्णयादितिपाद्मे ।

सौगतायास्तु ॥ ४ ॥ शब्दएवतावदप्रमाणं । कुतस्तद्विशेषोवेदादिरिति कथंतेनोक्तार्थसिद्धिःस्यादित्याहुः । तद्दूषयति ॥ नचेति ॥ कुतोनयुक्तमितिचेत् । किमागमाप्रामाण्यंतत्साधकप्रमाणसद्भावात् उततत्प्रामाण्यसाधकप्रमाणाभावात् । नाद्यइत्याह ॥ तदिति ॥ तत्तत्रागमाप्रामाण्यइत्यर्थः । ननुप्रत्यक्षादेरेवागमाप्रामाण्येप्रमाणत्वेनतत्प्रमाणाभावोसिद्धः । मानसप्रत्यक्षावसेयंहिज्ञानानामप्रामाण्यमितिचेन्न । प्रत्यक्षादेरेवप्रामाण्येप्रमाणाभावात् । तत्प्रामाण्यंस्वतएवेतिचे त्तर्हिआगमप्रामाण्यस्यापिस्वतस्त्वेननतदप्रामाण्यमित्याह ॥ स्वतइति ॥ प्रत्यक्षादिप्रामाण्यस्यस्वतस्त्वानंगीकारेबाधकमाह ॥ तदनंगीकारइति ॥ प्रामाण्यग्राहकपरंपरानवस्थानात् । कस्यापिव्यवस्थित्यभावादित्यर्थः । नद्वितीयः । तदसिद्धेरित्याह ॥ स्वतइति ॥ सर्वेषामपिज्ञानानांयथार्थत्वलक्षणप्रामाण्यस्यज्ञानग्राहकमात्रग्राह्यत्वंस्वतस्त्वं । प्रत्यक्षादिकरणानांतुज्ञानजनकत्वंयेनगृह्यतेततएवयथार्थज्ञानजनकत्वस्यतदीयस्यग्राह्यत्वंस्वतस्त्वं । तथाचागमजन्यज्ञानस्यप्रामाण्येज्ञानग्राहकःसाक्षी । आगमप्रामाण्येचतदीयज्ञानजनकत्वग्राहकमेवमानमितिभावः । स्वतस्त्वानंगीकारेबाधकमाह ॥ तदनंगीकारइति ॥ प्रामाण्यंतावदवश्यंकेनचित्प्रमाणेनज्ञातव्यं । अन्यथातदभावप्रसंगात् । नचज्ञानग्राहकातिरिक्तेनतद्ग्रहणंसंभवति । तत्प्रामाण्यस्याप्यन्येनग्रहणांगीकारेनवस्थानात् । तस्यस्वतस्त्वेप्रथमस्यैवतथांगीकारोपपत्तेः । अतःपरिशेषात्स्वतस्त्वसिद्धिः । अवश्यवेद्यत्वानभ्युपगमान्नानवस्थेतिचेन्न । निःशंकप्रवृत्तावश्यवेद्यत्वात् । तथाहि ज्ञानंतावदबुभुत्सितग्राह्यतयातीव्रसंवेदनं । ज्ञातेचतस्मिन्प्रामाण्याप्रा

भाष्यं ॥ नचागमस्याप्रामाण्यंवक्तुंयुक्तं । तत्प्रमाणाभावात् । स्वतःप्रामाण्याच्च । तदनंगीकारेचानवस्थानात् ।

माण्यानुपलब्धौकथंसंशयोनस्यात् । सतिप्रामाण्यसंशयेऽर्थसंशयोपिकथंनस्यादिति । नचसाक्षिवेद्यत्वेप्यनवस्थापातः । साक्षीस्वप्रकाशःस्वात्मानंस्वप्रामाण्यंचगोचरयतीत्यंगीकारस्त् । ज्ञानस्यैवतथाभावोभ्युपगम्यतामितिचेन्न । अंतःकरणवृत्तेर्ज्ञानस्यजडत्वेनस्वयंप्रकाशत्वायोगादिति । यदुक्तंतत्प्रमाणाभावादिति तदयुक्तं । अनुमानस्यैवसद्भावात् । तथाहि प्रमाकरणंहि प्रमाणं । प्रमाकरणंचतदुच्यतेयस्मिन्सतिप्रमाभवत्येव नासति । सत्यपिशब्दे नप्रमाजायते । तत्कथंप्रमाणंस्यात् । किंच प्रमाणंहिविषयसद्भावेनव्याप्तं । विषयश्चद्वेधा अपरोक्षःपरोक्षश्च । तत्रापरोक्षःप्रत्यक्षसिद्धः । परोक्षस्त्वनुमानवेद्यइतिविषयाभावान्नप्रमाणंशब्दः । अपिच यत्प्रमाणंतद्विज्ञानात्मकंदृष्टं यथाधूमज्ञानं । अविज्ञानात्माशब्दोऽतोनप्रमाणं । एवंबाह्यकरणप्रत्यक्षत्वात्आत्मन्यनाश्रितत्वाच्चघटवत् । किंच शब्दोर्थेनसंबद्धस्तंबोधयति उतासंबद्धः । आद्ये संबंध स्तादात्म्यं संयोगः समवायोवा । नाद्यः । वह्न्यादिशब्दोच्चारणेमुखादिदाहप्रसंगात् । वर्तमानशब्दस्यातीतादिनार्थेनतादात्म्येर्थस्यवर्तमानत्वंशब्दस्यातीतादित्वंवास्यात् । नद्वितीयः । गुणत्वात् । द्रव्यत्वेपिमूर्तस्यक्रिययार्थसंयोगेंऽतरावस्थितार्थविषयत्वापत्तिः । सर्वगत्वेतु सर्वार्थप्रतिपादकत्वप्रसंगः । सर्वथातीतानागतादिनासंयोगानुपपत्तौतदप्रतिपादकत्वंस्यात् । नतृतीयः । आकाशगुणस्यान्यत्रसमवायायोगात् । सर्वशब्दानामाकाशार्थतापत्तेश्च । द्रव्यस्यापिमूर्तस्यामूर्तस्यचनघटादिनासमवायोयुज्यते । नद्वितीयः । असंबद्धबोधकत्वेनियामकाभावात्सर्वोपिसर्वंबोधयेत् । किंचाप्तानाप्तप्रयुक्तयोःनद्यास्तीरेपंचफलानिसंतीतिवाक्ययोरस्तिकश्चिद्विशेषोनवा । नाद्यः । अनुपलंभात् । पुरुषविशेषोस्तीतिचेन्न । तस्यवाक्योच्चारणएवोपक्षीणत्वेनतदुत्पाद्यज्ञानेनुपयोगात् ।

द्वितीयेतुकथमेकस्यसंवादोपरस्यविसंवादः । अतःसंभावनामात्रेणशब्दात्कृष्यादाविवप्रवृत्तिरित्यतआह ॥ आगमेति ॥
आगमाप्रामाण्यसाधकेत्यनुमानविशेषणं । एतच्चप्रकृतानुमानाभिप्रायेणैव । वस्तुतस्तुअनुमानादेरित्येववक्तव्यं । विशेषणकृ
त्यंतूत्तरत्रवक्ष्यते । आदिशब्देनप्रत्यक्षं । यदिसत्यपिशब्देप्रमानुदयादप्रमाणंशब्दस्तर्हिसत्यपिचक्षुषिरूपज्ञानानुत्पत्तेः सत्यपि
धूमेऽग्निज्ञानानुदयात् आगमवत्प्रत्यक्षानुमानयोरप्यप्रामाण्यंस्यात् । प्रमाजनकत्वाभावाविशेषेपिप्रत्यक्षानुमानयोःप्रामाण्यमाग
मस्याप्रामाण्यमित्यत्रविशेषप्रमाणाभावात् । यदुक्तंविषयाभावान्नशब्दःप्रमाणमिति तदयुक्तं । तथासत्यागमवच्चाक्षुपप्रत्यक्ष
स्याप्रामाण्यप्रसंगात् । तस्यापिहिपरोक्षोपरोक्षोवाविषयः । नाद्यः । तस्यानुमानविषयत्वात् । नद्वितीयः । तस्यश्रोत्रादिविष
यत्वात् । इतिवक्तुंशक्यत्वात् । विषयाभावाविशेषेपिचाक्षुषप्रत्यक्षस्यप्रामाण्यमागमस्याप्रामाण्यमित्यत्रविशेषप्रमाणाभावात् ।
यच्चोक्तं अविज्ञानात्मकत्वाच्छब्दोनप्रमाणमिति तदपिन । तथासत्यविज्ञानात्मकस्येंद्रियस्यसन्निकर्षस्यवाप्रत्यक्षस्यधूमाद्यनुमा
नस्यचाऽऽगमवदप्रामाण्यप्रसंगात् । अविज्ञानात्मकत्वाविशेषेपिप्रत्यक्षानुमानयोःप्रामाण्यमागमस्याप्रामाण्यमित्यत्रविशेषप्रमा
णाभावात् । यदपिबाह्यकरणप्रत्यक्षत्वादात्मन्यसमवेतत्वाच्छब्दोनप्रमाणमिति तन्न । तथासतिबाह्यकरणप्रत्यक्षस्यधूमाद्नुमा
नस्यात्मन्यसमवेतस्यप्रत्यक्षस्यानुमानस्यचागमवदप्रामाण्यप्रसंगात् । तथात्वाविशेषेपि प्रत्यक्षादेःप्रामाण्यमागमस्याप्रामाण्य
मित्यत्रविशेषप्रमाणाभावात् । यच्चोक्तंशब्दस्यार्थेनसंबंधोस्तिनवेत्यादि तन्न । तथासत्यागमवदनुमानस्याप्यप्रामाण्यप्रसंगात् ।

भाष्यं ॥ आगमाप्रामाण्यसाधकानुमानादेरप्यगमवदप्रामाण्यप्राप्तेश्च । विशेषप्रमाणाभावात् ।

लिंगस्यधूमादेरसंबद्धग्राहकत्वेऽतिप्रसंगात् । संयोगादेरव्याप्त्यतिव्याप्त्यादिनाऽसंभवात् । प्रसिद्धसंबंधाभावाविशेषेपिअनुमानस्यप्रामाण्यमागमस्याप्रामाण्यमित्यत्रविशेषप्रमाणाभावात् । यत्पुनरुक्तमाप्तानाप्तप्रयुक्तयोरित्यादि तदप्यसारं । आगमवत्प्रत्यक्षानुमानयोरप्यप्रामाण्यप्रसंगात् । यथार्थायथार्थयोःप्रत्यक्षयोरनुमानागमयोश्चविशेषोस्तिनवा । नाद्योनुपलंभात् । नद्वितीयः । एकस्यसंवादोपरस्यविसंवादःइत्यस्यानुपपत्तेरितिवक्तुंशक्यत्वात् । न्यायसाम्येपिप्रत्यक्षादेःप्रामाण्यमागमस्याप्रामाण्यमित्यत्रविशेषप्रमाणाभावादिति । अस्तुप्रत्यक्षादेरप्रामाण्यमितिचेन्न । अपसिद्धांतापातात् । किंचानुमानाप्रामाण्येआगमाप्रामाण्यसाधकानुमानस्याप्यप्रामाण्यापत्त्याप्रमाणाभावेनागमाप्रामाण्यासिद्धिःस्यात् । अतएवानुमानादेरित्येववक्तव्येआगमाप्रामाण्यसाधकेत्युक्तं । शब्दस्याप्रामाण्यांगीकारेस्वव्याहतिंचाह ॥ स्वीकृततत्वाचेति ॥ नागमस्याप्रामाण्यमित्यनेनसंबंधः । पूर्वोक्तहेतुसमुच्चयार्थश्चशब्दः । तैरपि आगमाप्रामाण्यवादिभिरपीतिव्याहतिस्फोरणार्थं । ननुतैरपिनस्वागमस्यप्रामाण्यमंगीक्रियते । किंनाम संभावनामात्रेणशब्दात्कृष्यादाविवप्रवृत्तिः । संवादेनचप्रामाण्याभिमानः । नचैवंतदुक्तार्थासिद्धिप्रसंगः । अनुमानादिनैवतत्सिद्धेरित्यतआह ॥ नहीति ॥ स्वर्गस्याप्रत्यक्षत्वेनतत्प्रत्यन्वयव्यतिरेकयोर्दुर्ग्रहत्वादितिभावः । देवदत्तशरीरादिकंदेवदत्तविशेषगुणजन्यंकार्यत्वेसतिदेवदत्तस्यभोगहेतुत्वात् । देवदत्तप्रयत्नजन्यवस्तुवदित्यनुमानादिनाअदृष्टस्वरूपमात्रसिद्धावपिनसाधनफलसंबंधरूपस्तद्विशेषोनुमानादिगोचरः । अतस्तत्साधकत्वेनस्वागमस्यप्रामाण्यंस्वीकार्यमितिभावः ।

149

भाष्यं ॥ स्वीकृततत्वाच्चतैरपिस्वागमप्रामाण्यस्य । नह्यनुमानादिनासप्तमलधारणचैत्यवंदनादेःस्वर्गसाधनत्वंज्ञातुंशक्यं ।

किंचयदिस्वोक्तार्थेप्रमाणातरसंवादस्तर्हिंअविसंवादिविज्ञानंप्रमाणमितिवदद्भिःस्वागमस्यप्रामाण्यमंगीकृतमेवेत्यनुमानप्रामाण्यवादिनासौगतेनागमप्रामाण्यंकथंचित्संभावयितुंशक्यते । तथाविधानुमानाभासोत्प्रेक्षासंभवात् । तदप्रामाण्यवादिनाचार्वाकेणतुतत्संभावयितुंअप्यशक्यमित्याह ॥ नचेति ॥ तत्सिद्धं प्रत्यक्षसिद्धं । अयथार्थज्ञानजनकत्वरूपाप्रामाण्यस्याप्रत्यक्षत्वादितिभावः । आगमप्रामाण्येप्रमाणांतरंसूचयन्नचागमस्येत्यादिनोक्तमुपसंहरति ॥ अतइति ॥ चशब्दउक्तसमुच्चयस्यानुक्तसमुच्चयस्यचद्योतकः। तथाहि। शब्दाज्ज्ञानमुत्पद्यतेनवा। नेतिपक्षेअनुभवविरोधः। स्वक्रियाविरोधश्च। नशब्दोर्थप्रत्यायकइतिब्रूतेपरप्रत्ययनार्थंशब्दमेवप्रयुङ्क्तइति। आद्येसबोधःसंशयोविपर्ययोवा । नाद्यः। एकाकारनियतत्वात्। नद्वितीयः। बाधबोधविरहात् । सर्वत्रापिबाधाभ्युपगमेस्वप्रयुक्तवाक्यस्यतद्भावाभावयोःस्वव्याघातात् । एवंव्यवस्थितेप्रयुज्यते । शब्दःप्रमाणं संशयविपर्ययाजनकत्वेसतिज्ञानजनकत्वात् । प्रत्यक्षादिवदिति । नहिप्रत्यक्षादेरन्यत्प्रामाण्येनियामकमस्ति । नन्विदमेवप्रामाण्यमितिसाध्याविशिष्टता । मैवं । निर्दोषज्ञानसाधनंमानमितिवक्ष्यमाणत्वात् । ननुशब्दोनप्रमाणं आकाशगुणत्वात् । तत्परिमाणवदितिसत्प्रतिपक्षइतिचेन्न । असिद्धेः । वर्णात्माहिशब्दःप्रमाणं । नचासावाकाशगुणस्तत्वविदां । अत्रप्रत्यक्षवदित्यादिर्व्यतिरेकदृष्टांतः । यथाप्रत्यक्षादेर्नाकाशगुणत्वंतथाशब्दस्यापीतिनास्यप्रामाण्यंविहन्यतइति । यद्वा आगमाप्रामाण्यसाधकेत्यनेनोक्तस्यतर्कस्यविपर्ययेपर्यवसानंसूचयन्नचागमस्येत्यादिनोक्तमुपसंहरति ॥ अतइति ॥ ननुयदुक्तंप्रमाजनकत्वाभावाविशेषादा

भाष्यं ॥ नचप्रत्यक्षमात्रप्रामाण्यवादिनस्तत्सिद्धमागमाप्रामाण्यं । अतस्तेषांप्रत्यक्षवदनुमानवच्चांगीकर्तव्यमागमप्रामाण्यं ।

गमवत्प्रत्यक्षानुमानयोरप्यप्रामाण्यंस्यादिति तन्न । स्यादेवं यदींद्रियमात्रंप्रत्यक्षं धूमादिमात्रमनुमानंस्यात् । नचैवं । किंनाम
अंतःकरणाधिष्ठितंविषयसन्निकृष्टमिंद्रियंप्रत्यक्षं । व्याप्तिपक्षधर्मतावत्त्वेनानुसंहितंलिंगमनुमानमित्यभ्युपगमात् । नचतस्मिन्स
तिनप्रमोत्पद्यतइतिचेत् । तर्हिवयमपिब्रूमोनशब्दमात्रंप्रमाणं । किंतुश्रुतोनुस्मृतसंबंधश्च । नचैवंविधशब्देसतिनप्रमोत्पद्यते ।
तथाचशब्दमात्रपक्षीकरणेसिद्धसाधनं । विशिष्टपक्षीकरणेचासिद्धिरिति । तदिदमुक्तं प्रत्यक्षवदनुमानवच्चेति । अथयदुक्तंवि
षयाभावाविशेषादागमवच्चाक्षुषप्रत्यक्षस्याप्रामाण्यमिति । तदयुक्तं । रूपादेर्विषयस्यचापरोक्षत्वेपिश्रोत्राद्यविषयत्वात्तत्रचक्षुषः
प्रामाण्यस्ययुक्तत्वात्इतिचेन्न । शब्देप्यस्यसमानत्वात् । अस्तिचपरोक्षोपिसताद्दशःकश्चिद्विषयोयोनानुमानस्यविषयः । एत
दप्युक्तं प्रत्यक्षवदिति । प्रत्यक्षविशेषवदित्यर्थः । किंचैवंविषयविकल्पेनशब्दनिराकरणेशब्दमुपादायानुमानमपाकुर्वंतंप्रति
किंवक्तव्यं । अनुमानाप्रामाण्येसकललोकव्यवहारोच्छेदप्रसंगात् परचित्तवृत्त्याद्यसंकीर्णविषयदर्शनात्परोक्षविषयत्वेपिश
ब्दाच्छिन्नंतदंगीकरणीयमितिवाच्यमितिचेत्समेतच्छब्देपि । एतदप्याह अनुमानवदिति । नन्वविज्ञानात्मकत्वाविशेषादा
गमवदनुमानस्याप्रामाण्यमितियदुक्तंतन्न । धूमादिज्ञानस्यैवानुमानत्वेनधूमादिमात्रस्यानुमानत्वाभावात् । यथोक्तं लिंगप
रामर्शोनुमानमितीतिचे त्तर्हिशब्दमात्रंनप्रमाणं । किंतुतज्ज्ञानमेवेत्यसिद्धिः । एतदप्याहानुमानवदिति । ननुबाह्यकर
णप्रत्यक्षत्वाविशेषात् आत्मन्यसमवेतत्वाविशेषाच्चागमवदनुमानस्याप्यप्रामाण्यंस्यादितियदुक्तं तन्न । धूमादिज्ञानस्यैवा
नुमानत्वेनधूमादिमात्रस्याप्यनुमानत्वाभावात्इतिचेत्तर्हिशब्दमात्रंनप्रमाणं । किंतुतज्ज्ञानमेवेत्यसिद्धिः । इदमप्याहानुमा

151

नवदिति । किंचयथात्मन्यसमवेतमपींद्रियमिंद्रियसन्निकर्षोवाप्रत्यक्षंप्रमाणंतथाशब्दोपिप्रमाणंभविष्यतीतिकानुपपत्तिः । एतदप्युक्तंचप्रत्यक्षवदिति । अथप्रसिद्धसंबंधाभावाविशेषादागमवदनुमानस्याप्यप्रामाण्यमितियदुक्तं तन्न । प्रसिद्धसंबंधाभावेपिलिंगस्यलिंगिनाव्याप्तिलक्षणसंबंधसत्त्वादितिचेत्तर्हिशब्दस्याप्यर्थेनवाच्यवाचकभावलक्षणसंबंधसत्वादुक्तदोषानवकाशइति तदप्याहानुमानवदिति । ननुयदुक्तंयथार्थायथार्थयोःप्रत्यक्षयोरनुमानयोश्चविशेषोस्तिनवेति तत्राप्यस्त्येवदोषसदसद्भावकृतोविशेषइतिचेन्न । शब्देप्याप्तानाप्तवक्तृसदसद्भावाभ्यांविशेषोपपत्तेः । वक्तावाक्योच्चारणएवोपयुक्तइतिचेत् । यतस्तदेवाविषयेप्रयुंजानोदुष्टंकरोति । निशातमसिमाकाशेप्रयुंजानइव । अन्यथानुमानमप्यप्रमाणंस्यात् । कृतकत्वंहिशब्दानित्यत्वसाधनेसाधु । असाधुचाग्न्यनुष्णत्वसाधने । तत्कस्माद्विशेषात् । व्याप्तिपक्षधर्मताभावाभावाभ्यां इतिचेत्कालातीतत्वस्यपृथग्दूषणत्वाभावापातात् । ततोविषयवृत्तित्वतदभावरूपएवविशेषोवक्तव्यः । सचसमानःशब्देपीति । तदिदमुक्तंप्रत्यक्षवदनुमानवच्चेति । उक्तयुक्तीनांउत्प्रेक्षामूलकत्वशंकानिरासायोक्तार्थेप्रमाणमाह ॥ उक्तंचेति ॥ नकेवलमस्माभिरेवोक्तंकिंतुभविष्यत्पर्वणिचोक्तमित्यर्थः । ननुआगमाप्रामाण्यवादिनंप्रतिकथंतत्प्रामाण्यसाधनायागमोपन्यासः । अन्योन्याश्रयादितिचेन्न । युक्तिभिरागमप्रामाण्यस्यसाधितत्वात् । आगमस्यचदार्ढ्यार्थमुदाहरणात् । यद्वाशिष्यापेक्षयायमुपन्यासइतिनदोषः । कुतः

भाष्यं ॥ उक्तंचभविष्यत्पर्वणि । येनोक्तमागमामात्वंकुतस्तदितितंवदेत् । प्रत्यक्षादिर्यदिब्रूयात्तन्मात्वंकेतितंवदेत् । तत्स्वतश्चेदागमस्यप्रामाण्यंनस्वतःकुतः । परतश्चेत्प्रमाणस्यनकस्यापिस्थितिर्भवेत् ।

प्रमाणात् । तथाचप्रमाणाभावान्नागमामात्वमितिभावः । प्रत्यक्षादेरित्यनंतरमितिशब्दोनुवर्तनीयः । आदिपदेनानुमानं । क्व
केननानेन । प्रामाण्यग्राहकपरंपरायाअवस्थित्यभावेनकस्यापिप्रामाण्यस्यस्थितिर्नभवेदित्यर्थः । स्वव्याहतिमप्याह ॥ अंगीकृ
तंचेति ॥ बौद्धादिभिरेवागमस्यप्रामाण्यानंगीकारात्कथंसर्वैरित्युक्तमित्यतआह ॥ यतइति ॥ ननुतर्ह्यागमाप्रामाण्येसएवा
गमोनानंस्यात् । तत्रागमाप्रामाण्यस्यकथितत्वादितिचेन्न । स्वव्याहतत्वात् । वेदाद्यागमाप्रामाण्येस्वयंमानमितिचेन्न । प्रत्यक्षा
दिविरुद्धार्थप्रतिपादकत्वेनतेषांवस्तुतोप्रामाण्यात् । तर्हिप्रत्यक्षादिविरुद्धार्थप्रतिपादकस्यागमप्रामाण्यंकथमंगीकुर्वंतीत्यतयुक्तं ।
॥ विरोधेप्यक्षजादिनेति ॥ आग्रहमूलकस्तदंगीकारइतिभावः । ननुसतिप्रत्यक्षादिविरोधेस्वपक्षप्रामाण्याभ्युपगमआग्रह
मूलकः । वस्तुतश्चाप्रमाणमितिस्यात् । सएवकुतइत्यतस्तदुपपादयितुंप्रतिजानीते ॥ तत्पक्षइति ॥ प्रत्यक्षादि विरोधकं यस्यसः
प्रत्यक्षादिविरोधकः । आदिपदेनानुमानं । प्रत्यक्षविरोधेतावदुपपादयति ॥ शून्यतेति ॥ असत्त्वमित्यर्थः । जगतइतिशेषः ।
साकंभावाभावात्मतेतिस्याद्वादिमतं । भावात्मतासत्त्वमभावात्मताऽसत्त्वं । भावाभावात्मतासदसत्त्वमित्यर्थः । उपलक्षणमेतत् ।
सदनद्वैलक्षण्यं सत्त्वेसतिसद्वैलक्षण्यं असत्त्वेसत्यसद्वैलक्षण्यं सदसत्त्वेसतिसदसद्वैलक्षण्यमित्यपिग्राह्यं । साकंयुगपदित्यर्थः ।
सदनद्वैलक्षण्यादिपक्षचतुष्टयेनसाकंभावाभावात्मेतेतिवा । शरीरात्मत्वमेवेतिचार्वाकमतं । भेदाभेदनिवृत्त्यर्थमेवकारः । शरी

भाष्यं ॥ अंगीकृतंचप्रामाण्यंसर्वैरप्यागमस्यतु । यतःस्वपक्षप्रामाण्यंविरोधेप्यक्षजादिना । अंगीकुर्वंतितत्पक्षःप्रत्यक्षादिविरोधकः । शून्य
ताक्षणिकत्वंचज्ञानमात्रत्वमेववा । भावाभावात्मतासाकंशरीरात्मत्वमेवच ।

रातमत्वविरोधिप्रत्यक्षमाह ॥ मदेहइति ॥ शून्यताक्षणिकत्वभावाभावात्मताविरोधिप्रत्यक्षमाह ॥ भावरूपेति ॥ भावरूपंसत्त्वं । आदिपदेनकेषांचित्सत्वस्यैवकेषांचिदसत्वस्यकेषांचिद्देशकालादिभेदेनसदसत्त्वस्यग्रहणं । ज्ञानमात्रत्वविरोधिप्रत्यक्षमाह ॥ज्ञानाद्भेदस्येति ॥ घटादेरितिशेषः । घटंजानामीतिज्ञानाद्भेदेनार्थस्यदर्शनादित्यर्थः । ज्ञानार्थयोःक्षणिकत्वस्थायित्वोपलंभादितिवार्थः । यदुक्तंशरीरात्मत्वंमदेहइतिप्रत्यक्षविरुद्धमितितदसत् । भेदप्रतीत्यसंप्रतिपत्तेः । ममदेहइतिव्यवहारस्यममस्वरूपमितिवदौपचारिकत्वोपपत्तेरित्याशंक्याह ॥ देहेति ॥ देहभेदोदेहात्मभेदव्यवहारः । स्यादेवदेहात्मभेदव्यवहारस्यामुख्यत्वं । यदिदेहात्मैक्ये किंचित्प्रमाणंस्यात् । नचतदस्ति । कस्यापिदेहोहमितिप्रतीत्यभावात् । देहात्मत्वप्रतीत्यभावेपिदेहधर्माणांकार्ष्ण्यादीनांआत्मनिष्ठत्वप्रतीतिस्तावदस्त्येव । कृष्णोहमितिव्यवहारदर्शनात् । इतिचेन्न । कर्दमलिप्तेवस्त्रेकृष्णंवस्त्रमित्यादिव्यवहारवत्तस्यौपचारिकत्वोपपत्तौदेहात्मैक्यव्यवहारेमुख्यत्वाभावादितिभावः । ननुदेहात्मभेदव्यवहारस्यमुख्यत्वमभ्युपेत्यतदभेदव्यवहारस्यामुख्यत्वंवाकल्प्यं । अथदेहात्मैक्यव्यवहारस्यमुख्यत्वमभ्युपेत्यतद्भेदव्यवहारस्यमुख्यत्वंवा । विशेषप्रमाणाभावादितिचेन्न । मदेहइतिदर्शनादितिदेहात्मभेदप्रत्यक्षस्योक्तत्वात् । प्रमाणांतरंचाह ॥ जातिस्मृतीति ॥ आत्मनोदेहरूपत्वेसाधनविशेषात्पूर्वजातिस्मृतिर्नस्यात् । पूर्वदेहहानौतदात्मनोनष्टत्वात् । अस्यततोन्यत्वात् । नह्येकस्यानुभवोपरस्यस्मृतिरितियुज्यतइतिभावः ।

भाष्यं ॥ प्रत्यक्षेणविरुध्यंतेमदेहइतिदर्शनात् । भावरूपस्थिरत्वादेर्ज्ञानाद्भेदस्यदर्शनात् । देहभेदोयद्यमुख्योदेहैक्येमुख्यताकुतः । जातिस्मृतिप्रमाणाच्चनयुक्तादेहरूपता ।

विप्रतिपन्नाजातिस्मृतिःस्वजनकानुभवसमानाधिकरणास्मृतित्वात्संप्रतिपन्नस्मृतिवत् इतिप्रयोगोभिमतः । आत्मनोदेहरूपत्वाभावेप्रमाणांतरमाह ॥ **अनुष्ठायेति** ॥ भोगोपक्षयानुष्ठानस्यसमानकर्तृत्वंस्वर्गापवर्गयोःपुंसांरसायांभुविसंपदां । सर्वासामपिसिद्धीनांमूलंतच्चरणार्चनमित्यादिशास्त्रार्थदेवतार्चनादिकमेकस्मिन्जन्मन्यनुष्ठायजन्मांतरेस्वर्गसंपदादिफलभोगस्यप्रमाणेनदर्शनान्नयुक्तादेहरूपता । नह्येकस्यसंपूर्णसाधनानुष्ठानमन्यस्यफलभोगः । कृतविप्रणाशाकृताभ्यागमप्रसंगादितिभावः । अत्रापिविप्रतिपन्नःफलभोगःसाधनानुष्ठातृनिष्ठः फलभोगत्वात् संप्रतिपन्नफलभोगवदितिप्रयोगोभिमतः । तथाचदेहात्मभेदसाधकैतत्प्रमाणानुरोधेनदेहात्मैक्यव्यवहारएवौपचारिकोभ्युपगंतव्यइतितात्पर्यं । एतेनदेहात्मभेदमंगीकुर्वाणाअपितत्तद्देहनाशेतत्तद्देहपरिमाणकस्यात्मनोपिनाशावश्यंभावात्पूर्वोत्तरदेहगतात्मनोर्भेदमंगीकुर्वंतोपिपरास्ताः । उक्तप्रमाणद्वयेनपूर्वोत्तरदेहानुस्यूतस्यकस्यैवात्मनःसिद्धेरिति । यद्वा तत्पक्षःप्रत्यक्षादिविरोधकइत्युक्तं तत्रशून्यतेत्यादिनाप्रत्यक्षविरोधमुपपाद्येदानीमुपलक्षणत्वेनशरीरात्मत्वस्यानुमानविरुद्धत्वमाह ॥ **जातिस्मृतीति** ॥ चशब्दःप्रत्यक्षसमुच्चायकः । अनुमानप्रामाण्यंतेनांगीकारयित्वाइदमुपन्यस्तमितिनकश्चिद्दोषः । एवंसन्घटस्तदेवेदमितिप्रत्यक्षस्यापिबाधकाभावेनाभ्रांतत्वमुपपादनीयं । एवंतत्पक्षेनुमानविरोधोप्युपपादनीयः । अस्तुतत्पक्षःप्रत्यक्षादिविरोधकःकिंततइत्यतआह ॥ **प्रत्यक्षादेरिति** ॥ सौगताद्याः सौगताद्यागमाः । नकेवलंप्रत्यक्षानुमानविरुद्धत्वाद्दुरागमाः किंत्वागमविरुद्धत्वाच्चेत्याह ॥ **बह्विति** ॥ ननुतेषामप्यागमत्वात्कथमेतद्विरुद्धत्वेनदु

भाष्यं ॥ अनुष्ठायचशास्त्रार्थफलभोगस्यदर्शनात् । प्रत्यक्षादेर्विरुद्धत्वात्सौगताद्यादुरागमाः । बह्वागमविरोधाच्चदुष्टत्वंतेषुसंस्थितं ।

ष्टत्वंतेष्वित्यतउक्तं ॥ **बह्विति** ॥ ननुसौगताद्यागमानांकथंबह्वागमविरोधः । तदागमविरुद्धत्वाभावात्तेषामित्यतआह ॥ **प्रामा ण्यमिति** ॥ यैःशास्त्रैर्वेदानांप्रामाण्यंस्वीकृतंतेआगमाः । हिशब्दस्तत्रप्रमाणप्रसिद्धिद्योतकः । बौद्धाद्यागमास्तुवेदाप्रामाण्य प्रतिपादकाइतिनागमाइतिभावः । कानितानिस्वीकृतवेदप्रामाण्यानिशास्त्राणि कथंचतेषांबहुत्वमित्यतआह ॥ **शतकोट्य इति**॥ अन्यत्स्मृत्यादिकं। अस्तुपंचरात्रादीनांबहुत्वं तद्विरोधःकथंबौद्धाद्यागमानां । इत्यतोविरुद्धविषयत्वादित्यभिप्रेत्यपंचरात्रा दिप्रतिपाद्यमाह ॥ **सर्वेति** ॥ यद्वाऽक्षपादाद्यागमैर्वेदप्रामाण्यंस्वीकृतमितितेषामागमरूपमानत्वंस्यादित्यतआह ॥ **सर्वेति** ॥ यत्रेत्यस्यागमाहितइतिपूर्वेणसंबंधः । प्रायिकत्वाभिप्रायेणप्राचीनमागमलक्षणं । अतएववक्ष्यति किंचित्प्रामाण्यसंयुतमितीति भावः । स्वागमस्यबहुत्वमुक्त्वाइतरागमस्याल्पत्वमाह ॥ **विंशदेवेति**॥तथाशब्दद्वयस्यश्लोकानांविंशदेवसहस्राणीत्यर्थः। किंत तइत्यतआह ॥**अतइति**॥ बहुमानविरुद्धत्वादित्यर्थः। तत्बौद्धादिशास्त्रं तत्रव्याप्तिग्राहकंदर्शयति ॥ **बहुमानेति** ॥ अनेनव्या तौज्ञानिनांज्ञानमेवप्रमाणमित्युक्तंभवति। ननुपंचरात्रादिविरोधेनसौगताद्यागमाप्रामाण्येएतद्विरोधेनतदप्रामाण्यमेवकिंनस्यात्।

भाष्यं ॥ प्रामाण्यंस्वीकृतंयैस्तुवेदानामागमाहिते । शतकोट्यःपंचरात्रंपुराणंतावदेवच । रामस्यचरितंतावत्तावदन्यच्चसर्वशः । अनंताश्च तथावेदाःसांगोपांगाश्चसर्वशः । सर्वाधिक्यंयत्रविष्णोस्तात्पर्यातसमुदीर्यते । विंशदेवसहस्राणिश्लोकानांसमुदीरितं । बार्हस्पत्यंतथाबौद्धंभावाभावम तंतथा । शिवशक्त्यादिकंयच्चकिंचित्प्रामाण्यसंयुतं । त्रिंशत्कोट्येवतत्सर्वमतोमानंनतत्स्मृतं । बहुमानविरुद्धंयन्नतन्मानंविदोविदुः ।

उभयोरप्यागमत्वादिगुणसाम्यादित्यतउक्तं ॥ **गुणासम्येपीति** ॥ यथोक्तगुणसाम्येपिपंचरात्रादीनांबहुत्वेनप्रबलत्वात्तद्वि
रोधेनसौगताद्यागमानामेवाप्रामाण्यंवक्तव्यमितिभावः । अभ्युपगम्यचेदमुक्तं । वस्तुतस्तुगुणसाम्यमेवनास्ति । पंचरात्रादीनां
नितरांसर्वज्ञैर्विष्णवादिभिःप्रणीतत्वेनवेदानुसारित्वेनचवेदानांचापौरुषेयत्वेनादोषतयागुणाधिकत्वात् । एतेषांचतदभावात् ।
तथाचविप्रतिपन्नंशास्त्रंनमानं गुणाधिकविरोधित्वात् । इत्यभिप्रेत्यतत्रकैमुत्येनव्याप्तिमुपपादयति ॥ **गुणाधिकेति** ॥ यदागु
णसाम्येपियद्बहुमानविरुद्धंतन्नमानं तदायद्गुणाधिकविरोधितन्मानंनेतिकिमुवक्तव्यमितिविदोविदुरित्यन्वयः । बहुत्वप्रयुक्त
प्राबल्यापेक्षयास्वभावप्रयुक्तप्राबल्यस्यबलवत्त्वादितिभावः । अत्रापिव्याप्तौज्ञानिनांज्ञानमेवप्रमाणमित्युक्तंभवति । तथाप्यस्माकं
कथंव्याप्तिसिद्धिरित्यतोनुमानद्वयेपिदृष्टांतमाह ॥ **यथेति** ॥ ज्ञानत्वादिगुणतःसमानानामपिनिर्दोषज्ञानविरोधिसदोषज्ञानंय
थेति । द्वितीयानुमानदृष्टांतसमुच्चयार्थश्चशब्दः । यथेत्युक्तमेवव्यक्तिविशेषनिष्ठतयोपपादयति ॥ **प्रत्यक्षादाविति** ॥ आदिश
ब्देनानुमानशब्दयोर्ग्रहणं । यथेदंरजतमितिप्रत्यक्षंनेदंरजतमितिप्रत्यक्षेणदाहच्छेदादिलिंगेनतथाविधाप्तवाक्येनचविरुद्धमप्र
माणं यथावाविमतंमिथ्यादृश्यत्वादित्यनुमानंसदितिप्रत्यक्षेणप्रमाणदृष्टत्वाद्यनुमानेनविश्वंसत्यमित्याद्यागमेनचविरुद्धमप्रमाणं
यथावेदंरजतमितिभ्रांतवाक्यंवाप्रपंचोमिथ्येतिमायावादिवाक्यंवोक्तप्रमाणत्रयविरुद्धममानमिति । एवंसौगताद्यागमानांप्रत्यक्षा

भाष्यं ॥ गुणसाम्येपिकिमुतगुणाधिकविरोधियत् । यथाबहूनांज्ञानानांसमानांगुणतोपिच । विरोध्येकंतुयज्ज्ञानंनमानत्वंगमिष्यति । प्रत्य
 क्षादौहिबहुभिःसमैरेकमपोद्यते ।

दिविरुद्धार्थत्वेनवस्तुतोप्रामाण्यान्नतैर्वेदाद्यागमाप्रामाण्यसिद्धिरित्युक्तं । नकेवलंवेदाद्यागमाप्रामाण्येप्रमाणाभावः किंतुतत्प्रामाण्येप्रमाणंचास्तीत्याह॥**तस्मादिति**॥आगमाप्रामाण्यसाधकशास्त्राणाममानत्वादित्यर्थः।परस्परविरोधिज्ञानानांमध्येबहूनामेवप्रामाण्यदर्शनादितिभावः।एवशब्देनगुणाधिक्याभावेपीतिसूचयति।कैमुत्येनापितत्साधयति॥**किंपुनरिति**॥ वाक्याप्रामाण्यंहिवक्तृदोषनिबंधनं। वेदस्यचापौरुषेयत्वेनतदभावःसिद्धः।तथाचवेदोनाप्रमाणं अप्रामाण्यकारणदोषशून्यत्वात्प्रत्यक्षादिवत् । तथाच ज्ञानकरणस्याप्रामाण्याभावेप्रामाण्यमेवसिद्धमितिभावः । पंचरात्रादेस्तदनुसारित्वेनप्रामाण्यसिद्धिरितिभावः । एवंयदाऽदोषत्वाख्यगुणादेववेदाःप्रमाणंकिंपुनर्हेत्वंतरादितिभावेनाह ॥ **बलवदिति** ॥ चशब्दोत्रापिसंबध्यते । तदेवोपपादयति ॥ **वेदोक्तेति** ॥ वेदबाह्यानामाभिचारक्रियासंबंधाद्वेदोक्तकर्मयुक्तानांभविष्यत्फलस्यतथासिद्धिमतामपिसिद्धि(द्ध)फलस्यबाधोनास्तीत्यर्थः । ननुवेदोक्ताभिचारक्रियायोगेनवेदबाह्यकर्मसिद्धानामपिबाधाभावेसाम्यंस्यादित्याशंकापरिहारायोक्तमनुवदन्नधिकमप्याह ॥ **वेदेति** ॥ उक्तशंकापरिहारः ॥ **असाध्यंवेति** ॥ वेदोक्तकर्मानुष्ठानेपिक्वचिद्दृष्टफलानुपलंभस्तुकर्तृकरणादिवैगुण्यनिबंधनएवेतिभावः । ततोबलवत्कार्यसाधनात् । ननुकथमत्रप्रयोगः । वेदाःप्रमाणंबलवत्कार्यसाधनत्वादित्यत्रदृष्टांताभावेनव्याप्त्यभावात् । अप्रयोजकत्वाच्चेतिचेत्न । वेदाःस्वविरुद्धशास्त्रापेक्षयाबलवंतःतदपेक्षयाबलवत्कार्यसाधनत्वात् । यद्य

भाष्यं ॥ तस्माद्वेदाःप्रमाणंस्युर्बाहुल्यादेवकिंपुनः । अदोषत्वाद्गुणाच्चैवबलवत्कार्यसाधनात् । वेदोक्तकर्मयुक्तानांतथासिद्धिमतामपि । वेदबाह्यक्रियायोगान्नबाधःकापिदृश्यते । वेदोक्तकर्मसिद्धानांनाबाध्यंदृश्यतेक्वचित् । असाध्यंवाततोवेदाःप्रामाण्यंनिश्चयाद्गताइति ।

तोवलवत्कार्यसाधनंतत्ततोवलवदितिसामान्यव्याप्तेः । एवंचविरुद्धशास्त्रापेक्षयाप्रावल्येप्रामाण्यंनिश्चितमेवेति ॥ ६ ॥ ६ ॥
सौगताद्यागमाःप्रत्यक्षानुमानागमविरुद्धाइत्युक्तं । तत्तेषांस्वरूपाज्ञानेनज्ञातुंशक्यमितिप्रत्यक्षादिस्वरूपप्रदर्शनायोत्तरोग्रंथसं
दर्भः । तत्रतावत्प्रस्तुतत्वादनुप्रमाणंविभागेनोद्दिशति ॥ प्रत्यक्षमिति ॥ प्रमाअनुप्रमाणं । प्रायेणासन्नाव्यवहितवर्तमानक
तिपयार्थग्राहकंप्रत्यक्षं । अनासन्नातीतानागतव्यवहितार्थगोचरमनुमानं । स्वातंत्र्येणाशेषार्थविषयआगमइत्यर्थग्रहणक्रमेणो
द्देशः । ननुकथंत्रीण्येवप्रमाणानि । उपमानार्थापत्त्यादीनांपृथक्प्रमाणत्वादित्यतआह ॥ उपमाद्यमिति ॥ हियस्मादंतर्गतंत
स्मात्त्रिधेतिसंबंधः । तत्रप्रत्यक्षलक्षणमाह ॥ निर्दोषेति ॥ यद्यपिविषयान्प्रतिस्थितंह्यक्षंप्रत्यक्षमितिगीयते । प्रत्यक्षशब्दानु
सारादनुमेतिप्रकीर्तिता । आसमंताद्गमयतिधर्माधर्मौपरंपदं । यच्चाप्यतींद्रियंत्वन्यत्तेनासावागमःस्मृतः । इत्युक्तरीत्यासंज्ञानि
रुक्त्यैवैषांलक्षणसिद्धिः । तथापिप्रत्यक्षेतस्यैवस्पष्टीकरणार्थमनुमानादौशृंगग्राहिकयातज्ज्ञापनार्थंचपुनर्लक्षणारंभः । निर्दोषेंद्रि
यार्थसन्निकर्षइत्यर्थः । इंद्रियशब्देनज्ञानेंद्रियमुच्यते । निर्दोषत्वमिंद्रियार्थयोर्विशेषणं । अर्थशब्देनतत्तदिंद्रियविषयउच्यते ।
अत्रार्थग्रहणेनाकाशादीनांचक्षुरादिसन्निकर्षव्युदासः । निर्दोषत्वग्रहणेनातिसामीप्यादिदोषयुक्तार्थानामिंद्रियसन्निकर्षनिरासः ।
इंद्रियग्रहणेनार्थानामेवान्योन्यंसन्निकर्षव्युदासः । तन्निर्दोषत्वग्रहणेनमनोनधिष्ठितत्वादिदोषवदिंद्रियाणांअर्थसन्निकर्षव्यावृ
त्तिः । सन्निकर्षइतींद्रियमात्रव्युदासः । गीयतइति स्वीयलक्षणस्यप्रामाणिकत्वोक्त्याअपरोक्षप्रमाव्याप्तंप्रत्यक्षमित्यादिपरेषांल

भाष्यं ॥ प्रत्यक्षमनुमानंचवाक्यंचेतित्रिधाप्रमा । उपमाद्यंप्रमाणंयदेतेष्वंतर्गतंहितत् । निर्दोषेंद्रियसंयोगःप्रत्यक्षमितिगीयते ।

Scanned by CamScanner

क्षणमयुक्तमित्युक्तंभवति । सर्वस्यापिप्रमेयस्येश्वरापरोक्षप्रमाव्याप्तत्वेनातिव्यापकत्वात् । साधनाश्रययोरन्यतरत्वेसतीतिविशे पणमितिचेन्न । साधनाश्रययोरेवप्रमाव्याप्तिःसंभवतीत्येतावतातदुपादानं । नलक्षणशरीरानुप्रवेशोनेतित्वदुक्त्ययोगात् । आ श्रयग्रहणवैयर्थ्याच्च । ईश्वरस्यापिप्रत्यक्षत्वसिध्यर्थमितिचेत् । कर्तरिल्युडंतस्यप्रमाणशब्दस्याननुशासनेनेश्वरप्रामाण्यस्यैवायु क्तत्वादिति । अनुमानलक्षणमाह ॥ निर्दोषयुक्तिरिति ॥ अत्रोपपत्तिर्युक्तिर्लिंगंव्याप्यमितिपर्यायः इतिपद्धत्युक्तरीत्याय दियुक्तिशब्दोव्याप्यपरःतदाऽसिद्धिव्युदासार्थंनिर्दोषग्रहणं । यदाचोपपत्तिरितिलिंगमुच्यते साहचर्यबलेनार्थगमकंलिंगमितिप्र माणलक्षणटीकारीत्यायुक्तिशब्दोव्यभिचारादिसाधारणलिंगमात्रवचनः तदातद्व्यावृत्त्यर्थंनिर्दोषग्रहणंकृतमितिज्ञातव्यं । नचैव मनुमायुक्तिरेवोक्तेत्यनुव्याख्यानेन नतुनिर्दोषत्वविशेषितेतिसुधयाचविरोधइतिवाच्यं । तत्रयुक्तिशब्दस्ययथार्थानुमितिजनक त्वरूपमुख्यार्थस्यविवक्षितत्वात् । अत्रचतदभावात् । अतएवोक्तंसुधायां । अत्रपुनरंतर्गतनिर्दोषत्वंमुख्यमेवार्थमुपादाययुक्ति रित्येवोक्तमिति युक्तिग्रहणंप्रत्यक्षादिव्युदासार्थं । आगमलक्षणमाह ॥ तादृशोक्तिरिति ॥ निर्दोषोक्तिरित्यर्थः । अत्रनिर्दो षःशब्दआगमइतिप्रमाणलक्षणरीत्योक्तिशब्दःशब्दमात्रपरः । ततश्चनिरभिधेयत्वेनान्वयाभावेनवाअबोधकत्वं विपरीतबोध कत्वं ज्ञातज्ञापकत्वं अप्रयोजनत्वं अनभिमतप्रयोजनत्वं अशक्यसाधनप्रतिपादनं लुघूपायेसतिगुरूपायोपदेशनं इत्यादिदोष युक्तशब्दव्यावृत्त्यर्थंनिर्दोषग्रहणं । वाक्यमेवागमःशुभमितिवक्ष्यमाणरीत्यावाक्यपरोवा । विभक्त्यंतावर्णाःपदं । आकांक्षास

भाष्यं ॥ निर्दोषयुक्तिरनुमातादृशोक्तिस्तथागमः ।

न्निधियोग्यतावतांपदानांसमूहोवाक्यं । तत्रयदिपद्धत्युक्तरीत्यापूर्वपदसंजाताकांक्षापूरकत्वमात्रमाकांक्षावत्त्वं अविलंवेनोच्चारितत्वमात्रंसन्निहितत्वं प्रमाणाविरुद्धप्रतीतान्वयप्रतियोग्यर्थप्रतिपादकत्वंयोग्यतेत्याकांक्षादेर्लक्षणं । तदापदत्वेनानभिधेयत्वस्याकांक्षासन्निधिभ्यामन्वयाभावस्ययोग्यतयाविपरीतबोधकत्वस्यचनिरासेपिज्ञातज्ञापकत्वाद्यशेषदोषनिरासार्थंनिर्दोषग्रहणं । यदिप्रमाणलक्षणटीकोक्तरीत्याश्रोतुराकांक्षिताभिधायकत्वंपूर्वपदसंजाताकांक्षापूरकत्वंचाकांक्षावत्त्वं सन्निहितार्थाभिधायकत्वं अविलंवेनोच्चारितत्वंचसन्निहितत्वं अन्योन्यान्वययोग्यतावदर्थाभिधायकत्वंयोग्यतेत्याकांक्षासन्निधियोग्यतानांलक्षणं तदापदत्वेनानभिधेयत्वस्या कांक्षयानभिमतप्रयोजनत्वान्वयाभावयोः सन्निधिनाऽशक्यसाधनप्रतिपादनान्वयाभावयोः योग्यतया विपरीतप्रतीतान्वयायोग्यार्थप्रतिपादकत्वस्यच निरासेपि आगमाभासव्युदासार्थंनिर्दोषग्रहणमित्यवधेयं । तथाशब्दउपमायां । प्रत्यक्षादिक्रमिवोक्तिरप्यदुष्टेति । उक्तानिलक्षणानिकिंरूपाणीतिजिज्ञासायामाह ॥ **मानमिति** ॥ विशेषणैवमानंलक्षितमित्यर्थः । यद्यपिसामान्यलक्षणोक्तिपूर्वकंविशेषलक्षणाभिधानंप्राप्तं प्रतिपत्तिसौकर्यात् । तथापिसामान्यस्यव्यवहारेष्वनुपयोगाद्विशेषाणामेवतदुपयोगाद्विशेषलक्षणान्येवादावुदितानीतिभावः । नन्वेतेष्वेवंपरस्परविलक्षणेषुप्रत्यक्षादिष्वेकस्यप्रमाणशब्दस्यवृत्तिःकथमित्यतःसामान्यलक्षणप्रयोगादितिभावेनानुप्रमाणसामान्यलक्षणमाह ॥ **निर्दोषेति** ॥ मानंचैवेत्येतदनुवर्तते । सामान्यतोमानंचनिर्दोषज्ञानसाधनमेवेत्यर्थः । एवशब्देनप्रमाव्याप्तंप्रमाणमित्यादिपरोक्तलक्षणानांदुष्टत्वमभिप्रैति । निर्दोषंचतज्ज्ञानं

भाष्यं ॥ मानंचैवविशेषेणनिर्दोषज्ञानसाधनं ।

चनिर्दोषज्ञानं तस्यसाधनमितिविग्रहः। ननुयादृच्छिकसंवादिलिंगविभ्रमादिष्वतिव्याप्तिः। तस्यापियथार्थज्ञानसाधनत्वादितिचे
न्न। यज्जातीयेसतिनियमेनप्रमोत्पद्यतेतस्यैवात्रसाधनत्वेनविवक्षितत्वात् । यद्वानिर्दोषंचतज्ज्ञानसाधनंचेतिनिर्दोषत्वंसाधनविशे
षणं । यथार्थज्ञानकरणस्यापितस्यभ्रमत्वरूपदोषसत्वेननातिव्याप्तिः । अनेनज्ञातज्ञापकवाक्यादावपिप्रमाणलक्षणस्यातिव्याप्ति
र्निरस्ता। यथार्थज्ञानकरणस्यापितस्यज्ञातज्ञापकत्वादिरूपदोषयुक्तत्वात्। ननुज्ञातज्ञापकवाक्यादेरलक्ष्यत्वमेवनास्ति येनतत्राति
व्याप्तिशंकास्यात् । तथासतिस्मृत्यनुवादयोर्नाप्रामाण्यमित्यादिविरोधापत्तेरितिचेन्न। अयथार्थज्ञानसाधनत्वाभावमात्रस्यतत्रवि
वक्षितत्वात्। नचतावतावाक्यस्यप्रामाण्यं। तज्जन्यज्ञानस्ययथार्थत्वनियमेपिवाक्यस्यदुष्टत्वेनभ्रांतप्रतारकवाक्यवदप्रामाण्यात्।
अतएवपद्धत्यादौनिर्दोषःशब्दआगमः इत्यत्रनिर्दोषग्रहणेनज्ञातज्ञापकादिवाक्यमागमाद्बहिष्कृतं । अतएवसुधायांपारिभाषिक
साधनत्वविवक्षयैवयादृच्छिकसंवादिष्वतिव्याप्तिपरिहारेपिज्ञातज्ञापकवाक्यादेरपिव्यावर्त्यत्वाभिप्रायेणयदानिर्दोषतयासाधनंवि
शिष्यतइतिपक्षांतरमुक्तं । ननुप्रमाणलक्षणादौतत्साधनमनुप्रमाणमितियथार्थज्ञानसाधनत्वस्यैवानुप्रमाणत्वेनोक्तत्वात्कथमेत
दितिचेन्न । तत्रापिनिर्दोषतयासाधनस्यविशेषणीयत्वात् । तथात्वेनिर्दोषंज्ञानसाधनमनुप्रमाणमित्येवास्तु । कृतंयथार्थेतिज्ञान
विशेषणेनेतिचेन्न । तत्फलितार्थस्यैवनिर्दोषग्रहणेनवर्णितत्वात् । निर्दोषकरणजन्यंज्ञानंयाथार्थ्यंनव्यभिचरतीतिस्वरूपकथनंवा
तदिति । एवंचनिर्दोषत्वेसतिज्ञेयविषयीकारित्वमेवप्रमाणसामान्यलक्षणमिति नज्ञातज्ञापकवाक्यादौतस्यातिव्याप्तिरिति । उप

माद्येतेष्वंतर्गतमित्युक्तं । तत्रकस्यकुत्रांतर्भावइतिजिज्ञासायामाह ॥ **अर्थापत्तिरिति** ॥ आदिशब्देनपरिशेषोपक्रमादेर्ग्रहणं । एवकारःपृथक्प्रमाणत्वव्यावृत्त्यर्थः । अनुपपद्यमानार्थदर्शनात्तदुपपादकेबुद्धिरर्थापत्तिः । यथाजीवंश्चैत्रोगृहेनास्तीतिज्ञानेजाते सतिवहिर्भावज्ञानं । अत्रयद्यप्येकैकस्यवहिर्भावेलिंगत्वंनोपपद्यते । व्यभिचारात् । तथापिचैत्रोवहिरस्ति जीवित्वेसतिगृहेऽसत्वात् । योजीवन्यत्रनास्तिसततोन्यत्रास्ति यथाहं । इतिमिलितयोर्जीवनगृहाभावयोर्लिंगत्वमुपपद्यतएव । विरुद्धयोर्विशेष्यविशेषणभावानुपपत्तिरितिचेन्न । सामान्यविशेषयोरविरोधस्यस्वस्मिन्नेवदृष्टत्वात् । आत्यंतिकविरोधेत्वर्थापत्तिरपिनप्रवर्तते । किंतुविप्रतिपत्त्यासंदेहएवभवतीति । सादृश्यज्ञानसाधनमुपमानमितिमीमांसकाः । तत्रतेनायंसदृशइति सदृशाविमावितिवाज्ञानं प्रत्यक्षजं । गोगवयौसदृशावितिवाक्यजंत्वागमएवेतिस्फुटमेव । गृह्यमाणेस्मर्यमाणगतसादृश्यंदृष्ट्वास्मर्यमाणेयद्गृह्यमाणसादृश्यं प्रत्येतितदनुमानमेव । सगौरेतद्गवयसदृशोऽस्यगवयस्यतद्गोसदृशत्वात् । योयत्सदृशःसतत्सदृशः यथायमोयमांतरेणेतिप्रयोगात् । व्याप्तिसत्त्वेवैयधिकरण्यस्यादोषत्वात् । एतद्गवयगतसादृश्यप्रतियोगित्वस्यवालिंगत्वेनसामानाधिकरण्याच्च । बहुलज्ञानेऽल्पज्ञानंसंभवः । यथाशतमस्यास्तीतिज्ञानेपंचाशज्ज्ञानं । तदप्यनुमानमेव । देवदत्तःपंचाशद्वान्शतवत्त्वात् । इतिप्रयोगोपपत्तेः । प्रसक्तप्रतिषेधेपरिशिष्यमाणेबुद्धिःपरिशेषः । यथादेवदत्तयज्ञदत्तावितिज्ञानेसति एकस्मिन्नायंयज्ञदत्तइतिप्रतिषेधेदेवदत्तत्वबुद्धिः । इयमप्यनुमानजन्या । अयंदेवदत्तःदेवदत्तयज्ञदत्तयोरन्यतरत्वेसतिअयज्ञदत्तत्वात् । व्यतिरेकेणयज्ञदत्तवत् । 163

भाष्यं ॥ अर्थापत्तिश्चोपमाचसंभवाद्यनुमैवतु ।

इतिप्रयोगोपपत्तेरिति । उपक्रमादीनामपिव्याप्तिसापेक्षतयातात्पर्यनिर्णायकत्वादनुमानत्वमेवेति । अभावप्रमितिसाधनमभा
वाख्यंप्रमाणं । तस्यचनार्थापत्त्यादिवदनुमानमात्रेंतर्भावःसंभवतीतिभावेनतस्यपृथगंतर्भावमाह ॥ दुःखाद्यभावइति ॥ दुः
खाद्यभावविषयमित्यर्थः । वाह्यगःप्रत्यक्षयोग्यवाह्यार्थप्रतियोगिकाभावगोचरः । नकेवलंप्रत्यक्षंकिंत्वनुमाच । पुरोवृत्तिघटाभा
वप्रमितिर्झडितिजायमानाप्रत्यक्षफलमेव । नत्वनुपलब्धिमात्रजन्या । अपरोक्षज्ञानत्वात् । अनुपलब्धिस्त्ववर्जनीयसन्निधि
रेव । अनुमेत्युक्तमुपपादयति ॥ योग्यस्येति ॥ यत्रांधकारेहस्तप्रसारणादिरूपपरामर्शेनघटाभावंप्रत्येति । तदाभवत्येवानुप
लब्धिः । वाह्यगावाह्यार्थप्रतियोगिकाभावगोचरा । किंतुयुक्तिरेव नपृथक् । अत्रघटोनास्तियोग्यत्वेसत्यनुपलभ्यमानत्वादिति
प्रयोगसंभवात् । यन्नोपलभ्यतेतन्नास्तीत्यस्यातींद्रियेषुव्यभिचारादुक्तं योग्यस्येति । प्रत्यक्षयोग्यस्येत्यर्थः । अतींद्रियार्थप्रतियो
गिकाभावज्ञानस्यानुमानागमजन्यतायामविवादात्तन्नोक्तं । दुःखाद्यभावग्राहकंप्रत्यक्षमित्युक्तं तद्विशदयति ॥ **मनसइति** ॥
अभावोदुःखाद्यभावःरूप्यतेविषयीक्रियतेयेनतदभावरूपंप्रमाणं दुःखादिरहितात्मनोमनसोयःसंप्रयोगःतद्रूपंप्रत्यक्षमित्यर्थः ।
ननुदुःखाद्यभावःप्रत्यक्षमित्यसत् । संयोगसमवाययोरसंभवेनाभावस्येंद्रियसन्निकर्षानुपपत्तेरितिचेन्न । मनस्संयुक्तात्मविशेष
णतारूपसन्निकर्षसंभवात् । अतएवदुःखादिरहितात्मनोमनसःसंप्रयोगइतिदुःखाद्यभावआत्मविशेषणतयोक्तः । अभ्युपेत्यचेद
मुदितं । भाववदभावस्यापिसाक्षादिंद्रियसन्निकर्षेवाधकाभावात् मनसोदुःखाभावेनसंयोगोपपत्तेरिति । नन्वेकंतत्रानुभवतइ

भाष्यं ॥ दुःखाद्यभावःप्रत्यक्षंवाह्यगश्चानुमास्मृता । योग्यस्यानुपलब्ध्याख्यायुक्तिरेवहिबाह्यगा । मनसःसंप्रयोगोयोदुःखादिरहितात्मनः ।

त्यादौदुःखाद्यभावस्यसाक्षिवेद्यत्वोक्तेःकथंमनोवेद्यत्वमित्यतोनवयंतार्किकादिवत्साक्षिभिन्नमनोवेद्यत्वंब्रूमोयेनापसिद्धांतःस्यात् । किंतुचेतनात्मकमनोवेद्यत्वमित्याशयेनमनोद्वैविध्यमाह ॥ **मनश्चेति** ॥ प्रसंगादाह ॥ **चक्षुराद्यमिति** ॥ चक्षुराद्यंचतथैवो करीत्याद्विविधमित्यर्थः । ननुजीवानामेवचेतनत्वात्कथंतद्भिन्नानामपींद्रियाणांचेतनत्वमित्यतआह ॥ **चेतनमिति** ॥ किंद्वि विधेंद्रियवत्त्वंसर्वेषामस्ति नेत्याह ॥ **मुक्तानामिति** ॥ इंद्रियमित्यनुवर्तते । मुक्तशब्देनसंसारसंसर्गाभाववच्चेतनाविवक्षिताः । तेनेश्वरादिसंग्रहः । मनआदींद्रियाणामात्मस्वरूपत्वेमनसःसंप्रयोगोयोदुःखादिरहितात्मनइत्ययुक्तं । स्वेनस्वस्यसंयोगानुपपत्ते रित्यतआह ॥ **स्वरूपेणेति** ॥ तत्रदृष्टांतमाह ॥ **यथेति** ॥ रत्नतत्प्रकाशयोरपिभेदांगीकारादेवसंयोगोपपत्तिरितिकथमेतन्नि दर्शनमित्यतआह ॥ **रत्नस्येति** ॥ ननुदृष्टांतदार्ष्टांतिकयोरुभयत्रभेदाभावेतद्व्याप्तःसंयोगःकथमित्यतआह ॥ **विशेषइति** ॥ अभिन्नेपिभेदकार्यकारीतिशेषः । ननुविशेषसद्भावएवकिंमानमित्यतआह ॥ **विशेषादिति** ॥ व्यवहारविशेषाद्विज्ञेयइतिसंबं धः । तत्रप्रत्यक्षंचाह ॥ **दृष्टिगोचरइति** ॥ विशेषादित्युक्तमेवव्यवहारान्यथानुपपत्तिरूपप्रमाणंदर्शयति ॥ **विष्णोरेवेति** ॥ **विष्णोरितिपंचम्यंतंषष्ठ्यंतंच** । **स्वरूपाणांमत्स्यादीनां** । त्रयाणामेवशब्दानांस्वरूपाणामेवतद्गुणानामेवशिरआदीनामेवेतिसं

भाष्यं ॥ अभावरूपंप्रत्यक्षंमनश्चद्विविधंमतं । चेतनंचजडंचेतिचक्षुराद्यंतथैवच । चेतनंत्विंद्रियंह्यात्मस्वरूपान्नापरंस्मृतं । मुक्तानांचेतनंत्वे वबद्धानामुभयंतथा । स्वरूपेणापिसंयोगःस्वरूपस्यैवयुज्यते । यथारत्नस्यसंयोगस्तत्प्रकाशेननित्यदा । रत्नस्यचप्रकाशस्यनभेदःकश्चिदिष्यते । विशे षोनामविज्ञेयोविशेषाद्दृष्टिगोचरः । विष्णोरेवस्वरूपाणांतद्गुणानांतथैवच ।

वंधः । तथाशब्दस्समुच्चये । चशब्दःपरस्परंचेत्यनुक्तसमुच्चये । कश्चनाभेदसहितस्तदसहितोवा । किंततइत्यतआह ॥ अभेदेपीति ॥ पृथग्व्यवहारःभेदव्यवहारः । विष्णवंशानांतद्गुणानांतदवयवानांचविष्णुनापरस्परंचनास्तिभेदः । नेहनानास्तिकिंचनेतिश्रुतेः । अस्तिचभेदकार्यभूतोव्यवहारः । अवतारामहाविष्णोः आनंदंब्रह्मणोविद्वान् तस्यप्रियमेवशिरः इत्यादिः । अतस्तदुभयान्यथानुपपत्त्याभेदप्रतिनिधिरूपोविशेषःस्वीकार्यइतिभावः । स्वरूपाणामेवेत्याद्येवकारव्यावर्त्यंदर्शयति ॥ **विष्णोरिति** ॥ यद्वा यदिविष्णोस्तत्स्वरूपादिभिरभेदमंगीकृत्यभेदव्यवहारोविशेषबलादुपपादनीयस्तर्हिविष्णोर्जडजीवादिभिरप्यभेदमंगीकृत्यतत्रापिभेदव्यवहारोविशेषबलादेवकुतोनोपपादनीयइत्यतआह ॥ **विष्णोरिति** ॥ श्रियोदुःखस्पृष्टत्वलक्षणजीवत्वाभावात्पृथग्ग्रहणं । नह्यस्माभिःअकस्माद्विशेषोंगीक्रियते । किंतुभेदाभावेनुपचरितभेदव्यवहारेचप्रमितेसति । **नचविष्णोर्जडजीवादिभिर्भेदाभावःप्रमितः** । तत्वमसीत्यादिवाक्यानांसम्यग्व्याख्यातत्वात् । प्रत्युतप्रागुदाहृतप्रमाणैर्भेदएवप्रमितः । तथाचसाक्षाद्भेदेनैवभेदव्यवहारोपपत्तौभेदहीनेनुपचरितभेदव्यवहारनियामकोविशेषोनांगीकार्यइतिभावः । व्यवहारांतरान्यथानुपपत्तिमपिविशेषेप्रमाणमाह ॥ **विष्णोःक्रियाइति** ॥ तैस्ताभिः । अभेदेपिविशेषेणेत्येतदत्रापिसंबध्यते । अस्तितावद्विष्णोःस्वक्रियादिभिरभेदः । स्वाभाविकीज्ञानबलक्रियाचेतिश्रुतेः । अस्तिचविष्णोःक्रियाइत्यादिभेदव्यवहारः । अतस्तदुभयान्यथानुपप

भाष्यं ॥ तस्यैवशिरआदीनांनैवभेदोस्तिकश्चन । अभेदेपिविशेषेणव्यवहारःपृथग्भवेत् । विष्णोर्जडेनजीवैश्चभेदएवश्रियातथा । विष्णोः क्रियाश्चयाःकश्चिदभेदस्तैरपिध्रुवं ।

स्याविशेषोंगीकार्यइत्यर्थः । किंचानादिनित्यविष्णवभिन्नक्रियाणासइदंसर्वमसृजतेत्यादिकादाचित्कव्यवहारोस्ति । नह्ययंविशेषांगीकारमंतरेणोपपद्यते । नचशक्त्यात्मनानादिनित्यानामपिक्रियाणांव्यक्त्यात्मनाकादाचित्कत्वव्यवहारोपपत्तिरितिवाच्यं । शक्तिव्यक्त्योःपरस्परंभेदेशक्तिरेवनित्याक्रियात्वनित्येतिप्राप्त्यातयोरभेदेंगीकार्येशक्त्यानित्यत्वव्यवहारोव्यक्त्याकादाचित्कव्यवहारइतिभेदकार्यनिर्वाहार्थमपिविशेषस्यांगीकार्यत्वादित्यभिप्रेत्याह ॥ कादाचित्कत्वमपीति ॥ नकेवलंभेदव्यवहारः । किंतुआसांक्रियाणांकादाचित्कत्वव्यवहारोपीत्यर्थः । एतद्व्यवहारविशेषेणापिविशेषमुपपादयितुंविष्णोरेवस्वरूपाणामित्यत्रक्रियानोक्ता । उक्तन्यायमन्यत्राप्यतिदिशति ॥ एवमिति ॥ ऐक्यंनित्यंनियतमेव अस्तिचपृथग्व्यवहारः । अतस्तत्रापिविशेषोंगीकार्यइतिभावः । विमुक्तेतिजीवविशेषणोक्तेःप्रयोजनमाह ॥ भेदाभेदइति ॥ गुणैश्चिंतादिभिः कर्मभिःधर्माधर्मलक्षणादृष्टैः । भेदाभेदयोःकानिस्थलानीत्याशंकायांसंकलय्याह ॥ अंशांशिनोरिति ॥ उपादानातिरिक्तांशाभावात्किमस्यपृथग्ग्रहणेनेतिचेन्न । प्रत्यक्षतएवपटाद्यंशिनांतंत्वाद्यतिरिक्तहस्तवितस्त्याद्यंशप्रतीतेः । किंचाकाशस्यतावदंशाःसंतीत्यंगीकार्यं । अन्यथाऽऽकाशेविहगशरीरभावाभावयोरवस्थानायोगात् । ननुसंयोगःस्वात्यंताभावसमानाधिकरणइतिनिरंशेप्याकाशेविहगशरीरसंयोगतदभावयोरवस्थानंयुक्तमितिचेन्न । विरोधात् । अन्यथासर्वत्रभावाभावविरोधाभावप्रसंगः । नचैकस्मिन्नेववृक्षे

भाष्यं ॥ कादाचित्कत्वमप्यासांविशेषेणैवयुज्यते । एवंविमुक्तजीवानांस्वरूपैःस्वगुणैरपि । स्वक्रियाभिस्तथैवैक्यंनित्यंस्वावयवैरपि । भेदाभेदस्तुबद्धानांगुणैःस्वैःकर्मभिस्तथा । अंशांशिनोर्गुणस्यापिगुणिनःकर्मतद्वतोः । कार्योपादानयोश्चैवव्यक्तिसामान्ययोरपि ।

यथाग्रावच्छेदेनकपिसंयोगोमूलावच्छेदेनतदभावस्तथात्राप्यवच्छेदकभेदेनाविरोधइतिवाच्यं । अवच्छेदकप्रदेशस्यैवांश
त्वात् । नचसउपाधिकृतइतिनस्वाभाविकइतिवाच्यं । उपाधेरपिविहगशरीरसमानयोगक्षेमत्वात् । नचाकाशस्योपादानकार
णमस्ति । तस्मात्कार्यकारणातिरक्तांशांशिनावंगीकार्यावित्युपपन्नंपृथग्ग्रहणं । कार्यमुपादेयंपटादि । केचित्परमाणवएवतथात
थासन्निकृष्टाःपटादिषुबुद्धिविषयाः । नतुपटोनामात्रास्तीतिब्रुवते । अन्येतुकार्यकारणयोरत्यंतभेदं । तदुभयनिरासायैवकारः ।
नन्वेतत्पूर्वोक्तविरुद्धं । विष्णुमुक्तानांतत्तदंशगुणक्रियादिभिरत्यंताभेदस्योक्तत्वात् । इत्यतोभेदाभेदावच्छेदकमाह ॥ **विना
शइति** ॥ तथापियत्रांशांश्यादीनांसहैवविनाशःतत्रभेदाभेदाभावात्उक्तमनुपपन्नमित्यतउक्तं ॥ **एकस्मिन्निति** ॥ तयोरंशां
शिप्रमुखयोर्मध्ये । एकस्मिन्नंश्यादौविद्यमानेपिएकस्यांशादेःविनाशोयत्रदृश्यतेतत्रभेदाभेदइतिसंबंधः । देहाद्यंशिनिविद्यमाने
पिहस्ताद्यंशस्य पटाद्यंशेषुहस्तवितस्त्याद्यात्मकखंडपटेषुतंतुषुवासत्सुअंशिनःपटादेश्चविनाशदर्शनात्कस्यचिदित्युक्तं । यथादे
हाद्यंशिनोहस्ताद्यंशैः । सत्यपिदेहादौहस्ताद्यपगमात् । यथाचूतफलादेर्गुणिनःश्यामरूपादिभिः । सत्यपितस्मिन्पाकावस्था
यांतदपगपात् । यथावापटस्यचलनादिभिः । सत्यपितस्मिंस्तदभावात् । यथावापटादेस्तंत्वादिभिः । प्रागूर्ध्वंसत्स्वपितंतुषुपट
स्याभावात् । यथाचब्राह्मणस्यब्राह्मणत्वेन । महापातकेनजातेरपायात् । नन्वेवंसत्यत्यंताभेदःकुत्रांगीकार्यइतिचेत्अंशांशादि
ष्वेवेतिब्रूमः । नचविरोधोऽवच्छेदकभेदेनाविरोधादितिभावेनात्यंताभेदावच्छेदकमाह ॥ **अविनाभावेति** ॥ श्यामरूपादीनां

भाष्यं ॥ भेदाभेदःसमुद्दिष्टोविनाशोयत्रदृश्यते । एकस्मिन्विद्यमानेपितयोरेकस्यकस्यचित् । अविनाभावनियमोयत्राभेदस्तुतत्रहि ।

चूतफलादिभिरविनाभावेपिअत्यंताभेदाभावान्नियमपदं । तेनपरस्पराविनाभावोलभ्यतइतिनोक्तदोषः । अविनाभावश्चात्रकालिकोविवक्षितइतिनकश्चित्क्षुद्रोपद्रवः । यत्रांशांश्यादिषुपरस्पराविनाभावस्तत्रात्यंताभेदइत्यर्थः । अत्रोदाहरणानिविष्णोरेवस्वरूपाणामित्यादिनाप्रागुक्तान्येव । व्यक्तिसामान्ययोर्यथाघटघटत्वयोः । ननुस्वेनाभेदोन्येनभेदइतिभेदाभेदस्यसर्वत्रसत्त्वात्किंविशिष्योच्यते विनाशोयत्रदृश्यतेतत्रभेदाभेदइतीत्यतोभिप्रायमाह ॥ अभेदश्चेति ॥ स्वेनाभेदोन्येनभेदइतिनभेदाभेदशब्दार्थोविवक्षितः । येनोक्तदोषः । किंतुयत्रस्वभिन्नेनाभेदश्चएकप्रतियोगिकएवभेदाभेदश्चेतियावत् । तत्रैवभेदाभेदइतिनोक्तदोषः । ननुविष्णोःस्वरूपगुणक्रियादिभिरत्यंताभेदेपिवद्धवत्कैश्चिद्गुणादिभिर्भेदाभेदोप्यस्तिकिं नेत्याह ॥ **भेदाभेदइति** ॥ द्वित्वादिसमुदायंविना । कुतोनेतिचेत् । विष्णोर्भेदाभेदःकिंजीवजडप्रतियोगिकोवा **उतस्वस्वरूपगुणप्रतियोगिकोवा नाद्यइत्याह** ॥ **भेदएवत्विति** ॥ द्वितीयंदूषयति ॥ **केवलाभेदइति** ॥ ननुविष्णोःस्वरूपादिषुविद्यमानस्यविशेषस्यतदभिन्नत्वेविशेषविशेषिभावव्यवहारानुपपत्तेस्तद्भेदोवाच्यः । अतःकथंकेवलाभेदआत्मनीत्युक्तमित्यतआह ॥ **स्वरूपेष्विति** ॥ नन्वथापिकेवलाभेदआत्मनीत्ययुक्तं । विष्णोःस्वक्रियादिभिरत्यंताभेदायोगात् । विष्णोर्नित्यत्वात्तत्क्रियाणांचानित्यत्वात् । नित्यानित्ययोश्चकेवलाभेदायोगात् । तथाचतत्रभेदाभेदएवांगीकार्यइति नक्वापीतिकथमुक्तं इत्यतआह ॥ **क्रियाणांचेति** ॥ विष्णुसमुच्चयार्थश्चशब्दः ।

भाष्यं ॥ अभेदश्चस्वभिन्नेनभेदाभेदस्तुतत्रच । भेदाभेदोनतुक्वापिविष्णोररस्तिकदाचन । भेदएवतुजीवाद्यैःकेवलाभेदआत्मनि । स्वरूपेषुविशेषोयःस्वरूपंतस्यसोपितु । क्रियाणांचननाशोस्ति

विष्णुक्रियाणामित्यर्थः । नन्दीश्वरस्यपरिस्पंदरूपक्रियायाएवाभावेनतदनित्यत्वशंकातत्परिहारश्चेतिद्वावप्यनुपपन्नौ । नचज्ञा
नादिरूपधात्वर्थक्रियाणांविनाशाभावःसाधनीयः । ईश्वरज्ञानादिनित्यत्वस्यपरेणाप्यभ्युपगतत्वादितिचेन्न । ईश्वरस्यपरिस्पंदा
भावेप्रमाणाभावात् । परममहत्परिमाणेनतत्साधनस्याणुमध्यमपरिमाणाभ्यांसत्प्रतिपक्षत्वात् । असिद्धिशंकायाउभयत्रापिसा
म्यात् । महतोमहीयानितिश्रुतत्वान्नासिद्धिरितिचेत् । अणोरणीयानितीतरस्यापिश्रुतत्वात् । अणोरणीयस्त्वमप्रत्यक्षत्वोपलक्ष
कमितिचेत् । महतोमहत्त्वमपिपूज्यत्वमितिकिंनस्यात् । विरोधादुभयांगीकारोनोचितइतिचेत् । तर्हिप्रथमप्राप्तत्वादणुत्वमेव
ग्राह्यं । परिहरिष्यतेचायंविरोधःपंचमाध्याये । नन्वीश्वरक्रियाणांकुतोनविनाशइतिचेत् । प्रमाणाभावात् । नतावत्तत्रप्रत्यक्षम
स्ति । ईश्वरतत्क्रिययोरप्रत्यक्षत्वात् । नाप्यनुमानं । लिंगाभावात् । क्रियात्वंलिंगमितिचेत्तद्यदिधात्वर्थत्वंतदाज्ञानेच्छाप्रयत्नैःसत्तया
चव्यभिचारात् । यदिचपरिस्पंदत्वंतदानीमीश्वरपरिस्पंदानामपिनित्यत्वेनव्यभिचारात् । विपक्षेबाधकाभावेनाप्रयोजकत्वाच्च ।
अन्यथाज्ञानत्वादिनाज्ञानाद्यनित्यतासाधनसौलभ्यात् । नचज्ञानानित्यत्वेधर्मिग्राहकप्रमाणबाधः । केवलानुमानस्यतस्याप्रामा
ण्यात् । आगमस्यतत्रापिसाम्यात् । कार्यत्वस्योपाधित्वाच्च । नचपक्षेपितत्साधनीयं । तदकार्यत्वस्यश्रुत्यादिसिद्धत्वेनबाधात् ।
ईश्वरक्रियाऽनित्याऽसत्यावरणादौप्रागूर्ध्वमनुपलभ्यमानत्वात् । कदाचिदेवोपलभ्यमानत्वाद्वाघटादिवदितिचेन्न । प्रत्यक्षेणानु
पलंभस्याकाशादौव्यभिचारात् । योग्यतयाविशेषणेऽसिद्धेः । प्रमाणमात्रेणानुपलंभस्यासिद्धत्वात् । आगमादिनोपालंभात् । अतएव
द्वितीयहेतुरप्यसिद्धः । वर्णनित्यत्ववादेऽनैकांतिकश्च । नाप्यागमः । तदभावात् । सइमाँल्लोकानसृजतेत्यादेस्सऐक्षतेत्यादिवाक्य

समानयोगक्षेमत्वात्।नन्वथापिईश्वरक्रियाविनाशाभावोनयुक्तः । बाधकसद्भावात्।तथाहियदिसृष्टिसमयेसंहारादिक्रियाविद्येतत दातथैवश्रुत्यादावुपलभ्येत।जननविनाशौचघटस्ययुगपत्स्यातां । क्रियायाःसंयोगविभागौप्रत्यनपेक्षकारणत्वेनतदुत्पत्तिसातत्यप्रसंगश्चेत्यतआह॥तच्छक्तेरिति॥क्रियाशक्तेःपूर्वकालमारभ्यसत्त्वात् । अस्त्येवसृष्टिसमयेपिसंहारक्रिया संहारसमयेपिसृष्टिक्रिया । नचोक्तदोषः । तत्कार्यजननशक्तेरेवक्रियात्वात् । तस्याश्चपूर्वकालमारभ्यसदासत्वात् । अभिव्यक्तायाएवतस्यास्तत्तद्व्यवहारविषयत्वततत्कार्यजनकत्वाद्यंगीकारात् । तथाचसंहारसमयेसर्जनक्रियाशक्तिसद्भावेपिनश्रुत्यादौतथोपलंभ[illegible]संगः । व्यक्तिरूपेणैवव्यवहारालंबनत्वात् । व्यक्त्यवस्थायाएवशक्तेर्जनकत्वेनजननविनाशयौगपद्यासंभवः । अतएवनसंयोगविभागसातत्यप्रसंगश्चेतिभावः । ननुकेयंशक्तेर्व्यक्तिर्नाम । नतावत्प्रतीतिः । ईश्वरापेक्षयानित्यसिद्धत्वेनोक्तदोषानुषक्तेः । परापेक्षयाकदाप्यभावात् । भावेपिचकार्योत्पादनस्यतदनपेक्षत्वात् । अतएवनावरणनिवृत्तिर्व्यक्तिरिति । मैवं । व्यक्तिशब्देनशक्तेरेवावस्थानविशेषस्यविवक्षितत्वात् । ननुअभिव्यक्तायाःसर्जनक्रियाशक्तेःसंहारसमयेकिमुपरतिरस्तिनवा नोचेत्उक्तदोषानिस्तारः । आद्येतुकथंक्रियाविनाशाभावः । उपरतेर्विनाशरूपत्वात् । नचव्यक्तेर्विनाशेपिक्रियाशक्तिनाशोनास्तीतिवाच्यं । तयोरभेदस्यवक्ष्यमाणत्वात् । लाघवेनक्रियायाएवानित्यत्वस्वीकारोपपत्तेश्च । केवलाभेदआत्मनीत्युक्तव्याघाताच्चेत्यतआह॥ **विशेषएवेति**॥ तच्छक्तेःपूर्वकालतइत्यत्राप्यनुवर्तते । अस्त्येवाभिव्यक्तायाःसर्जनादिक्रियायाउपरतिः । नचैवमुक्तदोषः । यतउपरतिर्नामावस्थाविशेषएव ।

भाष्यं ॥ तच्छक्तेःपूर्वकालतः । विशेषएवोपरतिःक्रियायाःसमुदीरिता ।

नविनाशइत्यंगीकारादित्यर्थः । नन्वयमपिविशेषःकदाचिदुपरतोनवा नेतिपक्षेपूर्वोक्तदोषानुषंगः । आद्येतस्यैवविनाशप्रसंगः । नचविशेषस्याप्युपरतिर्विशेषएव नविनाशइतिवाच्यं । तस्मिन्नपिविशेषेउक्तविकल्पप्रसरेणानवस्थापातादित्यतआह ॥ **विशेषस्येति** ॥ प्रकृतत्वानुसंधानार्थश्चशब्दः । यदिविशेषस्यान्योपिविशेषोंगीक्रियतेतदानवस्थास्यात् । नचैवमित्यर्थः । तर्हिविशेषस्योपरतिःकथमित्यतआह ॥ **स्वस्यापीति** ॥ एतदुपपादनायदृष्टांतमाह ॥ **यथेति** ॥ घटादिवस्तुवत्तज्जनेरप्यनादित्वाभावाज्जनेरपिजनिरंगीकार्या । सायदिघटादिवस्तुजनेरन्यास्यात्तदासाप्येवमित्यनवस्थास्यादित्यतउक्तं ॥ **जनेरिति** ॥ वस्तुजनेर्जनिरन्यानभवतितेनचनानवस्थेत्यर्थः । तर्हिकथंजनेर्जनिरित्यतआह ॥ **तस्याइति** ॥ तस्याःजनेःतज्जनिरेवजनिरित्यर्थः । घटोजायतेघटजन्मजायतइत्यनयोःएकार्थत्वस्यैवलौकिकपरीक्षकसंमतत्वादितिभावः । तर्हिस्वयमनुपलब्धसत्ता(सत्त्वा)जनिःकथंघटादिवस्तुनःसत्त्वंसंपादयेत् । उत्पत्तिक्रियायांहिसत्यांवस्तुनस्सत्वप्राप्तिरित्यतउक्तं ॥ **तथापीति** ॥ यद्यपिजनेर्जनिःवस्तुजनेरन्यानभवति । तथापिसाजनिर्जनित्वात् उभयजनित्वात्वस्तुनःस्वाख्यस्यघटादेश्चयुगपदेवसत्त्वमानयेदित्यर्थः । दार्ष्टांतिकमाह ॥ **एवमेवेति** ॥ संहारसमयेसंहारंकरोतिसृष्टिंनकरोतीत्यादिव्यवहारकृदित्यर्थः । ननुशक्तिरूपक्रियायाःव्यक्तिरूपक्रियाकिंभिन्नाऽभिन्नावा । आद्येशक्तिरेवनित्याक्रियात्वनित्येत्यापन्नं । द्वितीयेत्वनिवृत्तःसदासंहारव्यवहारादिप्रसंगइत्यतआह ॥

भाष्यं ॥ विशेषस्यविशेषोन्योनचैवास्तिकथंचन । स्वस्यापितुविशेषश्चस्वयमेवभविष्यति । यथाजनेर्जनिर्नान्यातस्यावस्तुजनिर्जनिः । तथापितुजनित्वात्सासत्त्वंवस्तुनआनयेत् । एवमेवविशेषोसौविशेषांतरवर्जितः । करोतिनकरोतीतिविशेषव्यवहारकृत् ।

व्यक्तिभावमिति ॥ करोतीतिस्वरूपिणीकरोतीतिव्यवहारविशेषहेतुभूता।व्यक्तिभावंगतायाक्रिया सैवशक्तिरूपस्थिताक्रियाशक्तिरितीर्यतइतियोजना । याशक्तिरूपेणस्थिताक्रियाशक्तिरितीर्यते सैवव्यक्तिभावंगतासतीकरोतीतिस्वरूपिणीतिवासंबंधः। तथाचशक्तिव्यक्त्योरभेदांगीकारान्नभेदपक्षोक्तदोषः । उक्तमेवदृष्टांतेनोपपादयति ॥ साचेति ॥ क्रियायाःशक्तिरूपायाः जनिवत्जनिक्रियायाजनिर्वस्तुजनिस्वरूपंयथेत्यर्थः । इदानीमभेदपक्षोक्तदोषमुद्धरति ॥ तथापीति ॥ शक्तिव्यक्त्योरभेदेपिसाव्यक्तिर्विशेषेणविशेषिणीविशेषव्यवहारहेतुः । विशेषश्चाभिन्नेपिभेदकार्यकारीतिभावः । ननुसोपिविशेषोयदिविशेषिभ्यांभिन्नः तदाशक्तिव्यक्त्योरेवभेदःकिंनस्यात् । इत्याशंकापरिहारायस्वरूपेणेत्युक्तं । विशेषिस्वरूपेणेत्यर्थः । व्यक्तिस्वरूपक्रियायाःशक्त्यभिन्नत्वेपिविशेषवलादेवविशेषव्यवहारहेतुत्वंदृष्टांतेनोपपादयति ॥ जनेरिति ॥ प्रथमांतात्तसिः । यथाजनेर्जनिर्वस्तुजन्यव्यतिरिक्तापिएकैव जनिर्विशेषवलेनघटोजातोघटजनिर्जातेतिव्यवहारविशेषहेतु स्तथासौव्यक्तिरूपक्रियाशक्त्यव्यतिरिक्तापिविशेषव्यवहारहेतुर्ज्ञातव्येत्यर्थः।ननुविशेषस्यविशेषिस्वरूपत्वेऽयंविशेषोऽयंविशेषीतिव्यवहारानुपपत्तिः । नचतत्रविशेषांतरवलात्तदुपपत्तिः । तस्याप्यभिन्नत्वेविशेषविशेषिभावव्यवहारायविशेषांतरांगीकारेनवस्थापातादित्यतोवाह ॥जनेरिति॥ज्ञातव्येतिलिंगव्यत्यासः । असौविशेषोविशेष्यऽव्यतिरेकोपिजनेर्जनिवदेवज्ञातव्यः । यथावस्तुजनेर्जनिर्वस्तुजनेरन्यानभवति । किंतुवस्तुज

भाष्यं ॥ व्यक्तिभावंगतायातुकरोतीतिस्वरूपिणी । शक्तिरूपस्थितासैवक्रियाशक्तिरितीर्यते । साचव्यक्तिस्तुजनिवत्क्रियायारूपमेवतु । तथापितुविशेषेणस्वरूपेणविशेषिणी । जनेर्जनिवदेवासौज्ञातव्याव्यतिरेकतः ।

निरेवजनेर्जनिः । एवंविशेषस्यनान्योविशेषः । किंतुसएवविशेषःस्वस्यापिविशेषः । तथाचस्वनिर्वाहकत्वांगीकारान्नानुपपत्तिरि
तिभावः । एवमीश्वरक्रियानित्यत्वमुपपाद्यतेनैवन्यायेनमुक्तक्रियानित्यत्वमप्युपपादनीयमित्याह ॥ **एवमिति** ॥ तथाचेश्वर
स्यमुक्तस्यचस्वक्रियाभिरैक्यमुपपन्नमितिभावः । भेदाभेदस्तुवद्धानामित्यमुक्तक्रियाणांभेदाभेदोभिहितस्तत्साधयितुंप्रतिजानीते
॥ **नान्येषामिति** ॥ क्रियानित्येत्यनुवर्तते । कुतइत्यतआह ॥ **भ्रांतीति** ॥ नामुक्तक्रियानित्यातस्याभ्रांत्योत्पत्तेरित्यर्थः ।
यद्यप्युत्पन्नत्वादित्येववक्तव्यंतस्यैवनित्यत्वाभावेहेतुत्वात् । तथाप्युत्पत्तौकारणप्रदर्शनार्थंभ्रांतीत्युक्तं । हेत्वंतरमाह ॥ **मुक्ता
विति** ॥ अमुक्तकर्मणोमुक्तावेवोच्छेदतश्चननित्यत्वमित्यर्थः । संसारएवजागरावस्थायांचिंतनादिकर्मण्यक्तेरुच्छेदात्मुक्ताविति
किमर्थंमुक्तमित्यतआह ॥ **अखिलस्येति** ॥ इदानीमेकैककर्मव्यवच्छेदेपिअखिलस्यचकर्मणोनव्युच्छेदइत्यर्थः । सुषुप्तावखि
लस्यापिचिंतनादिकर्मणउच्छेदोस्त्येवेतिकिमर्थंमुक्तावित्युक्तमित्यतआह ॥ **निःशेषेणेति** ॥ सुषुप्तौतुननिःशेषेणतदुच्छेदः ।
वासनायाःसत्त्वात् । अन्यथापुनरुद्भवानुपपत्तेः । वक्ष्यतिच वासनायाहिपुनरुद्भवइति । मुक्तौतुनिःशेषेणैवतदुच्छेदः। पुनरुद्भ
वाभावेनवासनायाअप्यभावादितिभावः । नन्वेवंमुक्तक्रियायाअपिनित्यत्वमयुक्तं । मुक्तोयदाक्रियांतरंकरोतितदापूर्वक्रियोच्छे
दावश्यंभावादित्यतआह ॥ **नैवमिति**॥ मुक्तक्रियायाश्चैवममुक्तक्रियावत्उच्छेदोनास्तीत्यर्थः। क्रियांतरकरणकालेक्रियांतराभा
वात्कथंनोच्छेदइत्यतआह ॥ **तस्याश्चेति** ॥ क्रियांतरकरणकालेपिनक्रियांतरस्योच्छेदः । तस्याएवक्रियायाःपुनरुद्भवात्

भाष्यं ॥ एवंमुक्तक्रियानित्यानान्येषांभ्रांतिसंभवात् । मुक्तावुच्छेदतश्चैवनिःशेषेणाखिलस्यच । नैवंमुक्तक्रियायास्तुतस्याश्चपुनरुद्भवात् ।

किंतुशक्त्यात्मनावस्थितिरेवेतिभावः । नन्वमुक्तक्रियाणांमुक्तावुच्छेदेननित्यत्वाभावेमुक्तक्रियाणामपिनित्यत्वंनयुज्यते । अमुक्त क्रियाणामेवमुक्तौभावात् । नहिमुक्तावागंतुकक्रियाःसंति । नचतासांनित्यत्वंयुक्तमित्यतआह॥**अमुक्तानामिति**॥ तर्हिकासाममु क्तक्रियाणांमुक्तावुच्छेदोभेदाभेदश्चेत्यतआह॥ चिंतनादीति॥ किंमयाकार्यमित्येवमादिरूपाणांचिंतनादिक्रियाणामितिसंबंधः। चिंतनादिक्रियासद्भावदशायांअभेदः तदभावदशायांभेदइतिप्रतीतिनिरासायसदाभेदाभेदइत्युक्तं। नन्वमुक्तानांयथास्वक्रियाभि रत्यंताभेदोभेदाभेदश्चतथाऽचेतनानामपिस्वक्रियाभिरप्यत्यंताभेदोभेदाभेदश्चेतिद्वयमप्यस्तिकिं नेत्याह॥ **अचेतनेष्विति**॥अस्व तंत्राःपरसापेक्षोत्पत्तिकाःइत्यर्थः। अतएवविनाशवत्यश्च । सर्वत्राचेतनेष्वितिसंबंधः। नियमेनभेदाभेदोनत्वत्यंताभेदइत्यर्थः। ननुवि ष्णुमुक्तामुक्तजडानामेवधर्माविचारिताः । तदतिरिक्तपदार्थधर्मविचारःकस्मान्नक्रियतइतिचेत् । तदभावादेवेत्याह॥**ईश्वरइति**॥ प्रकृतिग्रहणंमुक्तोपलक्षणार्थं । जीवइत्यमुक्तग्रहणं । ननुविष्णुधर्मएवात्रविचारितोनत्वीशधर्मइत्यतआह॥ **तत्रेति**॥ ननुविष्णुमुक्त क्रियावदमुक्ताचेतनक्रियाणामपिनित्यत्वमेवकुतोनांगीक्रियते । शक्तिव्यक्तिरूपेणव्यवहारविशेषोपपादनसंभवात् । किमर्थमनि त्यत्वंवाच्यमितिचेत् । स्यादेवं यदितन्नित्यतायांप्रमाणंस्यात् । सतिनिर्बाधप्रमाणेतद्विपरीतव्यवहारेषुचतदन्यथानुपपत्त्याकल्पनै

भाष्यं ॥ अमुक्तानांक्रियायाश्चमुक्तावपिसमास्थिताः । अभिन्नाइतिताज्ञेयाअभिव्यक्तेःपुनःपुनः । चिंतनादिक्रियाणांतुमुक्तावृच्छेदतःसदा । किंमयाकार्यमादीनांभेदाभेदउदीरितः । अचेतनेष्वस्वतंत्राःक्रियायस्मात्सदैवतु । भेदाभेदस्ततोज्ञेयःसर्वत्रनियमेनतु । ईश्वरःप्रकृतिर्जीवोजडंचेति चतुष्टयं । पदार्थानांसमुद्दिष्टंतत्रेशोविष्णुरुच्यतइत्यादिब्रह्मतर्के ।

पाप्रभवति।नचघटादिक्रियानित्यत्वेनिर्वाधंप्रमाणमस्ति। अस्तितुपरमेश्वरक्रियानित्यत्वेतदित्याह ॥ **परास्येति**॥**स्वाभाविकीयावद्र**
व्यभाविनी।आदिपदेनज्ञानंनित्यंक्रियानित्यावलंशक्तिःपरात्मनःइत्यादिसंग्रहः।मुक्तक्रियानित्यताप्रतिपादकप्रमाणसंग्रहश्च।प्रागनु
क्तत्वेनात्यंताभेदस्थलंभेदाभेदस्थलंचान्यद्दर्शयन् अविनाभावनियमोयत्राभेदस्तुतत्रहीत्युक्तार्थे**प्रमाणमाह**।**शक्तीति**॥ **यद्वा** परा
स्यशक्तिरितिशक्तिशक्तिमतोर्भेदव्यवहारेणभेदोनमंतव्यइत्याह ॥ **शक्तीति** ॥ **विशेषस्यविशिष्टस्यविशेषिणीविशेष्यस्ययत्रपरस्प**
रमविनाभावितातत्रैवनभेदः। अन्यत्रतुभेदोस्तीत्यर्थः। शक्तिशक्तिमतोर्विशिष्टविशेष्ययोश्चाभेदोवर्ततइतिसिद्धवत्कृत्यभेदेविशेषो
(निषेधो)यमुक्तः । ननुशक्तिशक्तिमतोर्विशिष्टविशेष्ययोश्चभेदाभावेकथंभेदव्यवहारइतिचेत्विशेषबलादेवेतिब्रूमः । सोपि
विशेषःकिंविशेषिणाभिन्नोभिन्नोवेतिजिज्ञासायांचाह॥ **विशेषस्येति** ॥ विष्णुगुणानांतत्स्वरूपत्वेप्रमाणांतरमाह ॥ **सर्वेति** ॥
सर्वाधिकंसुखंयस्यासौसर्वाधिकसुखः । तस्यभावःसर्वाधिकसुखत्वं । सर्वविषयाशक्तिःसर्वशक्तिः । **यद्वाशक्तिशक्तिमतोर्विशि**
ष्टविशेष्ययोश्चात्यंताभेदेउदाहरणमाह ॥**सर्वाधिकेति**॥ अत्रसर्वाधिकासर्वशक्तिरित्येतत्शक्तिशक्तिमतोरभेदोदाहरणं।अन्यद्वि
शिष्टविशेष्ययोरितिविवेकः। अत्रसर्वाधिकसुखत्वादिकंविशिष्टंद्रव्यं । अतएवतत्वविवेकटीकायांविष्णोःसार्वज्ञस्यचेतिविशिष्ट
शुद्धयोरत्यंताभेदोदाहरणंतद्दर्शितं । शक्तिशक्तिमतोर्भेदाभेदोयथा। देवदत्तस्यगमनादिशक्त्या । सत्यपिदेवदत्तेतन्नाशात् ।

भाष्यं ॥ परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानवलक्रियाचेत्यादिश्रुतयश्च । शक्तिशक्तिमतोश्चैवविशेषस्यविशेषिणः । अविनाभाविताय
त्रनभेदस्तत्रविद्यते । सर्वाधिकसुखत्वंचज्ञानंसर्वाधिकंतथा । सर्वाधिकासर्वशक्तिस्तेजःसर्वाधिकंतथा । इत्यादयोगुणाःसर्वेस्वरूपंवैष्णवंतथा ।

विशिष्टविशेष्ययोर्भेदाभेदोयथा। पर्वतस्याग्निमत्त्वेन। पर्वतसद्भावेप्यग्न्यभावात्। विशेषविशेषिणोश्चात्यंताभेदोदाहरणं स्वरूपेषु विशेषोयःस्वरूपंतस्येत्युक्तमेव। चूतफलपीतत्वाभ्यांतन्निष्ठविशेषस्यभेदाभेदौ। ननुयदिविशेषोपिभेदकार्यकारी तर्हिभेदाद्विशेषस्यकिंवैलक्षण्यं। येनभेदपरित्यागेनविशेषोंगीकार्यइत्यतःतयोर्वैलक्षण्यप्रदर्शनायभेदशब्दार्थमाह॥ भेदेति ॥ आदिशब्देनांतरादिशब्दग्रहणं।नन्वन्योंतरआत्माप्राणमयइत्यादौअन्यांतरादिशब्दानांअतद्रूपत्ववाचकत्वंनयुक्तं। प्राणमयादीनामन्नमयादिपरमात्मस्वरूपत्वादित्यतआह ॥ क्वचिदिति ॥ चशब्दादन्यशब्दश्च । यद्वाभेदहीनेप्यवकाशेदेशांतरदेशभेदशब्दप्रयोगोस्तीतिकथमेतदित्यतआह ॥ क्वचिदिति ॥ चशब्दाद्भेदशब्दः। इदानींविशेषस्वरूपमाह ॥ एकस्मिन्नेवेति ॥ भेदहीनएवार्थेनानास्वरूपिणामपर्यायाणांशब्दानांप्रयोजकत्वहेतुःप्रयोगघटकोयःसविशेषइतिसंबंधः ॥ ५ ॥ ५ ॥ एवंजीवब्रह्मैक्यस्याप्रामाणिकत्वात्प्रमाणविरुद्धत्वाच्चनतत्परत्वेनब्रह्मवाइदमग्रआसीत्तदात्मानमेवावेदहंब्रह्मास्मीतिवाक्यंव्याख्येयमित्युक्तं । इदानींतद्व्याख्यानरूपप्रमाणविरुद्धत्वाच्चनतद्व्याख्यानंयुक्तमित्याशयेनतदाहुर्यद्ब्रह्मविद्ययेत्यादिखंडव्याख्यानरूपंप्रमाणमुदाहरति॥ यदाहुरित्यादिना ॥ तत्रतदाहुर्यद्ब्रह्मविद्ययासर्वंभविष्यंतइतिवाक्यमन्वयंदर्शयन्व्याचष्टे ॥ यदाहुरिति ॥ सर्वमित्यस्यार्थःसमग्रत्वमिति । स्वयोग्यतापूर्णत्वमित्यर्थः। भविष्यंतइत्येतस्ययियासवइति । किमाहुरित्याशंकानिवर्तकत्वेनब्रह्मविद्ययासर्वमित्येतदे

भाष्यं ॥ भेदान्यत्वादयःशब्दाअतद्रूपत्ववाचकाः। क्वचिदंतरशब्दश्चविशेषस्यैववाचकः। एकस्मिन्नेवशब्दानांयस्तुनानास्वरूपिणां । प्रयोजकत्वहेतुःस्यात्सविशेषःप्रकीर्तितइतिच ॥ ७ ॥ यदाहुर्ब्रह्मविज्ञानात्समग्रत्वंयियासवः।

वव्याचष्टे ॥ ब्रह्मज्ञानादिति ॥ समग्रत्वंस्वयोग्यतापूर्णत्वं प्राप्यतइतिशेपः । ब्रह्मविद्ययेत्येतत्सावधारणमितिभावेनोक्तंनान्यत
इति । निश्चयाध्यदाहुरितिसंबंधः । तदाहुरितितच्छब्दस्यमनुष्यामन्यंतइत्यनेनसंबंधमभिप्रेत्यव्याचष्टे ॥ तत्रेति ॥ किंमन्यंतइ
त्याशंकानिवर्तकंकिमुतद्ब्रह्मावेदितिवाक्यंव्याचष्टे ॥ ब्रह्मेति ॥ मतेःस्वात्मज्ञानादित्यर्थः । इतिमन्यंतइतिसंबंधः । तदात्मान
मेवावेदित्यादेःपरिहारपरत्वप्रतीत्यर्थमपेक्षितमध्याहरति ॥ ब्रूयादिति ॥ नकेवलंस्वयमेवजानीयात् । किंतुतान्प्रतीतिवक्ष्य
माणप्रकारेणब्रूयाच्च । चोवधारणेवा । इत्येवब्रूयादितिसंबंधः । तत्परिहारत्वेनतदात्मानमेवावेदहंब्रह्मास्मीतिवाक्यंव्याचष्टे
॥ ब्रह्मापीति ॥ नकेवलमधिकारीकिंतुब्रह्मापीत्यर्थः । तथाशब्दःसमुच्चये । गुणबृंहितंचेतिसंबंधः । विजानात्येवेत्यन्वयः ।
अवेदितिप्रयोगाज्ज्ञानस्यकादाचित्कत्वशंकापरिहारायसर्वदाविजानातीत्युक्तं । तस्मात्सर्वमभवदितिवाक्यंव्याचष्टे ॥ अतए
वेति ॥ अधिकारिसमग्रत्ववत्नेदंब्रह्मज्ञानजन्यमितिभावेनोक्तं ॥ सर्वदेति ॥ अभवदितिप्रयोगेणसर्वभावस्यकादाचित्कत्व
परिहारोप्यनेनजातः । लक्ष्मीव्यावृत्त्यर्थंस्वतएवेति । तत्तत्रदेवानांमध्येयोयोदेवःआत्मानंप्रत्यबुध्यत । बोधनात्सएवदेवःतद्ब्र
ह्माभवदित्यपव्याख्याननिरासाय तद्योयःप्रत्यबुध्यतसएवतदभवदित्येतत्तावद्व्याचष्टे ॥ तदहेयमिति ॥ तदित्यनुवादेनाहेयमि

भाष्यं ॥ ब्रह्मज्ञानात्समग्रत्वंनान्यतश्चेतिनिश्चयात् । तत्रकेचिन्मनुष्यास्तुमन्यंतेब्रह्मकिंमतेः । सम्यग्भावमगमदितिब्रूयाच्चतानिति । ब्रह्मा
पिसर्वदात्मानमहेयंगुणबृंहितं । सर्वदास्तीतिमेयंचविजानातितथैवतु । अतएवसमग्रत्वंस्वतएवास्यसर्वदा । तदहेयंपरंब्रह्मयोयोवेद्गुणबृंहितं । सर्व
दास्तीतिमेयंचससयातिसमग्रतां ।

त्यादिव्याख्यानं । श्रुतौयच्छब्देवीप्सासत्त्वादत्रतच्छब्देपिसादर्शिता । तदभवदित्यस्यार्थःसमग्रतांयातीति । नन्वहेयत्वादि प्रकारकब्रह्मज्ञानेनब्रह्मयादृशंसमग्रत्वंप्राप्तंअन्योपितादृशमेवप्राप्नोतिकिमित्यतआह ॥ **मुख्यमिति** ॥ तत्रहेतुमाह ॥ **ज्ञानस्यापीति** ॥ समग्रत्वतः । यद्यन्यस्याप्येतादृशमेवसमग्रत्वंतर्हिकोविशेषइत्यतस्तद्योयोदेवानांतथर्षीणांतथामनुष्याणामितिक्रमोक्तेर्भावमाह ॥ **किंचित्समग्रतामिति** ॥ तत्रहेतुस्तेषामिति । ऋषयस्तुततोदेवेभ्योप्यधमासमग्रतांआपुः । तत्रहेतुर्ज्ञानतादृक्त्वादिति । अयंहेतुरुत्तरत्रापिसंबध्यते । अनेनश्रुतौनकेवलंतथाशब्दद्वयंसमुच्चयार्थकं । किंतुयथाप्रत्यबुध्यततथातदभवदित्यपिव्याख्यातंभवति । तद्ब्रह्मैतदात्मानमेवाहंब्रह्मास्मीतिपश्यन्नितिव्याख्यानमसत् । पुल्लिंगात्मशब्देनप्रकृतस्यात्मनोनपुंसकलिंगेतच्छब्देनपरामर्शायोगादितिभावेनतद्धैतत्पश्यन्नित्यादिवाक्यंव्याचष्टे ॥ **अहेयमिति** ॥ एतच्छब्दार्थोहेयमित्यादि । तच्छब्दार्थोब्रह्मेति । इत्येतत्सूक्तमितिसंबंधः । नन्वत्रसूक्तेवामदेवस्यमन्वादिभावएवप्रतिपाद्यते । नतुब्रह्म । तत्कथंअतदर्थंब्रह्मपश्यन्तत्सूक्तंददर्शेतियुज्यते । तदर्थज्ञानस्यैवतत्प्रतिपादकशब्दस्मृतिहेतुत्वादित्यतःसूक्ततात्पर्यमाह ॥ **स्वांतर्यामीति** ॥ अन्यथात्वत्पक्षेपिवामदेवस्यमन्वादित्वाभावादनुपपत्तिः । नचेदानींविशिष्टैक्याभावेपिमोक्षेस्वरूपैक्यविवक्षयातथोक्तिरितिवाच्यं ।

भाष्यं ॥ मुख्यंसमग्रंतद्ब्रह्मज्ञानस्यापिसमग्रतः । किंचित्समग्रतांदेवास्तेषांज्ञानंहितादृशं । आपुस्ततोधमांज्ञानतादृक्त्वादृषयोपितु । ऋषिभ्योप्यधमांप्रापुर्मानुषाश्चसमग्रतां । अहेयंचगुणैःपूर्णंनित्यास्तिज्ञानगोचरं । ब्रह्मपश्यन्वामदेवःसूक्तमेतद्ददर्शह । अहंमनुःसूर्यइतिस्वांतर्यामिव्यपेक्षया ।

सर्वप्रवृत्तिहीनेमोक्षेअहंभूमिमददामार्यायेत्यादिप्रवृत्तिवचनानुपपत्तेरितिभावः । ननुयदीदंसूक्तंस्वांतर्यामिण्यपेक्षयाप्रवृत्तंतर्ह्यं
भवमस्मीत्याद्युत्तमपुरुषप्रयोगोनस्यात् । सहिवामदेवापेक्षयाभवतीत्यतआह ॥ अहंशब्दइति ॥ सर्वांतस्थेविष्णावितिसंबंधः ।
अहंशब्दोऽस्मदादेशरूपः । अस्मद्युत्तमइतिउत्तमपुरुषप्रयोगस्यास्मदादेशोपपदेविहितत्वादितिभावः।आदिपदेनास्मीत्यादेर्ग्रहणं।
ननुवामदेवांतर्यामिणोपिमनुसूर्यादिभिःअभेदाभावात्कथमहंमनुरभवमित्याद्युक्तिरितिचेतन्न । मनुसूर्यादिशब्दानामपिविष्णुपर
त्वादितिभावेन अहंमनुरभवंसूर्यश्चाहंकक्षीवाँऋषिरस्मिविप्रः [ऋ० ३ । ६ । १५] इतिवाक्यगतमनुसूर्यकक्षीवच्छब्दान्विष्णौ
निर्वक्ति ॥ मनुरिति ॥ स्वायंभुवादौयोगरूढिभ्यांप्रवर्तमानस्यमनुशब्दस्यतदंतस्थेयोगमुक्त्वारूढिमुपपादयति ॥ सहीति ॥
हिशब्दःप्रसिद्ध्यर्थः । यद्वाप्रकारांतरेणमनुशब्दंनिर्वक्ति ॥ सहीति ॥ हिशब्दोहेतौ । आचारश्चानुवाचावेदानुसारिवाग्वाच
आचारानुवाचेतयोरीशः । अनुवाचेतिटावंतं । टापंचापिहलंतानांयथावाचानिशादिशेत्युक्तेः । स्वायंभुवादौमनुशब्दप्रवृत्ता
वाचारानुवाचेशत्वंनिमित्तं । तच्चतदंतस्थेपिवर्तते । तत्कथमित्यतउक्तं ॥ प्रेरयन्निति ॥ सएवसूर्यइतिशेषः । कक्षंवनमेषामस्ती
तिकक्षिणः । तेयस्यसंतिसकक्षीवान्ऋषिस्तस्मिन्समास्थितः । सएवयतोमुमुक्षुभिःकक्षगैर्वनस्थैःसेव्यःअतःकक्षीवानित्यर्थः
॥ ७ ॥ तथाचायंश्रुत्यर्थः ॥ अहंमदंतर्यामी मनुर्बोधनादिनामनुनामकोमन्वंतस्थोऽभवं । अहंसूर्यःसूरिप्राप्यत्वेनसूर्यनामकः

भाष्यं ॥ अहंशब्दोयतोविष्णौततश्चोत्तमपूरुषाः । वर्ततेऽभवमित्याद्याःसर्वातस्थेजनार्दने । मनुर्यतोऽवबोधत्वान्मन्वंतस्थोजनार्दनः ।
सह्याचारानुवाचेशःप्रेरयन्मनुमानसं । सएवसूरिभिःप्राप्यःसूर्यातस्थोमुमुक्षुभिः ।

सूर्यस्यश्चाभवं । अहंकक्षीवानृषिःकक्षंगःसेव्यत्वेनकक्षीवान्नामकःकक्षीवतिऋचौसमास्थितोस्मीति ॥ ५ ॥ अहंकविरुशने
तिवाक्यगतशब्दद्वयंव्याचष्टे ॥ सएवेति ॥ यतोतइतिशेषः । उशंनयतीत्युशना । वशइच्छायामितिधातुः । वकारस्योकारः ।
तथाचाहंमदंतर्यामी । उशनाकामस्यप्रेरणात्उशनोनामकः । कविर्नीतीःकवयतीतिकविनामकःशुक्रस्थोस्मीतिश्रुतिवाक्या
र्थइतिभावः । अहंपुरोमंदसानोव्यैरंनवसाकंनवतीःशंबरस्येत्यस्यार्थमाह ॥ सएवेति ॥ अहंमदंतर्यामी इंद्रेव्यव
स्थितो मंदसानःमंदेनमदेनहर्षेणसनोतिभक्ताभिलषितंददातीतिमंदसानः । नवसाकंनवतीःशंबरस्यपुरोव्यैरंभेदितवानस्मी
तिश्रुत्यर्थइतिभावः । अहंकुत्संमार्जुनेयंन्यृंजेइत्यादेस्तात्पर्यमाह ॥ सर्वेति ॥ सर्वकर्मासर्वकर्तास्यांतर्यामिणंमन्वाद्यंतर्या
मिणंचश्रियःपतिमुद्दिश्यतथाहंमनुरभवमित्यादुवाचेत्यर्थः ॥ ५ ॥ तदिदमप्येतर्हिंयएवंवेदअहंब्रह्मास्मीतिसइदंसर्वंभवती
तिवाक्यमन्यथाप्रतीतिनिरासायव्याचष्टे ॥ यइति ॥ एतर्हीत्यस्यार्थः इदानीमिति । तस्यहनदेवाश्चनाभूत्याईशतइ
तिवाक्यंव्याचष्टे ॥ तस्येति ॥ चशब्दोऽपिशब्दार्थः । तेनचनेत्येतदुक्तार्थं । अभूतिंविद्याफलविघातं । कथमतिसम
र्थादेवाएतन्मात्रकरणेनेशतइत्याद्याशंकानिरासायात्माह्येषांसभवतीतिवाक्यंव्याचष्टे ॥ आत्माहीति ॥ हिशब्दोहेत्वर्थः ।

भाष्यं ॥ सएवकक्षगैःसेव्यःकक्षीवतिसमास्थितः । सएवशुक्रसंस्थास्तुनीतीःकवयतिस्वयं । यतःकविःसकामस्यप्रेरणादुशनास्मृतः । सए
वशंबरपुरोविभेदेंद्रेव्यवस्थितः । सर्वांतर्यामिकत्वात्तुसर्वकर्मासएवहि । ततःसूक्तेतथोवाचवामदेवःश्रियःपतिं । योयोऽहेयंपरंब्रह्मसदैवास्तीतिमानगं ।
 इदानीमपिजानातिस्वयोग्यांससमग्रतां । प्राप्नोतितस्यदेवाश्चनाभूतिकर्तुमीशते । आत्माहिविष्णुर्देवानांतेपुज्यात्मोयवःसदा ।

आत्मशब्दस्यस्वरूपार्थत्वप्रतीतिनिरासायार्थमाह ॥ तेष्विति ॥ कार्येषुनियोक्तृत्वेनतेषुसदाव्याप्तोयतोतस्तेषामात्मेत्यन्वयः ।
नन्वस्तुविष्णुर्देवानात्मातथापिकुतोदेवास्तस्याभूतिंकर्तुंनेशतइत्यतआह ॥ तज्ज्ञइति ॥ यस्मात्साधकोमोक्षसाधकः । तज्ज्ञो
देवनियामकविष्णुज्ञानी । नन्वस्तुसाधकस्यविष्णुज्ञानित्वंतथापिदेवाःकुतःतदभूतिकरणासमर्थाः । नहिराजज्ञस्ययस्यकस्यचि
दमात्योनाभूतिकर्तेत्यतआह ॥ यस्येति ॥ ज्ञानिनः । ततश्चकिं । नहिराजप्रीतिविषयोपिकश्चिदमात्यबाध्योनदृश्यतेलोकइ
त्यतआह ॥ तस्येति ॥ देवाश्चनप्रसिद्धामात्यादिवत्स्वामिद्रोहकर्तारइतिभावः । ततःकिमित्यतआह ॥ प्रीतियोगादिति
॥ प्रीतियोगादेवनत्वसामर्थ्यादित्यर्थः ॥ ७ ॥ ७ ॥ एवंपरब्रह्माहमित्यादिज्ञानिप्रशंसांकृत्वामिथ्याज्ञानिनिंदनायाथयोन्यांदेव
तामुपास्तेऽन्योसावन्योहमस्मीतिनसवेदयथापशुरितिवाक्यंप्रवृत्तं । तत्परैर्व्याख्यातं । यःकश्चिदब्रह्मवित्स्वात्मनोऽन्यतिरि
क्तांदेवतांअन्योहमुपास्यदेवताया अन्योसौमत्तउपासनीयोदेवइत्येवंभेददृष्ट्योपास्ते सउपासकः उपास्योपासकयोःतत्वंनवेद
ति । तदसत् । योन्यांदेवतामुपास्तेनसवेदेत्येतावतापूर्णत्वेनान्योसावित्यादिवाक्यवैयर्थ्यात् । अन्योसावन्योहमस्मीतियउ
पास्तेनसवेदेत्येतावताभेदज्ञाननिंदालाभात् । पूर्ववाक्यवैयर्थ्याद्वा । विद्याऽऽत्मनिभिदाबोधइत्यादिप्रमाणविरोधाच्चेतिभाव
नतद्व्याचष्टे ॥ एवमिति ॥ अथशब्दार्थएवमिति । देवनियामकत्वादिना । अन्यामित्यस्यावृत्तिमभिप्रेत्यविलक्षणमितिजी

भाष्यं ॥ नियोक्तृत्वेनकार्येषुतज्ज्ञोयस्मात्साधकः । यस्यप्रीतोहरिर्नित्यंतस्यप्रीताश्चदेवताः । प्रीतियोगान्नैवतस्यविरुद्धंकर्तुमीशते ॥७॥७॥
एवंविलक्षणंदेवमुपास्तेजीवरूपिणं ।

वरूपिणमितिचोक्तं । अथेत्यस्योत्तरत्रापिसंबंधमभिप्रेत्यअन्योसावन्योहमस्मीत्यस्यार्थमाह ॥ **अहेयइति** ॥ अन्यःशबल ब्रह्मरूपइति हरिःनिर्गुणब्रह्मरूपःइति । अथेत्यनुवादेनअपीतिव्याख्यातं । यद्वाथशब्दश्चशब्दार्थः । तस्यचावर्तितस्यमेयश्चेतिहरि श्चेतिसंबंधः । इत्युपास्तइतिसंबंधः। ननुयउपास्तेनसवेदेतिकथमुपासनस्यैवज्ञानत्वादित्यतउक्तं ॥ **परंविष्णुमिति** ॥ परंविलक्षण मुत्तमंचेत्यर्थः । उभयत्रापिहेतुमाह ॥ **जीवेति** ॥ यथापशुरित्यस्यार्थःतस्मात्पशुवदिति । मनुष्यपशुवदित्यर्थः । एवंसदेवाना मितिवाक्यंव्याचष्टे ॥ **देवानामिति** ॥ पशुवदित्यनेनैवंशब्दार्थउक्तः । असौकइत्यतउक्तंयोदेवेति । यथाहवैवहवःपशवोमनु ष्यंभुंज्युरेवमेकैकः(वैकः)पुरुषोदेवान्भुनक्तीतिवाक्यंव्याचष्टे ॥ **पशवइति** ॥ भुंज्युर्भुनक्तीत्येतदंतर्णीतण्यर्थमितिभावेनो क्तंभोजयंतीतिभोजयतीतिच । पशुशब्दोनहीनपशुपरइतिभावेनोक्तमेवविवृतं । वहुगाःयथेति । गाःगावः । यद्वाएकस्यवहुदे वभोजकत्वंकथमित्यतआह ॥ **एकोपीति** ॥ वहुगायथेति । एकैकस्मिन्नेवपशावादीयमानेप्रियंभवतिकिमुबहुष्वितिवाक्यंव्याचष्टे ॥ **स्वीकारेत्विति** ॥ दार्ष्टांतिकेस्वयमुपपादयति ॥ **तस्मादिति** ॥ भोजकत्वादित्यर्थः । तस्मादेषांतन्नप्रियंयदेतन्मनुष्याविद्युरि

भाष्यं ॥ अहेयोस्तीतिमेयोन्योथान्योसौहरिरित्यपि । नसवेदपरंविष्णुंजीवरूपेणवेत्तियत् । नाहेयत्वंचवेदास्यतस्मात्पशुवदीरितः । देवानां पशुवच्चासौयोवेदाहेयरूपिणं । पशवोवहवोयद्वत्पुरुषंभोजयंत्युत । तत्वज्ञःपुरुषस्तद्वदेकोपिवहुगायथा । देवान्भोजयतिज्ञानसंपत्त्याविष्णुसं श्रयात् । स्वीकारेतुपशोःप्रीतिरेकस्यापिभविष्यति । वहूनांहिगवांलाभेपराप्रीतिश्चकिंपुनः । तस्मात्सुवहुगोरूपेदेवानांतत्ववेदिनि । भवेदभ्यधिका प्रीतिर्विष्णवहेयत्ववेदनात् ।

तिवाक्यंव्याचष्टे ॥ नित्याहेयइति ॥ अपिशब्देनजीवाभिन्नइतीतिसमुच्चिनोति । देवानामप्रियत्वेपिकुतोनैवंज्ञेयमितिचेत् तथा
ज्ञानस्यानर्थहेतुत्वादित्याह॥ विष्णोरिति ॥ विष्णोरेवेतिसंबंधः। यश्चासत्यमितिप्रसंगादुक्तं । यद्वाजगतःसत्यत्वेनतदंतर्गताल्प
ज्ञत्वसर्वज्ञत्वादेरपिसत्यत्वात्कथंजीवैरैक्यंहरेरित्यतउक्तं॥ यश्चासत्यंजगदिति ॥ यद्यप्येकस्यैवमायावादिनःउक्तंसर्वंविद्यते ।
तथाप्येकैकमपितमःप्राप्तेर्हेतुः। किमुसर्वमितिभावेनयच्छब्दत्रयंतेसर्वइतिबहुवचनंचोक्तं। ननुविष्णोरहेयत्वादिगुणपूर्णत्वंयदिस्या
त्तर्हितदज्ञानमनर्थहेतुर्भवेत्। तदेवकुतः। प्रमाणाभावादित्यतआह॥ सर्ववेदैरिति ॥ पूर्णउच्यतइतिवक्ष्यमाणमत्रापिसंबध्यते।
हीतिप्रसिद्धिमाह। यतःतस्मात्तदज्ञानमनर्थहेतुरित्यर्थः। ननुजीवब्रह्मैक्यज्ञानमर्थहेतुरित्ययुक्तं । तस्यैवसकलश्रुतितात्पर्यगोचर
त्वेनतज्ज्ञानस्यानर्थहेतुत्वायोगादित्यतःश्रुतितात्पर्यविषयंचादर्शयति ॥ सर्वेति ॥ यद्वा ननुयदिजीवब्रह्मणोर्भेदःस्यात्तर्हिंभवेत्तदै
क्यज्ञानमनर्थहेतुः। सएवकुतइतिचेत् न। ब्रह्मणःपूर्णगुणत्वेनजीवस्यचापूर्णत्वेनश्रुतिसिद्धत्वादित्याह ॥ सर्वेति ॥ अस्तुसंसारद
शायांविरुद्धधर्माध्यासेनभेदो नमुक्तावित्यतआह ॥ मुक्ताअपीति ॥ ननुमुक्तानामपूर्णत्वेमुक्तेः पुरुषार्थत्वमेवनस्यादित्यतआह
॥ निःशेषेति ॥ मुक्तेशयोःभेदकांतरमाह ॥ तेपीति ॥ उपासतेइत्युच्यतेवेदैरित्यनुवर्तते । यदिजगत्सत्यंस्यात्तर्हितदसत्य

भाष्यं ॥ नित्याहेयस्तथैवान्यस्तदन्योविष्णुरित्यपि । देवानामप्रियंज्ञानंनैवंविद्यादतःपुमान् । विष्णोरहेयतांचैवनित्यत्वंपूर्णतामपि । योनवे
दतथायश्चजीवैरैक्यंहरेर्वदेत् । यश्चासत्यंजगद्ब्रूयात्सर्वेतेतमसिस्फुटं । मज्जंतिसर्ववेदैर्हिगुणैःसर्वैर्हरिर्यतः । पूर्णोनित्यमपूर्णाश्चजीवामुक्ताअपिस्फुटं ।
निःशेषदुःखमोकेनसुखैकानुभवस्तुयः । मोक्षइत्युच्यतेवेदैस्तेपिमुक्ताहरिंसदा । उपासते

त्वज्ञानमनर्थहेतुःस्यात् । एतदेवकुतइत्यतोजगत्स्वरूपमाह ॥ **जगदिति** ॥ ननुजगतोविनाशात्कदाचिदन्यथाभावादेतज्जगदाद्यंतवर्जितमितिकथमित्यतआह ॥ **नकदाचिदिति** ॥ नाशोनिवृत्तिर्बाधइतियावत् । आद्यंतवर्जितत्वेपिनाद्यंतरंवैचित्र्यमस्तीत्याह ॥ **नकदाचित्तदिति** ॥ जगतआद्यंतवर्जितत्वेभागेप्रत्यक्षादिविरोधःस्यादित्यतआह ॥ **जगदिति** ॥ स्वतोन्यथाभावाभावेपिब्रह्मज्ञानादिनान्यथाभावोभविष्यतीत्यतआह ॥ **ज्ञानतइति** ॥ ननुविष्ण्वादीनामेवासत्यत्वाद्विष्ण्वहेयत्वाज्ज्ञानादिकंकथमनर्थहेतुरित्यतआह ॥ **सत्योविष्णुरिति** ॥ सर्वस्यापिसत्यत्वेप्रत्यक्षमाह ॥ **सर्वेषामिति** ॥ यद्येवंज्ञानमनर्थहेतुःतर्हिकिंस्यज्ञानंमोक्षहेतुरित्यतआह ॥ **ज्ञात्वेति** ॥ अतःअन्यथाज्ञानस्यानर्थहेतुत्वात् । सइदंसर्वंभवतीत्यस्यस्वयोग्यसमग्रतांप्राप्नोतीतिव्याख्यानमयुक्तं । तद्वाचकपदाभावादित्यतस्तद्दर्शयति ॥ **इदमिति** ॥ आत्मनोयोग्यमुच्यतइतिशेषः । अन्वयप्रतीतिसौकर्यायभवतीत्यनुवादः । ननुपूर्वमप्रकृतत्वात्कथंइदंशब्देनात्मयोग्यमुच्यतइत्यतआह ॥ **निर्दुःखेति** ॥ स्वयोग्यस्येतिशेषः । वक्तृश्रोतृबुद्धौपरिवर्तमानंहिसाक्षात्प्रकृतमित्युच्यते । ग्रंथोक्तत्वंतुतल्लिंगतयैव । आत्मनोयोग्यमित्यस्यश्रोतृबुद्धौपरिवर्तमानत्वेनप्रकृतत्वादिदमितिनिर्देशोयुज्यतइत्यर्थः । सर्वसमग्रमितिव्याख्यानमुपपादयति ॥ **तत्सर्वमिति** ॥

भाष्यं ॥ जगच्चैतत्सर्वंदाद्यंतवर्जितं । नकदाचिज्जगन्नाशोनकदाचित्तदन्यथा । जगत्प्रवाहरूपेणसर्वदैवंव्यवस्थितं । ज्ञानतःकर्मतोवापितपसाशक्तितोपिवा । नकस्याप्यन्यथाभाव्यंजगदेतत्कदाचन । सत्योविष्णुःश्रीश्चसत्याजीवाःसत्याजडंतथा । असत्यंनास्तिकिंचिच्चसर्वेषांज्ञानगोचरं । ज्ञात्वाविष्णुमतोमुक्तिप्राप्नुयात्पुरुषोत्तममितिभविष्यत्पर्वणि । इदमित्यात्मनोयोग्यंसर्वसमग्रंभवति । निर्दुःखानंदस्यापेक्षितत्वान्मनसिस्थितत्वेनेदमितियुज्यते । तत्सर्वमभवत्सर्वंभविष्यंतइत्यादिनासमप्रभावस्यप्रस्तुतत्वात् ।

तद्धैतत्पश्यन्नित्यादेः अहेयंचगुणैःपूर्णंनित्यास्तिज्ञानगोचरं ॥ ब्रह्मपश्यन्नहंमनुरितिसूक्तंददर्शह ॥ इतिव्याख्यानंकथं । सूक्त
गताहंशब्दस्यास्मदादेशत्वेनाभवमस्मीत्यादेश्चोत्तमपुरुषत्वेनतत्रब्रह्मणोहेयत्वादेरप्रतिपादनात् । नहितदप्रतिपाद्यमर्थंपश्यंस्त
त्सूक्तंददर्शेतियुक्तं । इत्यतस्तद्धैतत्पश्यन्नितिवाक्यंप्रकारांतरेणव्याचष्टे ॥ ब्रह्मेति ॥ तच्छब्दार्थोब्रह्मेति । एतच्छब्दार्थो
ब्रह्मणइत्यादि । अनेनमनुर्मनुनामकोमन्वंतर्यामी अहंअहेयः सूर्यःसूर्यनामकस्सूर्यांतर्यामी अहंअहेयइतिसूक्तयोजनासू
चिता । नचैवंसत्यभवमित्याद्यनुपपत्तिः । नविद्यतेभवउत्पत्तिर्यस्यतदभवं अस्तीतिमेयमित्यस्मीतितस्यापिगुणांतरवाचकत्वा
दितिभावः । प्राचीनव्याख्यानंतुअस्यसूक्तस्यप्रतीतार्थत्वेनब्रह्मपरत्वमेवनास्तीतिवदंतंप्रतितत्परत्वसमर्थनार्थमितिनतस्यवैयर्थ्य
मितिध्येयं । अत्रापिप्रमाणमाह ॥ ब्रह्मेति ॥ तदिदमप्येतर्हियएवंवेदाहंब्रह्मास्मीतिवाक्यस्य योयोहेयंपरंब्रह्मसदैवास्तीति
मानगं । इदानीमपिजानातीतिव्याख्यानमयुक्तं । परंब्रह्मेत्यस्यश्रौतब्रह्मशब्दानुवादपरत्वेनतदिदंशब्दयोर्वैयर्थ्यापातात् ।
प्रकारसमर्पकशब्दमध्यगतब्रह्मशब्दस्यविशेष्यपरत्वानुपपत्तेश्च । तस्मात्तदिदंयत्सर्वभूतानुप्रविष्टंब्रह्मैतर्हिएतस्मिन्नपिकालेयः
कश्चिद्व्यावृत्तवाह्यौत्सुक्यआत्मानमेवैवंवेदाहंब्रह्मास्मीतिसकलधर्मातीतब्रह्मैवाहमस्मिकेवलमितियोवेदसएतादृक्ब्रह्मज्ञानादवि
द्याकृतासर्वत्वनिवृत्त्याइदंसर्वंभवतीतिव्याख्येयमित्यतःस्वयंतावत्तद्वाक्यंसम्यग्व्याचष्टे ॥ तदिदमिति ॥ तदिदमित्यनुवादे

भाष्यं ॥ ब्रह्मपश्यन्वामदेवोब्रह्मणोमन्वादिजीवैरहेयत्वंप्रतिपेदे । ब्रह्मपश्यन्वामदेवोब्रह्मणोहेयतांसदा । मन्वा[illegible]ः सर्वजीवैःप्रतिपेदेहिमं
त्रदृगितिब्राह्मे । तदिदंब्रह्मयोऽहेयत्वादिगुणमेतर्ह्यपिवेद ।

टि[illegible]

नब्रह्मेतिव्याख्यातं । अहंब्रह्मास्मीत्यस्यार्थोऽहेयत्वादिगुणमिति । तथाचप्रमाणवाक्येपरंब्रह्मेत्येतदिदंपदार्थकथनपरंब्रह्मशब्दोयोगेनगुणपूर्णत्वार्थकश्चेतिभावः । इदानीमपव्याख्यानंदूषयति ॥ अहंशब्दस्येति ॥ अर्थत्वेनेत्यशेषः । आत्मानमेवेत्यस्यसमुच्चयार्थोऽपिशब्दः । तदत्रनश्रूयतइतिचेत् । परेणतदात्मानमेवावेदितिपूर्ववाक्यानुसारेणात्राप्यात्मानमेवेत्यध्याहृत्यव्याख्यानात् । यद्वानकेवलंतदात्मानमेवावेदित्यत्रतदात्मानमितिव्यर्थं । अत्रवाक्येइदंशब्दोपीतियोज्यं । तच्छब्दसमुच्चयार्थोवा । तथाचाहंशब्दस्याहेयार्थकत्वमनंगीकृत्यास्मदादेशरूपत्वांगीकारेएतर्ह्यपियएवंवेदाहंब्रह्मास्मीत्येतावताधिकारिणो ब्रह्मत्वानुसंधानलाभेनात्मानमेवेत्यध्याहारः तदिदंशब्दौचव्यर्थाःस्युरित्यर्थः । अहेयत्वार्थकत्वेतुअहंब्रह्मास्मीत्येतैर्विशेषणैः किंवेदेतिविशेष्याकांक्षानिवर्तकत्वेनतदिदंशब्दौनव्यर्थाविितिभावः । इदानींसइदंसर्वंभवतीत्यस्यसएतादृक्ब्रह्मज्ञानादविद्याकृताऽसर्वत्वनिवृत्त्येदंसर्वंभवतीतिपरकृतंव्याख्यानंदूषयति ॥ सर्वेति ॥ हिशब्दःप्रसिद्ध्यर्थः । नाधिकारिणःसर्वस्वरूपत्वसंगीकर्तुंयुक्तं । मिथ्याभूतजडपदार्थस्वरूपत्वांगीकारेऽधिकारिचेतनस्यापिमिथ्यात्वापातात् । त्वयानंगीकाराच्च । जडस्वरूपत्वंनामतद्व्यतिरेकेणजडस्यासत्त्वमितिचेत् विशेषनिषेधस्यशेषाभ्यनुज्ञानार्थत्वेनानंदादिवत् जीवचैतन्यवच्चब्रह्मचैतन्यात्मकतयासत्त्वापातात् । नापिजडस्यतत्रारोपितत्वं । शुक्त्यादावारोपितरूप्येतत्स्वरूपत्वव्यवहाराभावात् । उक्तवक्ष्यमाणन्यायैःप्रपंचस्यसत्यत्वाच्च । सर्वचैतन्यस्वरूपत्वमेवविवक्षितमितिचेत् न । तत्रापिप्रमाणाभावात् । नतावत्तत्रप्रत्यक्षमस्ति । तस्यतदभावावे

भाष्यं ॥ अहंशब्दस्याहेयत्वानंगीकारेइदंशब्दोपित्यर्थः । सर्वस्वरूपत्वंहिदुर्विदग्धैरंगीक्रियते ।

दकत्वात् । विमतानिशरीराणिदेवदत्तस्यैवभोगायतनानिशरीरत्वात्संप्रतिपन्नशरीरवदित्यस्य विमतानिकलत्राणिदेवदत्तस्यैवभो
गायतनानि कलत्रत्वात् संप्रतिपन्नकलत्रवदित्याभाससमानयोगक्षेमतयापहास्यत्वात् । विमताआत्मानोदेवदत्तात्परमार्थतोन
भिद्यंते आत्मत्वाद्देवदत्तवदित्यनेनसर्वचैतन्याभेदसिद्धिरितिचेत् न । आत्मत्वानिरुक्तेः । तथाहि । किंतदात्मत्वं । नतावज्जा
तिविशेषः । तस्यात्मनिपरेणवस्तुतोनभ्युपगमात् । नापिप्रमातृत्वं । तस्यापित्वयानभ्युपगमात् । नापिज्ञानरूपत्वं । ज्ञातृज्ञेय
शून्यतयात्मनोज्ञानरूपत्वासंभवात् । नापिस्वप्रकाशत्वं । स्वविषयप्रकाशत्वस्यासिद्धत्वात् । अवेद्यत्वंस्वप्रकाशत्वमितिचेत् ।
तर्हिअज्ञानासिद्धिः । अन्यथास्वरूपासिद्ध्यापत्तेः । अनुमानवैयर्थ्याच्च । विमताघटाःएतद्घटान्नभिद्यंतेघटत्वादेतत्घटवदित्या
भाससमानयोगक्षेमत्वाच्च । आगमाश्चपूर्वमेवसम्यग्व्याख्याताइतिसर्वस्वरूपत्वेनकिंचित्प्रमाणं । तथाचाप्रामाणिकंसर्वप्रमाण
विरुद्धंचाधिकारिणः सर्वस्वरूपत्वंमिथ्याज्ञानित्वेनाग्रहवशादेवांगीकुर्वाणादुर्विद्वांसइतिनतत्प्रेक्षावद्भिरादरणीयमितिभावः ।
एतेनतस्मात्सर्वमभवदित्यस्य तस्मात्ब्रह्मात्मैकत्वज्ञानादविद्याकृताऽसर्वत्वनिवृत्त्यास्वाभाविकंसर्वत्वंप्राप्तमितिसर्वंभविष्यंतइत्य
स्यसर्वंनिरवशेषंभविष्यंतइतिचव्याख्यानंपरास्तं । यदुक्तमहंशब्दस्याहेयत्वानंगीकारेतदिदंशब्दौव्यर्थावितितदयुक्तं । युष्माक
मिवास्माकमपितदिदंशब्दस्यब्रह्मपरत्वात् । तदिदंयत्सर्वभूतानुप्रविष्टंब्रह्मेतिव्याख्यानादितिचेत् न । त्वत्पक्षेतदात्मानमेवावे
दित्यत्रतच्छब्दवदत्रतदिदंशब्दस्याविद्याविशिष्टाधिकारिस्वरूपभूतब्रह्मपरत्वंवोतसकलधर्मातीतपरब्रह्मपरत्वंवा । नाद्यः । अ

धिकारिप्रदर्शकस्ययइत्यस्यवैयर्थ्यापत्तेः । द्वितीयंदूषयति ॥ इदंशब्देनेति ॥ तदिदंशब्देनेत्यर्थः । उपलक्षणमेतत् । अस्मिशब्दश्चेत्यपिग्राह्यं । तदुपपादयति ॥ इदमिति ॥ योधिकारीतदिदंब्रह्माहमितिवेदेत्येवोक्त्याअधिकारिणोब्रह्मत्वानुसंधानलाभेनाहंब्रह्मास्मीत्यत्रब्रह्मास्मिशब्दौव्यर्थावित्यर्थः । अस्मत्पक्षेतुब्रह्मास्मिशब्दयोर्गुणांतरवाचकत्वेननवैयर्थ्यं । अतएवोक्तंप्रागहेयत्वादिगुणमितीतिभावः । दूषणांतरमाह ॥ एवंशब्दश्चेति ॥ एतदुपपादकत्वेनापिपूर्ववाक्यंयोज्यं । वेदनप्रकारस्येतिशब्देनैवोक्तत्वादेवंशब्दश्चव्यर्थइत्यर्थः । नन्वत्रवाक्येइत्येवेत्यवधारणेनैतद्व्यपीत्यस्यवैयर्थ्यमनुज्ञायते । नचैतत्संभवति । युष्मत्पक्षेपिसाम्यात् । कालविशेषवाचकत्वस्यास्माकमपिसाम्यादितिचेत् न । एवशब्दस्यब्रह्मास्म्येवंशब्दव्यावर्तकत्वेनतदव्यावर्तकत्वात् । ननुयुष्मत्पक्षेपि एवंशब्दोव्यर्थः । अहंब्रह्मास्मीत्यनेनैववेदनप्रकारस्योक्तत्वादित्यतआह ॥ **अस्मत्पक्षेत्विति** ॥ नन्वस्मत्पक्षेपितदात्मा [illegible] इत्युक्तार्थपरामर्शकतयानतद्व्यर्थमित्यतआह ॥ **तत्पक्षइति** ॥ तदपिस्वस्वरूपज्ञत्वज्ञानमपि । जीवब्रह्मैक्यज्ञानमेवसइ [illegible] कफलसाधनमितिपक्षेस्वस्वरूपज्ञत्वविज्ञानस्याततसाधनत्वादितिभावः । दूषणांतरंचाह ॥ **नहीति** ॥ कर्मकर्तृभावविरोधादितिभावः । तथाचतदात्मानमेवावेदित्यस्यपरपक्षेस्वकर्मकज्ञानवत्त्वार्थकत्वाभावेननास्मत्पक्षइवएवंशब्देनतत्परामर्शसंभवइतिभावः । यद्वातत्पक्षेतदात्मानमेवावेदित्यत्रतच्छब्दःअविद्याविशिष्टाधिकारिस्वरूपभूतब्रह्म

भाष्यं ॥ इदंशब्देनपरब्रह्मविवक्षायांब्रह्मशब्दोव्यर्थःस्यात् । इदंयोहमितिवेदेत्येवस्यात् । एवंशब्दश्चव्यर्थः । अस्मत्पक्षेतुतदात्मानमेवावेदित्यपिज्ञातव्यमित्येवंशब्दार्थः । तत्पक्षेतदपिव्यर्थमेव ।

परः । नचजीवब्रह्मैक्यज्ञानमेवोक्तफलसाधनमितिपक्षेतस्यस्वस्वरूपज्ञत्वज्ञानमिदानींतनाधिकारिणःउक्तफलसाधनं । स्वस्य ब्रह्मत्वानुसंधानेनैवोक्तफलसिद्धेः । तथाचैवंशब्देनतदात्मानमेवावेदित्युक्तार्थपरामर्शेपितज्ज्ञानंव्यर्थमितिपूर्ववाक्यार्थः । ननु युष्माकमिवास्माकमपितदात्मानमेवावेदित्यत्रतच्छब्दःपरब्रह्मार्थकएवास्तु । तस्यस्वस्वरूपज्ञत्वज्ञानंतदधिकारिणःफलसाधनं भविष्यतीत्यतआह ॥ नहीति ॥ स्यादेतदेवं । यदितत्परंब्रह्मस्वात्मानंवेत्तीत्येतदुपपन्नंस्यात् । नचतदस्ति । एकस्यैवकर्तृक र्मभावविरोधात् । नचा ...ष्यरंदोषः । विशेषबलेनैकस्यैवकर्तृकर्मभावोपपत्तेः । निर्विशेषब्रह्मपक्षेतुतदनुपपत्तेरित्यर्थः । यथोक्तंसंकरेणस्वभाष्ये ...ानाध्यारोपणनिवृत्तिरेवात्मानमेवावेदित्युक्तं । नात्मनोविषयीकरणमिति । नन्वथापिनैवंशब्दो व्यर्थः । यएवंवेदेतिसामान्‍ तदुक्त्वाअहंब्रह्मास्मीतीत्यनेनैवंशब्दस्यैवव्याख्यानादित्यतआह ॥ व्याख्यानेति ॥ गत्यंतराभा वेहिव्याख्यानव्याख्येयभावोंगीकार्यः । गत्यंतरंचात्रोक्तमेवेत्यर्थः । अप्रमाणमाह ॥ अभावइति ॥ ननुभवत्पक्षेपिब्रह्मणः स्वस्वरूपत्वज्ञानंव्यर्थमेव । अहेयत्वादिगुणकब्रह्मज्ञानेनैवसमग्रभावप्राप्त्युपपत्तेरित्यतस्तस्यापितत्फलकत्वेप्रमाणमाह ॥ स्वरू पज्ञमिति ॥ नन्वात्माह्येषांसभवतीत्यस्यात्माहिविष्णुर्देवानामितिव्याख्यानमयुक्तं । नपुंसकलिंगतच्छब्देनप्रकृतस्यब्रह्मणःस इतिपुल्लिंगतच्छब्देनपरामर्शायोगात् । अतस्तस्यहनदेवाश्चनाभूत्याईशतेइत्युक्तार्थहेतुतयासब्रह्मविदेषांदेवानामात्माशास्त्रस्वरू

भाष्यं ॥ नहितत्पक्षेतत्स्वात्मानंवेत्ति । व्याख्यानव्याख्येयभावश्चागतिकागतिः । अभावेपृथगर्थानांव्याख्यामभ्यासमेववा । कल्पयेन्नै वतद्भावेव्याख्याऽभ्यासश्चयुज्यतइतिभारते । स्वरूपज्ञंतथाहेयंनित्यंचब्रह्मवेत्तियः । समग्रभावंगच्छेत्सतत्प्रसादान्नसंशयइतिच ।

पप्रकाशितब्रह्मस्वरूपोभवतीतिव्याख्येयमित्यतस्तद्वाक्यंस्वयंतावद्व्याचष्टे ॥ **सइति** ॥ ब्रह्मविदोब्रह्मस्वरूपत्वंचप्रागेवनिरस्त मितिभावः । अत्रोक्तदोषमुद्धरति ॥ **पुल्लिंगंचेति** ॥ यथातत्सत्यमितिनपुंसकलिंगतच्छब्देनप्रकृतस्यापिआत्मशब्दापेक्षयास इतिपुल्लिंगशब्देनपरामर्शस्तथात्रापीतिभावः । प्रमाणविरुद्धत्वाच्चनपरव्याख्यानमादरणीयमित्याह ॥ **देवानामिति** ॥ एतस्य स्फुटंतस्यहनदेवाइतिपूर्वोक्तार्थेहेतुत्वाप्रतीतेस्तद्दर्शयति ॥ **तज्ज्ञइति** ॥ तुशब्दोयस्मादित्यर्थे । यस्मात्तेषामात्माहरिः तज्ज्ञः तस्यहरेःप्रियः ततस्तेषांप्रियः । ततस्तस्याधिकारिणोनाभूतिदाइत्यर्थः । अथयोऽन्यांदेवतामुपास्तइतिवाक्यंपूर्वंजीवब्रह्मैक्यवा दिविष्णवहेयत्वाज्ञानिनिंदापरत्वेनप्रमाणवचनेनव्याख्यातं । इदानींयस्तार्किकादिरीश्वरस्यजीवादिभ्योभेदमंगीकृत्यापितद्गुणे भ्योपिभेदमंगीकरोति यश्चविष्णवतिरिक्तएवहरहिरण्यगर्भादिरनंतगुणपूर्णइतिमत्वाभगवदन्यामुपास्ते तन्निंदापरत्वेनापिव्याच ष्टे ॥ **सर्वेभ्यइति** ॥ अनेनान्यामित्यस्यावृत्तियोग्यतयासर्वेभ्योजीवादिभ्यःस्वगुणेभ्योहेयत्वादिभ्यश्चेतिलाभइत्युक्तंभवति । यउपास्तेनसवेदेतिसंबंधः । अन्योसावन्योहमस्मीत्यस्यार्थमाह ॥ **अहेयइति** ॥ अन्योहरहिरण्यगर्भादिः । अथेत्यस्यचशब्दा र्थकत्वमभिप्रेत्यमेयश्चेति । अन्यश्चेत्युक्तं । मत्त्वेतिशेषपूरणं । योऽन्यांदेवतामुपास्तेइतिवाक्यमत्रापिसंबध्यतइतिभावेनोक्तं ॥

भाष्यं ॥ सईश्वरएषांदेवानामात्माभवति । पुल्लिंगंचतत्सत्यंसआत्मेत्यादिवद्भवति । देवानांव्यापकत्वात्तुतेषामात्माहरिःसदा । तज्ज्ञःप्रि यस्ततस्तेषांतस्यनाभूतिदास्ततइतिवामने । सर्वेभ्योन्यांविलक्षणांदेवतांस्वगुणेभ्योऽहेयत्वादिभ्यश्चान्यांयउपास्तेअहेयोऽस्तीतिमेयश्चान्योन्यश्चासौ विष्णुरितिमत्वा

योविष्णोरिति ॥ अन्यांदेवतांहरहिरण्यगर्भादिरूपां । उपासनायाःज्ञानसमानविषयकत्वलाभायउपासनाप्रकारप्रदर्शकतया अन्योसाविति वाक्यमावर्तितं । वाशब्दः प्रमाणवचनकृतव्याख्यानापेक्षयाप्रकारांतरद्योतकः । अत्रापिप्रमाणमाह ॥ जीवादिभ्यइति ॥ यथापशुरित्यस्यार्थोमनुष्याणांपशुर्हिंसइति । एवंसदेवानामित्यस्यार्थमाह ॥ सम्यग्ज्ञानीति ॥ नन्वेतदयुक्तं। सम्यग्ज्ञानिनःपूर्वमप्रकृतत्वेनसइतितत्परामर्शायोगात् । नसवेदेतिसन्निहिताज्ञानिपरामर्शस्यैवस्वीकार्यत्वाच्च । तथाचयथापशुरेवंसदेवानामित्यत्रनवाक्यभेदः । किंतुएकमेववाक्यमंगीकृत्ययथापशुर्गवाश्वादिदोहनवाहनाद्युपकारैरुपयुज्यते । एवमेवसोविद्वान्देवानांमध्येएकैकस्यापिदेवस्यपशुवदिज्याद्यनेकैरुपकारैरुपभोग्योभवतीतिव्याख्येयमित्यतस्तावत्सइत्यन्यसम्यग्ज्ञानिपरामर्शकत्वेअप्रकृतत्वशंकांनिवारयति ॥ एवमिति ॥ पूर्वःतदिदमप्येतर्हीतिवाक्यप्रकृतइत्यर्थः । ननुयद्येवंसदेवानामित्यत्रसम्यग्ज्ञानिपरामर्शस्तर्हिसम्यग्ज्ञानिनोदेवपशुरूपत्वेदेवभोजकत्वेनतत्प्रीतिविषयकत्वंस्यात् । नचतद्युक्तं । तस्मादेतेषांतन्नप्रियंयदेतन्मनुष्याविद्युरितिवाक्यशेषेमनुष्याब्रह्मणस्तत्वंविद्युरितियदेतदेतेषांदेवानांनप्रियमितिमनुष्यसम्यग्ज्ञानस्यदेवाप्रियत्वोक्तेरित्यतस्तद्वाक्यंयथावद्व्याचष्टे ॥ एतदिति ॥ मनुष्याविष्णोरन्यांदेवतांविद्युरुपासीरन् इतियत्एतत्विष्णोरन्यदेवतोपासनमि

भाष्यं ॥ योविष्णोरन्यांदेवतामुपास्तेअन्योसावन्योहमस्मीतिनसवेदेतिवा । जीवादिभ्योहरिर्भिन्नस्तंयःस्वगुणभेदतः। अहंयोन्योहरिश्चान्यइतिमत्वाऽन्यमेववा । यउपास्तेनसज्ञानीमनुष्याणांपशुर्हिसः । सम्यग्ज्ञानीतुदेवानांपशुरित्यभिधीयतइतिच । एवंसदेवानामित्यत्रपूर्वःसम्यग्ज्ञानीपरामृश्यते । एतन्मनुष्याविद्युरित्यत्रैतच्छब्देनविष्णोरन्यदेवतोपासनमुच्यते ।

तिवाक्ययोजनामनेनसूचयति । यथाचयोऽन्यांदेवतामुपास्तेइत्युक्तमनूद्यतस्यैवदेवाप्रियत्वमुच्यतेनसम्यग्ज्ञानस्येत्यर्थः । न
न्वथापिएवंसदेवानामित्यत्रसन्निहिताज्ञानिपरामर्शसंभवेतत्परित्यागेनकिमितिदूरोक्तज्ञानिपरामर्शःक्रियतइत्यतःतावत्स्वपक्षेवा
क्यार्थानुपपत्तिर्नास्तीत्याह ॥ नहीति ॥ यद्यज्ञान्येवदेवानांभोजकःस्यात्तर्हिएवंसदेवानामित्यत्रसइतिसम्यग्ज्ञानिपरामर्शेतस्य
देवभोजकत्वाभावेनदेवपशुत्वासंभवात्वाक्यार्थोबाधितःस्यात् । नचैवं । किंतूभावपिदेवानांभोजकौ । ततश्चनवाक्यार्थानुप
पत्तिरित्यर्थः । तर्ह्युभयत्रापिवाक्यार्थानुपपत्त्यभावात् । किमितिसन्निहिताज्ञानिपरामर्शपरित्यागेनदूरोक्तज्ञानिपरामर्शःक्रिय
तइत्यतआह ॥ ज्ञानीति ॥ सत्यमज्ञान्यपिकर्मकरणादिनादेवानांभोजकइति । तथापिनज्ञानिवत् । ज्ञानिनोविशेषेणदेवता
भोजकत्वात् । तथाचमुख्येसत्यमुख्यग्रहणायोगात्सन्निहितमप्यज्ञानिनंपरित्यज्यपूर्वःसम्यग्ज्ञानीपरामृश्यतइत्यर्थः । स्यादेत
देवं । यदिज्ञानिनोदेवभोजकत्वमेवस्यात् । तदेवकुतइत्यतःएतद्ब्राह्मणगतमेववाक्यंप्रमाणयति ॥ अथोइति ॥ सर्वेषांभूता
नांदेवादिपिपीलिकांतानां । लोकःतद्भोजकत्वेनाश्रयः । सप्तान्नब्राह्मणगतमपिवाक्यंप्रमाणयति ॥ सयइति ॥ भूतानामात्मा
भवतीतिश्रुतिशेषः । इतिवचनादित्यनुवर्तते । ननुज्ञानिनोदेवभोजकत्वे अथोअयंवाआत्मेतिवाक्यंनप्रमाणं । तत्रायमात्मेत्य
नेनयदिहवाअप्यनेवंविन्महत्पुण्यंकर्मकरोतीतिपूर्ववाक्यप्रकृतस्याविदुषएवकर्माधिकारिणोग्रहस्थस्यग्रहणात् । तथाचाज्ञानिन

 भाष्यं ॥ नह्यज्ञान्येवदेवानांभोजकः । ज्ञानीहिविशेषेणभोजकः । अथो अयंवाआत्मासर्वेषांभूतानांलोकःइतिवचनात् । सयएवंवित्सर्वेषांभूतानां

एवगृहस्थस्यदेवादिपिपीलिकांतसर्वभूतोपभोजकत्वमुच्यतइत्यतआह ॥ ब्रह्मविच्चेति ॥ अज्ञानिसमुच्चयार्थश्चशब्दः ब्रह्मवित्गृहस्थश्चेत्यर्थः । कुतइत्यतआह ॥ प्रस्तुतत्वादिति ॥ आत्मानमेवलोकमुपास्तइतिज्ञानिनोपिप्रस्तुतत्वादित्यर्थः । नह्युभयोःप्रकृतत्वाविशेषेऽज्ञानिनएवग्रहणेकश्चिद्विशेषहेतुरस्तीतिभावः । कथंतर्हिपरमात्मैवगृहस्थांतर्यामित्वेनसर्वेषांलोकआश्रयइतिभाष्यं । यथाचनानुपपत्तिस्तथातत्रैववक्ष्यामः । ननुसयएवंविदितिवाक्येसत्ताब्रह्मोपासकोदेवएवोच्यते । नहवैदेवान्पापंगच्छतीत्युत्तरवाक्यात् । आत्माभवतिव्यापकोभवतिसर्वेषुव्याप्तिमन्वेतीतिस्ववचनप्रमाणाभ्यांदेवतापरत्वेनव्याख्यास्यमानत्वाच्च । तथाचज्ञानीहिदेवानांभोजकइत्यत्रकथमिदंप्रमाणं । नहिदेवोदेवानांभोजकइत्यतश्चाह ॥ ब्रह्मविच्चेति ॥ नकेवलंसत्ताब्रह्मदृष्ट्वेनब्रह्मोपासकोदेवएवतत्रसयएवंविदितिवाक्येउच्यते । किंतुब्रह्मविन्मात्रश्च । तथाचयएवंवित्सत्ताब्रह्मज्ञानमात्रवान्मनुष्यःससर्वेषांदेवपश्वादीनांभूतानांआत्माप्रियोभवति । तत्तद्योग्यान्नभोजकत्वादित्यर्थइतिभावः । कुतइत्यतआह ॥ प्रस्तुतत्वादिति ॥ सदेवानपिगच्छतीति । अयमेवसयोयमेवंवित्पुरुषइतिपूर्ववाक्येसत्ताब्रह्मोपासकवत्सत्ताब्रह्मज्ञानिमात्रस्यापिप्रस्तुतत्वात् । नचतत्रविवादः । ननरायोग्याःएतदुपासनेज्ञानमात्रेणदेवानांसामीप्यंआप्राप्नुवंतितेसएवंविदुषिस्थितइतिव्याख्यास्यमानत्वादित्यर्थः । नन्वस्त्वेवंसम्यग्ज्ञानीदेवानांभोजकः । तथाप्यज्ञान्यपेक्षयाविशेषेणभोजकइत्यत्रकिंमानमित्यतआह ॥ तत्त्वविदिति ॥ अपिशब्दोवधारणे । देवगौरेवेतिसंबंधः । देवानामेवभोजकत्वात् । नरगौश्चनराणामपिभोजकत्वादित्यर्थः । अत्रेवांऽऽ

भाष्यं ॥ ब्रह्मविच्चतत्रोच्यते । प्रस्तुतत्वात् । तत्वविदेवगौःप्रोक्तोनरगौश्चाप्यतत्ववित् । तस्माद्देवास्तत्वविदेप्रियंकुर्वंत्यतंद्रिताइत्याम्नये ।

तरोपपत्तिमप्याह ॥ **तस्यहेति** ॥ यद्वाएतन्मनुष्याविद्युरित्यत्रतच्छब्देनविष्णोरन्यदेवतोपासनमुच्यतइतियदुक्तंतन्न । ज्ञानिनःसन्निहितत्वेनतत्परत्वेनाव्याख्यायदूरोक्तमिथ्याज्ञानिपरतयाव्याख्यानेकारणाभावादित्यतआह ॥ **तस्येति** ॥ तथाचतद्विरोधःस्यादितिभावः । एवंसति क्रियावृद्ध्याहिकौंतेयदेवलोकःसमावृतः । नचैतदिष्टंदेवानांमर्त्यैरुपरिवर्तनमितिवचनविरोधःस्यादितिचेन्न । नह्यत्रतत्वज्ञानंदेवानामप्रियमित्युच्यते । येनविरोधःस्यात् । अयोग्यमर्त्यविपयंवातदिति अथवाएवंसदेवानामित्यत्रसम्यग्ज्ञानीदेवानांपशुरित्युच्यतेइत्ययुक्तं । असंगतत्वात् । नह्ययमर्थःपूर्वेणसंगतइत्यतःसंगतिंदर्शयति ॥ **तस्यहेति** ॥ तथाचतदुपपादकत्वेनैवंसदेवानामितिवाक्यंप्रवृत्तमितिभावः । सइदंसर्वंभवतीत्यत्रैतादृक्त्वब्रह्मज्ञानादविद्याकृतासर्वत्वनिवृत्त्येदंसर्वंभवतीतिव्यावर्तकव्यावृत्तिरूपासर्वत्वस्यज्ञाननिवर्त्यत्वंपरैरुक्तं । तदसत् । ज्ञाननिवर्त्यत्वरूपासत्यत्ववादिनांनिंदनादितिभावेनाह ॥ **असत्यमिति** ॥ तत्सत्यत्वेप्रमाणसद्भावाच्चनतद्युक्तमितिभावेनाह ॥ **यदिति** ॥ सईश्वरो यद्विश्वं चिकेतचकार तत्सत्यमित्सत्यमेव नमोधंनमिथ्या स्पार्हस्पृहणीयं वसुवल्यादिभ्योजेता ऽथेंद्रादिभ्योदातापीत्यर्थः । जीवधर्माजडंचेतीदंसर्वंजगदित्यर्थः । ईशजगतोरीशजडयोरित्यर्थः । किंचविप्रतिपन्नंनज्ञाननिवर्त्यं मुक्तैर्दृश्यमानत्वादित्यनुमानमभिप्रेत्यासिद्धिंपरि

भाष्यं ॥ तस्यहनदेवाश्चनाभूत्याईशतइतिदेवानांतत्वज्ञानंप्रियमित्युक्तंच । असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरमिति । यच्चिकेतसत्यमित्तन्नमोघंवसुस्पार्हमुतजेतोतदाता । सत्योजीवेशयोर्भेदःसत्याविष्णोर्गुणाअपि । सत्यंजगदिदंसर्वंसत्येशजगतोर्भिदित्यादेश्च ।

हरति ॥ भेदेनैवेति ॥ गुणैःस्वातंत्र्यादिभिः सहसहितं ईशंगुणैरप्रधानैर्जीवादिभिर्भेदेन । ननुमुक्तैर्दृश्यमानमपिज्ञाननिवर्त्यं किंनस्यादितिचेत् तथात्वेमुक्तानांभ्रांतत्वप्रसंगात् । नचेष्टापत्तिः । तेषांभ्रमकारणदोषशून्यत्वादितिभावेनमुक्तस्वरूपमाह ॥ निःशेषेति ॥ कालसंबंधकृतविकारवर्जिताइत्यर्थः । ननुअथयोऽन्यांदेवतामुपास्तइतिवाक्यस्यजीवब्रह्मैक्यादिवादिनिंदापरत्वेनव्याख्यानमनुपपन्नं । जीवेशाभेदो विष्णोरहेयत्वादिगुणकोभिन्नः विष्णोःस्वगुणादिभिर्भेदो जगन्मिथ्यात्व मित्यादिप्रमेयस्यवेदपुराणादिष्वेवतत्रतत्रदर्शनादित्यतआह ॥ तिर्यगिति ॥ प्रकृतेर्विकारतातद्देहादेः । विष्णोःसम्यग्भक्तिमृतेनामस्मरणतीर्थस्नानादिभिः । विप्राकृपयः । असंसारित्वंनित्यमुक्तत्वं । विशेषःहीनोच्चभावः । गुणेषुतद्गुणेषुच । भेदोवाविशेषोवेतिवर्तते । साम्यमेववा । श्रियइत्यत्रापिसंबध्यते । ब्रह्मवाय्वोःसकाशादनंतादेराधिक्यंसाम्यंवा तेभ्यअनंतादिभ्यइंद्रसूर्यादेराधि

भाष्यं ॥ भेदेनैवजगत्सर्वंभेदेनेशंगुणैःसह । भेदेनजीवानन्योन्यंमुक्ताःपश्यंतिसर्वशः । निःशेषदुःखहीनाश्चकेवलंसुखभोगिनः । जन्ममृत्युविहीनाश्चकालसंबंधवर्जिताः । रजस्तमःसत्वहीनाःप्रकृत्यादिविवर्जिताइत्यादिगारुडवचनान्नज्ञाननिवर्त्यतावक्तुंयुक्ता । तिर्यङ्मानुषदेवादिविष्णुरूपेष्वशक्तता । यस्मिन्कस्मिंश्चविषयेदुःखित्वंभिन्नतापिवा । प्रकृतेर्विकारितावापिच्छेदभेदव्रणादिवा । अज्ञानंनाशितावापिजन्मजीवैरभिन्नता । प्रकृत्यभिन्नतावापिजीवाभेदःपरस्परं । जडाभेदोथवाविष्णोर्मिथ्यात्वंजगतोपिवा । अगुणत्वमदेहत्वमकर्तृत्वंतथाहरेः । सम्यग्भक्तिमृतेमुक्तिर्विष्णोस्तद्वेषतस्तथा । मुक्तावभोगोजीवानांमुक्तौसाम्यंतथैवच । अरूपत्वंचजीवानांमुक्तानांबंधिनामपि । नामतीर्थादिभिर्मुक्तिस्तत्वज्ञानंविनापितु । विष्णोःसकाशात्प्रकृतेर्ब्रह्मणोनंतरुद्रयोः । गरुडेंद्रसूर्यविप्रादेरग्निसोमगुहादिनां । प्रद्युम्नस्यानिरुद्धस्यदेवविप्रादिनामपि ।

क्यंसाम्यंवा ततइंद्रसूर्यादेर्बद्धानांमुक्तिगानांविप्रभूपादीनामाधिक्यंसाम्यंवा बद्धानांमुक्तिगानांवेत्येतद्वचनविपरिणामेनब्रह्मादेरित्यादौसर्वत्रसंबध्यंते । मोक्षएवनतमः मोहार्थंदैत्यानां आपातप्रतीतार्थमपेक्ष्येदमितिबोध्यं । हरिणापुराणादौ ब्रह्मणेत्यादावपितत्प्रणीतशास्त्रइतिद्रष्टव्यं । मोक्षप्रयोजनकवेदादौकिमर्थमेतदुच्यतइत्यतआह ॥ यथेति ॥ नकेवलंश्रुतेःकिंतुपुराणादिकर्तृणामपीत्याह ॥ एवमेवेति ॥ तर्हिवेदादावुक्तंतत्वंकिमित्यतआह ॥ विष्णोरिति ॥ ऋषिभिर्याज्ञवल्क्यादिभिः क्षत्रियाद्यै

भाष्यं ॥ यैःकैश्चापिगुणैर्विष्णोःसकाशाद्वरतातथा । यदाकदापियत्नैर्वावरशापादिनापिवा । तपसावाप्युपायैर्वायोगज्ञानादिनापिवा । साम्यंवाविष्ण्वधीनत्वादन्यथैषांस्थितिःक्वतिः । असंसारित्वमेषांवाप्येषामीश्वरतापिवा । विनाविष्णुप्रसादेनमुक्तिरेषांसकाशतः । विष्णोःप्रयोजनावाप्तिर्विष्णोर्दोषश्चकश्चन । विष्णोःसर्वेषुरूपेषुसंपूर्णगुणहीनता । भेदोवाविष्णुरूपेषुविशेषोवागुणेषुच । श्रियःसकाशादाधिक्यंब्रह्मादेःसाम्यमेववा । ब्रह्मवाय्वोरनंतस्यरुद्रस्यगरुडस्यच । तेभ्यश्चैवेंद्रसूर्यादेर्विप्रभूपादिनांततः । बद्धानांमुक्तिगानांवा [illegible] सर्वंमोहार्थमुद्दिष्टंवेदेषुहरिणापिवा । ब्रह्मणावाथरुद्रेणदेवैश्चमुनिभिस्तथा । यथासुराणांसज्ज्ञानेतात्पर्यंसर्वदाश्रुतेः । तथादुर्ज्ञानजननेतात्पर्यमसुरेषुच । एवमेवचदेवानांविष्णुब्रह्मादिनामपि । विष्णोःसर्वगुणैःपूर्तिरपिमत्स्यादिरूपिणः । अजेयत्वमभेद्यत्वमच्छेद्यत्वंचसर्वशः । सर्वावताररूपाणामपिचित्सुखरूपता । श्रीब्रह्मरुद्राद्याधिक्यंसर्वेशत्वंस्वतंत्रता । सर्वशक्तिस्तत्प्रसादान्मोक्षोब्रह्मादिनामपि । तद्भक्त्यैवविमोक्षश्चभेदोजीवेशयोरपि । श्रीब्रह्मरुद्रशक्रादेःक्रमेणैवनिजागुणाः । सर्वदोषव्यपेतत्वंविष्णोःसर्वत्रसर्वदा । एतत्सर्वंसर्ववेदैर्विष्ण्वाद्यैर्देवतागणैः । ऋषिभिःक्षत्रियाद्यैश्चसम्यक्तात्पर्यतःसदा । उक्तंसर्वेषुशास्त्रेषुतस्माद्ग्राह्यंबुभूषुभिः ।

र्जनकादिभिः । तात्पर्यद्योतनायाह ॥ इदमिति ॥ तथापिनोत्तरत्रेतिनमंतव्यमित्याह ॥ पुनश्चेति ॥ नैतत्प्रमाणोक्तमप्यश्रद्धे यमितिभावेनाह ॥ एवमिति ॥ हंसोक्तमवश्यंज्ञेयमित्याशयेनतन्माहात्म्यमाह ॥ साक्षाद्विष्णुरिति ॥ नपृथ्व्यादिवदित्य र्थः ॥ ४ ॥ छ ॥ ततश्चायंखंडार्थः ॥ छ ॥ ब्रह्मविद्ययासर्वंभविष्यंतआत्मयोग्यतापूर्तिप्राप्नुवंतोमहातोब्रह्मविद्ययैवस्वयोग्यं सर्वंप्राप्यतइतियदाहुः । तत्रकेचिन्मनुष्यामन्यंते । किमिति यस्मात्तद्ब्रह्मसर्वंपूर्णमभवत् । तत्तस्माद्ब्रह्मापिअवेत्किमिति ॥ १ ॥ तत्रोत्तरंवक्तुमाह ॥ ब्रह्मेति ॥ इदमग्रेअस्यजगतोग्रेब्रह्मैवासीत् । तद्ब्रह्म अहमहेयं ब्रह्मपरिपूर्णं अस्मिसर्वदास्मीतिमेय मित्ये तैर्विशेषणैरात्मानंस्वरूपमेवावेत् । तस्मादेवतत्ब्रह्मसर्वदासर्वपरिपूर्णमभवदितिपरिहारः । देवानामध्येयोयोदेवःतदहेत्वादि

भाष्यं ॥ इदंसत्यमिदंसत्यमिदंसत्यंनसंशयः । कोटिभिःशपथैश्चापिनिर्णीतंदेवतागणैः । अनादिकालतश्चायंशास्त्रार्थोनान्यथाक्वचित् । पुन श्चानंतकालीनएषएवनसंशयः । ज्ञातव्यश्चैषएवार्थःसर्वदैववुभूपुभिः । एवंतुस्थिरयाबुद्ध्याज्ञात्वायास्यथतत्परं । एवंतेहंसरूपेणविष्णुनादेवताग णाः । ब्रह्माद्यावोधिताःसर्वेतथाज्ञात्वापरंगताः । साक्षाद्विष्णुर्हंसरूपउक्त्वैवंतुदिवौकसां । वासुदेवाख्यरूपेणतेनसर्वेहृदिस्थितः । संकर्षणाख्यरू पेणविवेशानंतमेवच । तंध्यायतिसदानंतस्तस्मान्मुक्तिपदेच्छया । प्रद्युम्नाख्येनरूपेणकाममेवविवेशसः । हंसस्तद्ध्यानतोमुक्तिकामइच्छतिसर्वदा । अनिरुद्धाख्यरूपेणसोनिरुद्धंविवेशह । हंसस्तद्ध्यानतोमुक्तिमनिरुद्धस्तथेच्छतीत्यादिब्रह्मांडपुराणे । तत्वनिर्णयगीतायां ॥ ४ ॥

उप० ॥ तदाहुर्यद्ब्रह्मविद्ययासर्वंभविष्यंतोमनुष्यामन्यन्ते । किमुतद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥ १ ॥ ब्रह्मवाइदमग्रआसीत्तदात्मानमे वावेत् । अहंब्रह्मास्मीति ।

गुणंब्रह्मयथाप्रत्यबुध्यत ससएवतथातज्ज्ञानानुसारेणतदभवत् । तत्सर्वंसमग्रंस्वयोग्यानंदादिपूर्णमभवत् । तथाऋषीणांमध्ये योयऋषिःयथातत्प्रबुध्यत तथासएवतदभवत् । तथामनुष्याणांमध्येयोयोमनुष्योयथातत्प्रतिबुध्यते । तथातज्ज्ञानानुसारेणत दभवदितिसंबंधः । श्रुतिरुक्तार्थेप्रमाणमाह ॥ तदिति ॥ तद्ब्रह्मपश्यन्वामदेवोहंमनुरभवंसूर्यश्चेतिसूक्तप्रतिपाद्यमेतद्ब्रह्मणःप्रा गुक्तमर्वजीवाहेयत्वादिगुणजातंप्रतिपेदेव्यजानात् । नकेवलंपूर्वमेवदेवादीनांएतज्ज्ञानेनैवफलप्राप्तिःकिंतर्हीत्यतआह ॥ तदि दमर्पीति ॥ यएतद्यपिइदानीमपि । तदिदंपरंब्रह्म अहमहेयं ब्रह्मपरिपूर्णं अस्मिसर्वदास्तीतिमेय मित्युक्तविशेषणैरेवंतदात्मा नमेव । वेदित्युक्तस्वस्वरूपज्ञत्वरूपविशेषणेनचवेद । सइदंस्वयोग्यंसर्वसमग्रमानंदादिपूर्णमभवत् । इदानींतनस्यदेवकृतविघ्न संभवात्कथंविद्याफलप्राप्तिरित्यतआह ॥ तस्येति ॥ तस्यज्ञानिनोदेवाश्चदेवाअपि अभूत्यैविद्याफलविघाताय नेशतेह तद्वि घातंनकुर्वंतीतियावत् । किमसामर्थ्यादेवनकुर्वंति नेत्याह ॥ आत्मेति ॥ सईश्वरःएषांदेवानां आत्मा कार्येगुनियोक्तृत्वेनते पुव्यातत्वात् । आत्माहियस्मात्तस्मादितिपूर्वेणसंबंधः । विष्णुज्ञानीहिविष्णुप्रियः । अतोदेवानामपिसप्रियः । विष्णुर्हिदेवाना मात्मा ततःप्रीतियोगादेवनविघातंकुर्वंतीतिभावः । एवंसम्यग्ज्ञानिप्रशंसांकृत्वामिथ्याज्ञानिनोनिंदयति ॥ अथेति ॥ योऽन्यां जीवेभ्योविलक्षणांविष्णुरूपांदेवतामन्यांजीवरूपामुपास्ते सनवेद । अहमस्मीति अहेयत्वादिगुणविशिष्टोन्योसौहरिर्निर्गुणरूपो

उप० ॥ तस्मात्तत्सर्वमभवन्तद्योयोदेवानांप्रत्यबुध्यतसएवतदभवत्तथर्षीणांतथामनुष्याणांतद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेऽहंमनुरभवꣳसूर्यश्चे तितदिदमप्येतर्हियएवंवेदाहंब्रह्मास्मीतिसइदꣳसर्वंभवतितस्यहनदेवाश्चनाभूत्याईशते । आत्माह्येषाꣳसभवति । अथयोन्यांदेवतामुपास्तेऽन्योऽसा

199

न्यइत्यपियउपास्तेसनवेद । यद्वा सर्वेभ्योजीवादिभ्योन्यांविलक्षणांदेवतामहेयत्वादिस्वगुणेभ्योप्यन्यायउपास्तेसनवेद । अह
महेयो ऽस्मिअस्तीतिमेयो ऽन्योहरहिरण्यगर्भादिरसौविष्णुरन्यस्तद्गुणरहितइतियावत् । इतिमत्वायोविष्णोरन्यांहरहिरण्यग
र्भादिरूपांअन्योसावन्योहमस्मीत्युपास्तेसनवेदसोऽज्ञानीयथापशुःमनुष्यभोजकज्ञानरहितपशुसदृशः । इदानीमात्माद्युपासंभव
तीत्युक्तमेवज्ञानिनोदेवप्रियत्वमुपपादयितुमाह ॥ एवमिति ॥ सःयएवंवेदेतिपूर्वोक्तःसम्यग्ज्ञानी । देवानामेवंपशुवदित्यर्थः ।
पशुवदित्युक्तेःतस्यापिनिंदाप्रतीतिनिवारणार्थंतदेवविशदयति ॥ यथेति ॥ यथाबहवःपशवोगोरूपाःदोहनादिनामनुष्यंभुज्युः
भोजयेयुरेवमेकैकोज्ञानीपुरुषोदेवान्भुनक्तिभोजयति। ज्ञानिनोदेवभोजकत्वेपिसतत्प्रियइतिकुतइत्यतआह ॥ एकस्मिन्निति ॥
यस्माल्लोकेएकस्मिन्भोजकेपशावदीयमानेसतिप्रियंभवति किमुबहुषु । तस्मात्सुबहुगोरूपेज्ञानिनिदेवानांपराप्रतीतिर्भवतीति
किमुवक्तव्यमितिभावः । नकेवलमथयोऽन्यामित्याद्युक्तार्थवेत्तुर्निंद्यत्वान्नतथाविद्यात् किंतुतज्ज्ञानस्यदेवाप्रियत्वाच्चेत्याह ॥
तस्मादिति ॥ यस्मात्तत्वज्ञानमेवदेवानांप्रियंतस्मात्तत्एषांदेवानांनप्रियं । किंतत् मनुष्याविष्णोरन्यांदेवतांविद्युःउपासीर
न्नितियत्एतद्विष्णोरन्यदेवतोपासनं ॥ ४ ॥ अथभाष्यार्थः ॥ आत्मैवेदमग्रआसीत् पुरुषविधइतिविष्णोःसकाशाच्चतुर्मुखसृ
ष्टिरुक्ता । सैवब्राह्मणजातिसृष्टिरित्यभिप्रायेणतदनुवादपूर्वकंतस्माच्चतुर्मुखात्क्षत्रियादिवर्णभेदेनदेवानांसृष्टिमाह ॥ ब्रह्मवाइ

वन्योऽहमस्मीतिनसवेदयथापशुरेवंसदेवानां । यथाहवैबहवःपशवोमनुष्यंभुञ्ज्युरेवमेकैकःपुरुषोदेवान्भुनक्त्येकस्मिन्नेवपशावादीयमानेप्रियंभव
तिकिमुबहुपुतस्मादेषांतन्नप्रियंयदेतन्मनुष्याविद्युः ॥ ७ ॥ ४ ॥

दमित्यादिना ॥ अप्रतिपत्तिविप्रतिपत्तिनिरासायखंडंप्रमाणेनव्याचष्टे ॥ **विष्णोरित्यादिना** ॥ ब्रह्मवाइदमग्रआसीत्इत्यत्रब्रह्मपदंपरब्रह्मपरमितिप्रतीतिनिरासायव्याचष्टे ॥ **विष्णोरिति** ॥ ब्रह्मशब्दार्थोब्राह्मणजातिःसन्निति । तस्यैवार्थांतरमाह ॥ **ब्रह्मेति** ॥ नवब्रह्मणांसत्त्वाच्चतुर्मुखइत्युक्तं । आसीदित्यस्यार्थोजज्ञइति । इतोवक्ष्यमाणाज्जगतोग्रे । अन्यथाब्रह्मशब्दस्यपरब्रह्मपरत्वेब्राह्मणजातिसृष्टयुक्तिर्नस्यादिति तदेतद्ब्रह्मक्षत्रंविट्शूद्रइत्यनुवादासंभवइतिभावः । तच्छ्रेयोरूपमत्यसृजतक्षत्रमित्येतद्व्याचष्टे ॥ **तस्मादिति** ॥ यान्येतानिदेवत्राक्षत्राणींद्रोवरुणइत्यादिवाक्यंव्याचष्टे ॥ **वायुरिति** ॥ तत्रेशानशब्दस्यार्थोवायुरिति । रुद्रशब्दःसर्वरुद्रपरइतिप्रतीतिनिरासायसदाशिवइत्युक्तं । मृत्युशब्दस्यार्थोऽनंतइति । इंद्रशब्दस्यार्थोगरुडइति । पर्जन्यशब्दस्यार्थःशक्रइति । एतच्चस्वसमकामोपलक्षणमितिभावेनकामश्चेत्युक्तं । सोमशब्दःस्वसमसूर्योपलक्षकइतिभावेनसूर्यस्यापिग्रहणं । एवकारद्वयेनेशानादिशब्दानांप्रसिद्धार्थतांनिवारयति । अन्यथारुद्रेशानशब्दयोःयममृत्युशब्दयोश्चपुनरुक्तिःस्यात् । पर्जन्यस्यद्वादशादित्यांतर्गतस्योत्तरत्रवैश्यत्वस्यवक्ष्यमाणत्वेनक्षत्रियत्वानुपपत्तेश्च । पर्जन्यशब्देनेंद्रग्रहणेचेंद्रशब्देनपुनरुक्त्यापत्तेरितिभावः । एतदप्युपलक्षणपरमितिभावेनैवमाद्याइत्युक्तं । यद्यपिश्रुतिरविवक्षितक्रमात्तथापिप्राधान्यक्रममनुसृत्यैवव्याख्यातं । देवत्रेत्यस्यार्थोदेवानांमध्यइति । देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्योर्बहुलमितिसप्तम्यर्थेत्राप्रत्ययः ।

भाष्यं ॥ विष्णोर्ब्राह्मणजातिःसन्ब्रह्माजज्ञेचतुर्मुखः । इतोग्रेजगतस्तस्मात्क्षत्रजातिरजायत । वायुःसदाशिवोनंतोगरुडःशक्रएवच । कामश्चवरुणश्चैवसोमःसूर्योयमस्तथा । एवमाद्याःक्षत्रियास्तुदेवानांब्रह्मनिर्मिताः ।

श्रेयोरूपमित्यस्यार्थमाह ॥ **श्रेयसीति** ॥ श्रुतिस्तच्छ्रेयोरूपमित्यादिका । क्षत्रजातिःसर्वजातिभ्यःश्रेयसीत्याहेत्यर्थः । तस्मात्क्षत्रात्परंनास्तीत्येतद्व्याचष्टे ॥ **नैवेति** ॥ ब्राह्मणजातेरेवसत्वात्कथमेतदित्यतआह ॥ **ब्रह्मजातिमिति** ॥ तस्माद्ब्राह्मणःक्षत्रियमधस्तादुपास्ते राजसूयइतिवाक्यंव्याख्यातुंउक्तस्यापवादमाह ॥ **ब्राह्मणाचेति** ॥ इदानींतद्वाक्यंव्याचष्टे ॥ **उपास्तइति** ॥ सैषाक्षत्रस्ययोनिर्यद्ब्रह्मेत्यादिवाक्यंयोनिरुत्पत्तिकारणमितिप्रतीतिनिरासायव्याचष्टे ॥ **तथापीति** ॥ यद्यपिराजसूयाश्वमेधयोःब्राह्मणाच्चपरोराजा तथापीत्यर्थः । अनेनयद्यपिराजापरमतांगच्छति तथापियद्ब्रह्मब्राह्मणःसैषाक्षत्रस्ययोनिरुपदेशादिनाज्ञप्तिकारणमितिव्याख्यातंभवति । तस्माद्यद्यपिराजेत्यत्रत्यतस्मादित्यस्यब्रह्मैवांततउपनिश्रयतिस्वांयोनिमितिवाक्येनान्वयमभिप्रेत्यतद्व्याचष्टे ॥ **तस्मादिति** ॥ अंततइत्यस्यार्थोराजसूयांतइति ब्रह्मैवेत्यस्यब्राह्मणानिति उपनिःश्रयतीत्यस्यवंदयीतेति यउएवंहिनस्तिस्वांसयोनिमृच्छतीतिवाक्यंव्याचष्टे ॥ **यइति** ॥ एनंहिनस्तीत्यस्यार्थोब्राह्मणहेति स्वांयोनिमृच्छतीत्यस्यपितृहेति । सपापीयान्भवतियथाश्रेयांसंहिंसित्वेतिवाक्यंव्याचष्टे ॥ **पापीयानेवेति** ॥ ननुयथाश्रेयांसमित्यस्ययंकंचनराजश्रेष्ठमितिप्रतीतेः स्वपितरमितिव्याख्यानंकथमित्यतआह ॥ **स्वतइति** ॥ जनिताचोपनीताचयस्तुविद्यांप्रयच्छति । अन्नदा

भाष्यं ॥ श्रेयसीसर्वजातिभ्यःक्षत्रजातिरितिश्रुतिः । नैवक्षत्रात्पराजातिर्ब्रह्मजातिंविनाक्वचित् । ब्राह्मणाच्चपरोराजाराजसूयाश्वमेधयोः । उपास्तेराजसूयेऽतोब्राह्मणोराजसूयिनं । आसीनआसनाधस्तात्तथापिब्राह्मणोगुरुः । तस्मात्सराजसूयांतेब्राह्मणान्वंदयीतच । यःक्षत्रियोब्राह्मणहा पितृहासप्रकीर्तितः । पापीयानेवभवतिहत्वात्वपितरंयथेतिवामने । स्वतोधिकगुणंहत्वासाक्षाच्चपितरंपुनः ।

ताभयत्रातापंचैतेपितरःस्मृताः । इतिपितृत्वमनेकविधमित्यतःसाक्षादित्युक्तं । स्वतोधिकगुणंसाक्षादेवपितरंहत्वास्थितस्यया वान्दोपस्तावान्दोपोब्राह्मणंहत्वास्थितस्यक्षत्रस्यध्रुवंभवेदित्यर्थः । ईशानशब्दोवायुपरतयाव्याख्यातस्तत्राभिधानमाह ॥ ईशा नइति ॥ मृत्युशब्दस्यानंतपरत्वेअभिधानमाह ॥ मृत्युरिति ॥ इंद्रशब्दस्यगरुडपरत्वेतदाह ॥ इंद्रइति ॥ पर्जन्यशब्दस्य शक्रपरत्वेप्यभिधानमाह ॥ पर्जन्यइति ॥ क्षत्रएवतद्यशोदधातीतिवाक्यंप्रागव्याख्यातत्वात्व्याचष्टे ॥ यशोनिधिरिति ॥ तद्यशः । स्वस्यैवतदभावेकथंतद्दानंस्यादित्यतोयशोनिधिरित्युक्तं । ननुस्वांसयोनिमृच्छतीत्यस्यपितृहेतिव्याख्यानंकथं । स्वां योनिंस्वपितरंऋच्छतिगच्छतीत्यर्थप्रतीतेरित्यतआह ॥ ऋच्छतीति ॥ तत्रधातुंपठति ॥ रीङिति ॥ धातोःधातुव्याख्यानात् ॥ ५ ॥ वसवोरुद्राआदित्याविश्वेदेवामरुतइतिवाक्यंयथाश्रुतार्थप्रतीतिनिरासायव्याचष्टे ॥ विवस्वदिति ॥ द्वादशादित्या नांमध्येविवस्वदिंद्रवरुणानांक्षत्रियत्वस्योक्तत्वाद्विष्णोश्चवर्णशून्यत्वादिदमुक्तं । अदितेस्सुताआदित्याः । एकादशरुद्रेषुरुद्रस्य

भाष्यं ॥ क्षत्रस्यत्राह्मणंहत्वातावान्दोपोभवेद्ध्रुवमित्याग्नेये । ईशानोमारुतःप्राणोवायुर्जिष्णुस्तथैवच । धृष्णुश्चपवमानश्चपवनश्चेतिकथ्यतइ तिशब्दतत्वे। मृत्युःसंकर्षणःशेषःशेतानंतस्तथैवच।वलिर्महाविपश्चेतिभूधरश्चेतिकथ्यतइतिच।इंद्रःसुपर्णोगरुडोमहाभारोधुरंधरः।विश्वजिच्चाप्यवध्यश्च वैनतेयश्चकथ्यतइतिच । पर्जन्योमघवांश्चैवपुरुहूतःपुरंदरः। प्राचीनबर्हिर्हर्यश्वःसोमपामेपमुक्तथेतिच । यशोनिधिर्ब्राह्मणस्तुतद्दातुंक्षत्रियेस्वयं। अथो ब्राह्मणआसीनोराजसूयेहिसेवतइतिप्रत्यये । ऋच्छतिविनाशयति । रीङ्क्षयइतिधातोः ॥ ५ ॥ विवस्वदिंद्रवरुणविष्णुभ्योन्येदितेःसुताः। रुद्रादन्ये तथारुद्रावायोरन्येचटायवः ।

क्षत्रियत्वस्योक्तत्वादन्यइत्युक्तं । मुख्यवायुसहितेषुपंचाशन्मरुत्सुमुख्यवायोःक्षत्रियत्वस्योक्तत्वाद्वायोरन्यइत्याह । अष्टवसुष्वग्नेर्ब्राह्मणत्वस्यवक्ष्यमाणत्वादग्नेरन्यइत्यभिहितं । ब्रह्मवाइदमग्रआसीदेकमेवेतिवाक्यस्यार्थमाह ॥ एकएवेति ॥ ब्रह्मेतिवक्ष्यमाणमत्रापिसंबध्यते । एवकारव्यावर्त्यंदर्शयति ॥ परिवारविवर्जितइति ॥ अनेनतदेकंसन्नव्यभवदितिवाक्यंव्याख्यातं । ननुतच्छ्रेयोरूपमत्यसृजतक्षत्रमित्यादिनापरिवारभूतक्षत्रियदेवानामुत्पत्तेरुक्तत्वात्पुनःसनैवव्यभवदित्युक्तिःकथमित्यतस्तदभिप्रायमाह ॥ वाय्वादीनिति ॥ नैवव्यभवदित्यस्यार्थोऽल्पपरिग्रहइति । सइत्यस्येच्छन्वहुपरिवारमिति । विशमसृजतेत्यस्यार्थो वैश्यानिति । तर्हिंवहुपरिवारस्यापिजातत्वात्सनैवव्यभवत्सशौद्रंवर्णमसृजतेत्युक्तिःकथमित्यतआह ॥ ततइति ॥ शूद्रांश्चेतिसंबंधः । पूषणमियंवैपूषेयंहीदंसर्वंपुष्यतीतिपृथिव्याःशूद्रदेवत्वमुक्तं तदुपलक्षणपरमितिभावेनाह ॥ अश्विनाविति ॥ निर्ऋतिरपिग्राह्यः । इत्युक्तप्रकारेण देववर्णाःदेवेषुब्राह्मणादिवर्णाःस्मृताउक्ताइत्यर्थः । ननुवहुतरपरिवारस्याप्युत्पन्नत्वात्पुनःसनैवव्यभवदित्युक्तिःकथमित्यतस्तदभिप्रायमाह ॥ स्रष्टेति ॥ अस्यजगतोधारणंकथंकेनस्यात् । अस्यसज्जनवर्गस्यगतिर्मोक्षश्चकथंकेनस्यादितिमत्त्वेत्यर्थः। ननुस्वेनवास्वसृष्टदेवैर्वाधारणंगतिश्चस्यादित्यतउक्तंस्रष्टेति तच्छ्रेयोरूपमत्यसृजतधर्ममित्येतद्व्याचष्टे

भाष्यं ॥ अग्नेरन्येचवसवोवैश्याइत्येवकीर्तिताः । एकएवहरेर्जातःपरिवारविवर्जितः । वाय्वादीन्क्षत्रियान्सृष्ट्वापुनरल्पपरिग्रहः । इच्छन्वहुपरीवारंवैश्यान्देवान्ससर्जह । ततोवहुतरानिच्छनशूद्रान्देवान्ससर्जह । अश्विनौपृथिवीचैवकालमृत्यवएवच । शूद्रदेवाःसमुद्दिष्टादेववर्णाइतिस्मृताः । स्रष्टास्वयंसमुद्दिष्टःपालकादेवताइमाः । धारणंकथमस्यस्याद्गतिश्चास्यकथंपरा ।

॥ हरेरिति ॥ भक्त्याख्यधर्माभिमानिरूपमितिगतिसाधनरूपोक्तिः । यद्वाधर्मोनिवृत्तधर्मः। तदुपलक्षणपरमित्यभिप्रायेणभक्ति धर्मरूपमित्युक्तं । अतएवभक्त्यादिरूपिणइतिवक्ष्यति । धैर्यरूपंधैर्याभिमानिरूपमितिधारकरूपोक्तिः । अनेनश्रौतधर्मशब्दोद्वे धाव्याख्यातः । उत्तरत्ररूपद्वयस्याप्युक्तत्वात् । क्षत्ररूपापेक्षयाप्रथमःपुनःशब्दः । गतिसाधनरूपापेक्षयाद्वितीयः । ननुवायोः स्वरूपेणसमत्वात्कथंब्रह्मातंससर्जेत्यतआह ॥ विष्णोरिति ॥ तस्माद्धर्मात्परंनास्तीत्येतद्व्याचष्टे ॥ तस्मादिति ॥ विष्णुरेवा स्तीत्यतउक्तं ॥ ऋतइति ॥ तस्मादित्युक्तंहेतुंदर्शयितुंतदेतत्क्षत्रस्यक्षत्रंयद्धर्मइतिपूर्ववाक्यंव्याचष्टे ॥ शेषादीनामिति ॥ यस्मादितिशेषः । यद्धर्मइतिधर्मशब्दोनपूर्वधर्मशब्दवदुभयार्थः । गतिसाधनरूपस्याथोवलीयानित्यादिनावक्ष्यमाणत्वादितिभा वेनतस्यार्थमाह ॥ धारणादिति ॥ प्रजाःशेषाद्याः अतोवायुर्धर्मशब्दाभिधेयइतिशेषः । अथोवलीयान्वलीयांसंआशंसतेधर्मे णेतिवाक्यंव्याचष्टे॥ अबलोपीति॥ यतोवायोःपरोनास्तिततइत्यर्थः । अनेनाथोइत्युक्तार्थं। धर्मेणेतिधर्मशब्दोनपूर्ववदुभयार्थः धारकरूपस्योक्तत्वादितिभावेनोक्तंविष्णुभक्त्यादिरूपिणइति । युक्तोयोगयुक्तः । यथाराज्ञैवमित्येतद्व्याचष्टे ॥ यथैवेति ॥ महा राजंप्राप्तुंइतिसंबंधः । योवैसधर्मःसत्यंवैतदित्येतद्व्याचष्टे ॥ धर्माभिमानीति ॥ तस्मात्सत्यंवदंतमाहुःधर्मंवदतीतिधर्मंवावदं

भाष्यं ॥ इतिमत्वाहरेर्भक्तिर्धर्मरूपंपुनर्विभुः। प्राणिनांधैर्यरूपंचवायोरूपांतरंपुनः।ससर्जमतिमान्ब्रह्माविष्णोराज्ञापुरःसरः। तस्माद्वायोःपरो नास्तिऋतेविष्णुंसनातनं । शेषादीनांक्षत्रियाणांवायुरेवाधिपःस्मृतः । धारणाद्धर्मइत्याहुर्वायुर्धारयतिप्रजाः । अवलोपिततोवायोर्विष्णुभक्त्यादिरू पिणः । प्राप्तुमिच्छतियुक्तःसन्विष्णुंसुबलवत्तरं । यथैवयुवराजेनमहाराजमभीप्सति । प्राप्तुंधर्माभिमानीसवायुःसत्याभिमानवान् ।

तंसत्यंवदतीतिइत्येतद्व्याचष्टे ॥ तस्मादिति ॥ सत्यवचनंधर्मवचनंवाविप्रलंभादिमूलंनभवतीतिभावेनधर्मविदमित्यादिनाव्यव
हारकारणीभूतंज्ञानंदर्शितं । एतद्ध्येवैतदुभयंभवतीतिवाक्यंव्याचष्टे ॥ वायुरिति ॥ सनैवव्यभवदित्यस्यपुनरल्पपरिग्रहइति
कथंव्याख्यानं। ततस्तस्यार्थस्याप्रतीतेरित्यतस्तद्वाक्यंव्याचष्टे ॥ सनैवेति ॥ यद्विशिष्टत्वंतन्नाभवत्नप्राप्तवानित्यर्थः । यद्विशि
ष्टमितिपाठेयथाश्रुतएवार्थः । तथाचाल्पपरिग्रहइतितदर्थलब्धस्योक्तिरितिभावः । एवंसनैवव्यभवदित्युत्तरवाक्यद्वयमपिपरि
वारबहुतरत्वेनयद्विशिष्टत्वंतन्नाभवदितिमोचकेनधारकेणचयद्विशिष्टत्वंतन्नाभवदित्यपिव्याख्येयं । प्रागुक्तब्राह्मणादिवर्णेषुश्रेष्ठा
नांचतुर्मुखादीनामग्न्याद्याविष्टत्वरूपमाहात्म्यंवक्तुंतदनुवदतिश्रुतिः । तदेतत्ब्रह्मक्षत्रंविट्शूद्रइति । तत्रनिर्देशक्रमेप्राधान्य
क्रमएवनिमित्तमितिभावेनतांश्छब्दांस्तत्रनिर्वक्ति ॥ बृहत्त्वादिति ॥ सर्ववर्णानांमध्येबृहत्त्वाच्छ्रेष्ठत्वात् । ब्राह्मणाःब्रह्मेतिपरि
कीर्तिताइत्यर्थः । क्षत्रियाश्चक्षतत्राणात्क्षत्रमितिकीर्तिताःवैश्याइतिशेषः । वैश्यानांत्रिपूनत्वेनविट्शब्दवाच्यत्वंकथमित्यतआह
॥ ऊनेति ॥ शुभेदत्तइति ॥ शूइत्यस्यार्थःशुभइति । दकारस्यदत्तइति । रइत्यस्यार्थोरमतइति । शुभाधिक्यविवक्षयोकार
दैर्घ्यं। तदग्निनैवदेवेषुब्रह्माभवदितिवाक्यंव्याचष्टे ॥ सइति ॥ देवेषुअग्निनैवसहास्तेतदाविष्टइतियावत्। एवमुत्तरत्रापि। ब्राह्मणो

भाष्यं ॥ तस्मादाहुर्धर्मविदंसत्यंवेत्तेतिवेदिनः । सत्यज्ञमथधर्मज्ञंवायुर्देवोयतस्तयोरितिनारदीये । नैवव्यभवदितिपरिवारबहुत्वेनयद्विशिष्टत्वं
तन्नाभवदित्यर्थः । बृहत्त्वात्सर्ववर्णानांब्राह्मणाःपरिकीर्तिताः । क्षतत्राणात्क्षत्रियाश्चत्रिपूनत्वाद्विशःस्मृताः । ऊनवाचीहिविट्शब्दःशुभेदत्तेत्रिभिर्यतः।
रमतेसततःशूद्रःसब्राह्मण्याभिमानवान् ।

मनुष्येष्वितिवाक्यंव्याचष्टे ॥ **अथनरेष्विति** ॥ अनेनब्रह्माभवदित्येतदत्राप्यनुवर्तनीयमित्युक्तंभवति । क्षत्रियेणक्षत्रियइतिवाक्यंव्याचष्टे ॥ **क्षत्रेति** ॥ देवेपुराजानोदेवराजानःतैः । समासांतोविधिरनित्यइतिभावः । सहैवास्तइत्यत्राप्यनुवर्तते । वैश्येनवैश्यइतिवाक्यंव्याचष्टे ॥ **वैश्यजातीति** ॥ देवेपुवस्वादिभिः । शूद्रेणशूद्रइत्येतद्व्याचष्टे ॥ **शूद्राभिमानीचेति** ॥ देवेतासुमध्येनासत्ययोःपृथिव्यांचास्ते । मानुपेतुशूद्रेष्वेवास्तइतिसंबंधः । अनेनक्षत्रियेणेत्यादिवाक्यत्रयेपिदेवेपुमनुष्येष्वभवदितिपदत्रयस्यचानुवृत्तिः तृतीयैकवचनंचजात्यभिप्रायेणेत्युक्तंभवति । तस्मादग्नावेवदेवेपुलोकमिच्छंतइतिवाक्यंतस्मादित्युक्तहेतुंदर्शयन्व्याचष्टे ॥ **यस्मादिति** ॥ सर्वेपांदेवानांमध्येहविर्हुत्वेतिशेषोक्तिः । ब्राह्मणेमनुष्येष्वितिवाक्यंव्याचष्टे ॥ **तथेति** ॥ विप्रेपुयस्माद्विशेपेणब्रह्मणःसन्निधिर्भवेत् अतोमानुपेविप्रेपुहविर्हुत्वालोकान्प्रार्थयंतीतिसंबंधः । ब्राह्मणइत्येकवचनंजातिविवक्षयेतिभावेनोक्तंविप्रेष्विति । मानुपइत्येकवचनंजातिविवक्षया । अतएवश्रुतौमनुष्येष्वित्युक्तं । अत्रयस्मादितिहेतुवाक्येनैताभ्यांहिरूपाभ्यांब्रह्माभवदितिवाक्यंपूर्वत्रहेतुप्रतिपादकतयाविवृतंभवति । एताभ्यांहिरूपाभ्यामित्येतदेववाक्यंसाध्यांतराध्याहारेणा

भाष्यं ॥ ब्रह्माग्निनासहैवास्तेदेवेष्वथनरेपुच । ब्राह्मणेनसहैवास्तेब्रह्माशुभचतुर्मुखः । क्षत्रजात्यभिमानीतुपवनोदेवराजभिः । सुपर्णशेपरुद्राद्यैर्मानुषेपुचराजभिः । वैश्यजात्यभिमानीचनासिक्योवायुरूर्जितः । वस्वादिभिःसहैवास्तेदेवेष्वथनरेपुच । विड्भिःशूद्राभिमानीचनिर्ऋतिर्देवतासुच । नासत्ययोःपृथिव्यांचशूद्रेष्वेवतुमानुपे । यस्मादग्नौविशेपेणब्रह्मणःसन्निधिर्भवेत् । अतोग्नावेवदेवानांसर्वेपांनियमाद्धविः । हुत्वालोकान्प्रार्थयंतितथाविप्रेपुमानुषे ।

पिन्याचष्टे ॥ **सर्वेति** ॥ ब्रह्मतुष्ट्यापिकिंफलंविष्णुतुष्टेरेवलोकप्राप्तिहेतुत्वेनसंपाद्यत्वादित्यतआह ॥ **तुष्टइति** ॥ लोकान्वैकुंठादीन्अग्निविप्रार्चनमात्रस्यब्रह्मतुष्टिद्वारामोक्षहेतुत्वमितिशंकानिरासायाथयोहवाअस्माल्लोकादितिवाक्यंव्याचष्टे ॥ **अग्नीति** ॥ कर्माकरणेनैवभोजनाभावोपपत्तेरविदितोनभुनक्तीतिकथमित्यतआह ॥ **अग्निविप्रार्चकोपीति** ॥ नैवभोजयेत् लोकानित्यनुवर्तते । यथावेदोवाननूक्तोन्यद्वाकर्माकृतमितिदृष्टांतवाक्यंव्याचष्टे ॥ **यथेति** ॥ ननुकथमयंदृष्टांतः अनधीतस्यवेदस्याकृतस्यचकर्मणोनसर्वथाफलहेतुत्वं । अज्ञकृतकर्मणस्तुस्वर्गादिफलहेतुत्वमितिवैषम्यादित्यतआह ॥ **नसम्यगिति** ॥ अल्पफलदोपिमोक्षरूपसम्यक्फलदोनभवतीत्यर्थः । सर्वथाफलाजनकस्याप्यनधीतवेदादेःसम्यक्फलप्रदत्वाभावोस्तीतिनवैषम्यमितिभावः । नन्वल्पस्याग्निविप्रार्चनमात्रस्यमोक्षहेतुत्वाभावेपिमहतोश्वमेधादेर्मोक्षहेतुत्वंभविष्यतीतिकिंज्ञानेनेत्याशंकानिरासायप्रवृत्तंयदिहवाइतिवाक्यंव्याचष्टे ॥ **यदीति** ॥ आत्मानमेवलोकमुपासीतेतिवाक्यंव्याचष्टे ॥ **आसेति** ॥ उपासीतजानीतच । सयआत्मानमेवेतिवाक्यंव्याचष्टे ॥ **विष्णुरिति** ॥ उपास्तेजानातिच । नन्वेवंक्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइत्यनेनविरोधःस्यादि

भाष्यं ॥ सर्वजात्युत्तमोब्रह्मायतोविप्राग्निसंस्थितः । तस्माद्विप्रांस्तथैवाग्निंतर्पयेद्ब्रह्मतुष्टिकृत् । तुष्टेब्रह्मणिविष्णुश्चतुष्टोलोकान्प्रदास्यति । अग्निविप्रार्चकोप्येवंयोनवेदहरिंपरं । आश्रयंसर्वजीवानांहरिस्तंनैवभोजयेत् । यथाऽनधीतोवेदस्तुयथाकर्माकृतंतथा । नसम्यक्फलदोविष्णुरज्ञातोजगदीश्वरः । यद्यवेत्तामहदपिहयमेधादिकंहरेः । कुर्यात्क्षयिष्णुफलवान्सभवेन्नात्रसंशयः । आप्तकामतयात्मेतियोविष्णुःसमुदीरितः । सर्वाश्रयमुपासीततमेवपुरुषंसुधीः । विष्णुःसर्वाश्रयइतिसदोपास्तेयआत्मवान् । क्षीयंतेनास्यकर्माणि

त्यतआह ॥ शुभान्येवेति ॥ अशुभकर्मनाशविषयंतत् । शुभहानेरपुरुषार्थत्वादितिभावः । अस्माद्ध्येयात्मनइतिवाक्यंतात्प
र्यतोव्याचष्टे ॥ उपासनेति ॥ नन्वेताभ्यांहिरूपाभ्यांब्रह्माभवदित्यस्यैताभ्यांहिब्राह्मणाग्निरूपाभ्यांकर्मकर्त्रधिकरणरूपाभ्यांब्र
ह्माभवदित्यर्थप्रतीतेः । सर्वजात्युत्तमोब्रह्मायतोविप्राग्निसंस्थितइतिव्याख्यानंकथमित्यतस्तद्व्याचष्टे ॥ एताभ्यामिति ॥ सहयो
गतृतीयेतिभावः । पूर्वोक्तंतुतात्पर्यकथनमितिहृदयं । ऐक्यस्यदूषितत्वेननार्थांतरसंभवइतिभावः । ननुस्वंलोकमित्यस्यस्वाख्यंलो
कंपरमात्मानमित्यर्थप्रतीतेःकथमाश्रयंसर्वजीवानामितिव्याख्यानमित्यतआह ॥ स्वंलोकमिति ॥ स्वस्याश्रयःस्वाश्रयइत्युक्त्या
स्वमित्यस्यस्वीयार्थकत्वमुक्तं । स्वाज्ञातयइतिस्वशब्दस्यस्वीयेपिप्रयोगादितिभावः ॥ ९ ॥ आत्मानमेवलोकमित्युक्तंभगवतः
सर्वाश्रयत्वंप्रपंचयति ॥ अथोइति ॥ तत्राथोअयंवाआत्मासर्वेषांभूतानांलोकइतिवाक्यं अयंप्रकृतोगृहीकर्माधिकृतोऽविद्वाना
त्माशरीरेंद्रियविशिष्टः । सर्वेषांदेवादीनांभूतानांलोकोभोग्यइतिव्याख्यातं । तदसत् । आत्मानमेवलोकमुपासीतेत्युपास्यत्वेन
प्रकृतस्यैवात्मनोयंवाआत्मेतिपरामर्शात् । नहिकर्माधिकृतोगृहस्थःपूर्वमात्मशब्देनप्रकृतः येनतत्परामर्शःस्यादितिभावेनखंडंप्र
माणेनव्याचक्षाणःतावदयमात्मेत्यस्यार्थमाह ॥ योयमिति ॥ सर्वेषांभूतानांलोकइत्येतद्व्याचष्टे ॥ सइति ॥ सर्वभूतानांदेवादी

भाष्यं ॥ शुभान्येवकदाचन । उपासनाबलान्मुक्तोभोगान्कर्मफलान्सदा । भुंक्तेविष्णोःसमीपस्थःसर्वदोषविवर्जितइतिब्रह्मांडे । एताभ्यां
रूपाभ्यांसहितंहिब्रह्माभवत् । स्वंलोकंस्वाश्रयं । योयंसर्वेषुजीवेषुनियामकतयास्थितः । सविष्णुरात्मकामत्वादात्मेत्येवोच्यतेबुधैः । सलोक[illegible]
भूतानांसर्वजीवेषुसंस्थितः ।

नां । सयज्जुहोतियद्यजतेतेनदेवानांलोकइतिवाक्यंव्याचष्टे ॥ वैश्वेति ॥ ननुकिमर्थमेतत्करणंदेवताप्रीतिसंपादनार्थमितिचेत्
न । आप्तकामस्यतेनापिप्रयोजनाभावादित्यतउक्तं ॥ कारुण्यादिति ॥ अथयदनुब्रूतेतेनर्षीणामितिवाक्यंअध्ययनकरणमात्रेण
कथंऋषीणामाश्रयइतिशंकांपरिहरन्व्याचष्टे ॥ ऋषीणामिति ॥ चशब्दःपूर्वत्रसंबध्यते ॥ ऋषिसंस्मृतेरिति ॥ योहवाअवि
दितार्षेयच्छंदोदैवतब्राह्मणेनेतिश्रुतेर्ऋषिपरिज्ञानाभावेअध्ययनस्यव्यर्थत्वादितिभावः । श्रुतौपूर्ववाक्यात्सइत्येतदत्रानुवर्ततइतिभा
वेनसइत्यनुवादेनजीवेषुसंनिविष्टइतितत्परामृष्टंदर्शितं । अथयत्पितृभ्योनिमृणातियत्प्रजा मिच्छतेतेनपितॄणामितिवाक्यंव्याचष्टे
॥ पिंडमिति ॥ अथयत्पशुभ्यस्तृणोदकंविंदतितेनपशूनामितिवाक्यंव्याचष्टे ॥ तृणेति ॥ यदेभ्योऽशनंददातितेनमनुष्याणा
मितिवाक्यंव्याचष्टे ॥ अन्नतइति ॥ उभयत्रापिआश्रयोहरिरितिवक्ष्यमाणेनसंबंधः । यदस्यगृहेष्वितिवाक्यंव्याचष्टे ॥ उप
काराचेति ॥ अथोअयंवाआत्मेत्यादिजीवांतर्गतोभगवान्यज्ञादिकर्तृत्वाद्देवाद्याश्रयइत्यर्थत्वेनव्याख्यायश्वेतद्वीपगतमूलरूपे
णापियज्ञादिकर्तृत्वाद्देवाद्याश्रयइत्यर्थत्वेनापिव्याकरोति ॥ यज्ञादीनिति ॥ सर्वलोकानांसर्वभूतानां । विष्णुरेवमूलरूप्येवे

भाष्यं ॥ वैश्वदेवादिकान्होमान्यज्ञांश्चकुरुतेविभुः । कारुण्यात्सर्वदेवेपुतेनदेवाश्रयोहरिः । ऋषीणामाश्रयश्चापिस्वाध्यायेष्वृषिसंस्मृतेः ।
सहिजीवेपुसंविष्टःपिंडंपुत्रजनिंतथा । यत्करोतिपितॄणांचसंश्रयस्ततएवसः । तृणोदकादिदानेनपशूनामन्नतोनृणां । उपकाराच्च सर्वेषांप्राणिनामाश्रयो
हरिः । यज्ञादीन्देवतादीनामन्नत्वेनपुरैवयन् । ब्रह्माद्यैरर्थितःप्रादात्क्षीराब्धेस्तटउत्तरे । अतश्चसर्वलोकानामाश्रयोविष्णुरेवसः ।

त्यर्थः । हैवंविदेसर्वाणिभूतान्यरिष्टिमिच्छंतीतिवाक्यंव्याचष्टे ॥ एवमिति ॥ यथाहवैस्वायलोकायारिष्टिमिच्छेदेवमितिवाक्यं व्याचष्टे ॥ स्वाश्रयस्येति ॥ स्वाश्रयस्यराजादेरितिसंबंधः । तानिराजाद्याश्रितानि । एवमुत्तमस्यहरेःआश्रयत्ववेदिनःतस्या विनाशितामिच्छंतीतिपूर्वेणसंबंधः । तद्वाएतद्विदितंमीमांसितमितिवाक्यंव्याचष्टे ॥ तदेतदिति ॥ एवमथोअयंवाआत्मेत्या दिवाक्यंजीवांतर्गतरूपेणवामूलरूपेणवायज्ञादिकर्तृत्वात्भगवान्देवाद्याश्रयइतिव्याख्यातं । इदानींरामकृष्णाद्यवताररूपेणापि यज्ञादिकर्तृत्वात् देवाद्याश्रयइत्यपितद्वाक्यस्यार्थमभिप्रेत्यतत्रप्रमाणमाह ॥ किंत्विति ॥ हरिर्विधिबद्धतयारामकृष्णादिरूपे णदेवादीन्पूजयामासेतिन किंत्वित्यर्थः । पुराकृतयुगेविष्णुनाम्नैवविष्णोरेव(देवत्वेन)पूजाकरणेननिरंहसोनिर्गतपापान् अतए वनरकादिभयशून्यान्यथेष्टंपदमागतान्दृष्ट्वातमनोदेवत्वेनस्वातंत्र्येणपूजांचअलब्ध्वोत्तरयुगप्रवृत्तिमिच्छद्भिःब्रह्मादिभिर्देवैरसुरज नमोहनायहर्याज्ञयैवसम्यगाराधितइत्यर्थः । नकेवलंब्रह्मादिभिःकिंतुअस्माद्विष्णोरपिश्रैष्ठ्यंदुष्टजनमोहनायविष्ण्वाज्ञयैववांच्छ

भाष्यं ॥ एवंयोवेत्तिविष्णोस्तुसर्वाधारत्वमुत्तमं । सर्वाण्यपिहिभूतानितस्येच्छंत्यविनाशितां । स्वाश्रयस्ययथानित्यमनाशंप्रार्थयंतिहि । राजादेरपितान्येवमुत्तमाश्रयवेदिनः । तदेतद्वासुदेवस्यसर्वाधारत्वमुत्तमं । विदितंसर्ववेदैश्चमीमांसाभिश्चनिश्चितमितिभविष्यत्पर्वणि । किंतुब्रह्मा दिभिर्देवैःपुराद्दृष्ट्वानिरंहसः । निर्भयान्विष्णुनाम्नैवयथेष्टंपदमागतान् । अलब्ध्वाचात्मनःपूजांसम्यगाराधितोहरिः । मयाचास्मादपिश्रैष्ठ्यंवांच्छताहं कृतात्मना । ततःसाक्षाज्जगन्नाथःप्रसन्नोभक्तवत्सलः । अंशांशेनात्मनैवैतान्पूजयामासकेशवः । देवान्पितॄन्द्विजान्हव्यकव्याद्यैःकरुणामयः ।

ताहंकाराभिमानिनाम्याचसम्यगाराधितः । रुद्रवाक्यमिदं । ततआराधनात्प्रसन्नःअंशस्यपुरुषावतारस्यअंशेनरामकृष्णादिरूपेण ॥ १० ॥ नन्वथोअयंवेत्यादेर्भगवान्मूलरूपेणयज्ञादिकर्तृत्वात्देवाद्याश्रयइतिव्याख्यानंतदास्यात् यदिमूलरूपस्यभगवतोगृहस्थत्वंयज्ञादिकर्तृत्वंचप्रामाणिकंस्यात् । तदेवकुतइत्याशंकानिरासायप्रवृत्तमात्मैवेदमग्रआसीदितिखंडंभगवतोगार्हस्थ्ययज्ञादिकर्तृत्वप्रतिपादकतयाप्रमाणेनव्याचष्टे ॥ एकइति ॥ अनेनात्मशब्देनब्रह्मचारीकथ्यतइतिपरव्याख्यानंप्रमाणविरुद्धमित्युक्तंभवति । सोकामयतजायामेस्यादितिवाक्यंव्याचष्टे ॥ जायामिति ॥ नन्वविद्यमानस्येच्छाद्दष्टा । नहिनारायणस्यजायाऽविद्यमाना । महालक्ष्म्याःसदाविद्यमानत्वादित्यतआह ॥ विद्यमानामपीति ॥ स्वरमणस्यतस्यतयाभोगःकादाचित्कइतिभावः । एवंतर्ह्यात्मैवेदमग्रआसीदेकएवेतिकथं । नारायणवत्तज्जायायाअपिअनादिनित्यत्वादित्यतआह ॥ नित्यत्वेपीति ॥ यदायस्मात्तयावियुक्तःतस्मादेकइत्युच्यतइत्यर्थः । अथप्रजायेयेतिवाक्यंव्याचष्टे ॥ देव्येति ॥ अन्येच्छावद्विष्णोरिच्छानमोघेतिभावेनवाक्यशेषमाह ॥ ब्रह्मेति ॥ अथवित्तंमेस्यादितिवाक्यंव्याचष्टे ॥ जातइति ॥ पूर्ववदत्रापिवाक्यशेषमाह ॥ भूतानीति ॥ अथकर्मकुर्वीयेत्येतद्व्याचष्टे ॥ कुर्यामिति ॥ अत्रापिवाक्यशेषमाह ॥ ततस्त्विति ॥ जायादिकामनयायज्ञक

भाष्यं ॥ ततःप्रभृतिपूज्यंतेत्रैलोक्येसचराचरइतिपाद्मे । एकोनारायणःपूर्वमासीज्जायांसऐच्छत । विद्यमानामपिसदाभोगार्थंपुरुषोत्तमः । नित्यत्वेप्युभयोर्देवोवियुक्तस्तुतयायदा । एकइत्युच्यतेदेव्यारममाणःसुतंविभुः । ऐच्छद्ब्रह्मातततोजज्ञेततोदेवाश्चसर्वशः । जातेपुत्रेवित्तमैच्छद्भूतान्यंडंततोभवत् । अंडस्यांतस्त्विमेलोकाःकुर्यांकर्मेतिचैच्छत । ततस्तुकृतवान्यज्ञंस्वस्मैसपुरुषोत्तमः ।

रणेनचप्राप्तापूर्णत्वशंकानिरासायात्मशब्दंनारायणेनिर्वक्ति ॥ आहुरिति ॥ तस्मादप्येतर्हीत्यादिवाक्यंव्याचष्टे ॥ तस्मादिति ॥ नारायणेनकामितत्वादित्यर्थः । एतावंतं जायादिचतुष्टयं । नात्रवित्तशब्देनपूर्ववद्भूतादिकंविवक्षितं । तस्याधुनातनपुरुषाकाम्यत्वादितिभावेनाह ॥ दैवमिति ॥ सुसम्यक्खंज्ञानं आद्यशब्देनवेदादिशास्त्रं । यद्वा । सुखस्याद्यंसुखसाधनंवेदादिशास्त्रमित्यर्थः । मित्राद्यंमित्राद्यशब्देनहिरण्यादिग्रहणं । सयावदप्येतेषामितिवाक्यं सइतितच्छब्देनात्मपरामर्शइतिभ्रांतिनिरासायव्याचष्टे ॥ इदानीमपीति ॥ तस्मान्नारायणेनजायादिचतुष्टयस्यकामितत्वादिदानीमपियःकश्चिदपिपुरुषःएवमेवनारायणवदेवजायादिचतुष्टयंकामयेत् । तत्रयदिकामितवैकल्यंतदाऽकृत्स्नवानपूर्णोहीत्यर्थः । तस्योकृत्स्नतेत्येतदपेक्षितंपूरयन्व्याचष्टे ॥ एकाकिनइति ॥ तस्येत्यस्यार्थः एकाकिनइति । उशब्दार्थोपीति । कृत्स्नतेत्यस्यार्थोवैकल्यमिति । मनएवास्यात्मेतिवाक्यंजडमनःप्रतीतिंनिवारयन्व्याचष्टे ॥ स्वात्मनइति ॥ जडमनसःआत्मत्वचिंतनंचवाधितमितिभावः । वाग्जायेतिवाक्यंपूर्ववद्व्याचष्टे ॥ जायामिति ॥ तादृशींस्वरूपभूतां जडवाक्नित्याविवियुक्तेतिभावः । प्राणःप्रजेत्येतद्व्याचष्टे ॥ बलमिति ॥ तादृक्स्वरूपभूतं स्वंस्वकीयं बलमात्मजंचिंतयेदितिसंबंधः । चक्षुर्मानुषंवित्तंश्रोत्रंदैवमितिवाक्यंव्याचष्टे ॥

भाष्यं ॥ आहुरात्मेतितंदेवंपूर्णत्वाद्विष्णुमव्ययं । तस्माद्द्यापियःकामीसह्येतावंतमिच्छति । दैवंवित्तंसुखाद्यंहिमित्राद्यंमानुषंतुयत् । इदानीमपितस्माद्धिकामयेदेवमेवतु । यःकश्चित्पुरुषोवापितद्वैकल्यादकृत्स्नवान् । एकाकिनोप्यवैकल्यंयथैवस्यात्तथाशृणु । स्वात्मनस्त्वपृथग्यत्तज्ज्ञानरूपंमनःपरं । मुक्तावपिनहेयंयत्तत्स्वात्मेत्येवाचिंतयेत् । जायांतुतादृशींवाचंबलंतादृक्स्वमात्मजं ।

श्रोत्रमिति ॥ तादृक्स्वरूपभूतंआत्मैवास्यकर्मेत्येतद्व्याचष्टे ॥ एवंभूतमिति ॥ नकेवलमेवंचिंतनंफलहेतुःअपितर्हीत्यतआह ॥ एतदिति ॥ आत्मादिकर्मांतंप्रागुक्तंषट्कमित्यर्थः । समर्पयेच्चेत्यन्वयः । सएषपाङ्क्तोयज्ञइत्येतद्व्याचष्टे ॥ एवमिति ॥ द्विविधमपिवित्तमित्येवंपंचभिरितिसंबंधः । पशुपुरुषयोरुक्तपंचकसाध्यत्वाभावात्तत्साधनपंचकंदर्शयन्पाङ्क्तःपशुःपाङ्क्तःपुरुषइत्येतद्व्याचष्टे ॥ पुरुषइति ॥ पाङ्क्तमिदंसर्वंयदिदंकिंचेतिवाक्यंव्याचष्टे ॥ एवंहीति ॥ मात्रादिपंचकेनेत्यर्थः । जडस्योक्तपंचकसाध्यत्वाभावातइदंसर्वमित्येतत्प्राणिनइतिव्याख्यातं । तदिदंसर्वमाप्नोतियएवंवेदेतिवाक्यंव्याचष्टे ॥ एतामिति ॥ यइतिश्रवणात्सइतिग्राह्यं । तदयोग्यानांफलप्रतिपादकतयापितद्व्याचष्टे ॥ ब्राह्मइति ॥ अनेनसर्वशब्दोयथायोग्यार्थकइत्युक्तंभवति । तदयोग्यफलप्रतिपादकतयापितद्व्याचष्टे ॥ तस्यापीति ॥ नकेवलमैहिकंसर्वाधिपत्यादिमात्रफलंकिंत्वित्यतआह ॥ क्रमादिति ॥ मुक्तिंचेतिसंबंधः । नन्विच्छंश्चननविंदेदित्यस्यजायादिचतुष्टयमध्यएवजायामेस्यादित्यादीच्छन्नपिनविंदेदित्यर्थोवाततोन्यत्स्यादितिइच्छन्नपीतिवा । नाद्यः । जायापुत्रवित्तकर्मणांलब्धत्वात् । एतावान्वैकामइतिहेतुवाक्यासंगतेश्च । न

भाष्यं ॥ श्रोत्रंचक्षुश्चतादृग्यद्वित्तंदैवंचमानुषं । एवंभूतांचिंतनंयत्तत्कर्मैत्येवाचिंतयेत् । एतत्पट्कंचहरयेसर्वेशायसमर्पयेत् । एवमात्माप्रियापुत्रोवित्तंद्विविधमित्यपि । पंचभिःक्रियतेयज्ञःपुरुषःपशुरेवच । मातापितृभ्यामन्नेनतयोःपूर्वेणकर्मणा । जन्यस्यकर्मणाचैवसाध्यःपंचभिरेवतु । एवंहिप्राणिनोन्येपिजायंतेनात्रसंशयः । एतामुपासनांकुर्याद्योब्राह्मंपदमाप्यच । सर्वस्यास्यपतिर्भूयाद्विष्णोरेवप्रसादतः । ब्राह्मेपदेत्वयोग्यायेतेदेवपदमाप्नुयुः । तस्याप्ययोग्यालोकस्यभवेयुरधिकप्रियाः । क्रमान्मुक्तिंव्रजेयुश्चकेशवस्यप्रसादतइतिमाहात्म्ये ।

द्वितीयः । ततोन्यस्यकाम्यस्यैवाभावेनेदंमेस्यादितिविशेषेणेच्छायाएवासंभवादित्यतआह ॥ अविशेषेणेति ॥ कुतोनिर्विंदे दित्यतःएतावान्वैकामइतिहेतुवाक्यंव्याचष्टे ॥ ततइति ॥ जायादिचतुष्टयादित्यर्थः । आत्मैवास्यकर्मेत्यात्मशब्दएवंभूतंचिं तनमितिचिंतनार्थोव्याख्यातः । तत्राभिधानमाह ॥ आत्मेति ॥ योहवाअस्माल्लोकात्स्वंलोकमदृष्ट्वाप्रैतिसएनमविदितोनभु क्तीत्यादिकंप्रमाणेनव्याकृतमपिज्ञानस्यमोक्षहेतुत्वेवादिविप्रतिपत्तेःश्रुत्यापिव्याचष्टे ॥ सर्वाश्रयमिति ॥ लोकशब्दार्थस्सर्वा श्रयमिति । स्वमित्यस्यार्थःपितरमिति । स्वशब्दस्यज्ञातिवाचकत्वात् । गुणपूर्णत्ववाचकात्मशब्दपर्यायेवास्वशब्दः । अत एवश्रुतौस्वंलोकमित्येतदात्मानमेवलोकमित्यनूद्यतइतिभावेनस्वशब्दस्यार्थांतरमाह ॥ अधिकंगुणैरिति ॥ पुण्यंपुण्यसाधनं, अग्निविप्रार्चनादि । महदश्वमेधादिकर्म । फलभाक्अनंतफलभागित्यर्थः । अनेनयदिहवाअप्यनेवंवित्महत्पुण्यमित्येतदपि व्याख्यातं । अतएवमहत्पुण्यमित्युक्तं । सयआत्मानमेवलोकमुपास्तइतिवाक्यमुपासनामात्रपरत्वप्रतीतिनिरासायव्याचष्टे ॥ तथेति ॥ अपरोक्षतोज्ञात्वेत्यर्थः । उदितंवेदादिविहितं । अस्माद्ध्येवात्मनइत्यस्यतात्पर्यंप्राप्नोतीति । ननुअथोअयंवात्मेतिवा क्यस्यसलोकःसर्वभूतानांसर्वजीवेषुसंस्थितइतिव्याख्यानमसत् । पश्वादिजीवानांत्रिवर्णेतरेषांचकर्माधिकारस्यैवाभावेनत्रिवर्णे

भाष्यं ॥ अविशेषेणततोन्यत्स्यादितीच्छन्नपिनविंदेत् । ततोन्यस्याभावात् । आत्मामनश्चितनंचशेमुषीबुद्धिरित्यपि । एकार्थवाचकाधीश्चम नीषातपइत्यपीतिशब्दतत्वे । सर्वाश्रयंचपितरंसर्वेषामधिकंगुणैः । अविदित्वामहत्पुण्यंकृत्वानफलभाग्भवेत् । तथाज्ञात्वाहरिंयस्तुकुर्यात्कर्मसदो दितं । अनंतफलवान्सस्यात्प्राप्नोतिचमनोगतमितिबृहच्छ्रुतौ ।

ष्वपियत्यादीनांवैश्वदेवादिकर्माभावेनतदंतस्थस्यपरमात्मनोवैश्वदेवादिकरणेनसर्वभूताश्रयत्वाभावात् । अतोस्मदुक्तरीत्याऽविद्वद्गृहस्थपरमेवेदमित्यंगीकार्यमित्यतस्तद्व्याचष्टे ॥ परमात्मैवेति ॥ एवकारेणगृहस्थव्यवच्छेदः । गृहस्थस्यैवप्रतिपाद्यत्वेउपनिपदोऽब्रह्मविद्यात्वप्रसंगात् । अत्रगृहस्थशब्दोज्ञान्यज्ञान्युभयपरः । उभयोरपिप्रकृतत्वात् । अतएवयोहवाइत्यादिवाक्यव्याख्यानरूपंप्रमाणमुदाहृतं । सर्वजीवेष्वितिवचनंगृहस्थसर्वजीवपरमित्यवधेयं । प्रमाणविरुद्धत्वाच्चनतद्गृहस्थमात्रपरमितिभावेन सयज्जुहोतीत्यादिवाक्यव्याख्यानरूपांश्रुतिंपटति ॥ गृहस्थेति ॥ यदनुब्रूतेतेनर्षीणामितिवाक्यंव्याचष्टे ॥ स्वाध्यायइति ॥ स्वाध्यायेवेदेऋषिसंस्मृत्या स्वाध्यायाध्ययनादित्यर्थः । अथयत्पितृभ्यइत्यस्यार्थःश्राद्धतइति । यदेभ्योशनंददातीत्यस्यार्थोन्नदानतइति । अत्रादिपदमध्याहार्यं । तेनतृणोदकादिसंग्रहः । मनुष्यादेरित्यादिपदेनपश्वादिग्रहणं । तेनयत्पशुभ्यस्तृणोदकंविंदतीत्यादिव्याख्यातं । यथाहवैस्वायलोकायेतिफलवाक्यंव्याचष्टे ॥ अतइति ॥ स्वस्यांतर्यामिणमेवंवेत्तीतिसंबंधः । नकेवलमेतावत् किंतुसुरादीन्पूजयेच्च । यथालोकाःस्वाश्रयस्यराजादेरविनाशमिच्छंति तथासुराःसुराद्याः तस्याविनाशमिच्छंतीतियोजना । तद्वाएतदित्यस्यार्थमाह ॥ तदेतदिति ॥ विष्णोःसर्वाश्रयत्वं । किंचाथोअयंवेत्यादिकंनगृहस्थमात्रपरमितिवक्तुं

भाष्यं ॥ परमात्मैवगृहस्थांतर्यामित्वेनसर्वेषांलोकआश्रयः । गृहस्थांतर्गतोविष्णुर्यज्ञैर्देवाश्रयोभवेत् । स्वाध्यायेऋषिसंस्मृत्याऋषीणांचसदाश्रयः । स्वाध्यायाच्छ्राद्धतश्चैवपितृणामन्नदानतः । मनुष्यादेरतोवेत्तियएवंसततंगृही । स्वस्यांतर्यामिणंविष्णुंसुरादीन्पूजयेत्तथा । तस्याविनाशमिच्छंतिस्वाश्रयस्ययथासुराः । तदेतत्सर्वशास्त्रेपुऋपिसंघैर्विचारितमितिनारायणश्रुतौ ।

शक्यं । गृहस्थस्यमनुष्यस्यदेवाश्रयत्वासंभवादितिभावेनतत्रप्रमाणमाह ॥ नराणामिति ॥ नचैवंब्रह्मविच्चतत्रोच्यतइतिउक्तविरोधः । लोकशब्दस्यमुख्याश्रयत्वरूपार्थविवक्षयाप्रवृत्तत्वात् । भोजकत्वरूपामुख्याश्रयत्वरूपार्थविवक्षयातस्यप्रवृत्तत्वात् । अतएवोक्तंगृहीसुरादीन्पूजयेत्तथेति । पूर्वमात्मैवेदमग्रआसीदित्यादिकमीश्वरपरतयाव्याख्यातं । इदानींचतुर्मुखपरतयापिव्याख्यातुंआत्मशब्दार्थमाह ॥ आत्मेति ॥ कुतइत्यतस्तत्प्रमाणमाह ॥ आत्मात्विति ॥ स्वामीत्यर्थः । एवंसतिआहुरात्मेतितंदेवमित्युक्तश्रुतिविरोधःस्यादित्यतआह ॥ तस्येति ॥ एवमात्मशब्दार्थमुक्त्वाआत्मैवेदमग्रआसीदितिवाक्यार्थमाह ॥ सएवेति ॥ इदमग्रइत्यस्यार्थः प्रथममिति । आसीदित्यस्यार्थोजातइति । वासुदेवादितिशेषोक्तिः । सोकामयतेत्यादिव्याचष्टे ॥ सइति ॥ तदनंतरं भार्याप्राप्त्यनंतरं । तत उभयप्राप्त्यनंतरं । वित्तंमानुषंदैवंच । ततस्त्रितयप्राप्त्यनंतरं । इत्यकामयतेतिसंबंधः । सयावदप्येतेषामित्यादिवाक्यंव्याचष्टे ॥ सोपीति ॥ तस्योक्तस्त्वतेत्यस्यतात्पर्यंपूर्णत्वसिद्ध्यर्थमिति । वाग्जायेत्यादिव्याचष्टे ॥ भार्यामिति ॥ प्राणंवलं चक्षुर्बाह्यंमानुषंवित्तं श्रोत्रंज्ञानाख्यमांतरंदैवंवित्तं अकल्पयदितिसंबंधः । स्वात्मानं

भाष्यं ॥ नराणामाश्रयादेवानदेवानांनराःक्वचित् । नराणांचसुराणांचगतिरेकोजनार्दनइतिच । आत्मातुजगतांब्रह्मातस्यात्माभगवान्हरिः । सएवजातःप्रथमंवासुदेवाच्चतुर्मुखः । सोकामयतभार्यामित्यात्पुत्रस्तदनंतरं । ततोवित्तंममस्याच्चकर्मकुर्यांततोहरेः । इतिसोपिनतान्प्रापततो पूर्णत्वमात्मनः । मत्वापूर्णत्वसिध्यर्थंभार्यांवाचमकल्पयन् । प्राणंपुत्रंतथावित्तंचक्षुर्बाह्यमथांतरं । ज्ञानाख्यंश्रोत्रमेवासौकर्मस्वात्मानमेवतु ।

आत्मा क्षेत्रा

स्वदेहं । देहांतात्पंचकादित्युत्तरत्रानुवादात् । एवंकल्पनेनकिंकृतवानतआह ॥ एवमिति ॥ स्वरूपभूतवागादिभिःबाह्यजा
यादिप्रतिनिधिभूतैःपंचभिर्मानसयज्ञेकृतेबाह्यानिजायापुत्रसानुपदैवविक्तकर्माणिचजातानीत्यर्थत्वेनचवाग्जायेत्यादिवाक्यंव्याच
ष्टे ॥ ततइति ॥ मानसयज्ञादित्यर्थः । अनेनवाक्प्राणइत्यादिप्रथमापंचम्यर्था जन्यजनकयोरभेदोपचारोवेत्युक्तंभवति । दि
शश्चक्षुषःश्रोत्राज्ज्ञानमभूदितिग्राह्यं । तदुपपादयति ॥ तस्येति ॥ आत्मनादेहेन चकारउत्पादयामास । नन्वेवंतर्हिमनए
वास्यात्मेतिवाक्यंव्यर्थं इत्यतोजायाद्युत्पत्तौअसाधारणकारणप्रतिपादनपरंतदितिभावेनतद्व्याचष्टे ॥ पुरेति ॥ अस्यब्रह्मणोजा
याद्युत्पत्तेःपुरामानसयज्ञसंकल्पात्मकंमनएवासीन्नजायादिकमित्यर्थः । किंततइत्यतआह ॥ तेनेति । तेनमनसा मानसयज्ञे
नेतियावत् । इदंपूर्वमपेक्षितंजायादिकर्मपर्यंतंपंचकमवापेतिसंबंधः । पूर्वोक्तंप्रातिस्विकंकारणमाह ॥ देहांतादिति ॥ वा
क्प्राणचक्षुःश्रोत्रदेहरूपात्पंचकाज्जायादिकर्मपर्यंतंपंचकमवापेतिसंबंधः । अत्रदेहशब्दःस्वरूपभूतचिंतनात्मकमनोलक्षणदेहप
रः । एवं कर्मस्वात्मानमित्यत्रात्मनासर्वंकर्माणीत्यत्रचात्मशब्दःपूर्ववत्चिंतनार्थइत्याहुः । तदिदंसर्वमाप्नोतियएवंवेदेतिफल

भाष्यं ॥ एवंसमानसेयज्ञेत्वयजत्केशवंविभुं । ततोऽस्यवाचःसंभूताभार्यातस्यसरस्वती । पुत्रःप्राणादभूद्वायुर्दिशोलोकाहिरण्मयाः ।
तस्यापरोक्षतांयातोभगवान्पुरुषोत्तमः । सर्वविद्याददौताश्चश्रोत्रेणजगृहेविभुः । आत्मनासर्वकर्माणिचकारभगवत्परः । पुरासीन्मनएवास्य
तेनेदंपंचकंविभुः । अवापकर्मपर्यंतंदेहांतात्पंचकात्स्वयं ।

वाक्यंव्याचष्टे ॥ **तस्मादिति** ॥ पंचकंवागादिपंचकं । तथाजायादित्वेनकल्पनयाउपास्तेमानसयज्ञंकरोतीत्यर्थः । इदंसर्वंजा यादिकं । नकेवलमेवमुपासकस्यैहिकजायादिप्राप्तिःफलं किंतर्हीत्यतआह ॥ **मुक्तिश्चेति** ॥ नकेवलमेवंमानसयज्ञमात्रेणमुक्तिः किंतर्हीत्यतआह ॥ **पंचानामिति** ॥ वागादीनामित्यर्थः । नित्यंस्मरतएवास्यमुक्तिरितिसंबंधः । नकेवलमुक्तप्रकारे णवागादिपंचकोपासकस्योक्तफलप्राप्तिः किंत्वित्यतःसएषपाङ्क्तोयज्ञइत्येतद्व्याचष्टे ॥ **सवनत्रयमिति** ॥ यज्ञेइतिपंचकंयो विष्णूपकरणत्वेनोपास्तेसइदंसर्वमाप्स्यतिमुक्तिश्चांतेभवत्यस्येतिसंबंधः । एवमुत्तरत्रापि पाङ्क्तःपशुरित्येतद्व्याचष्टे ॥ **मध्य मिति** ॥ पक्षौपार्श्वभागौपुच्छंचेतिपंचकमितिसंबंधः । पाङ्क्तःपुरुषइत्येतद्व्याचष्टे ॥ **पुरुषइति** ॥ दिक्चतुष्टयवृत्तिचतुर्भाग मित्यर्थः । पाङ्क्तमिदंसर्वंयदिदंकिंचेत्यस्यार्थकथनायसर्वत्रेत्युक्तं । पंचानांदेवतांहरिमित्याद्यत्रापिसंबध्यते ॥ **अथखंडा र्थः** ॥ ब्रह्मचतुर्मुखाख्यंब्रह्मब्राह्मणजातिविशिष्टंसदिदमग्रेएकमेवासीत्जज्ञेविष्णोरितिशेषः । तद्ब्रह्मएकंसत्नव्यभवत्परिवार विशिष्टंनाभवत् । तद्ब्रह्मात्मनःपरिवारमिच्छन्श्रेयोरूपंसर्वजात्युत्तमंक्षत्रंक्षत्रजातिंअत्यसृजत् । तदेवव्यक्तिभेदेनदर्शयति

भाष्यं ॥ तस्माद्यापियोविद्वानुपास्तेपंचकंतथा । विष्णूपकरणत्वेनसइदंसर्वमाप्स्यति । मुक्तिश्चांतेभवत्यस्यपंचानांदेवतांहरिं । नारा यणंवासुदेवंतथासंकर्षणंविभुं । प्रद्युम्नंचानिरुद्धंचस्मरतोनित्यमेवतु । सवनत्रयंतथापूर्वमुत्तरंचेतिपंचकं । यज्ञेमध्यंशिरःपक्षौपुच्छंपशुपुरुषे । चतुर्दिशंतथामध्यमितिसर्वत्रपंचकमितिच ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेबृहद्भाष्येतृतीयेध्यायेपंचममव्याकृतब्राह्मणं ॥ ५ ॥

उप० ॥ ब्रह्मवाइदमग्रआसीदेकमेवतदेकंसन्नव्यभवत्तच्छ्रेयोरूपमत्यसृजतक्षत्रं

॥ यानीति ॥ देवत्रादेवेषु । यान्येतानिप्रसिद्धानिक्षत्राणि । एतानिकानीत्यपेक्षायामाह ॥ इंद्रइति ॥ इंद्रोगरुडः वरुणःप्रसिद्धः सोमः सूर्यश्चग्राह्यः । रुद्रःसदाशिवः पर्जन्यइंद्रः कामोपिग्राह्यः । यमःप्रसिद्धः । मृत्युःशेषः ईशानोवायुरिति यस्मात्क्षत्रंश्रेयोरूपं तस्मात्क्षत्रात्परमुत्तमंब्राह्मणजातिंविनानास्ति । क्वचित्समयेब्राह्मणादप्युत्तमःक्षत्रियः किमुवैश्यादेरितिभावेनब्राह्मणात्क्षत्रियस्योत्तमत्वेलिंगमाह ॥ तस्मादिति ॥ यस्मात्क्षत्रात्परंनास्ति तस्माद्ब्राह्मणःस्वयंगुरुरपि आसीनंक्षत्रियंआसनाधस्तात्राजसूयेउपास्ते किमर्थंइत्यतआह ॥ क्षत्रएवेति ॥ यशोनिधिर्ब्राह्मणस्तत्स्वामी(त्मी)यंयशः तत्तेनाधस्तात्उपासनेन क्षत्रएवदधातिस्थापयति । तस्मैयशोदातुंतथोपास्तइत्यर्थः । स्वयमुत्तमोयशोदातुंअधस्तादुपास्तइतिकुतः अपकृष्टत्वादेवतथोपास्तइतिकिंनस्यादित्यतआह ॥ सैषेति ॥ यद्यपिराजातस्माद्राजसूयकर्तृत्वोपाधेःपरमतांगच्छति तथापियद्ब्रह्म योब्राह्मणः सैपाक्षत्रस्ययोनिरुपदेशादिनाऽधिकारणं गुरुरितियावत् । गुरुत्वज्ञापकमाह ॥ ब्रह्मैवेति ॥ तस्मादित्यनुवर्तते । तस्माद्ब्राह्मणस्यगुरुत्वादेवअंततोराजसूयांते राजास्वांयोनिंस्वगुरुभूतं ब्रह्मब्राह्मण मुपनिश्रयतिवंदयीत । इतोपिब्राह्मणःक्षत्रियादुत्तमइतिभावेनाह ॥ यइति ॥ यःक्षत्रियः एनंब्राह्मणं हिनस्ति सःस्वांयोनिंस्वपितरं ऋच्छतिविनाशयति । ब्राह्मणहं

उप० ॥ यान्येतानिदेवत्राक्षत्राणींद्रोवरुणःसोमोरुद्रःपर्जन्योयमोमृत्युरीशानइतितस्मात्क्षत्रात्परंनास्तितस्माद्ब्राह्मणःक्षत्रियमधस्तादुपास्ते राजसूयेक्षत्रएवतद्यशोदधातिसैपाक्षत्रस्ययोनिर्यद्ब्रह्मतस्माद्यद्यपिराजापरमतांगच्छतिब्रह्मैवांततउपनिःश्रयतिस्वांयोनिंयउएनंहिनस्तिस्वांसयोनिमृच्छति । ॥ ११० ॥

तुरपिक्षत्रियस्यपितृजीवनदर्शनात्कथमेतदित्यतोभिप्रायमाह ॥ सइति ॥ यथाश्रेयांसंगुणाधिकं स्वपितरंहिंसित्वाहत्वा पापीयान्भवति तथाब्राह्मणहाक्षत्रियः पापीयानेवभवति नतुतद्धननेनैतद्धंतेत्यर्थः ॥ ५ ॥ एवंक्षत्रियदेवोत्पत्त्यनंतरं सचतुर्मुखोनैवव्यभवत्परिवारवहुत्वेनयद्विशिष्टंतन्नाभवत् । सबहुपरिवारमिच्छन्विशमसृजत । तदेवव्यक्तिभेदेनदर्शयति ॥ यानीति ॥ यानिदेवजातानिदेवत्वजातिमंति वसवोग्निव्यतिरिक्ताःसप्त रुद्राःसदाशिवव्यतिरिक्ताःदश आदित्याःविवस्वदिंद्रवरुणविष्णुभिन्नाअष्टौ विश्वेदेवाःदश मरुतोवायुभिन्नाःएकोनपंचाशत्संख्याकाः इतिगणशआख्यायंतेएतान्यसृजतेतिसंबंधः । ॥ ६ ॥ एवंक्षत्रियवैश्यदेवोत्पत्तावपि सचतुर्मुखोनैवव्यभवत्परिवारवहुपरत्वेनयद्विशिष्टंतन्नाभवत् । सवहुतरपरिवारेच्छुःशौद्रंवर्णमसृजत । किंतत् । पूषणं कःपूषेत्यतआह ॥ इयमिति ॥ इयंपृथिवी । केननिमित्तेनेत्यतआह ॥ इयंहीति ॥ पुष्यतिपोषयति । उपलक्षणमेतत् अश्विनिर्ऋत्यादयोपिग्राह्याः ॥ ७ ॥ एवंबहुतरपरिवारसंपत्तावपि सनैवव्यभवत् । जगद्धारकेनमोचकेनचयद्विशिष्टंतन्नाभवदित्यर्थः । स्वस्यस्रष्टृत्वात् । उत्पन्नदेवानांचपालकत्वात् । कथमस्यधारणंमोक्षश्चस्यादितिविचिंत्य तद्ब्रह्मचतुर्मुखाख्यं श्रेयोरूपंसर्वश्रेष्ठं धर्मंजगद्धारकंवायोःरूपांतरमत्यसृजत । तथाश्रेयोरूपंमोक्षसाधनंधर्मंविष्णुभक्त्यादिधर्माभिमानिभूतंवायोरेवरूपांतरमत्यसृजत । ननुशेषादिष्वपिविद्यमानंधारकत्वंमोचकत्वंचवायोरेवकुतइत्यतस्ताव

उप० ॥ सपापीयान्भवतियथाश्रेयाꣳसꣲ हिꣳसित्वा ॥५॥ सनैवव्यभवत्सविशमसृजतयान्येतानिदेवजातानिगणशआख्यायंतेवसवोरुद्रा आदित्याविश्वेदेवामरुतइति ॥ ६ ॥ सनैवव्यभवत्सशौद्रंवर्णमसृजतपूषणमियंवैपूषेयꣳहीदꣳसर्वंपुष्यतियदिदंकिंच ॥ ७ ॥ सनैवव्यभवत्तच्छ्रेयोरूपमत्यसृजतधर्मं

द्धारकत्वमुपपादयति ॥ तदेतदिति ॥ यद्धर्मोयोधारकस्तदेतत्क्षत्रस्यक्षत्रियस्यशेषादेःक्षत्रमधिपतिर्यस्मात्तस्माद्धर्माद्वायोः परमुत्तमंविष्णुमृतेनास्ति तथाचतस्यैवधारकत्व(त्वंयुक्त)मितिभावः । इदानींमोचकत्वमुपपादयति ॥ अथोइति ॥ यस्माद्ध र्माद्वयोःपरमुत्तमंनास्ति । अथोतस्मादेवावलीयान्स्वयमेवविष्णुंप्रतिगंतुमसमर्थः धर्मेणविष्णुभक्त्यादिधर्माभिमानिवायुरूपेण वलीयांसंविष्णुं प्राप्तुंआशंसतेइच्छति । अत्रदृष्टांतमाह ॥ यथेति ॥ यथालोकेकश्चिदवलीयान्स्वयमेवराजानंप्रतिगंतुमसमर्थो राज्ञायुवराजेन वलीयांसंमहाराजंप्राप्तुमाशंसतेएवमित्यर्थः । धर्माभिमानिनोवायोःरूपांतरमाह ॥ यइति ॥ सप्रसिद्धो योवैयएव धर्मोधर्माभिमानी एतत्सत्यंवैसत्याभिमान्येवतयोरैक्येलोकप्रसिद्धिंप्रमाणयति ॥ तस्मादिति ॥ हियस्माद्धर्मःस त्यंचेत्युभयमेतदेवप्रकृतवाय्वभिमन्यमानंएवभवतितस्मात्सत्यंवदंतंपुरुषमयंधर्मंवदतीत्याहुः । धर्मंवदंतंचसत्यंवदतीत्याहुः । ज्ञानिनइतियोजना ॥ ८ ॥ प्रागुक्तब्राह्मणादिवर्णेषुश्रेष्ठानांचतुर्मुखादीनांअग्न्याद्याविष्टत्वरूपंमाहात्म्यंवक्तुंतदनुवदति ॥ त देतदिति ॥ ब्रह्मक्षत्रंविट्शूद्रइतियत्तदेतत्प्रागुक्तमित्यर्थः । तत्तत्र ब्रह्मब्राह्मणजात्यभिमानिचतुर्मुखाख्यं देवेषुमध्येऽग्नि नैवसहअभवत्आस्ते । तदंतर्गतमितियावत् । मनुष्येषुमध्येब्राह्मणोभवत्ब्राह्मणांतर्गतोभवत् । देवेषुमनुष्येष्वभवदितिपद त्रयमुत्तरत्राप्यनुवर्तते । क्षत्रियःक्षत्रजात्यभिमानीवायुः देवेषुक्षत्रियेणसुपर्णशेषादिनासह मनुष्येषुक्षत्रियेणराज्ञासह अभवत्

उप० ॥ तदेतत्क्षत्रस्यक्षत्रंयद्धर्मस्तस्माद्धर्मात्परंनास्त्यथोअवलीयान्बलीयाꣳसमाशꣳसतेधर्मेणयथाराज्ञैवंयोवैसधर्मःसत्यंवैतत्तस्मात्सत्यंवदंत माहुर्धर्मंवदतीतिधर्मंवावदंतꣳसत्यंवदतीत्येतद्ध्येवैतदुभयंभवति॥८॥ तदेतद्ब्रह्मक्षत्रंविट्शूद्रस्तदग्निनैवदेवेषुब्रह्माभवद्ब्राह्मणोमनुष्येषुक्षत्रियेणक्षत्रियो

आस्ते तदंतर्गतइतियावत् । वैश्यःवैश्यजात्यभिमानीनासिक्योवायुः देवेषुवैश्येनवस्वादिनासह मनुष्येषुवैश्यैनसहअभवत् तदंतर्गतोभवदित्यर्थः । शूद्रःशूद्राभिमानीनिर्ऋति र्देवेषुशूद्रेणअश्विपृथिव्यादिना मनुष्येषुशूद्रेणसहअभवत्तदंतर्गतोऽभव दित्यर्थः । देवेष्वग्नौ मनुष्येषुब्राह्मणे चतुर्मुखःसन्निहितइत्यत्रज्ञापकमाह ॥ तस्मादिति ॥ हियस्माद्ब्रह्म चतुर्मुखाख्यं ए ताभ्यामेवाग्निब्राह्मणरूपाभ्यांसहितमभवत् । अग्नौब्राह्मणेचसन्निहितमितियावत् । तस्माद्देवेषुमध्येऽग्नावेव मनुष्येषुब्राह्मण एव हविर्हुत्वालोकमिच्छंतिप्रार्थयंते । अग्निब्राह्मणयोर्ब्रह्मणःस्थितत्वात्तौब्रह्मणस्तुष्टिद्वारालोकप्राप्तिकामःसर्वोपिजनस्तर्पये दितिभावेनाप्याह ॥ एताभ्यामिति ॥ अग्निब्राह्मणपूजयैवकिंमोक्षोपिभवति नेतिभावेनाह ॥ अथेति ॥ यद्वाकेचिदग्निब्रा ह्मणपूजयैवमोक्षोभवतीत्याहुःतान्प्रत्याह ॥ अथेति ॥ अथशब्दःपूर्वपक्षव्यावृत्त्यर्थः । योवैयोग्निविप्रार्चकोपि स्वंस्वकीयं लोकमाश्रयंहरिं अदृष्ट्वाअनपरोक्षीकृत्या स्माल्लोकात्देहा त्प्रैति । एनंअग्निविप्रार्चकं सःहरिरविदितोऽदृष्टो नभुनक्तिनामृ तत्वंभोजयति । अत्रदृष्टांतमाह ॥ यथेति ॥ यथावेदोननूक्तोनधातो ईश्वरज्ञानादिजननेन नभुनक्ति अन्यद्वाकर्माकृतंस्व कीयफलदानेननभुनक्तितथेति । तथाप्यश्वमेधादिमहत्कर्मानुष्ठानान्मोक्षोभविष्यतीत्यतआह ॥ यदिहेति ॥ यदिअनेवंवित् परमात्मानपरोक्षज्ञानी महदपिपुण्यंपुण्यसाधनंकर्माश्वमेधादिकंकरोति अस्याज्ञानिनःतत्कर्मअंततःस्वर्गादिफलभोगावसाने

उप० ॥ वैश्येनवैश्यश्शूद्रेणशूद्रस्तस्मादग्नावेवदेवेषुलोकमिच्छंतेब्राह्मणेमनुष्येष्वेताभ्यां हिरूपाभ्यांब्रह्माभवदथयोहवाअस्माल्लोकात्स्वंलोकम दृष्ट्वाप्रैतिसएनमविदितोनभुनक्तियथाऽवेदोवाअननूक्तोन्यद्वाकर्माकृतंयदिहवाअप्यनेवंविन्महत्पुण्यंकर्मकरोतितद्धास्यांततःक्षीयते

क्षीयतएव हनिश्चितं नपुनरक्षयमोक्षसाधनं । तस्मात्मुमुक्षुर्लोकंसर्वाश्रयंआत्मानमेवाप्तकामंविष्णुमेव उपासीतजानीतच । ज्ञानिकृतकर्मणोप्यज्ञकर्मवत्क्षयेकिंज्ञानसंपादनेनेत्यतआह ॥ सयइति ॥ उपास्तेजानातिच कर्मशुभं अशुभस्यक्षयात् । ननुकर्मणआशुतरविनाशित्वान्नक्षीयंतइतिकथमुक्तमित्यतआह ॥ अस्मादिति ॥ हियस्मादेवमुपासनापरोक्षज्ञानाभ्यामुक्तोय द्यत्कामयतेतत्तदस्मादेवापरोक्षीकृतादात्मनस्तत्प्रसादात्कर्मसृजतेतस्मान्नक्षीयतइत्युक्तमिति ॥ ९ ॥ आत्मानमेवलोकमिति यद्भगवतःसर्वाश्रयत्वमुक्तंतत्साधयितुंप्रतिजानीते ॥ अथोइति ॥ अयंप्रकृतगृहस्थांतर्यामीमूलरूपोवा रामकृष्णादिगृहस्था वतारकरूपोवा आत्मापरमात्मा सर्वेषांभूतानांदेवादिपिपीलिकांतानां लोकःआश्रयः । तत्कथमित्यतउपपादयति ॥ सइत्यादि ना॥ सःगृहस्थांतर्गतोमूलरूपोवा रामकृष्णाद्यवताररूपोवापरमात्मा यज्जुहोतिवैश्वदेवादिकंकरोति यद्यजतेअश्वमेधादियज्ञांश्च कुरुते तेनहोमादिना देवानांलोकःआश्रयः देवानुद्दिश्याहुतिप्रक्षेपात् । यदनुब्रूतेस्वाध्यायमधीते तेनऋषीणांलोकः अध्यय नकालेवेदद्रष्टृऋषिसंस्मरणात् । यत्पितृभ्योनिपृणातिपिंडंप्रयच्छति यत्प्रजांपुत्रमिच्छतेउत्पादयतीतियावत् तेनपितृणांलोकः अथयन्मनुष्यान्गृहभूम्यादिदानेनवासयते यच्चैभ्योवसद्भ्यःअर्थिभ्योदानमन्नंददाति तेनमनुष्याणांलोकः । अथयत्पशुभ्य

22

उप० ॥ एवात्मानमेवलोकमुपासीतसयआत्मानमेवलोकमुपास्तेनहास्यकर्मक्षीयतेऽस्माद्ध्येवात्मनोयद्यत्कामयतेतत्तत्सृजते ॥ ९ ॥ अथो अयंवाआत्मासर्वेषांभूतानांलोकःसयज्जुहोतियद्यजतेतेनदेवानांलोकोऽथयदनुब्रूतेतेनर्षीणामथयत्पितृभ्योनिपृणातियत्प्रजामिच्छतेतेनपितॄणामथय न्मनुष्यान्वासयतेयदेभ्योदानं(ऽशनं)ददातितेनमनुष्याणामथयत्पशुभ्यस्तृणोदकंविंदति ॥ ११.. ॥

स्तृणंचोदकंविंदतिलंभयति तेनपशूनांलोकः। अस्यपूर्वोक्तरूपत्रयस्यपरमात्मनोगृहेषु श्वापदाःमार्जारादयो वयांसिपक्षिणःकिं वहुनाऽऽपिपीलिकाभ्यःपिपीलिकांमर्यादीकृत्यवर्तमानाःसर्वेपिप्राणिनोयत्करणवलिपिंडासाधनाद्युपजीवंति तेनतेषांलोकः। एवंस्वांतर्यामिणोमूलरूपस्यावताररूपस्यवाहरेःसर्वाश्रयत्ववेत्तुर्गृहस्थस्यफलमाह ॥ यथेति ॥ यथालोकेस्वायस्वकीयाय लोकाय आश्रयायराजादये अरिष्टिंअविनाशमिच्छंति एवंहएवमेवै वंविदेउक्तप्रकारेणस्वांतर्यामिणःसर्वाश्रयत्वविदेगृहस्थाय सर्वाणि भूतानिदेवादीन्यरिष्टिमिच्छंति। परमात्माधिष्ठानभूतगृहस्थपरत्वेनापीदंयोज्यं। तदालोकशब्दोभोजकत्वार्थोज्ञेयः। एवंविष्णोर्मुख्यतःसर्वाश्रयत्वमुपपाद्यस्वोक्तार्थेप्रमाणमाहश्रुतिः ॥ तद्वाइति ॥ तदेतद्विष्णोर्मुख्यतःसर्वाधारत्वं सर्वैर्वेदैर्विदितंप्रतिपादितं मीमांसितंमीमांसाभिर्निश्चितंच ऋषिसंघैर्विचारितमितिवा ॥ १० ॥ ननुयदिमूलरूपस्यभगवतोगार्हस्थ्यंयज्ञादिकर्तृत्वंचस्यात्तदापूर्वोक्तमुपपन्नंस्यात् तदेवकुतइत्यतआह ॥ आत्मैवेति ॥ इदमग्रेअस्याग्रे आत्मापरिपूर्णोनारायणएवासीत्। किमन्यन्नासीत्वाढमित्याह ॥ एकएवेति ॥ सनारायणोऽकामयत किमिति जायामेस्यादिति सर्वदाविद्यमानामपिजायांरमां। भोगार्थऐच्छत्। अथतयासहभोगानंतरं प्रजायेयपुत्रंजनयिष्यामीत्यकामयत। ततोब्रह्माततोदेवाद्याजाताइतिग्राह्यं। अथपुत्रसंपत्त्यनंतरं वित्तंपंचमहाभूतादिरूपं स्यादित्यकामयत। ततः तज्जातमितिग्राह्यं। अथवित्तसंपत्त्यनंतरं कर्मस्वात्मानमुद्दिश्य

उप० ॥ तेनपशूनांयदस्यगृहेपुश्वापदावया ँस्यापिपीलिकाभ्यउपजीवंतितेनतेषांलोकोयथाहवैस्वायलोकायारिष्टिमिच्छेदेव ँ हैवंविदेसर्वाणिभूतान्यरिष्टिमिच्छंतितद्वाएतद्विदितंमीमा ँसितं ॥ १० ॥ आत्मैवेदमग्रआसीदेकएवसोकामयतजायामेस्यादथप्रजायेयाथवित्तंमेस्यादथकर्मकुर्वीयेत्येतावान्वैकामोनेच्छ ँश्चनातोभूयोविंदेत्

225

226

यज्ञंकुर्वीयेत्यकामयत कृतवांश्च । जायाद्यतिरिक्तमपिकुतोनकामनयालब्धवानित्यतआह ॥ एतावानिति ॥ काम्यतइति
कामोविषयः एतावानेवयतोतोनेच्छत्येव । भूयःपुनस्ततोन्यत्स्यादित्यविशेषेणेच्छन्नपिनविंदेदित्यर्थः । तस्मान्नारायणेनैवंकामि
तत्वादेतर्ह्यपिइदानीमप्येकाकीकामयतेजायामेस्यादथप्रजायेयाथवित्तंदैवंमानुषंचमेस्यादथकर्मकुर्वीयेति । सएवंकामयमानःक
श्चित्पुरुषः एतेषांजायादीनांमध्ये एकैकमपियावन्नप्राप्नोति तावदहमकृत्स्नोपूर्णएवेतिस्वात्मानंमन्यते । तस्यउअकृत्स्नस्यापि
कृत्स्नतापूर्णता वक्ष्यमाणप्रकारेणभवति । यद्वायथास्यात्तथाशृण्वितिशेषः । सूर्यादीन्प्रतिचतुर्मुखादिवाक्यमिदं । मनः
स्वस्वरूपभूतमस्यात्मास्वात्मेतिचिंतयेत् । वाक्स्वरूपभूतवागिंद्रियंजायेतिचिंतयेत् । प्राणःस्वरूपभूतंबलंपुत्रइतिचिंतयेत् ।
चक्षुर्मानुषंवित्तमितिचिंतयेत् । कुतश्चक्षुषाहितन्मानुषवित्तंहिरण्यादिकंविंदतेलभते । श्रोत्रंदैववित्तमितिचिंतयेत् । कुतःश्रोत्रे
णतद्दैवंवित्तंविद्यारूपंशृणोति । अस्यैवंचिंतकस्यात्मैवंभूतंचिंतनमेवकर्मेतिविचिंतयेत् । कुतआत्मनाचिंतनेनहि कर्मकरोति ।
कुतोमनआदीनांआत्मत्वादिचिंतनंकार्यमितिचेत् । प्रसिद्धयज्ञस्यापिआत्मादिपंचकसाध्यत्वादितिभावेनाह ॥ सइति ॥ सए
षःप्रसिद्धो यज्ञःपाङ्क्तःआत्मप्रियापुत्रद्विविधवित्तरूपपंचकसाध्यः । नकेवलंयज्ञएवपाङ्क्तः किंतुयज्ञांगःपशुःपुरुषश्चेतिप्रसं
गादाह ॥ पाङ्क्तइति ॥ पशुपुरुषयोःपांक्तत्वंमातापितृभ्यामित्युक्तप्रकारेणद्रष्टव्यं । नकेवलंयज्ञांगएवपुरुषःपाङ्क्तः । किं

उप० ॥ तस्मादप्येतर्हेकाकीकामयतेजायामेस्यादथप्रजायेयाथवित्तंमेस्यादथकर्मकुर्वीयेतिसयावदप्येतेषामेकैकंनप्राप्नोत्यकृत्स्नएवतावन्मन्यतेतस्यो
कृत्स्नतामनएवास्यात्मावाग्जायाप्राणःप्रजाचक्षुर्मानुषंवित्तंचक्षुषाहितद्विंदतेश्रोत्रंदैवंश्रोत्रेणहितच्छृणोत्यात्मैवास्यकर्मात्मनाहिकर्मकरोतिसएषपांक्तो

तुसर्वोपीत्याह ॥ पाङ्क्तमिति ॥ यदिदंकिंचेदंसर्वंप्राणिजातंपाङ्क्तंपुरुषयदेवपंचकसाध्यमित्यर्थः । एवमुपासकस्यफलमाह॥ तदिदमिति ॥ योब्रह्मपदयोग्यः । एवंमनआदीनांस्वात्मत्वादिकंवेदोपास्तेचिंतयति । सयदिदंकिंचजगत् । तदिदंसर्वमाप्नोतिसर्वस्याधिपतिर्भवतीत्यर्थः । ब्रह्मपदायोग्यस्यतुस्वयोग्यंफलंभवतीतिद्रष्टव्यं । यद्वापूर्वंचतुर्मुखस्यसरस्वतीवायूत्पादकत्वंयज्ञकर्तृत्वंचोक्तं । तत्राख्यायिकामाह ॥ आत्मैवेति ॥ इदमग्रेअस्याग्रेप्रथममेवात्मासर्वजगतांस्वामीचतुर्मुखएववासुदेवात् आसीज्जातः । (सएकएवजातः ।) सब्रह्मामेजायास्यात् । अथजायाप्राप्त्यनंतरं प्रजायेय प्रजामुत्पादयिष्यामि । अथतत्प्राप्त्यनंतरंवित्तंदैवंमानुषंचेतिद्विविधमपिमेस्यात् । अथतत्प्राप्त्यनंतरंकर्मेश्वरमुद्दिश्ययज्ञादिरूपंकुर्वीयेत्यकामयत । एतावानित्यादेः कुर्वीयेत्यंतस्यपूर्वोक्तएवार्थः । सोपिब्रह्माप्येतेषांजायादीनांमध्येएकैकंयावन्नप्राप्नोतिनप्रापतावदकृत्स्नएवापूर्णएवाहमितिमन्यते । तस्यउअकृत्स्नत्वंमन्यमानस्यापिब्रह्मणःकृत्स्नतापूर्णता । एवंभवति । कथंअस्यब्रह्मणःपूर्वमात्मास्वरूपभूतंमनएवासीत् मानसयज्ञंकरिष्यामीतिसमकल्पयदित्यर्थः । तत्रमानसयज्ञेवाक्वागिंद्रियंजायेत्यकल्पयत् । प्राणोबलंप्रजापुत्रइत्यकल्पयत् । चक्षुर्मानुषंवित्तमित्यकल्पयत् । तत्रहेतुश्चक्षुषाहीति । श्रोत्रंदैवंवित्तमित्यकल्पयत् । तत्रहेतुःश्रोत्रेणेति । अस्यस्वस्यात्मैवदेहएवचिंतनंवाकर्मेत्यकल्पयत् । तत्रहेतुरात्मनेति । एवंकल्पनेनविष्णुमुद्दिश्यमानसयज्ञेकृते । तेनवागित्यादिप्रथमापंचम्यर्थे । वाचोजायासरस्वती । प्राणात्प्रजावायु चक्षुषोमानुषंवित्तंहिरण्मयालोकाः । श्रोत्राद्दैवंविद्यारूपं । अस्यात्मनोदेहाच्चिंतनाद्वा

उप० ॥ यज्ञःपांक्तःपशुःपांक्तःपुरुषःपांक्तमिदम्सर्वंयदिदंकिंचतदिदꣳ सर्वमाप्नोतियएवंवेद ॥ ११ ॥ इत्यव्याकृतब्राह्मणं ॥ ५ ॥

कर्मसंभूतमितियोज्यं । नकेवलंवागादीनांविष्णूपकरणतयाजायात्वादिकल्पनेनजायादिप्राप्तिः । किंतुवक्ष्यमाणानुसंधानेनचेतिभावेनाह ॥ **सएषइति** ॥ सएषयज्ञःपाङ्क्तः । सवनत्रयंपूर्वमुत्तरंचेतिपंचकोपेतः । पाङ्क्तःपशुःमध्यंशिरःपक्षौपुच्छंचेति पंचकोपेतः । पाङ्क्तःपुरुषःचतुर्दिशंमध्यमितिपंचकोपेतः । नकेवलमयमेवपुरुषःकिंतुयदिदंकिंचप्राणिजातंइदंसर्वमित्युक्तप्रकारेणपाङ्क्तं । अत्रवागादिपंचकस्यसवनत्रयादिपंचकस्यचनारायणादिदेवताकत्वमप्यनुसंधेयं । तस्माद्द्यापियोधिकारीएवंस्ववागादिपंचकंविष्णूपकरणतयाजायादित्वेननारायणादिदेवताकत्वेनतथायज्ञादौसवनत्रयादिपंचकंनारायणादिदेवताकत्वेन वेदउपास्ते । सःतदिदंसर्वंजायादिकर्मांतपंचकंअवाप्स्यतिअंतेमुक्तिश्चास्यभवतीत्यर्थः ॥ ११ ॥ **इतिपंचमंअव्याकृतब्राह्मणं ॥ ५ ॥ अथभाष्यार्थः** ॥ एवंचतुर्मुखादिदेवतास्रष्टृत्वेनप्रकृतस्यपरमात्मनःसप्तान्नस्रष्टृत्वरूपंमहिमांतरमाह ॥ **यत्सप्तेत्यादिना** ॥ अयंमंत्रःपिताक्षेत्रज्ञोज्ञानकर्माधिकारीमेधयातपसापाङ्क्तेनकर्मणा । सप्तान्नानियत्प्रसिद्धमन्नमजनयत् । तन्मध्येएकमस्यसाधारणमितिपरेणव्याख्यातः । तदसदितिभावेनतावत्पितृशब्दार्थमाह ॥ **पितेति** ॥ योनःपितेतिश्रुतेः । देवतास्रष्टृत्वेनपरमात्मनएवप्रकृततयापितृशब्देनतस्यैवग्राह्यत्वाच्चनतद्व्याख्यानंयुक्तमितिभावः । यदित्यस्ययत्प्रसिद्धमितिव्याख्यानमप्यसत् । एकवचनांतयच्छब्दस्यबहुवचनांतान्नशब्दसामानाधिकरण्यायोगादितिभावेनतदर्थमाह ॥ **यदिति** ॥ तपसेत्यस्यसंतापार्थकताप्रतीतिनिरासायतपःशब्दार्थमाह ॥ **तपसेति** ॥ यद्वापाङ्क्तेनकर्मणेत्यपिव्याख्यानमसत् । प्राणिनांकर्मभा

भाष्यं ॥ पिता विष्णुः । यत् यदा । तपसाप्राणिनांकर्मभिः ।

न्नस्यसप्तान्नोत्पत्तौनिमित्तत्वेनतद्विशेषोपादानेनियामकाभावात्इतिभावेनतपसेत्यस्यार्थमाह ॥ **तपसेति** ॥ मेधयेत्यस्यज्ञानक र्माधिकारिमेधयेत्यपिव्याख्यानमसत् । मेधाशब्दस्यकर्मार्थत्वेतपसेत्यनेनपौनरुक्त्यापातात् । पाङ्क्तोपासनयेत्यर्थइतिनयुक्तं । नहिज्ञानकर्माधिकारिणोजीवस्यपाङ्क्तोपासनंसप्तान्नोत्पत्तौकारणमित्यत्रनियामकमस्तीतिभावेनमेधाशब्दार्थमाह ॥ **मेधयेति** ॥ तपोमेधाशब्दयोरुक्तार्थत्वंकुतइत्यतःउत्तरब्राह्मणेनैवतथाव्याख्यानादितिभावेनाह ॥ **सहीति** ॥ धियास्वेच्छया । प्रमाणविरुद्ध त्वाच्चनपरकीयंव्याख्यानंयुक्तमितिभावेनब्राह्मणंप्रमाणेनव्याचष्टे ॥ **सप्तान्नानीति** ॥ ससर्ज । तदेतिशेषः । त्रीण्यात्मनेकुरु तेतिमंत्रःप्रतीकग्रहणपूर्वकंमनोवाचंप्राणंतान्यात्मनेकुरुतेतिब्राह्मणेनव्याख्यातः । देवाद्यपेक्षयाविष्णोर्हुतादिदेवान्नापेक्षयातद न्नस्यप्राधान्यादादौतत्ब्राह्मणंव्याचष्टे ॥ **तेषामिति** ॥ तेषांमध्ये । ननुमनआदेर्विष्णवद्यत्वाभावात्कथंतदन्नत्वमित्यतःतुष्टि हेतुत्वगुणयोगादितिभावेनाह ॥ **तस्मादिति** ॥ तेषामन्नत्वादेवेत्यर्थः । ननुकथंमनआदीनांविष्णुतुष्टिहेतुत्वेनतदन्नत्वं । तदन्य विषयकमनआदेस्तत्तुष्टिहेतुत्वासंभवात् । इत्यतोनवयमन्यविषयकमनआदीनांविष्णवन्नत्वंब्रूमः । किंतुतद्विषयकाणामेव । अतःकामःसंकल्पोविचिकित्साश्रद्धाश्राद्धधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेत्युक्तमनोवृत्तीनांयःकश्चनशब्दोवागेवेत्युक्तवाच श्चप्राणोपानोव्यानउदानःसमानइत्युक्तप्राणवृत्तीनांचविष्णुविषयकत्वमेवकर्तव्यमित्याह ॥ **तस्मादिति** ॥ तद्वेदनेच्छामित्यनेन

भाष्यं० ॥ मेधयास्वेच्छया।सहीदमन्नंधियाधियाजनयतेकर्मभिरितिवचनात् । सप्तान्नानियदाविष्णुःपरमःपुरुषोविभुः । ससर्जतेषांस्वार्थानि चकारत्रीणिकेशवः । मनोवाचंतथाप्राणंतस्मात्तैस्तुष्टिमेतिसः । तस्मात्तद्भक्तिकामःस्यात्संकल्पंतत्कृतिंप्रति । कुर्यात्तद्वेदनेच्छांचश्रद्धांतस्यगुणोन्नतौ ।

विचिकित्साशब्दः इच्छार्थकइत्युक्तंभवति । तन्निंदीति । विष्णुगुणोन्नतिनिंदकवागादौप्राप्तेपितत्रवैगुणोन्नतावेवधृतिंकुर्यादि त्यर्थः । तन्मतस्यविसर्गार्थेअधृतिमितिसंबंधः । मनोवागादींद्रियाणांअत्रपरमात्मनिनियमेनियमनेसमानंकुर्यादितिसंबंधः । कदाचित्तद्विषयकमनआदेर्नविष्णवन्नत्वं किंत्वित्यतआह ॥ अन्नमिति ॥ मनआदेरुक्तेपुविष्णुभक्त्यादिपुसदैवसुस्थैर्येसति नरस्तन्मनआदिकंविष्णवन्नंकुर्यात् । तस्यैवविष्णुप्रीतिहेतुत्वादितिभावः । ननुविचिकित्साशब्देनेच्छाग्रहणेकामशब्देनपुनरुक्तिः स्यादित्यतस्तयोरर्थभेदमाह ॥ अनेकेति ॥ प्राणादीनांभगवत्कर्मादौविनियोगःकर्तव्यइत्युक्तं । तत्कुतइत्यतःप्राणादीनांव्या पारमाह ॥ **प्राणइति** ॥ निवर्तनेहेतुःबलकर्मावलरूपकर्मकृत्नोस्मदादीनामित्यर्थः । नइत्येतत्प्रवृत्तिहेतुरित्यादावपिसंबध्यते। मनोवाक्प्राणानांविष्णवन्नत्वोपपादनायतत्प्रशंसापरमेतन्मयोवाअयमात्मेत्यादिवाक्यंआत्मशब्दस्यजीवपरत्वंमयटःप्राधान्यार्थ कत्वंचाभिप्रेत्यव्याचष्टे ॥ **मनइति** ॥ मनोवाक्प्राणाभिमानिसांनिध्यप्राधान्यादित्यर्थः । ननुक्तेतमनोवाक्प्राणाभिमानिनः यत्सान्निध्यप्राधान्येनजीवेउन्नतिरित्याशंकापरिहारकत्वेनाप्येतन्मयोवाअयमात्मेतिवाक्यंव्याचष्टे ॥ **ब्रह्मेति** ॥ अनेनायमा

भाष्यं० ॥ अश्रद्धामन्यसाम्येवाप्यन्येषामुन्नतौततः । अन्येपांतत्स्वरूपत्वेप्राकृतत्वादिकेस्यच । धृतिंतन्निंदिवागादौप्राप्तेतत्रैवचाधृतिं । तन्मतस्य विसर्गार्थेह्रियंतद्भक्तिवर्जने । तद्विवेकेधियंचैवतदज्ञानेभियंतथा । वाचंनित्यंतद्गुणोक्तौप्राणंतत्कर्मणिस्फुटं । तदन्यकर्मसंत्यागेचापानंव्यानमस्यच । विरोधिनांनिरासेतत्वथोदानंयोगधारणे । मनोवागादींद्रियाणांसमानंनियमेत्रहि । अन्नमुक्तेपुसुस्थैर्येनरःकुर्यात्सदैवहि । अनेकगोचरेच्छास्यात्काम एकाश्रयेस्थितः । प्राणःप्रवृत्तिहेतुःस्यादपानस्तुनिवर्तने । बलकर्मातथाव्यानउदानोयोगकर्मकृत् । देहेंद्रियमनोनेतासमानोनःस्थितिप्रदः ।

त्माब्रह्मादिरेतन्मयएतदभिमानीतिव्याख्यातं । ननुब्रह्मादीनांमनआद्यभिमानित्वमेवकुतइतिचेत् । विष्णुमनोवाक्प्राणैस्तेषांजातत्वादितिभावेनतदेववाक्यंव्याचष्टे ॥ **मनोवाक्प्राणतइति** ॥ तस्यभगवतः । अनेनायमात्माविरिंचादिरेतन्मयोविष्णुमनआदिजन्यइतिव्याख्यातं । ननुविष्णोर्मनोवाक्प्राणानामेवाभावेकथंब्रह्मादीनांतज्जन्यत्वमित्याशंकापरिहारकतयापितदेववाक्यंव्याचष्टे ॥ **मनोवाक्प्राणरूपइति** ॥ अनेनायमात्मापरमात्माएतन्मयोमनोवाक्प्राणस्वरूपइतिव्याख्यातं । एषांह्यंतमायत्तैप्राहिनइतिवाक्यद्वयंव्याचष्टे ॥ **सर्वस्येति** ॥ आयत्ताप्रतिपादयित्रीत्यर्थः । नयस्यकस्यापिवाक्विष्णवायत्ता । किंतुनोस्माकमितिवेदद्रष्टृवचनं । ननुयःकश्चनशब्दोवागेवेतिवाचःसर्वशब्दात्मकत्वमुक्तं तत्कथंतस्याःविष्णवायत्तत्वं नहिलौकिकवाचोघोषात्मिकायाश्चविष्णवायत्तत्वंइत्यतआह ॥ **सर्वेति** ॥ ननुध्वनिवर्णात्मकसर्वशब्दस्यविष्णुनामकत्वेतदुच्चारयितॄणांसर्वेषामपिविष्णुनामोच्चारणफलंस्यादित्यतआह ॥ **तज्ज्ञानामिति** ॥ चोवधारणे सर्वशब्दस्यविष्णुनामकत्वज्ञानामेवेत्यर्थः । तत्फलंविष्णुनामोच्चारणफलं । मनसाह्येवाभिपश्यतिमनसाशृणोतीतिचाक्षुषश्रौत्रज्ञानंप्रतिमनसःकरणत्वमुक्तं । तदुपलक्षणपरमितिभावेनाह ॥ **सर्वेति** ॥ सर्वबाह्येंद्रियजन्यमित्यर्थः । मनआयत्तंमनोजन्यमित्यर्थः । ननुविषयेंद्रियसंयोगादेवज्ञानोत्पत्तेःमनो

भाष्यं० ॥ मनोवाक्प्राणसान्निध्यप्राधान्यात्तीवउच्यतिः । मनोवाक्प्राणरूपोसौभगवान्पुरुषोत्तमः । मनोवाक्प्राणतस्तस्य जाताअन्येभिमानिनः । ब्रह्मासरस्वतीवायुर्मनआद्यभिमानिनः । सर्वन्तांतस्थितंविष्णुमायत्तावाग्घिनःसदा । सर्ववाचश्चघोषाश्चविष्णोर्नामेतिकीर्तिताः । तज्ज्ञानांतत्फलंच स्याद्ज्ञानांतत्फलंनतु । सर्वेंद्रियमतंज्ञानंमनआयत्तमीरितं ।

जन्यत्वंकुतइत्याशंकापरिहारकत्वेन तस्मादपिपृष्ठतःउपस्पृष्टोमनसाविजानातीतिवाक्यंव्याचष्टे ॥ **पृष्टइति** ॥ विषयेंद्रियसंयोगस्याप्रयोजकतासूचनायस्पृष्टोपीत्यपिपदं । अतएव । सर्वेंद्रियगतज्ञानस्यमनआयत्तत्वादेवेत्यर्थः । अव्याकुलएवेतिसंबंधः । अन्यत्र मनसिव्याकुलेसतीत्यर्थः । उपलक्षणमेतत् । चक्षुरादिसन्निकर्षेपिमनस्यव्याकुलएवेति व्याकुलेतुनवेतीत्यपि ग्राह्यं । अनेनान्यत्रमनाअभूवंनादर्शमित्यादिव्याख्यातंभवति ॥३॥ मनआदेर्लोकाद्यभेदप्रतीतिनिरासायत्रयोलोकाएतएवत्रयो वेदाएतएवदेवाःपितरोमनुष्याएतएवपितामाताप्रजैतएवविज्ञातंविजिज्ञास्यमविज्ञातमेतएवेतिवाक्यानिव्याचष्टे ॥ **लोकेति** ॥ सुरादेःज्ञातादेःपित्रादेश्चेत्यर्थः । तत्रसुरादेरित्यादिपदेनपितृमनुष्यग्रहणं । ज्ञातादेरित्यादिपदेनविजिज्ञास्याविज्ञातग्रहणं । पित्रादेरित्यादिपदेनमातृप्रजाग्रहणं । ब्रह्मासरस्वतीवायुर्मनआद्यभिमानिनःइत्येतदत्राप्यनुवर्तते ॥ १० ॥ तस्यैवाचःपृथिवीशरीरंज्योतीरूपमयमग्निः । अथैतस्यमनसोद्यौःशरीरंज्योतीरूपंअसावादित्यः । अथैतस्यप्राणस्यापःशरीरंज्योतीरूपंअसौचंद्र इतिवाक्यत्रयंव्याचष्टे ॥ **द्युपृथिवीति** ॥ मनोभिमानीब्रह्माद्युसूर्ययो र्वागभिमानीसरस्वतीपृथिव्यग्न्योः । प्राणाभिमानी वायुःअपांसोमस्यचाभिमानीतिविवेकः । सइंद्रःसएषोसपत्नःइत्येतद्व्याचष्टे ॥ **सइंद्रइति** ॥ असपत्नइत्यस्यार्थोशत्रुरिति । नन्वसुराणामेवशत्रूणांसत्वात्कथमशत्रुरित्याशंकापरिहारकतयाद्वितीयोवैसपत्नइत्यस्याभिप्रायमाह ॥ **समवर्जनादिति** ॥

भाष्यं० ॥ पृष्टेस्पृष्टेप्यनेनाहंस्पृष्टइत्येववेत्यतः । मनस्यव्याकुलेन्यत्रनैववेत्तिकथंचन ॥ ३ ॥ लोकवेदसुरज्ञातपित्रादेश्चाभिमानिनः ॥ १० ॥ द्युपृथिव्यग्निसूर्यापांसोमस्याप्यभिमानिनः । सइंद्रःपरमैश्वर्यादशत्रुःसमवर्जनात् । वायुरेतेसमाव्याप्तौब्रह्मेरौगुणतोधिकौ ।

विरोधिसमवर्जनादित्यर्थः । असुराणांचनीचत्वादितिभावः । ननुसरस्वत्याःब्रह्मवायुभ्यांनीचत्वात्कथंतएतेसर्वएवसमाइत्युक्तमित्यतस्तदभिप्रायमाह ॥ एतइति ॥ नचब्रह्मवाय्वोरेवकथंव्याप्तिः । अणुश्चेतिप्राणाणुत्वस्यसमर्थितत्वादितिवाच्यं । देहांतर्गतरूपेणाणुत्वेपिदेहाद्बहिर्वर्तमानेनमुख्यवायुरूपेणव्याप्तेरप्यंगीकारात् । तथाचश्रुतिः । सवाएषप्राणोणुर्महान्नामांतर्वाअणुर्बहिर्महानिति । सर्वेनंताइत्येतद्व्याचष्टे ॥ अनंताश्चेति ॥ किंनिरुपचरितमानंत्यं । नेत्याह ॥ अन्येति ॥ सावधारणमेतत् । कुतइत्यतआह ॥ तेभ्यइति ॥ अथयोहैताननंतानुपास्तइत्यस्यार्थमाह ॥ तेषामिति ॥ ब्रह्मसरस्वतीवायूनामित्यर्थः । एवमन्यनीचव्यपेक्षयानंतगुणवत्त्वेन । सयोहैतानंतवतउपास्तइत्यादेरर्थमाह ॥ अनित्यस्येति ॥ अन्यथातवद्गुणवत्त्वेन । उपासकइत्यनुवर्तते । अनित्यस्यलोकस्योपभोगीतिवुध्याविवेकेनसंबंधः ॥ १३ ॥ सएषसंवत्सरःप्रजापतिःषोडशकलइत्यत्रसंवत्सरःप्रजापतिरित्यनुवादेनषोडशकलत्वंविधीयतइत्यनुपपन्नं । प्रागनुक्तत्वेनानुवादासंभवादितिभावेनात्रवाक्यभेदमंगीकृत्य सएषप्रजापतिरितिवाक्यंव्याचष्टे ॥ वायुरिति ॥ प्रजापतिःप्रजानांपालकइत्यर्थः । सएषषोडशकलइतिवाक्यंचंद्राभेदउच्यतइतिप्रतीतिनिरासायव्याचष्टे ॥ सोसाविति ॥ अवपेक्षयाविशेषतइत्यर्थः । रात्रीणामेवकलात्वमुच्यतइतिप्रतीतिनिरासायतस्यरात्रयएवपंचदशकलाइत्येतद्व्याचष्टे ॥ रात्रिनामकाइति ॥ अस्यवायोःपंचदशकलारात्रिनामकाःप्रोक्ताइतिसंबंधः । तत्रनिमित्तप्रदर्शनपरंसरात्रिभिरेवा

भाष्यं० ॥ अनंताश्चगुणाह्येषामन्यजीवव्यपेक्षया । तेभ्योप्यनंताविष्णोस्तुतेषामेवमुपासकः । नित्यलोकोपभोगीस्यादनित्यस्यान्यथाभवेत् ॥ १३ ॥ वायुःप्रजापतिःसोसौचंद्रसंस्थोविशेषतः । रात्रौरात्रौक्षयादस्यपूरणाद्रात्रिनामकाः ।

चपूर्यतेपचक्षीयतइतिवाक्यंव्याचष्टे ॥ रात्राविति ॥ एकैकस्याःकलायाःएकैकस्यांरात्रौरक्षयपूरणेअभिप्रेत्यरात्रौरात्राविति वीप्सा । ध्रुवैवास्यषोडशीकलेतिवाक्यंव्याचष्टे ॥ ध्रुवैवेति ॥ षोडशीकलास्थितितिसंबंधः । ननुवायोरकलत्वात्कथंषोडश कलत्वोक्तिरित्यतआह ॥ अकलोपीति ॥ सःवायुः । चंद्रस्यस्वाधिष्ठानस्य । तथाषोडशकलइति प्रोच्यते । यद्वावायोराग मापायिकलाशून्यत्वादध्रुवकलावत्त्वंकथमुच्यतइत्यतआह ॥ अकलोपीति ॥ अध्रुवकलारहितोपीत्यर्थः । सोमावास्यामित्या दितस्मादेतांरात्रिंप्राणभृतःप्राणंनविच्छिंद्यात् । इत्यंतंवाक्यंव्याचष्टे ॥ सोमावास्यामिति ॥ अतःप्राणिवधोनकर्तव्यइतिशेषः । अपिकृकलासस्येत्यत्रापिपदोक्तंकमुत्यंस्पष्टयंस्तद्व्याचष्टे ॥ कल्पावेशादिति ॥ सएषसंवत्सरइतिवाक्यंव्याचष्टे ॥ वायुरिति ॥१४॥ योवैसंवत्सरःप्रजापतिःषोडशकलोयमेवसयोयमेवंवित्पुरुषइतिवाक्यं ज्ञानिनावायोरभेदउच्यतइतिप्रतीतिनिरासायव्या चष्टे ॥ सइति ॥ सचंद्रसंस्थोवायुःएवंविदुषिहरेःसत्तासत्त्वप्रदृत्वज्ञानिनीत्यर्थः । तस्यवित्तमेवपंचदशकलाइत्येतद्व्याचष्टे ॥ ॥ अध्रुवाइति ॥ तस्यज्ञानिस्थवायोःधनंइतिसंबंधः । कुतइत्यतःसवित्तेनैवाचपूर्यतेपचक्षीयतइत्येतद्व्याचष्टे ॥ आगमापाय वत्त्वादिति ॥ आत्मैवास्यषोडशीकलेतिवाक्यंव्याचष्टे ॥ ध्रुवावदिति ॥ ध्रुवकलावदित्यर्थः । तदेतन्नभ्यमित्यादिवाक्यंव्या

234

भाष्यं० ॥ कलाःपंचदशप्रोक्ताध्रुवैवास्यतुषोडशी । अकलोपिसचंद्रस्यकलाभिःप्रोच्यतेतथा । सोमावास्यांयतोरात्रौप्राणभृत्सुव्ययवास्थितः । कल्यावेशादल्पदोषःकृकलासवधोपिसन् । तस्यांरात्रौमहान्दोषोदेवतावेशतोभवेत् । वायुःसंवत्सरःप्रोक्तोवत्सोविष्णोरसौयतः । सम्यगेवरतिंयाति ॥ १४ ॥ सएवंविदुषिस्थितः । अध्रुवास्तुकलायद्वत्सौम्यास्तस्ययथाधनं । आगमापायवत्त्वात्तुध्रुवावदेहउच्यते ।

चष्टे ॥ **नाभिस्थानमिति** ॥ चक्रस्येतिपूर्वेणोत्तरेणचसंबध्यते । प्रधिवत्‌अरनम्योदियदित्यर्थः । तस्माद्यद्यपीवाक्यंव्याचष्टे ॥ **सर्वस्वेति** ॥ सर्वज्यानिमित्यस्यार्थःसर्वस्वेति । सर्वस्यपराजयेपीत्यर्थः । अस्मात्पुरुपात्‌ । प्रधिनागादित्यस्यार्थःप्रधिमात्रमिति । प्रधिस्थानीयंवित्तमात्रंगच्छतिनतुशरीरमितिभावः । हिशब्देनाहुरित्युक्तप्रसिद्धिर्दर्शिता । त्रयोलोकाएतएवेत्यादिनोक्तमनआदिमहिमज्ञानिनःप्रयोजनंस्वयमाह ॥ **एवमिति** ॥ देवान्‌ब्रह्मसरस्वतीवायून्‌ । एवंत्रीण्यात्मनेकुरुतेतिमंत्रव्याख्यानरूपब्राह्मणंव्याख्यायइदानीमेकमस्यसाधारणमन्नंइतिमंत्रव्याख्यानरूपमिदमेवास्यतत्साधारणमन्नंयदिदमद्यतइतिवाक्यंव्याचष्टे ॥ **चतुर्थमिति** ॥ सयएतदुपास्तेनसपाप्मनोव्यावर्ततेइतिवाक्यंसाधारणान्नकृत्त्येनभगवदुपासकस्यपापाव्यावृत्तिःकथ्यतइतिप्रतीतिनिरासायव्याचष्टे ॥ **आत्मनइति** ॥ स्वकीयत्वमेवेत्यर्थः । अनेनोपास्तइत्युपशब्दस्यावृत्तिः । ततश्चयएतदन्नंउपस्वसमीपेवर्तमानंस्वकीयमेवेतियावत्‌ । उपास्तेमन्यतइतिव्याख्यातंभवति । पापव्यावृत्तिनिषेधलब्धार्थकथनमक्षयमिति । कुतइत्यतोमिश्रंह्येतदित्युक्तं । नन्वेतदन्नस्यदेवब्रह्मस्वत्वेनमिश्रत्वेपिकुतोयंनसपाप्मनोव्यावर्ततइत्यतआह ॥ **देवेति** ॥ द्वेदेवानभाजयदितिमंत्रोहुतंचप्रहुतंचेतिव्याख्यातः । तदनुपपन्नं । हुतप्रहुतयोरात्माद्यन्नमनआदिवत्साधारणान्नात्पृथगभावात्‌इत्यत

भाष्यं० ॥ नाभिस्थानंशरीरंतुचक्रस्यप्रधिवर्धनं । सर्वस्वविजयेप्यस्मात्प्रधिमात्रंतुगच्छति । एवंमहागुणान्देवानेवंयोवेदपूरुषः । नचैभ्योतिप्रियःकश्चिद्विष्णोरस्तिकदाचन । चतुर्थभोज्यमेवान्नंसर्वसाधारणंस्मृतं । आत्मनोतिसमीपत्वंतस्ययोन्नस्यमन्यते । अक्षयंपापमस्यस्याद्देवब्रह्मस्वहारिणः ।

स्तद्व्याचष्टे ॥ **तदेवेति** ॥ तस्मान्नेष्टियाजुकःस्यादित्येतद्व्याचष्टे ॥ **तस्मादिति** ॥ मंत्रपूतस्यसाधारणान्नस्यदेवान्नत्वादित्यर्थः। मंत्रपूतस्यदेवान्नत्वेपिफलेच्छयाकुतोनयजेदित्यतोभिप्रायमाह ॥ **यदीति** ॥ तेषांदेवानामन्नस्येतिशेषः । इच्छयायागेदेवान्नापहर्तृत्वंकथमित्यतआह ॥ **देवस्वमिति** ॥ येनकारणेनतेनयाजकेनदेवस्वमेवस्वकाम्यार्थेविनियोजितं । तेनकारणेनापहर्तेतिसंबंधः । ननुतेनापिदेवस्वंदेवेष्वेवविनियुज्यतइतिकथंतस्यापहर्तृत्वमितिचेत् । इत्थं । देवस्वंहिदेवेषुतत्प्रीत्यर्थं । युष्मदीयमिदं युष्माभिर्ग्राह्यमेवेतिविनियोजनीयं । नतुस्वकाम्यार्थं । तथात्वेपहर्तृत्वापरिहारादित्यत्रदृष्टांतमाह ॥ **परकीयेनेति** ॥ परकीये नवित्तेनतस्मिंस्तद्वित्तस्वामिनिततोवस्त्रादिग्रहणेनविनिमयेनयथातद्वित्तापहर्तासतथेत्यर्थः । पशुभ्यएकंप्रायच्छदितिमंत्रमनूद्यत देकमन्नंकिमित्याकांक्षायांतत्पयइतिव्याख्यायपयोह्येवाग्रेमनुष्याश्चपशवश्चोपजीवंतीतितदुपपादनंक्रियतेतदनुपपन्नं । उपपादकवाक्येमनुष्यग्रहणस्यासंगतत्वादित्यतोमंत्रगतपशुशब्दोनप्रसिद्धपशुमात्रपरोयेनासंगतिःस्यात् । किंतूभयपरइतिभावेनतंमंत्रंव्याचष्टे ॥ **चतुष्पाद्भ्यइति** ॥ यत्पयइत्यस्यार्थःपयआत्मकमिति । पश्वन्नत्वेनप्रकृतस्यपयसःसंवत्सरंपयसाजुह्वदितिहोमसाधनत्वमुच्यते । तद्यत्किंचित्पयसोनेतिवक्तुमाह ॥ **गोक्षीरमिति** ॥ अत्रपयसि । किंततइत्यतआह ॥ **आत्मनइति** ॥

भाष्यं० ॥ तदेवमंत्रयुक्तत्वाद्बलिहोमात्मनाद्वयं । देवानांप्रददौविष्णुस्तस्मान्नैवेच्छयायजेत् । यदीच्छयायजेत्तेषामपहर्ताभविष्यति । देवस्वं तेनयेनैवकाम्यार्थेविनियोजितं । परकीयेनवित्तेनतस्मिन्विनियमेयथा । चतुष्पाद्भ्योद्विपाद्भ्यश्चपशुभ्यःपयआत्मकं । प्रायच्छत्सप्तमान्नंसगोक्षीरंमुख्यमत्रच । आत्मनेचैवदेवानांतद्धोमार्थंप्रकल्पितं ।

चतुर्थींपष्ठ्यर्थे । देवानांचेतितदेवेतिचैवशब्दसंबंधः । तद्यदिदमाहुःसंवत्सरमित्यादिनामतांतरमनूद्यनतथाविद्यादित्यनेनतद्दूपितमितिव्याख्यानमसत् । मुनिमतस्यदूष्यत्वायोगेनतस्यापिपरिग्राह्यत्वादितिभावेनसंवत्सरंपयसाजुह्वदपपुनर्मृत्युंजयतीतिवाक्यंव्याचष्टे ॥ **संवत्सरमिति** ॥ पयोहोमस्यकथंमुक्तिसाधनत्वं । तमेवंविद्वानितिश्रुतिविरोधादित्यतउक्तंभगवत्तत्वविदुषेति । मुक्तिरानंदाभिवृद्धिलक्षणा । भगवदपरोक्षज्ञानाभावेकिमयंहोमोऽव्यर्थः । नेत्याह ॥ **अदृष्टेति** ॥ नन्वेवंनतथाविद्यादितिकथंनिषेधइतिचेत् । नापक्षांतरस्यापिविद्यमानत्वेनतथैवनविद्यादित्यर्थत्वादितिभावेनस्वयंपक्षांतरमाह ॥ **भगवदिति** ॥ यदहरेवजुहोतितदहःपुनर्मृत्युमपजयत्येवंविद्वानितिपक्षांतरप्रतिपादकंवाक्यंयस्मिन्नहनिपयोहोमःकृतःतदहरेवमुक्त्यभावात्कथमेतदित्याशंकानिरासायव्याचष्टे ॥ **सप्तान्नेति** ॥ ननूभयोरपिभगवदज्ञानित्वाविशेषात्कस्यचित्संवत्सरकृतहोमेनमुक्तिः कस्यचिदेकहोमेनेतिविशेषःकथमित्यतआह ॥ **विशेषज्ञइति** ॥ ज्ञानित्वाविशेषात्कस्यचिद्धोमेनमुक्तिःकस्यचित्विनाहोमेनमुक्तिरितिकथमित्यतोप्याह ॥ **विशेषज्ञइति** ॥ सोयंभगवदिष्टिपूतइति । कस्मात्तानिनक्षीयंतेद्यमानानिसर्वदेतिमंत्रोन्नाक्षयहेतुप्रश्नपरइतिव्याख्यानमसत् । मंत्रेतत्परिहारादर्शनात् । पुरुषोवाऽक्षितिरितिब्राह्मणेनपुरुषएवान्नाक्षयहेतुरितिपरिहारःकथ्यतइतिचेत् न । पुरुषस्यान्नक्षयहेतुत्वेनतदक्षयहेतुत्वायोगात् । पुनःपुनरन्नस्रष्टृत्वायोगाच्चेतिभावेनपुरुषोत्राअक्षितिरितिब्राह्मणवा 231

भाष्यं० ॥ संवत्सरंगोपयसानेनहोमोहरेःकृतः । भगवत्तत्वविदुषातस्यमुक्तिर्नसंशयः । अदृष्टभगवद्रूपस्यैतद्दर्शनकारणं । भगवद्दृष्टिपूतस्तु विनाहोमेनमुच्यते । सप्तान्नसृष्टितत्वज्ञस्त्वेकहोमेनमुच्यते । विशेषज्ञोयतःसोयंभगवत्तत्ववेदने ।

क्यस्यकस्मात्तानिनक्षीयंतइतिवाक्यव्याख्यानरूपत्वसिध्यर्थमंत्रगतंकस्मादित्यस्यार्थमाह ॥ **कोनामेति** ॥ कस्मैदेवायहविषा विधेमेत्यत्रहिरण्यगर्भवाचककशब्दस्यसर्वनामसंज्ञावदत्रापिद्रष्टव्यं । तथाचभगवानेवाद्यमानान्नाक्षयहेतुरितिमंत्रार्थइतिभावः। ननुतर्हिपुरुषोवाऽक्षितिरितिकथंव्याख्यानं तत्रपुरुषस्यानाशप्रतीतेरित्यतःपुरुषोवाक्षितिःसहीदमन्नंपुनःपुनर्जनयतिइतिवाक्य द्वयमुपपाद्योपपादकभावप्रतीत्यर्थंव्यत्यासेनव्याचष्टे ॥ **प्राणिनामिति** ॥ सहीदमन्नंधियाधियाजनयतेकर्मभिरित्युत्तरवाक्या नुसारेण प्राणिनांकर्मभिःस्वेच्छयाचेत्युक्तं । तस्मादन्नाक्षयहेतुत्वादेव । योवैतामक्षितिंवेदसोन्नमत्तिप्रतीकेनेतिमंत्रंव्याचष्टे ॥ **यएवमिति** ॥ एवमन्नाक्षयहेतुत्वेन । प्रतीकेनेत्यस्यमुखेनेत्यर्थउक्तोब्राह्मणेतस्याभिप्रायमाह ॥ **अप्रयत्नेनेति** ॥ सदेवानपि गच्छति सऊर्जमुपगच्छतीतिवाक्यंयःकश्चित्सप्तान्नोपासकोदेवत्वमूर्जमपिप्राप्नोतीतिनिरासायव्याचष्टे ॥ **सप्तान्नेति** ॥ गुणाः देवान्नस्य तदपिऊर्जमपीतिदेवत्वसमुच्चयार्थोपिशब्दः । अनेनश्रुतौदेवानपीत्यपिशब्दःऊर्जमित्यत्रसंबध्यतइत्युक्तंभवति । एतदुपासनयामनुष्यस्याप्युक्तफलप्राप्तिःकिंनस्यादित्यतआह ॥ **नेति** ॥ ननूपासनाभावेपिज्ञानमात्रंसंभवतीतिचेत्सत्यं तेनाप्यु

भाष्यं० ॥ कोनामभगवान्विष्णुःपरमानंदरूपतः । प्राणिनांकर्मभिश्चैवस्वेच्छयाचपुनःपुनः । सप्तान्नंसृजतेयस्मादन्नानामक्षयस्ततः । तस्मादक्षितिनामासौभगवान्पुरुषोत्तमः । यएवमक्षितिंवेदभगवंतंसनातनं । अप्रयत्नेनभोगाःस्युर्यथेष्टास्तस्यसर्वदा । सप्तान्नोपासनंयस्माद्देवानांयोग्यमुत्तमं । तस्माद्देवत्वमाप्नोतियोग्योदेवपदस्यवः । ऊर्जदेवान्नमुद्दिष्टंऊर्जितास्तुगुणास्तथा । तदप्याप्नोतिननरायोग्याएतदुपासने ।

कफलाभावेपिफलांतरंसंभवतीतिभावेनसदेवानपिगच्छतीतिवाक्यंव्याचष्टे ॥ **ज्ञानमात्रेणेति** ॥ १६ ॥ त्वंब्रह्मेत्यत्रपित्रापुत्र
स्यपरब्रह्माभेदउच्यतइतिप्रतीतिनिरासार्थंब्रह्मशब्दार्थमाह ॥ **ब्रह्मेतीति** ॥ उच्यतइतिशेषः । अन्यथ. यद्वैकिंचानूक्तंतस्यसर्व
स्यब्रह्मेत्येकतेत्युत्तरवाक्यविरोधइतिभावः । तथापित्वंब्रह्मेतिकथं पुत्रस्यवेदाभेदाभावात् । अतएवत्वंयज्ञःत्वंलोकःइत्येतदप्य
नुपपन्नमित्यतआह ॥ **स्वाध्यायेति** ॥ सएवंवित्सर्वेषांभूतानामात्माभवतीतिवाक्यंज्ञानिनःसर्वाभेदउच्यतइतिप्रतीतिनिरासा
यव्याचष्टे ॥ **आत्मेति** ॥ ननुयथापित्रादिलोकजयोनामतल्लोकप्राप्तिः एवंमनुष्यलोकजयोपितल्लोकप्राप्तिरेव साचस्वतःसिद्धे
तिकथंपुत्रेणैवसाध्येत्यतआह ॥ **पुनरिति** ॥ नन्वस्मिन्जन्मनिकृतेनकर्मणाकर्मकरणयोग्यजन्मांतरप्राप्तौतत्राप्यनुष्ठितकर्मणा
पुनःपुनस्तादृशजन्मांतरप्राप्तौस्वस्यैवपुनःपुनःकर्मकरणलक्षणमानुष्यजयसंभवेनपुत्रेणैवजय्योनान्येनकर्मणेतिकथमुच्यतइत्यत
स्तदभिप्रायमाह ॥ **जन्मांतरमिति** ॥ स्वस्यैवजन्मांतरेणकर्मणापुनःपुनःकर्मकरणसंभवेपिजन्मांतरंविनातत्पुनःपुनःकर्मक
रणंकर्मणानैवयुज्यते । पुत्रेणोपदिष्टयाविद्ययावाशिष्येणेतियावत् । जन्मांतरंविनैवनित्यंतत्पुनःपुनःकर्मकरणंयुज्यतइत्यर्थः ।
अनेनश्रुतौपुत्रशब्दःशिष्यस्यापिसंग्राहकइत्युक्तंभवति । किंपुत्रशिष्ययोःसमुचितयोरेवपुनःपुनःकर्मकरणहेतुत्वंनेत्याह ॥ **एकैके
नापीति** ॥ ननुपुत्रशिष्ययोःस्वभिन्नत्वात्कथंताभ्यांस्वस्यपुनःपुनःकर्मकरण मित्यतःस्वकृतकर्मणेवपुत्रादिकृतकर्मणापिफल

भाष्यं० ॥ ज्ञानमात्रेणदेवानांसामीप्यंप्राप्नुवंतितइतिनारायणीये ॥ १६ ॥ ब्रह्मेतिवेदः । स्वाध्यायादिकर्तृत्वात्पुत्रस्त्वंब्रह्मेत्याद्युच्यते । आ
त्माभवतिव्यापकोभवति । पुनःपुनःकर्मकृतिर्मानुष्यजयउच्यते । जन्मांतरंविनानैवकर्मणातत्तुयुज्यते । पुत्रेणविद्ययानित्यमेकैकेनापियुज्यते ।

प्राप्तिरेवेत्याह ॥ **अष्टभागेति** ॥ सप्तान्नवित्पितागुरुर्वापुत्रकृतशिष्यकृतकर्मफलंसर्वंलभेदित्यर्थः । अनेनैतस्मात्सर्वंसन्नयमि
तोभुनजदितीतिवाक्यंव्याख्यातं । अथैभिरेवप्राणैःसहपुत्रमाविशतीत्यादिपुत्रोमुंचतीत्यंतंवाक्यंव्याचष्टे ॥ **पुत्रमिति** ॥ सप्ता
न्नविदितिवर्तते । अंशरूपसामर्थ्यादित्यर्थः । अक्षणयेत्यस्यच्छिद्रेतिव्याख्यानमुपपादयति ॥ **अक्षणमिति** ॥ अक्षणंच्छिद्रमि
तिपर्यायोयस्मात्तस्माच्छिद्रेतिव्याख्यानमुपपन्नमित्यर्थः । तस्मादेनंपुत्रोमुंचतितस्मात्पुत्रोनामेतिवाक्यंव्याचष्टे ॥ **पुत्रइति** ॥
तत्तस्मादक्षणकर्मणः । नन्वक्षणकर्मणः त्राणतःपुत्रशब्दवाच्यत्वंकथमित्यतआह ॥ **अक्षणंचपुदितीति** ॥ अक्षणंपुदितियतः
पर्यायस्तस्मात्पुतस्त्राणतःपुत्रइत्युच्यतइत्यर्थः ॥ १७ ॥ अथैनमेतेदेवाआविशंतीतिवागादीनांदेवत्वमुक्त्वादैवीवाक्दैवंमनःदै
वःप्राणइतिदेवसंबंधित्वमुच्यते तद्घटयति ॥ **पृथिव्यादीति** ॥ आदिशब्देनाग्निद्यादित्याप्चंद्रमसांग्रहणं । अनेनपृथिव्यैचैन
मग्नेश्च दिवश्चैनमादित्याच्च अद्भ्यश्चैनंचंद्रमसश्चेतिवाक्यंव्याख्यातं । संसारदशायांपृथिव्यादिस्थिताःसरस्वत्यादिकामुक्ताः ।
देवेषुसप्तान्नविन्मुक्तदेवेषु । यद्वापृथिव्यादिशब्देनमुक्ताःपृथिव्यादिदेवताःग्राह्याः । अत्रमुक्तब्रह्मणएवरूपांतरेणेतरमुक्तमनः
प्राणप्रवेशापेक्षयात्रयइत्युक्तं । सादैवीवाग्ययायद्यदेववदतितत्तद्भवतीतिवाक्यंव्याचष्टे ॥ **यदावेशादिति** ॥ तद्वैदैवंमनोये

भाष्यं० ॥ उभाभ्यांकिमुवक्तव्यमष्टभागफलंसुतात् । विद्ययात्वर्धमाप्नोतिसर्वंसप्तान्नविल्लभेत् । पुत्रमाविश्यसामर्थ्यान्मुच्यतेच्छिद्रकर्मणः ।
अक्षणंचपुदितिच्छिद्रंपुत्रस्तत्राणतोभवेत् ॥ १७ ॥ पृथिव्यादिस्थितादेवाःसरस्वत्यादिकास्त्रयः । अधिकावेशतोदेवेष्वतोदैवाइतिस्मृताः । यदावेशा
त्सर्वमुक्तंसत्यंदैवीतुवाग्विसा ।

नानंद्येवभवत्यथोनशोचतीत्येतद्व्याचष्टे ॥ **यदावेशान्नेति** ॥ मुक्तोदुःखीनस्यात्‌आनंदीचस्यात्‌तदितिग्राह्यं । **सर्वैदैवःप्राणः** यःसंचरंश्चासंचरंश्चनव्यथतेथोनरिष्यतीत्येतद्व्याचष्टे ॥ **यदावेशात्सर्वकार्येष्विति** ॥ अम्लानोमुक्तः । अम्लानत्वंकुतइत्यतउक्तंसंचरणादिसर्वसामर्थ्ययुक्तइति । नरिष्यतीत्यस्यार्थोनम्रीयेतेति । यदावेशादित्याद्युक्तमुपसंहरन्नथैनमेतेदेवाइतिप्रतिज्ञावाक्यतात्पर्यमाह ॥**एवमिति**॥ एवंत्रिभिराविष्टइतिसंबंधः । सयएवंवित्सर्वेषांभूतानामात्माभवतीतिवाक्यंव्याचष्टे ॥ **सर्वेष्विति** ॥ सप्तान्नविदित्यनुवर्तते । तर्हिसर्वेषांदुःखेतस्यापिदुःखंस्यादित्याशंकापरिहारकतयायदुकिंचेमाइतिवाक्यंव्याचष्टे ॥ **नदुःखीति** ॥ अमुंसप्तान्नविद्योपासनेनप्रेरकतयासर्वप्राणिस्थितं प्राणिकृतंपुण्यमेवगच्छतिनपापमित्यत्रनहवैदेवानितिकथंहेतुः देवानांपापास्पर्शेपिसर्वप्राणिस्थस्योपासकस्यतत्स्पर्शोपपत्तेरित्याशंकांपरिहरन्नहवाइतिवाक्यंव्याचष्टे ॥ **सप्तान्नेति** ॥ तस्योपासकस्य । पापंनत्विति पुण्यमेवेत्यवधारणार्थः । ननुयदिसप्तान्नोपासकादेवाएव तर्हितेषांमृत्यनंतरंपुत्राणामेवानवस्थानेन तेभ्यःफलाभावात्कथंसयदैवंविदस्माल्लोकात्प्रेत्येत्यादिनापुत्रोमुंचतीत्यंतेनतेषांमृत्यनंतरंपुत्रतःफलमुच्यतइत्यतआह ॥ **देवाइति** ॥ देवाःअंशैर्मनुष्यतामाप्तायेतेषामेवपुत्रतःफलंस्यात्पुत्रेजीवतितेषांमरणसंभवात्‌ । नतुमूलरूपेणदेवानामेव । पुत्रेजीवतितेषांमर

भाष्यं ॥ यदावेशान्नदुःखीस्यादानंदीदैवतंमनः । यदावेशात्सर्वकार्येष्वम्लानःप्राणएवसः । सर्वसामर्थ्ययुक्तःस्यान्नम्रियेतकदाचन । एवंसप्तान्नविन्मुक्तस्त्रिभिराविष्टएवतु । सर्वेपुन्याप्तिमन्वेतिनदुःखीप्राणिपुस्थितः । सप्तान्नोपासनायोग्यादेवाएकांततोहियत्‌ । देवांश्चपापंनाप्नोतितस्मात्पापंनतस्यतु । देवामनुष्यतामंशैराप्तायेपुत्रतःफलं ।

णासंभवादितिभावः । एतदपिनसर्वेदेत्याह ॥ आमुक्तेरिति ॥ कुतइत्यतआह ॥ मुक्तानामिति ॥ पुत्रतःफलमितिवर्तते। यदिसप्तान्नोपासकस्यमुक्तौपुत्रतःफलंनतर्हिकिंतस्यमुक्तौतद्विद्यासाध्यफलमित्यतआह ॥ मुक्तानामिति ॥ सप्तान्नविद्याफलतयेतिशेषः । ननुवायुरेवसर्वाणिभूतान्यवतिनतुतानिवायुंअवंति तत्कथमुच्यते सयथैतांदेवतांसर्वाणिभूतान्यवंतीति । किंच सप्तान्नविद्यावेत्तुरपिदेवत्वेनसर्वभूतकर्तृकावनासंभवादेवंविदंसर्वाणिभूतान्यवंतीतिचकथमुक्तमित्यतस्तस्याभिप्रायमाह ॥ प्राणज्ञानमिति ॥ सप्तान्नविन्मुक्तस्वरूपज्ञानमित्यर्थः । चशब्देनामुक्तसप्तान्नवित्स्वरूपग्रहणं । प्राणस्वरूपस्यदैववागाद्यावेशविशिष्टसप्तान्नविन्मुक्तस्वरूपस्यचायोग्येष्वनुपदेशेनेत्यर्थः । ननुतस्मादेकमेवव्रतंचरेदित्यत्रप्राणस्यसर्वोत्तमत्वादित्युक्तं तदनुपपन्नं । विष्णोस्ततोप्युत्तमत्वादित्यतआह ॥ उत्तमइति ॥ ननुचतुर्मुखस्यापिसत्वात्कथंप्राणएवेत्युक्तमित्यतआह ॥चतुर्मुखस्येति॥ इदानींतस्मादेकमेवव्रतंचरेदितिवाक्यंव्याचष्टे ॥ तस्मादिति ॥ हरेरनुप्राणस्यसर्वदेवोत्तमत्वात् । ननुकिंतद्विष्णुप्राणयोर्व्रतं यदाचरणीयमित्यतःप्राण्याच्चैवापन्याच्चेतिवाक्यंव्याख्यातुंतावत्तयोर्व्रतमाह ॥ हंसोपास्तिरिति ॥ श्वासरूपेजपेअधिष्ठानेवायाहंसोपास्तिःसातयोर्विष्णुप्राणयोर्व्रतमुदीरितमितिसंबंधः । हंसोपास्तिःकथंतयोर्व्रतमित्यतआह ॥ हंसरूपाविति ॥ ननु

भाष्यं ॥ स्यात्तेपामेवचामुक्तेर्मुक्तानांनतुकिंचन । मुक्तानांदैववागादेरावेशःसंप्रकीर्तितः । प्राणज्ञानंयथावंतिरहस्यमितिसर्वदा । एवंमुक्तस्वरूपंचाप्यवंत्येवरहस्यतः । उत्तमःसर्वदेवेषुप्राणएवहरेरनु । चतुर्मुखस्यप्राणस्यनविशेषोस्तिकश्चन । तस्माद्विष्णोर्व्रतस्यानुनित्यंप्राणव्रतंचरेत् । हंसोपास्तिःश्वासरूपेतयोर्व्रतमुदीरितं । हंसरूपौहितौदेवौ

श्वासरूपाधिष्ठानेहंसरूपयोर्विष्णुप्राणयोरुपास्तिः कुतइत्यतआह ॥ श्वासेति ॥ इदानींप्राण्याच्चैवापान्याच्चेतिवाक्यंव्याख्याति ॥ **तस्मादिति** ॥ तयोःश्वासोच्छ्वासप्रवर्तकत्वात्प्राण्यात् श्वासंकुर्यात् अपान्यादुच्छ्वासंकुर्यादित्यर्थः । ननुश्वासोच्छ्वासकर्तृत्वस्यप्राणभृन्मात्रेपिसत्वात्सर्वस्यापिहंसोपास्तिकर्तृत्वंकिंनेत्याह ॥ तद्रूपमिति ॥ तस्मादेकमेवेत्येवकारव्यावर्त्यमाह ॥ **नान्यस्येति** ॥ ननुयद्युच्चरेत्समापिपयिषेदित्यन्यदेवव्रतारंभकस्यापिकर्तव्यत्वोक्तेःकथमेतदित्यतआह ॥ **तद्भृत्यत्वंविनेति** ॥ प्रजापतिर्हिकर्माणिससृजइतिवाक्यंप्रजापतिर्ब्रह्मेतिप्रतीतिनिरासायव्याचष्टे ॥ इंद्रियाणीति ॥ वागादींद्रियाभिमानिनइत्यर्थः । वह्न्यादिदेवताश्चेत्यपिग्राह्यं । नन्वध्यात्ममधिदैवंचवागादींद्रियाभिमानिनांअग्न्यादिदेवतानांचकिंपरस्परभेदो नेत्याह ॥ **अध्यात्ममिति** ॥ तुशब्दोवधारणे । अधिदैवेअग्न्याद्यादेवताएवाध्यात्ममिंद्रियाणि इंद्रियवाचकवागादिशब्दाभिधेयान्याहुरित्यर्थः । कोदेवःकिमिंद्रियशब्दाभिधेयइत्यतआह ॥ अध्यात्ममिति ॥ अधिदैवेग्निरध्यात्मंवाङ्नामेत्यादियोज्यं । चंद्रमानामेत्यंतेनवदिष्याम्येवाहमितिवाग्दध्रइत्यादिवाक्यगतावाक्चक्षुःश्रोत्रशब्दाव्याख्याताः । प्राणस्यसर्वदेवोत्तमत्वसिध्यर्थं इतरेंद्रियाभिमानिषुमनोभिमानिनांप्राधान्यात्तदुत्तमत्वसिद्धौरसनाद्यभिमानिवरुणाद्युत्तमत्वस्यकैमुत्येनैवसिद्धिरितिभावेनोपल

भाष्यं ॥ श्वासोच्छ्वासप्रवर्तकौ । तस्मात्प्राण्यादपान्याच्चतद्रूपंसंस्मरेत्सदा । नान्यस्योपासनंकुर्यात्तद्भृत्यत्वंविनाक्वचित् । इंद्रियाणिससर्जादौवासुदेवःप्रजापतिः । अध्यात्ममिंद्रियाण्याहुरधिदैवंतुदेवताः । अध्यात्ममग्निर्वाङ्नामाचक्षुरादित्यउच्यते । श्रोत्रंतुचंद्रमानाप्समनस्थूलंतुवासवः । येनयज्ञादिकंकुर्याच्छेषरुद्रविपास्तथा ।

क्षणतयामनोभिमानिपरतयैवमन्यानिकर्माणीतिवाक्यंव्याचष्टे ॥ मनइति ॥ किंस्थूलत्वमित्यतआह ॥ **येनेति** ॥ तथाशेष रुद्रविपाःसूक्ष्मंमनउच्यंते । किंसूक्ष्मत्वमित्यतउक्तं ॥ ज्ञानयोग्यमिति ॥ तदेवविशदयति ॥ **शेषइति** ॥ एवमन्यानिकर्माणीत्यत्रप्राणोपिविवक्षितइतिभावेनाह ॥ वायुरिति ॥ अधिदैवेवायुरध्यात्मंप्राणइतिप्रोक्तः । किंतस्यकर्मेत्यतआह ॥**येनेति**॥ तानिसृष्टान्यन्योन्येनास्पर्धंतेतिवाक्यंव्याचष्टे ॥ २० ॥ तएतादिति ॥ व्यूदिरेविवादंकृतवंतः । अथाधिदैवतंज्वलिष्याम्येवाहमित्यग्निर्दध्रइत्यादिएवमन्यादेवतायथादैवतमित्यंतंवाक्यंव्याचष्टे ॥ अधिदैवइत्यादिना **वींद्रइत्यंतेन** ॥ कांतौप्रकाशनेशक्तिमान् । तस्यक्रियापरःपंचरात्रोक्तविष्णुपूजादिक्रियाप्रवर्तकः । तानिसृष्टान्यन्योन्येनास्पर्धंतेतिवाक्यमधिदैवपरत्वेनापि व्याचष्टे ॥ **तेधिदैवेचेति** ॥ अध्यात्मसमुच्चयार्थश्चशब्दः । अहंश्रेयानितिपस्पृधुः । यथाकर्मेत्यनंतरंयथादैवमित्यनंतरंचवक्तव्यमाह ॥ तानित्यादिनाऽनारतमित्यंतेन ॥ प्रजापतिरित्यनुवर्त्यतानिश्रमोभूत्वोपयेमइतिवाक्यंव्याचष्टे ॥ **तानेतानिति** ॥ तस्माच्छ्राम्यत्येववागित्यादिवाक्यंव्याचष्टे ॥ श्रांताइति ॥ श्राम्यत्येवेत्येवकाराभिप्रायमाह ॥ **स्वंभगवत्कर्मकर्तुं**

भाष्यं ॥ मनःसूक्ष्मंज्ञानयोग्यंशेषोव्याख्यानगोचरं । रुद्रस्तुमननाख्यंचगरुडोध्यानगोचरं । वायुःप्राणइतिप्रोक्तोयेनसर्वंनियम्यते ॥२० ॥ तएतेभगवत्सृष्टाव्यूदिरेऽध्यात्मसंस्थिताः । अधिदैवेज्वलत्कर्मावह्निःसूर्यस्तुतापकः । सोमःकांतौवृष्टिकर्मावासवःशेषएवतु । पंचरात्रप्रवृत्तीशोरुद्रस्तत्स्थक्रियापरः । सर्वप्रवर्तकोवायुर्ज्ञानमोक्षप्रदस्तथा । वेदप्रवृत्तिकृद्वींद्रस्तेधिदैवेचपस्पृधुः । अहंश्रेयानहंश्रेयानितितानब्रवीद्धरिः । स्वकर्मयस्त्वविश्रांतःकुर्याच्छ्रेयान्हिवःस्मृतः । इतिश्रुत्वाततश्चक्रुःकर्मस्वंस्वमनारतं । तानेताञ्छ्रमरूपेणप्रापब्रह्माप्रजापतिः । श्रांताःस्वंभगवत्कर्म

नशेकुरिति ॥ अथेममेवनाप्नोदितिवाक्यंकिंप्राणस्यप्रजापत्यपेक्षयाधिकशक्तिमत्त्वान्नाप्नोदित्याशंकांपरिहरन्व्याचष्टे ॥ **वायुमिति** ॥ मध्यमःप्राणइत्यनंतरंतस्मात्सनाश्राम्यदितिवक्तव्यमितिसूचयन्नाह ॥ **तेनेति** ॥ श्रमरूपेणब्रह्मणःप्रवेशतोदेवानांकिमनिष्टंजातमित्याशंकानिवर्तकत्वेनमृत्युरित्यस्यात्रसंबंधमभिप्रेत्यतान्याप्नोत्तान्याप्त्वामृत्युरवारुंद्धदितिवाक्यंव्याचष्टे ॥ **श्रमादिति** ॥ श्रमान्निमित्तात्भगवत्कर्मवर्जनाद्धेतोःपापात्मकोमृत्युरन्यान्देवानवाप । अनेनश्राम्यतिश्रोत्रमित्यनंतरंतान्याप्नोदित्यादिवाक्यंयोजनीयमित्युक्तंभवति । अथेममेवनाप्नोदितिवाक्यंप्रकारांतरेणव्याचष्टे ॥ **नैवेति** ॥ तानिज्ञातुंदध्रिरइतिवाक्यंव्याचष्टे ॥ **तइति** ॥ वायुमितिशेषोक्तिः । अयंवैनःश्रेष्ठःइत्यस्यार्थमाह ॥ **श्रेष्ठोयमिति** ॥ तएतस्यैवसर्वेरूपमभवन्निितिवाक्यमभेदप्रतीतिंनिवारयन्व्याचष्टे ॥ **तेनचेति** ॥ अनेनरूप्यतेनिरूप्यतइतिरूपशब्दःप्रतिमार्थइत्युक्तंभवति । **प्रकारांतरेण** तद्वाक्यंव्याचष्टे ॥ **तद्भृत्यत्वमिति** ॥ अनेनरूप्यतेनिरूप्यतइतिरूपशब्दोभृत्यपरइत्युक्तंभवति । **तस्मादेतएतेनाख्यायंतेप्राणाइतीतिवाक्यंव्याचष्टे** ॥ **तस्मादिति** ॥ तदाविष्टत्वात् । मरुतइत्यधिदैवापेक्षया । **म्लोचंतिह्यन्यादेवतानवायुरित्यस्मिन्नर्थेसूर्यमात्रस्यप्राणादुत्पत्तिनाशप्रतिपादकमंत्रोदाहरणमसंगतमित्यतःसूर्यशब्दस्योपलक्षणपरत्वमभ्युपेत्यमंत्रव्याख्यानरूपंप्राणा**

भाष्यं ॥ नशेकुःसर्वदेवताः । वायुंतुसमशक्तित्वान्नापब्रह्माप्रजापतिः । तेनासौभगवत्कर्मसर्वंचकृतवान्सदा । श्रमात्पापात्मकोमृत्युर्भगवत्कर्मवर्जनात् । अन्यान्देवानवापाशुनैववायुंकदाचन । तेवायुंज्ञातुमैच्छंतश्रेष्ठोयमितिनिश्चिताः । तंज्ञात्वातेनचाविष्टास्तद्भृत्यत्वमुपागताः । तस्मात्प्राणाश्चमरुतइत्येषांनामसंस्थितं ।

द्वाइतिवाक्यंव्याचष्टे ॥ **वायोरिति** ॥ तंदेवाश्चक्रिरेधर्ममित्येतद्व्याचष्टे ॥ **तस्मादिति** ॥ तद्विषयंव्रतंएषांतेतद्व्रताः । सए वाद्यसउश्वइत्यस्यार्थोनित्यमिति । तस्मादेकमेवव्रतंचरेदित्यस्यार्थमाह ॥ तद्व्रनइति ॥ अतोदेवानांतद्व्रतत्वात् । यद्युच्चरेत्स मापिपयिषेदित्येतद्व्याचष्टे ॥ **अन्येति** ॥ विष्णुवायुभृत्यत्वेनेतिशेषः । तेनोएतस्यैदेवतायैसायुज्यंसलोकतांजयतीतिवाक्यंव्या चष्टे ॥ **तेनेति** ॥ समापनेनेत्यर्थः । अथैवमेतेदेवाःप्राणाअमृताःआविशंतीत्यादिप्रकरणंमुक्तपरतयाप्रमाणेनव्याख्यातं तत्रांत रोपपत्तिमप्याह ॥ **आनंद्येवेति** ॥ मुक्तःएतत्प्रकरणप्रतिपाद्यइतिशेषः । आनंदित्वदुःखाभावयोर्मुक्तलिंगत्वादितिभावः॥२२॥ **ततश्चायंखंडार्थः** ॥ विष्णोःसप्तान्नस्रष्टृत्वप्रतिपादकमंत्रानुदाहरति ॥ **यत्ससेत्यादिना** ॥ १ ॥ अप्रतीतेरुदाहृतमंत्राननूद्य व्याचष्टे ॥ **यत्सप्तान्नानीत्यादिना** ॥ प्रसिद्धिद्योतकहिशब्देनायंमंत्रभागोव्याख्यातः । मेधातपोभ्यांसप्तान्नजनकत्वंपितुःप्र सिद्धमिति । तथाचपिताविष्णुः सप्तान्नानिमेधयातपसाच यत्यदाऽजनयत् तदातेषांमध्येएकमस्यसाधारणमित्याद्युत्तरत्रसंबं

भाष्यं ॥ वायोर्देवाहिजायंतेलयमेष्यंतितत्रच । तस्मान्नित्यंतद्व्रताश्चतद्व्रतोतोभवेत्सदा । अन्यदेवव्रतारंभंयदिकुर्यात्समापयेत् । तेनासौवा युनासाकंभगवंतमुपेष्यतीतिनारायणश्रुतौ । आनंद्येवभवति । नशोचतीत्यतोमुक्तइत्येवावगम्यते ॥ इतिसप्तान्नब्राह्मणं ॥ ३ ॥ ६ ॥

उप० ॥ यत्सप्तान्नानिमेधयातपसाऽजनयत्पितै(१)कमस्यसाधारणं(२)द्वेदेवानभाजयत्(३)त्रीण्यात्मनेऽकुरुत(४)पशुभ्यएकंप्रायच्छ(५) त्तस्मिन्त्सर्वंप्रतिष्ठितंयच्चप्राणितियच्चन(६)कस्मात्तानिनक्षीयंतेऽद्यमानानिसर्वदा(७)योवैतामक्षितिंवेद(८)सोन्नमत्तिप्रतीकेनसदेवानपिगच्छतिसऊ र्जमुपजीवतीतिश्लोकाः(९) ॥ १ ॥ यत्सप्तान्नानिमेधयातपसाऽजनयत्पितेतिमेधयाहितपसाऽजनयत्पितै(१)कमस्यसाधारणमितीदमेवास्यतत्साधा

धइतिमंत्रार्थइतिभावः । मेधातपःशब्दार्थौश्रुतिःस्वयमेववक्ष्यति । (१) द्वितीयमंत्रेअस्यसर्वस्यैकमन्नमकुर्रुतकिंतत्साधारणमित्युक्तं । तदप्रतीतेरनूद्यव्याचष्टे ॥ **एकमिति** ॥ अस्यमनुष्यवर्गस्य तच्छ्रुत्युक्तं साधारणमन्नं इदमेव । किं यदिदंप्रसिद्धंप्राणिभिरद्यतइत्यर्थः । सर्वसाधारणमिदमन्नमात्मीयत्वेनासाधारणंकुर्वतोदोषमाह ॥ **सइति** ॥ उपास्तइत्युपशब्दस्यावृत्तिः । ततश्चयएतदन्नं उपस्वसमीपएववर्तमानं स्वकीयमेवेतियावत् । उपास्तेमन्यते सपाप्मनोनव्यावर्तते । अक्षयपापवान्स्यादित्यर्थः । कुतः हियस्मा देतदद्यमन्नं मिश्रंदेवब्राह्मणादिसाधारणं । तच्चकेवलमात्मीयत्वेनमन्यमानोदेवब्रह्मस्वापहारीत्यर्थः (२) । केतेद्वेदेवान्ने इत्यतोद्वेदेवानभाजयदितिमंत्रमनूद्यव्याचष्टे ॥ **द्वेइति** ॥ मंत्रपूतंतदेवान्नं हुतंहोम्यं प्रहुतंवलिंचाभाजयदित्यर्थः । यस्माद्धुतप्रहुतेदेवान्ने तस्मादिदानींतनाअपि देवेभ्योजुह्वतिप्रजुह्वतिच । नकेवलंवैश्वदेववलिहरणेदेवानामन्ने अपितर्हि अन्यदपि इतिभावेनमुनिमतेनाह ॥ **अथोइति** ॥ अथोइतिपक्षांतरे येद्वेअन्नेदेवानांविष्णुनादत्ते तेदर्शपूर्णमासावित्याहुर्ज्ञानिनइत्यर्थः । यस्माद्धुतादिर्देवान्नं तस्मादिष्टियाजुकःफलेच्छयायष्टा नस्यात् । तदीयस्यैवस्वफलोद्देशेनतेषुविनियोगेतदपहर्तृत्वप्राप्तेरितिभावः(३) । त्रीण्यात्मनेकुरुतेतिमंत्रव्याख्यानस्यबहुत्वात्सूचीकटाहन्यायेनपशुभ्यएकमितिमंत्रमादावनूद्यकिंतदेकमन्नमित्यतस्तद्व्याचष्टे ॥ **पशुभ्यइति** ॥ यदेकमन्नंपशुभ्यःप्रायच्छत् तत्पयइत्यर्थः । पयसःपश्वन्नत्वमुपपादयति ॥

उप० ॥ रणमन्नंयदिदमद्यतेसयएतदुपास्तेनसपाप्मनोव्यावर्ततेमिश्रंह्येत(२)द्वेदेवानभाजयदितिहुतंचप्रहुतंचतस्माद्देवेभ्योजुह्वतिप्रचजुह्वत्यथोआहुर्दर्शपूर्णमासावितितस्मान्नेष्टियाजु(ज)कःस्या(३)त्पशुभ्यएकंप्रायच्छदितितत्पयः

पयोहीति ॥ हियस्मात् मनुष्याःपशवश्चा ग्रेप्रथमंशैशवे पयएवोपजीवंति तस्मात्पशुभ्योदत्तमेकंपयइत्यर्थः । अनेनमंत्रस्थःपशुशब्दोऽज्ञानित्वसाधारण्यात्बालकमनुष्यपरोपीत्युक्तंभवति । यस्मात्मनुष्याअग्रेपयएवोपजीवंति तस्माद्यतनाज़ना जातंकुमारंघृतंचैवघृतमेवपयःकार्यं अग्रेशैशवे प्रतिलेहयंतिप्राशयंति अनुपश्चा त्स्तनंवाधापयंतिपाययंतीत्यर्थः । यस्माच्चपयःपशवःउपजीवति अथतस्माज्जातंवत्समतृणादःतृणमत्तीतितृणादः नतृणादःअतृणादः किंतुपयोदइत्याहुरित्यर्थः । (५) तस्मिन्सर्वंप्रतिष्ठितंइतिमंत्रे तच्छब्देनप्रकृतसप्तान्नेषुकस्यपरामर्शइतिनज्ञायतेप्रकृतान्नसप्तकपरामर्शइतिचप्रतीयते इत्यतस्तदनूद्यव्याचष्टे ॥ **तस्मिन्निति** ॥ यच्चप्राणितिमनुष्यपश्वादि यच्चनप्राणितिवृक्षादिस्थावर मिदंसर्वंपयसिप्रतिष्ठितं । उदकेनेवपयसाप्यंकुराभिवृद्धेर्दर्शनात् । पयोहोमेनादृष्टद्वारास्थावराद्युत्पत्तेर्वा । नकेवलंजीवनहेतुत्वेनैवपयसिप्राणिजातंप्रतिष्ठितं किंतुगोपयसोमोक्षादिहेतुत्वेनापीतिभावेनाह ॥ **तद्यदिदमाहुरिति** ॥ संवत्सरंपयसा जुह्वत्होमंकुर्वन्पुरुषो यदिभगवदपरोक्षज्ञानी तर्हिपुनर्मृत्युंमरणंसंसारमितियावत् । अपजयतिमुक्तोभवति । यद्यदृष्टभगवत्तत्वः तर्हिपुनर्मृत्युंतत्साधनमज्ञानमपजयति भगवदपरोक्षज्ञानीभवतीति यदिदमाहुर्ज्ञानिनःतत्तथैवसंवत्सरहोमेनैवमुक्त्यादिकमिति नविद्यात् । कुतः यतएवंविद्वान्सप्तान्नसृ

उप० ॥ पयोह्येवाग्रेमनुष्याश्चपशवश्चोपजीवंतितस्मात्कुमारंजातंघृतंवैवाग्रेप्रतिलेहयंतिस्तनंवानुधापयंत्यथवत्संजातमाहुरतृणादइति (५) तस्मिन्सर्वंप्रतिष्ठितंयच्चप्राणितियच्चनेतिपयसिहीदꣳसर्वंप्रतिष्ठितंयच्चप्राणितियच्चनतद्यदिदमाहुःसंवत्सरंपयसाजुह्वदपपुनर्मृत्युंजयतीतिनतथाविद्यात्

ष्टितत्वज्ञानी यदहःपयसाजुहोतितदहरेवपुनर्मृत्युमपजयति । एकहोमेनैवमुच्यतइतियावत् । कथमेकहोममात्रेणएवंविदुषोमुक्तिरित्यतआह ॥ **सर्वंहीति** ॥ यस्मात्सप्तान्नवित्पयोहोमकरणेनैव देवेभ्यःसर्वमन्नाद्यंप्रयच्छति । गोपयसःप्रशस्तत्वेनसर्वान्नादिस्थानीयत्वादितिभावः । यद्वा एवंविद्वान्हियस्माद्यदहःपयसाजुहोतितदंगभूतंसर्वमन्नाद्यंचदेवेभ्यःप्रयच्छति । तदहरेव पुनर्मृत्युमपजयति तस्मात्नतथाविद्यादित्यन्वयः । (६) नन्वद्यमानानामेतेषांअन्नानांक्षये कथंपुनर्मनुष्यादीनांअवस्थानमित्यतोऽक्षयत्वोपपादकंमंत्रमनूद्यव्याचष्टे ॥ **कस्मादिति** ॥ पुरुषोवापरमात्मैवा ऽक्षितिरन्नाक्षयहेतुः । कथंपुरुषोन्नाक्षयहेतुरित्यतआह ॥ **सहीति** ॥ हियस्मात्पुरुषःइदंसप्तविधमन्नंपुनःपुनर्जनयतेतस्मादक्षितिरितिसंबंधः । तथाचतानिसाधारणादीनिसप्तान्नानिसर्वदाद्यमानान्यपि कस्मादानंदरूपाद्भगवतो नक्षीयंते भगवानेवान्नाक्षयहेतुरितियावदितिमंत्रार्थइतिभावः । (७) योवैतामक्षितिमितिमंत्रमनूद्यएतामक्षितिमित्यस्यार्थमाह ॥ **योवाइति** ॥ पुरुषोवाअक्षितिरन्नाक्षयहेतुःकुतइत्यतःप्रागुक्तमेव हेतुंकारणप्रदर्शनपूर्वकमाह ॥ **सहीति** ॥ धियाधियेतिपुनरुक्तिःपुनःपुनरन्नसर्जनापेक्षया । धियास्वेच्छया प्राणिनांकर्मभिरित्युक्त्याप्रथममंत्रगतंमेधयातपसेतिपदद्वयंव्याख्यातंभवति । तदेवव्यतिरेकमुखेनोपपादयति ॥ **यद्धैतदिति** ॥ यत्यदि एतत्सप्तविधमन्नं पुरुषोनकुर्यात् तर्हिसर्वदाद्यमानत्वात् हनिश्चयेन क्षीयेतेत्यर्थः । अनेनयोवाअधिकारीएतांपुनःपुनरन्नजनिका

उप० ॥ यदहरेवजुहोतितदहःपुनर्मृत्युमपजयत्येवंविद्वान्सर्वंहिदेवेभ्योन्नाद्यंप्रयच्छति(६)कस्मात्तानिनक्षीयंतेऽद्यमानानिसर्वदेतिपुरुषोवाअक्षितिःसहीदमन्नंपुनःपुनर्जनयते(७)योवैतामक्षितिंवेदेतिपुरुषोवाअक्षितिःसहीदमन्नंधियाधियाजनयतेकर्मभिर्यद्धैतन्नकुर्यात्क्षीयेतह(८)

मतएवाक्षितिमन्नाक्षयहेतुंभगवंतंवेदेतिमंत्रार्थोव्याख्यातोभवति । सोन्नमत्तिप्रतीकेनेतिमंत्रमनूद्यप्रतीकेनदेहेनेतिप्रतीतिनिरासायतद्याचष्टे ॥ **सइति** ॥ प्रतीकंमुखंततश्चप्रतीकेनेत्येतत्मुखेनेत्यर्थमाहेत्यर्थः । तथाचसभगवतोन्नाक्षयहेतुत्वज्ञानी प्रतीकेन मुखेनस्वमुखेनाप्रयत्नेनेतियावत्।अन्नमत्तियेथष्टभोगाननुभवतीतिमंत्रार्थइतिभावः । सदेवानपीत्यादिमंत्रद्वयमनूद्याक्षरार्थस्यातिरोहितत्वात्तात्पर्यमाह ॥ **सदेवानपीति** ॥ प्रशंसाभगवतःसप्तान्नसृष्टिकर्तृत्वज्ञानिनइतिशेषः । सःसप्तान्नोपासकोदेवपदयोग्यत्वात् देवान्देवत्वं गच्छतिप्राप्नोति । सउपासकऊर्जमपिदेवान्नमपिउपजीवति । यद्वासप्तान्नज्ञानीमनुष्योदेवान्गच्छतिदेवसमीपंप्राप्नोतीतिमंत्राक्षरार्थइतिभावः (९) ॥ २ ॥ एवंसूचीकटाहन्यायेनपशुभ्यएकमित्यादिमंत्रान्व्याख्यायेदानींत्रीण्यात्मनइतिमंत्रमनूद्य कानितानित्रीणीत्याशंकापरिहारायव्याचष्टे ॥ **त्रीणीति** ॥ एवंत्रीणीतिपदार्थमुक्त्वावाक्यार्थमाह॥**तानीति**॥ तानिमनोवाक्प्राणरूपाणित्रीण्यन्नानि आत्मनेस्वार्थं मकुरुतेत्यर्थः । साधारणाद्यन्नानामिवमनोवाक्प्राणानांभगवद्विषयकाणांभगवत्तुष्टिहेतुत्वेनभगवदन्नत्वंद्रष्टव्यं । ननुचक्षुरादिषुज्ञानकरणेषुसुत्सु मनएवकस्मादात्मान्नमकुरुतेत्यतस्तस्यप्राधान्यादितिभावेनतत्प्राधान्यंव्यतिरेकेणसमर्थयते ॥ **अन्यत्रेति** ॥ पुरुषोवस्थितंगजंकिंत्वंदृष्टवानसीतिकेनचित्पृष्टआह । अन्यत्रविषयांतरेगतंमनोयस्यसोहमन्यत्रमनाअभूवमत्तोनादर्शं । तथाइदंमदीयंवचःकिंश्रुतवानसीतिपृष्ठआह । अन्यत्रमनाअभूवं अतो

उप० ॥ सोन्नमत्तिप्रतीकेनेति मुखंप्रतीकंमुखेनात्त्येतत्सदेवानपिगच्छतिसऊर्जमुपजीवतीतिप्रशंसा(९) ॥ २ ॥ त्रीण्यात्मनेकुरुतेतिमनोवाचंप्राणंतान्यात्मनेऽकुरुतान्यत्रमनाभूवंनादर्शमन्यत्रमनाभूवंनाश्रौषमिति

नाश्रौषमिति । एवमितरेंद्रियेष्वपिमनोव्यतिरेकेणज्ञानव्यतिरेकोद्रष्टव्यः । मनसिव्याकुलेचक्षुरादिभिर्ज्ञानंनोत्पद्यतइत्येतदुप
पादयति ॥ **मनसाहीति** ॥ हियस्मान्मनस्यव्याकुलएवचक्षुपापश्यतिश्रोत्रेणशृणोतीत्यर्थः । ननुविष्णुभक्तिकामतत्पूजाकर
णसंकल्पादीनामपिभगवत्तुष्टिहेतुत्वेनतदन्नत्वसंभवात्कथंमनोवाक्प्राणानामेवभगवदन्नत्वमुक्तमित्यतोमनोग्रहणेनैवकामसंक
ल्पादयोपिगृहीताइतिभावेनकामसंकल्पादीनांमनोवृत्तित्वमाह ॥ **कामइति** ॥ एकविषयेच्छाकामः । अनेकगोचरेच्छाविचि
कित्सा । एतत्सर्वंमनएव मनउपादानमेकमेव । विषयेंद्रियसंयोगादेवज्ञानोत्पत्तौकिंमनसेत्यतोविषयेंद्रियसंयोगस्याप्रयोजकत्व
माह ॥ **तस्मादिति** ॥ बाह्येंद्रियजन्यज्ञानस्यमनोधीनत्वात्पृष्ठतउपस्पृष्टोपिमनसाविजानाति । मनस्यव्याकुलएवअनेनाहंस्पृ
ष्टइतित्वचाविजानातीत्यर्थः । स्पृष्टोपीत्यपिपदेनविषयेंद्रियसन्निकर्षमात्रस्याप्रयोजकत्वमभिप्रैति । ननुध्वनिवर्णात्मकविष्णुना
मरूपशब्दस्यैवभगवत्तुष्टिहेतुत्वाद्वाचःकथंतुष्टिहेतुत्वेनान्नत्वमित्यतआह ॥ **यःकश्चेति** ॥ यःकश्चनशब्दोध्वनिवर्णात्मकोऽसौ
वागेवतथाचवाचोन्नत्वोक्तौसर्वस्यापिशब्दस्यान्नत्वमुक्तमेवेतिभावः । यत्किंचिच्छब्दोच्चारणहेतुभूतवाचःकथंविष्णवन्नत्वमित्यत
आह ॥ **सैषाहीति** ॥ हियस्मात्सैषासर्वशब्दोच्चारणहेतुभूतावाक् अंतंसर्वांतस्थंविष्णुमायत्ताविषयीकुर्वंती । सर्वेषामपिध्वनि
वर्णात्मकशब्दानांविष्णुनामत्वात् अतोवाक्विष्णवन्नमित्यर्थः । केषांवाक्विष्णुमायत्तेत्यतोवेदद्रष्टारआहुः ॥ **एषाहिनइ**

उप० ॥ मनसाह्येवपश्यतिमनसाशृणोतिकामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवतस्मादपिपृष्ठतउपस्पृष्टो
मनसाविजानातियःकश्चिच्छब्दोवागेवसैषाह्यंतमायत्तैषाहिनः

ति ॥ नोस्माकं एषावाक् विष्णुमायत्ता हिप्रसिद्धमित्यर्थः । ननुविष्णुपूजादिसत्कर्महेतुप्राणस्यैवतदन्यकर्मसंत्यागादिहेत्व
पानादेरपितत्तुष्टिहेतुत्वेनतदन्नत्वात्कथंप्राणस्यैवतदन्नत्वोक्तिरित्यतआह ॥ **प्राणइति** ॥ नोस्माकं विष्णुकर्महेतुभूतःप्राणः
सदन्यकर्मसंत्यागहेतुरपानः तद्विरोधिनिरासहेतुर्व्यानः तद्योगधारणहेतुरुदानः तद्विषयकमनोवागादींद्रियनियमनहेतुःसमानः
इत्येतत्सर्वं प्राणएवप्राणप्रभेदएवेत्यर्थः । यस्यकस्यापिप्राणापानादेर्विष्णवन्नत्वंनास्तीतिनइत्युक्तंवेदद्रष्टृभिः । मनोवाक्प्राणानां
प्राधान्यंप्रकारांतरेणाप्याह ॥ **एतन्मयइति** ॥ एतच्छब्दस्यअव्यवधानेनप्रकृतप्राणमात्रपरत्वप्रतीतिनिवारणायविवृणोति ॥
वाङ्मयइत्यादिना ॥ अयमात्मोत्तमोजीवो । वागादिप्रधानकः । वाङ्मनःप्राणाभिमानिसान्निध्यप्राधान्यनिमित्तकोत्कर्ष
वानित्यर्थः । कस्तदभिमानीत्यतोप्याह ॥ **एतन्मयइति** ॥ अयमात्मासरस्वतीब्रह्मवायुरूपः एतन्मयःएतदभिमानीत्यर्थः ।
अनेनसरस्वत्याद्युत्तमाभिमन्यमानकत्वाच्चवागादिकमुत्तममित्युक्तंभवति । सरस्वत्यादयोवागाद्यभिमानिनइतिकुतः यतोयमा
त्मासरस्वत्यादिरतन्मयः प्रकृतपरमात्मवागादिजन्यइत्याह ॥ **एतन्मयइति** ॥ परमात्मनोवागादिसत्त्वेतज्जन्यत्वंतेषांस्यात् ।
तदेवकुतः यतोऽयमात्मापरमात्माएतन्मयःवाङ्मनःप्राणस्वरूपइत्याह ॥ ३ ॥ **एतन्मयइति** ॥ वागाद्युत्तमत्वप्रयोजकसर
स्वत्याद्युत्तमत्वसिद्धयेतेषांमहिमानमाह ॥ **त्रयोलोकाइत्यादिना** ॥ एतएवप्रकृतवाङ्मनःप्राणाभिमानिसरस्वतीब्रह्मवायव

उप० ॥ प्राणोपानोव्यानउदानःसमानोनइत्येतत्सर्वंप्राणएवैतन्मयोवाऽयमात्मावाङ्मयोमनोमयःप्राणमयः ॥ ३ ॥ त्रयोलोकाएतएववागे
वायंलोकोमनोंतरिक्षलोकःप्राणोसौलोकः ॥ ४ ॥

/ते

एव । त्रयोलोकास्त्रिलोकाभिमानिनः । तदेवविशदयति ॥ वागेवेति ॥ वाक्वागभिमानिनीसरस्वत्ययंलोकःपृथिवीलोकाभिमानिनी । मनोमनोभिमानीब्रह्मांतरिक्षलोकाभिमानीप्राणःप्राणाभिमानीवायुरसौलोकःस्वर्गलोकाभिमानीत्यर्थः ॥ ४ ॥ एवंत्रयोवेदाएतएवेत्यारभ्यप्राणएनंतद्भूत्वावतीत्यंतस्यग्रंथस्यव्याख्यानंद्रष्टव्यं । यत्किंचविज्ञातंविज्ञानविषयः तद्वाचःतदभिमानिसरस्वत्या रूपंप्रतिमा कुतः हियस्मात् वाक्विज्ञाताविज्ञाताभिमानिनी । वाङ्महिमज्ञानिनःफलमाह ॥ **वागिति** ॥ वाक्सरस्वती एनंवाग्विभूतिज्ञं तद्भूत्वाविज्ञाताभिमानिनीभूत्वा ऽवतीतियोजना । एवमुत्तरत्रापि । विजिज्ञास्यंजिज्ञासाविषयः अविज्ञातंविज्ञानाविषयः ॥ १० ॥ सरस्वतीब्रह्मवायूनामेवपृथिव्याद्यभिमानरूपमहिमांतरमाह ॥ **तस्याइत्यादिना** ॥ तस्यैतस्यावाचःतदभिमानिसरस्वत्याः पृथिवीशरीरं ज्योतीरूपंप्रतिमा किंज्योतिरित्यतउक्तं ॥ **अयमग्निरिति** ॥ पृथिव्यग्नीसरस्वत्यभिमन्यमानावित्यर्थः । पृथिव्यग्न्योर्वागतिक्रमेणवृत्तौकथंतच्छरीरत्वादिकमित्यतआह ॥ **तद्यावत्येवेति** ॥ ततृत्वात्पृथिव्यग्न्योःसरस्वत्यभिमन्यमानत्वात् यावतीवाक्तावत्येवपृथिवीतावानेवायमग्निः अभिमानिव्यतिरेकेणाभिमन्यमाना

उप० ॥ त्रयोवेदाएतएववागेवर्ग्वेदोमनोयजुर्वेदःप्राणःसामवेदः ॥ ५ ॥ देवाःपितरोमनुष्याएतएववागेवदेवामनःपितरःप्राणोमनुष्याः ॥६॥ पितामाताप्रजैतएवमनएवपितावाङ्माताप्राणःप्रजाः ॥ ७ ॥ विज्ञातंविजिज्ञास्यमविज्ञातमेतएवयत्किंचविज्ञातंवाचस्तद्रूपंवाग्घिविज्ञातावागेनंतद्भूत्वाऽवति ॥ ८ ॥ यत्किंचविजिज्ञास्यंमनसस्तद्रूपंमनोहिविजिज्ञास्यंमनएनंतद्भूत्वाऽवति ॥ ९ ॥ यत्किंचाविज्ञातंप्राणस्यतद्रूपंप्राणोह्यविज्ञातःप्राण

 एनंतद्भूत्वाऽवति ॥ १० ॥ तस्यैवाचःपृथिवीशरीरंज्योतीरूपमयमग्निस्तद्यावत्येववाक्तावतीपृथिवीतावानयमग्निः ॥ ११ ॥

भावादित्यर्थः ॥ ११ ॥ अथवागभिमन्यमाननिरूपणानंतरंमनसोभिमन्यमानंनिरूप्यतइत्यर्थः । एतस्यमनसोमनोभिमानिब्र
ह्मणः द्यौःशरीरं ज्योतीरूपंप्रतिमा । किंज्योतिरित्यतउक्तं ॥ **असावादित्यइति** ॥ द्व्यादित्यौमनोभिमानिब्रह्माभिमन्यमा
नावित्यर्थः । अभिमान्यभिमन्यमानयोःसमपरिमाणकत्वमाह ॥ **तद्यावदेवेति** ॥ तौवाङ्मनोभिमानिनौसरस्वतीब्रह्माणौ
मिथुनंसमेतांप्राप्तवंतौ । ततोमिथुनीभावानंतरं प्राणोवायुरजायत । तस्यप्राणस्यमहिमानमाह ॥ **सइति** ॥ सवायुरिंद्रःपरमै
श्वर्यसंपन्नः । सएषवायुरसपत्नोशत्रुः । कल्पादिशत्रुसद्भावेनकथमशत्रुरित्यतआह ॥ **द्वितीयइति** ॥ द्वितीयःसमबलोवैसप
त्नःशत्रुर्भवति कल्पादयश्चनसमबलाइतिभावः । वायोरसपत्नत्ववेत्तुःफलमाह ॥ **नास्येति** ॥ योधिकारीएवंवायुरसपत्नइति
वेदास्यसपत्नःशत्रुःकोपिनभवति ॥ १२ ॥ अथैतस्येत्यादेःपूर्ववदेवार्थः । तएतेमनोवाक्प्राणाभिमानिनःसरस्वतीब्रह्मवायवः
सर्वएवगुणतस्तारतम्योपेताअपिव्याप्त्यासमाः सर्वेरुद्राद्यपेक्षयाअनंताबहुगुणाः सयःकश्चित्एतान्सरस्वत्यादीनंतवतःइतरजी
ववदल्पगुणानुपास्ते सोंतवंतंनाशवंतंलोकंजयतिह । नरकाद्यनर्थभोगानंतरंतमःप्राप्तिर्भवतीतिभावः । अथयोधिकारीएताननं
तानितरजीवापेक्षयाबहुगुणानुपास्ते सोनंतंनाशरहितंविष्णुलोकं जयतिप्राप्नोतीत्यर्थः ॥ १३ ॥ चंद्राभिमानिनोमहिमानमाह

उप० ॥ अथैतस्यमनसोद्यौःशरीरंज्योतीरूपमसावादित्यस्तद्यावदेवमनस्तावतीद्यौस्तावानसावादित्यस्तौमिथुनꣳसमेतांततःप्राणोऽजायतसइं
द्रःसएषोसपत्नोद्वितीयोवैसपत्नोनास्यसपत्नोभवतियएवंवेद ॥ १२ ॥ अथैतस्यप्राणस्यापःशरीरंज्योतीरूपमसौचंद्रस्तद्यावानेवप्राणस्तावत्यआपस्ता
वानसौचंद्रस्तएतेसर्वएवसमाःसर्वेनंतास्सयोहैतानंतवतउपास्तेंतवंतꣳसलोकंजयत्यथयोहैताननंतानुपास्तेअनंतꣳसलोकंजयति ॥ १३ ॥

॥ **सएषइति** ॥ सएषवायुःसंवत्सरःत्रिष्णोर्वत्सःसन्सम्यग्रमतइतिसंवत्सरइत्यर्थः । सएषवायुः प्रजापतिःप्रजानांपालनात् सएषवायुःषोडशकलःविशेषतःषोडशकलचंद्रसंस्थइत्यर्थः । तस्यचंद्रस्थस्यवायोःपंचदशकलाः रात्रयएवरात्रिनामिकाएव । अस्यचंद्रस्थवायोः षोडशीकलाध्रुवैव । पंचदशकलाःकेननिमित्तेनरात्रिनामिकाःतत्राह ॥ **सइति** ॥ सवायुःरात्रिभिःशुक्लपक्ष प्रतिपदमारभ्यपौर्णमासीपर्यंतंपंचदशरात्रिभिरेवपंचदशकलाभिरापूर्यतेच । कृष्णपक्षप्रतिपदमारभ्यामावास्यापर्यंतंपंचदशरा त्रिभिरपक्षीयतेच । शुक्लपक्षकृष्णपक्षयोरेकैकस्यांरात्रौकलानांपूरणात्क्षयाच्चकलाःरात्रिनामिकाइत्यर्थः । अकलोपिवायुःस्वाधि ष्ठानचंद्रकलाभिरेवमुच्यते । सःपंचदशकलारहितः अमावास्यां अमावास्यायां रात्रिंरात्रौ एतयाध्रुवयाषोडश्याकलया सर्वमि दंप्राणभृत् अनुप्रविश्य ततःप्रातःप्रतिपदि जायतेद्वितीयकलायुक्तोभवति । तस्मादमावास्यारात्रौचंद्रस्थवायोःप्राणभृत्सुस्थि तत्वा देतांरात्रिंएतस्यांरात्रौ प्राणभृतोजीवतः प्राणंनविच्छिंद्यात् । महापापहेतुप्राणिवधोनकर्तव्यइतिकिमुवक्तव्यं कृकलास स्यापिअल्पदोषहेतुवधस्यापिप्राणंनविच्छिंद्यात् । तस्यांरात्रौकृकलासवधोपिमहादोषहेतुरित्यर्थः । हिंसानिषेधस्यप्रयोजनमाह॥ **एतस्याइति** ॥ एतस्याःसर्वप्राणभृत्स्थायाःचंद्रस्थवायुरूपदेवतायाः अपचित्याएवपूजार्थमेवेत्यर्थः । तदाप्राणिस्थंवायुंज्ञात्वा

उप० ॥ सएषसंवत्सरःप्रजापतिःषोडशकलस्तस्यरात्रयएवपंचदशकलाध्रुवैवास्यषोडशीकलासरात्रिभिरेवाचपूर्यतेअपचक्षीयतेसोमावास्याꣳ रात्रिमेतयाषोडश्याकलयासर्वमिदंप्राणभृदनुप्रविश्यततःप्रातर्जायतेतस्मादेताꣳरात्रिंप्राणभृतःप्राणंनविच्छिंद्यादपिकृकलासस्यैतस्याएवदेवतायाअप चित्यै ॥ १४ ॥

तद्बधाकरणमपिवायुपूजैवेतिभावः ॥ १४ ॥ चंद्रस्थस्यैववायोःसप्तान्नसृष्टितत्वज्ञानिस्थत्वरूपंमहिमांतरमाह ॥ यइति ॥ स प्रसिद्धोयः संवत्सरःप्रजापतिःषोडशकलोवायुः सोऽयमेवतदंतर्गतएव अयंकः यःएवंवित्सप्तान्नस्रष्टृत्वविद् पुरुषःतदंतर्गतो यमित्यर्थः । चंद्रस्थएववायुर्ज्ञानिसंस्थइत्यर्थः । ननुचंद्रस्थवायोःज्ञानिनिविशिष्यस्थित्युक्तौकिंनिमित्तमित्यतः चंद्रवज्ज्ञानिनो पिषोडशकलत्वेनचंद्रस्थवत्ज्ञानिस्थस्यापिषोडशकलत्वमितिभावेनज्ञानिस्थवायोःषोडशकलत्वमुपपादयति ॥ तस्येति ॥ त स्यज्ञानिस्थवायोः वित्तमेवमानुषवित्तमेवहिरण्यादिकं पंचदशकलाःसौम्यपंचदशकलास्थानीयमित्यर्थः । अस्यज्ञानिस्थवायोः आत्मादेहः स्वाधिष्ठानज्ञानिदेहः षोडशीकलातत्स्थानीयः । वित्तस्यपंचदशकलास्थानीयत्वमुपपादयति ॥ सइति ॥ सज्ञानि स्थोवायुः वित्तेनैवागतेनैवापूर्यतेचअपगतेनवित्तेनैवापक्षीयतेच । आगमापायवत्वाद्वित्तस्यपंचदशकलास्थानीयत्वमित्यर्थः । शरीरस्यध्रुवकलास्थानीयत्वंवित्तस्याध्रुवकलास्थानीयत्वंचोपपादयति ॥ तदेतदिति ॥ यश्चासावयंचेतियदय मात्मादेहः त देतत् नभ्यंरथचक्रस्थानीयं वित्तं प्रधिःप्रधिस्थानीयं अरनेम्यादिस्थानीयमित्यर्थः । एवंसतिफलितमाह ॥ तस्मादिति ॥ तस्मादात्मवित्तयोर्नाभिप्रधिस्थानीयत्वात् । यद्यपिसर्वज्यानिंसर्वस्वं जीयतेपराजीयते । तथापि आत्मनानाभिस्थानीयेनदेहे नचेद्यदिजीवति तदातर्ह्ययंप्रधिनातत्स्थानीयेनवित्तेनागात्वित्तहीनोजातइतियावदित्येवाहुः ॥ १५ ॥ सप्तान्नविद्यावेत्तुःफलं

उप० ॥ योवैससंवत्सरःप्रजापतिःषोडशकलोयमेवसयोयमेवंवित्पुरुषस्तस्यवित्तमेवपंचदशकलाआत्मैवास्यषोडशीकलासवित्तेनैवाचपूर्यतेऽपचक्षीयतेतदेत(न्ना)न्नभ्यंयदयमात्माप्रधिर्वित्तं तस्माद्यद्यपिसर्वज्या‍निं(जी)क्षीयतआत्मनाचेज्जीवतिप्रधिनागादित्येवाहुः ॥ १५ ॥

वक्तुंतदुपयुक्तमाह ॥ **अथेत्यादिना** ॥ केतेत्रयोलोकाइत्यतआह ॥ **मनुष्यलोकइति** ॥ तेपांसाधनमाह ॥ **सोयमिति** ॥ पुत्रेणैवऔरसेनशिष्येणच । नान्येनकर्मणेति । यद्यपिपुनःपुनःकर्मकरणलक्षणोमनुष्यलोकजयः स्वेनैवकर्मणाजन्मांतरंप्राप्य संपादयितुंशक्यः तथापिस्वस्यजन्मांतरंविनोक्तमनुष्यलोकजयस्तु पुत्रेणैव पुत्रपौत्रादिकृतफलभाक्त्वात्स्वस्येतिभावः । कर्मणाज्योतिष्टोमादिना पितृलोकःस्वर्गादिः विद्ययादेवलोकोजनोलोकोमोक्षश्च जेयइतिसंबंधः । यथोक्तं ईयुस्त्रीन्कर्मणालोकान् ज्ञानेनैवतदुत्तरानिति । ननुदेवलोकस्यकोविशेषः येनकर्मसाध्यविद्यासाध्यत्वमित्यतआह ॥ **देवलोकइति** ॥ तस्मात्श्रेष्ठलोकसाधनत्वात्प्रशंसंतिज्ञानिनः ॥ १६ ॥ पुत्रेणमनुष्यलोकजयइत्युक्तं सकिंयादृशतादृशपुत्रेणभवतीत्यतःसुशिक्षितेनेतिभावेनाह ॥ **अथेत्यादिना** ॥ अथपुत्रादिसाधनसाध्यविशेषसंबंधकथनानंतरं अतःफलसद्भावात् । संप्रत्तिःसंप्रदानंउपदेशः पित्रा पुत्रंप्रतिक्रियमाणउपदेशप्रकारोनिरूप्यतइत्यर्थः । यदापिता प्रैष्यन्अरिष्टादिदर्शनेनस्वयंमरिष्यन् मन्यते अथतदा पुत्रं त्वं ब्रह्म यज्ञः त्वं त्वंलोकइत्याह । सएवमुक्तःपुत्रोहंब्रह्माहंयज्ञोहंलोकइतिप्रतिवचनमाह । ब्रह्मादिपदानांतिरोहितार्थत्वात्श्रुतिस्तद्व्याकरोति ॥ **यद्वाइति** ॥ यत्किंचवैप्रसिद्धमनूक्तंअनुवचनंवेदादि त्रयीश्रुतिर्नित्यवाक्वेदोनुवचनंतथेत्यभिधानात् । त

उप० ॥ अथत्रयोवावलोकामनुष्यलोकःपितृलोकोदेवलोकइतिसोयंमनुष्यलोकःपुत्रेणैवजय्योनान्येनकर्मणाकर्मणापितृलोकोविद्ययादेवलोकोदेवलोकोवैलोकानाꣳश्रेष्टस्तस्माद्विद्यांप्रशंसंति ॥१६॥ अथातःसंप्रत्तिर्यदाप्रैष्यन्मन्यतेऽथपुत्रमाहत्वंब्रह्मत्वंयज्ञस्त्वंलोकइतिसपुत्रःप्रत्याहाहंब्रह्माहंयज्ञोहंलोकइतियद्वैकिंचानूक्तं

स्यसर्वस्यब्रह्मेत्येकता ब्रह्मशब्देनग्रहणमित्यर्थः येकेचवैद्रव्ययज्ञास्तपोयज्ञाइत्यादिप्रमाणप्रसिद्धयज्ञास्तेपांसर्वेपांयज्ञइत्येकतायज्ञ
शब्देनग्रहणमित्यर्थः । येकेचनवैप्रसिद्धालोकाःस्वर्गादयस्तेपांसर्वेपांलोकइत्येकतालोकशब्देनग्रहणमित्यर्थः । तथाचत्वंब्रह्मवे
दाध्ययनादिकर्ताभव तदनंतरंत्वंयज्ञोयज्ञकर्ताभव तदनंतरंत्वंलोकोलोकसंपादकोभवेतिवाक्यार्थइतिभावः । अन्यदपिकर्तव्यं
पित्राकस्मान्नोपदिष्टमित्यतःश्रुतिःस्वयमाह ॥ एतावद्वाइति ॥ इदंसर्वंकर्तव्यतयोपदेष्टव्यमेतावदेव वेदादिकमधीत्यतदुक्त
प्रकारेणयज्ञादिकर्मकृत्वातेनमोक्षादिलोकमापादयेत्येतावदेवेत्यर्थः । पिताकिमर्थमेवंपुत्रंअनुशास्तीत्यतआह ॥**एतस्मादिति**॥
सत्युत्तमोयंमनुष्यत्वमंशेनप्राप्तः सप्तान्नोपासकोदेवः इतःप्राप्तः पुत्रमितिशेपः । पुत्रेस्थितइत्यर्थः । एतस्मादनुशिष्टात्पुत्रात्स
र्वंतत्कृतवेदाध्ययनादिफलमभुनजत् अभुङ्क्तइतियस्मात्तस्मादनुशिष्टंपुत्रं लोक्यंलोकसाधन माहुर्विद्वांसः । यस्मात्लोक्यमाहुः
तस्मादेनंपुत्रंत्वंब्रह्मेत्याद्यनुशास्तिपिता । ननुमृतस्यपुत्रेऽवस्थानाभावात्कथमेतदित्यतआह ॥ **सइति** ॥ एवंवित्सप्तान्नोपास
कःसदेवोमनुष्यत्वमाप्तः यदास्माल्लोकात्प्रैतिमृतोभवति अथतदा एभिरेवप्राणैःस्ववाङ्मनोभिमानिभिःसरस्वत्यादिभिः सह
स्वांशरूपसामर्थ्याच्चपुत्रमाविशति । सप्तान्नोपासकस्यपुत्रात्फलांतरमाह ॥ **सइति** ॥ अनेनपित्रासप्तान्नविदा यदिकदाचिद

उप० ॥ तस्यसर्वस्यब्रह्मेत्येकतायेवैकेचयज्ञास्तेपाꣳसर्वेपांयज्ञइत्येकतायेवैकेचलोकास्तेपाꣳसर्वेपांलोकइत्येकताएतावद्वाइदꣳसर्वमेतस्मात्सर्वꣳ
सन्नयमितोऽभुनजदितितस्मात्पुत्रमनुशिष्टंलोक्यमाहुस्तस्मादेनमनुशासति सयदैवंविदस्माल्लोकात्प्रैत्यथैभिरेवप्राणैःसहपुत्रमाविशतिसयद्यनेनकिंचि

क्षणयाच्छिद्रेणपापेन किंचित्कर्म कृतंभवति तदासपुत्रःतस्मात्सर्वस्माच्छिद्रकर्मणः एनंस्वपितरं मुंचतिमोचयति । पापकर्म फलानुभवंपरिहरतीत्यर्थः । तस्मादेव पुतःछिद्रकर्मणःत्राणाद्रक्षणात्पुत्रोनाम । एवंयेनपुत्रतःफलमाप्तंतेनैवमनुष्यलोकोजि तइत्याह ॥ **सइति** ॥ पुत्रेणैवनतुस्वयंसाक्षा न्नकेवलंसप्ताऽन्नविदोमनुष्यलोकजयादिरेवफलं किंतुमोक्षगतातिशयोपीत्याह ॥ **अथेति** ॥ अथमुक्त्यनंतरं एनंसप्ताऽन्नविदंमुक्त मेतेप्राणाः पूर्ववाङ्मनःप्राणाभिमानिनोदेवाःसरस्वत्यादयःस्वरूपभूतवागा दिनियामकत्वेनआविशंति । नन्वमुक्तानांकथंमुक्तप्रवेशइत्यतउक्तं ॥ **अमृताइति** ॥ तेपिमुक्ताःसंतइत्यर्थः । अत्रमुक्तजीवे प्राणप्रवेशोवायोरुच्यमानःचतुर्मुखस्यैवरूपांतरेणेतिज्ञातव्यं ॥ १७ ॥ कोदेवःकुत्रप्रविष्टइत्यतस्तद्विशदयन्तदावेशफलमाह ॥ **पृथिव्यैचैनमित्यादिना** ॥ चतुर्थीपंचम्यर्थे ल्यब्लोपनिमित्तापंचमी प्राक्स्वाविष्टांपृथिवीमग्निंचपरित्यज्येत्यर्थः । **दैवी** [illegible] न्नविन्मुक्तदेवेषुविशेषावेशाद्दैवीत्युक्ता वाक्सरस्वती आविशति मुक्तस्वरूपभूतवाचमितिशेषः । **यद्वा पृथिव्याश्चाग्नेश्चमुक्तपृ थिव्यग्न्योर्देवयोर्विशेषावेशादितियावत्** । दैवीदेवसंबंधिनीत्यर्थः । कासादैवीवागित्यतआह ॥ **सेति** ॥ **ययाविष्टयासरस्व त्या प्रेरितोमुक्तोयद्यद्वदति तत्तद्भवत्येव** सैवदैवीवागित्यर्थः ॥ १८ ॥ एवंदिवश्चैनमित्यादिकंयोज्यं । **आनंद्येवेत्यवधारणव्या**

उप० ॥ चिद्क्षणयाकृतंभवतितस्मादेनꣳसर्वस्मात्पुत्रोमुंचतितस्मात्पुत्रोनामसपुत्रेणैवास्मिंल्लोकेप्रतितिष्ठत्यथैनमेतेदेवाःप्राणाअमृताआविशं ति ॥ १७ ॥ पृथिव्यैचैनमग्नेश्चदैवीवागाविशतिसावैदैवीवाग्ययायद्यदेववदतितत्तद्भवति ॥ १८ ॥ दिवश्चैनमादित्याच्चदैवंमनआविशतितद्वैदैवंम नोयेनानंद्येवभवत्यथोनशोचति ॥ १९ ॥

वर्त्यकश्च्नमथोमुक्त्यनंतरंनशोचतीति ॥ १९ ॥ योयत्प्रेरितोमुक्तः संचरंश्चासंचरंश्चनव्यथते सर्वसामर्थ्ययुक्तत्वात् । अथोत स्मादेव नारिष्यतिनम्रियतइत्यर्थः । संचरन्व्यथतेरिष्यतिचमनुष्योसंचरन्व्यथतेरिष्यतिचाश्वइति संचरंश्चासंचरंश्चेत्युक्तं । मरणानंतरभाविफलकथनप्रसंगात् मुक्तेरपिमरणविशेषत्वेनतदुत्तरभाविफलमभिधायेदानींसप्तान्नविदोमुक्तेःपूर्वफलांतरमप्याह ॥ सयइति ॥ यःएवंवित्सप्तान्नोपासकोदेवः ससर्वेपांभूतानामात्माव्यापकोभवति । तत्रदृष्टांतमाह ॥ यथेति ॥ यथाएषाप्राणरूपादेवता सर्वेषांभूतानामात्मैवमित्यर्थः । तस्यैवफलांतरमाह ॥ सइति ॥ सवक्ष्यमाणोदृष्टांतोयथा । एतांदेवतांप्राणाख्यां सर्वाणिभूतान्यवंतितज्ज्ञानस्यरहस्यत्वेनायोग्येपुनोपदिशंति एवंहएवमेव एवंविदंसप्तान्नवेत्तारंमुक्तममुक्तंच सर्वाणिभूतान्यवंति । ननुसप्तान्नोपासकस्यसर्वभूतव्यापकत्वेतदेहेपुस्थित्याभूतशोकेशोकःस्यादित्यतआह ॥ यदुकिंचेति ॥ इमाःप्रजाःयदुकिंचयत्किंचिदपिशोचंति तत्शोचनं अमादेहनियामकदेवैस्सह आसांप्रजानामेवभवति । नतत्स्थसप्तान्नोपासकानां । कुतः यतःप्राणिकृतपुण्यमेव अमुंसर्वप्राणिस्थंसप्तान्नोपासकंप्रति गच्छति नपापं । तदपिकुतः यतोनियामकतयाप्राणिदेहस्थान्देवान्पापंनगच्छति हवाइतिप्रमाणप्रसिद्धिकथनं । सप्तान्नोपासकाश्चदेवाइतिभावः ॥ २० ॥ सप्तान्नविद्योपासकस्यमु

उप० ॥ अद्भ्यश्चैनंचंद्रमसश्चदैवःप्राणआविशतिसवैदैवःप्राणोयःसंचरꣳश्चासंचरꣳश्चनव्यथतेथोनरिष्यतिसयएवंवित्सर्वेपांभूतानामात्माभवतियथैपादेवतैवꣳसयथैतांदेवताꣳसर्वाणिभूतान्यवंत्येवꣳहैवंविदꣳसर्वाणिभूतान्यवंतियदुकिंचेमाःप्रजाःशोचंत्यमैवासांतद्भवतिपुण्यमेवामुंगच्छतिनहवैदेवान्पापंगच्छति ॥ २० ॥

त्त्यवस्थायाममुक्त्यवस्थायांचउक्तफलप्राप्त्यर्थंअनुष्ठेयंव्रतमाह ॥ अथेति ॥ अथअधिकारिस्वरूपनिरूपणानंतरं । अतउक्तफल सद्भावात् । व्रतार्थंमीमांसाव्रतमीमांसा तस्मात्प्राण्याच्चैवापान्याच्चेतिविष्णुप्राणविषयकव्रतंनिरूपयितुं किमर्थंतद्विषयकंव्रतम नुष्ठेय मित्यतस्तत्स्वरूपविचारःक्रियतइत्यर्थः । तत्राख्यायिकामाह ॥ प्रजापतिरिति ॥ प्रजापतिर्वासुदेवः कर्माणिकर्मसा धनानि अध्यात्मंवचनादिक्रियासाधनवागादींद्रियाभिमानिनो अधिदैवंज्वलनादिक्रियाकर्त्रग्न्यादिदेवान्ससृजेससर्ज । तानि सृष्टान्यग्न्यादीनि अन्योन्येनास्पर्धंत । प्राणस्यआत्मभ्यःआधिक्यंआत्मनांतदवमत्वंजानमानाअपि प्राणोत्तमत्वनिर्णयायैवा ध्यात्ममधिदैवतंचस्पर्धांकृतवंतइत्यर्थः । तत्रतावदध्यात्मंतत्प्रकारमाह ॥ वदिष्याम्येवेति ॥ अहमेवान्यापेक्षांविनावदिष्या मिवागिंद्रियप्रेरणेनवचनक्रियांजीवेनकारयिष्यामीति वाक्वाङ्नामाग्निर्दध्रे । चक्षुरादित्योदध्रे । श्रोत्रंचंद्रमाः । एवमन्यानि कर्माणिकर्मसाधनानिमनआदीनि तदभिमानिशेषादयः । यथाकर्म व्याख्यानविषयकमनःप्रेरणादिरूपस्वस्वयोग्यंकर्म । करि ष्यामइतिदध्रिरे । तदायःस्वकर्माविश्रांतःकुर्यात्सःयुष्मासूत्तमइतिहरिणोक्तंश्रुत्वातेदेवाःस्वंस्वंकर्मानारतंचक्रुरितिग्राह्यं । ता नीत्यत्रप्रजापतिरितिवर्तते । मृत्युरित्यस्योत्तरत्रसंबंधः । तदनंतरंप्रजापतिर्ब्रह्मातानिवागादीनि श्रमोभूत्वाश्रमकरोभूत्वो पये मेप्राप्तवान् । तस्मात्ब्रह्मणाश्रमरूपेणप्राप्तत्वात् । वाक्वाङ्नामाग्निः श्राम्यत्येव नस्वकर्मचक्रे करणशक्त्यभावात् । चक्षुरा

उप० ॥ अथातोव्रतमीमांसाप्रजापतिर्हकर्माणिससृजेतानिसृष्टान्यन्योन्येनास्पर्धंतवदिष्याम्येवाहमितिवाग्दध्रेद्रक्ष्याम्यहमितिचक्षुःश्रोष्या म्यहमितिश्रोत्रमेवमन्यानिकर्माणियथाकर्मतानिमृत्युःश्रमोभूत्वोपयेमे तान्याप्नोत्तान्याप्त्वामृत्युरवारुंधत्तस्माच्छ्राम्यत्येववाक्श्राम्यतिचक्षुःश्राम्यति

दित्यःश्राम्यत्येव श्रोत्रंश्राम्यत्येव श्राम्यतिमनइत्याद्यपिग्राह्यं । अथेतरदेवानांश्रमप्राप्त्यनंतरं इममेवनाप्नोत् । कं योयंमध्यमः प्राणः सर्वेहिचेतनाःप्राणशब्दवाच्याः । तत्राज्ञानाभिभवास्पृष्टौविष्णुर्वायुश्चेतिद्वावेव । अन्येतुतत्स्पृष्टाएव । तथाचप्राणशब्द वाच्येषुमध्येविष्णोरुत्तमत्वात् अन्येषामधमत्वात् वायोर्मध्यमत्वात् मध्यमइत्युक्तं । ब्रह्मणःवायुसमशक्तित्वाच्छ्रमरूपेणतं नापेत्यर्थः । ततोभगवद्विषयकंसर्वकर्मकृतवान् । एवंदेवानांश्रमप्राप्तौकोदोषइतिचेत् यतःश्रमाद्विष्णुपूजादिकर्मवर्जनेनमृत्युः पापात्मकःतान्यग्न्यादीन्याप्नोत् । तान्याप्त्वामृत्युरवारुंधत्अवरोधंकृतवान् । अथतेषांपापात्मकासुरवेधानंतरं योयंमध्यमः प्राणः इममेवनाप्नोत् । मृत्युरितियोज्यं । तानिपापात्मकासुरवेधितान्यग्न्यादीनि तदविद्धंवायुंज्ञातुंदध्रिरे । अयंवैवायुरेव नोस्माकंमध्ये श्रेष्ठइतिज्ञातवंतश्च । कुतःश्रैष्ठ्यमित्यतउक्तं ॥ यइति ॥ ततःकिंचक्रुरित्यतउक्तं ॥ हंतेति ॥ हंतेत्यास्वादने। सर्वेवयमस्यैववायोरेवरूपमसाम प्रतिमाःभवाम । तथारूप्यतेनिरूप्यतेइतिरूपंभृत्याभवामेत्युक्त्वा तेसर्वेएतस्यैववायोरेव रूपं प्रतिमाः भृत्याश्चाभवन् । तस्माद्देवानांप्राणप्रतिमात्वात् एतेदेवाः एतेनप्राणनाम्ना आख्यायंते । तदेवविशिष्याह ॥ प्राणा इति ॥ प्राणप्रविष्टत्वाद्देवाःप्राणशब्देनाख्यायंतइति । वेत्तुःफलमाह ॥ तेनेति ॥ योधिकारी एवंप्राणशब्देनदेवाआख्यायं-

---

उप० ॥ श्रोत्रमथेममेवनाप्नोद्योयंमध्यमःप्राणस्तानिज्ञातुंदध्रिरेऽयं वैनःश्रेष्ठोयःसंचरꣳश्चासंचरꣳश्चनव्यथतेथोनरिष्यतिहंतास्यैवसर्वेरूपम सामेतितएतस्यैवसर्वेरूपमभवꣳस्तस्मादेतएतेनाख्यायंतेप्राणाइतितेनहवावतत्कुलमाचक्षते

तइति वेदजानाति सयस्मिन्कुलेभवति तत्कुलं तेनतद्वाचकशब्देन आख्यायतेअमुष्येदंकुलमित्याचक्षते । किंचयउयःकश्चि देवंविदास्पर्धतेप्रतिपक्षंकरोति सोनुशिष्यदीर्घकालंशोषंप्राप्यैवांततोम्रियतेह नसहसाऽनुपद्रुतोम्रियतइत्यर्थः । उपसंहरति ॥ इत्यध्यात्ममिति ॥ २१ ॥ अथा ध्यात्मंप्राणस्यश्रैष्ठ्यकथनानंतरं । अधिदैवतंप्राणस्यश्रैष्ठ्यं उच्यतइतिशेषः । ज्वलिष्या मीत्यादिपूर्ववत् । एवमन्यादेवताःशेषाद्याः यथादैवतंतत्तद्देवतायोग्यपंचरात्रप्रवृत्त्यादि करिष्यामइतिदध्रिरे । अग्न्यादयःश्र मरूपेणप्रजापतिनाप्राप्ताःमृत्युनावरुद्धाः । वायुस्तुनेत्युक्तमत्राप्यतिदिशति ॥ सयथेति ॥ सवक्ष्यमाणोदृष्टांतोयथा । एषां वागादीनांप्राणानांमध्ये मध्यमःप्राणोयथाश्रमरूपेणप्रजापतिनानप्राप्तः अतएवनमृत्युनावरुद्धोतएवश्रेष्ठश्च । तथैतासांदेवता नांअग्न्यादीनांमध्येवायुरित्यर्थः । अन्यादेवताःमृत्युनावरुद्धत्वादेवम्लोचंतिम्लानाभवंति । नवायुर्म्लोचति । कुतः यद्वायुर्यो वायुः सैषादेवता नास्तमितायद्यस्मादित्यर्थः । अत्रवायोरपिदेवतावत्स्वरूपनित्यत्वदेहानित्यत्वयोःसत्वेपिस्वरूपातिरिक्तेश्वर विषयवृत्तिप्रवाहाविच्छेदापेक्षयाआविर्भूतज्ञानातिरोभावापेक्षयाचेदमुपपादनीयं । यद्वाशरीराभिमानाभावेनतदुत्पत्तिनाशा भ्यांनास्योदयास्तमयावितिभावेनैतदुक्तं । यथोक्तं ब्रह्मानिरभिमानित्वाच्छरीर्यप्यशरीरवानिति ॥ २२ ॥ देवानांवाय्वधीनत्वे

उप० ॥ यस्मिन्कुलेभवतियएवंवेदयउहैवंविदास्पर्धतेअनुशुष्यहैवांततोम्रियतइत्यध्यात्मं ॥ २१ ॥ अथाधिदैवतंज्वलिष्याम्येवाहमित्यग्निर्दध्रे तप्स्याम्यहमित्यादित्योभास्याम्यहमितिचंद्रमाएवमन्यादेवतायथादैवतं ॥ सयथैषांप्राणानांमध्यमःप्राणएवमेतासांदेवतानांवायुर्म्लोचंतिह्यन्यादेवता नवायुस्सैषानास्तमितादेवतायद्वायुः ॥ २२ ॥

मंत्रोप्यस्तीत्याह ॥ अथेति ॥ तमुदाहरति ॥ यतइति ॥ सूर्यशब्दोदेवतांतरोपलक्षकः । मंत्राभिप्रेतंब्राह्मणंस्वयमाह ॥ प्राणाद्वाइति ॥ मंत्रशेषमुदाहरति ॥ तमिति ॥ देवास्तमुद्दिश्य धर्मंहंसोपास्तिलक्षणं चक्रिरे । सएवधर्मोद्यापिवर्तते । सएवश्वोपिवर्तिष्यतइत्यर्थः । मंत्रंव्याचष्टे ॥ यद्वाइति ॥ एतेदेवाः । यद्वायदेवधर्मसाधनव्रतं अमुर्हिअमुष्मिन्कालेप्राणश्रेष्ठत्वनिर्णयकालेध्रियंतधृतवंतः । तदेवव्रतमद्यकुर्वंति अपिशब्देनश्वःकरिष्यंतीत्यस्यसमुच्चयः । यदर्थंप्राणस्योत्तमत्वंप्रसाधितं तदाह ॥ तस्मादिति ॥ तस्माद्विष्णवनंतरंप्राणस्यसर्वदेवोत्तमत्वात् मामां पाप्मामृत्यु नेंत्नैवामुव दितिमन्वानोधिकारी एकमेवप्राणमात्रविषयकमेवव्रतं चरेत् । किंतदित्यतउक्तं ॥ प्राण्यादिति ॥ प्राण्यात्श्वासंकुर्यात् । अपान्यात्उच्छ्वासंकुर्यात् । श्वासोच्छ्वासात्मकहंसोपास्तिंकुर्यादित्यर्थः । आरब्धंप्राणव्रतंमध्येनविसर्जनीयमित्याह ॥ यदीति ॥ यद्युच्चरेत्प्राणव्रतं प्रारभेत तर्हिसमापिपयिषेत्समापयेदित्यर्थः । प्राणभृत्यत्वेनान्यदेवताव्रतस्यारब्धत्वेवाकर्तव्यमाह ॥ यदिति ॥ अन्यदेवताव्रतमितिशेषः । तस्यफलमाह ॥ तेनेति ॥ तेनप्राणव्रतसमापनेनान्यदेवताव्रतसमापनेनवा एतस्यैदेवतायैएतस्याःदेवतायाः विष्णुरूपदेवतायाः सायुज्यं तेनवायुना जयतिप्राप्नोति तदनधिकारीसलोकतांजयतीत्यर्थः ॥ २३॥ इतिसप्तान्नब्राह्मणं॥६॥

उप० ॥ अथैपश्लोकोभवति । यतश्चोदेतिसूर्योस्तंयत्रचगच्छतीतिप्राणाद्वाएषउदेतिप्राणेस्तमेतितंदेवाश्चक्रिरेधर्मंॅसएवाद्यसउश्वइतियद्वाए तेमुर्ह्यध्रियंततदेवाप्यद्यकुर्वंतितस्मादेकमेवव्रतंचरेत्प्राण्याच्चैवापान्याच्चनेन्मापाप्मामृत्युराप्नुवदितियद्युच्चरेत्समापिपयिषेत्तेनोएतस्यैदेवतायैसायुज्यॅं सलोकतांजयति ॥ २३ ॥ सप्तान्नब्राह्मणं ॥ ६ ॥

(॥ **अथभाष्यार्थः** ॥) प्राणस्यैवरुद्रभारत्युत्तमत्वरूपंमहिमांतरमाह ॥ **त्रयंवाइतिब्राह्मणेन** ॥ तत्रैतद्धिसर्वैर्नामभिःसममित्यादिवाक्यत्रयंपरैरेतद्वाग्रूपशब्दसामान्यंसर्वैःस्वविशेषभूतैःदेवदत्तादिनामभिःसममविशेषेणानुस्यूतमितिव्याख्यातं । तदसत् । वाक्त्वरूपशब्दत्वस्यकथंचिच्छब्दविशेषानुस्यूतत्वेपिवागितिसामान्यशब्दस्यतदनुस्यूतत्वाभावात् किंचैवंसतिनामस्वितिसप्तमीस्यान्नतुतृतीया सामान्यशब्दस्यविशेषशब्दकारणत्वाभावेनातोहिसर्वाणिनामान्युत्तिष्ठंतीत्यस्यानुपपत्तेश्चेतिभावेनखंडत्रयगतसममित्यस्यार्थमाह ॥ **सहैवेति** ॥ सहेत्यस्यसभावः माङ्मानइत्यतआतोनुपसर्गेकइतिकप्रत्ययेआतोलोपइटिचेत्याकारलोपेमातीतिमसित्यर्थः । आत्मेत्येतदित्यात्मशब्देनात्मशब्दवाच्यशरीरनिर्वर्त्यकर्मसामान्यमुच्यतइतिव्याख्यानमसत् । तथात्वेआत्मशब्दस्यलाक्षणिकत्वापत्तेः । सर्वकर्मणांशरीरनिर्वर्त्यकर्मसामान्य(जन्य)त्वाभावाच्चेतिभावेनात्मशब्दार्थमाह ॥ **आत्माप्राणइति** ॥ आत्मशब्दोक्तमेवतदेतदमृतमितितदेतच्छब्देनपरामृश्यप्राणोवाअमृतमितितद्व्याख्यानादितिभावः । तदेतत्त्रयंसदेकमयमात्मेतिवाक्चक्षुरात्मनामभेदउच्यतइतिप्रतीतिनिरासायव्याचष्टे ॥ **नामरूपयोरपीति** ॥ अत्रनामरूपशब्दाभ्यांवाक्चक्षुषोर्ग्रहणं प्राणशब्दस्येंद्रियादिपरत्वमपाकुर्वन्वाक्चक्षुःशब्दार्थौवदन्नामरूपयोरपीत्युक्तार्थेप्रमाणमाह ॥ **प्राणइति** ॥ तत्पत्नीभारतीनामेतिवागितिप्रोक्ता । तत्सुतोरुद्रोरूपमितिचक्षुरितिप्रोक्तइत्यर्थः । **प्राणोवाअमृतमितिवाक्यंव्याचष्टे** ॥ **अमृतइति** ॥ **नामरूपेसत्यमित्येतद्व्याचष्टे** ॥ **सत्यमिति** ॥ यथार्थवक्तृत्वादेवेतिसंबंधः । **ननुवायोरेवसर्वाच्छादकत्वात्कथंता**

भाष्यं ॥ सहैवमातिजानातीतिसमं । आत्माप्राणः नामरूपयोरपिप्राणाधीनत्वादेकमित्युच्यते । प्राणोवायुरितिप्रोक्तस्तत्पत्नीनामभारती ।
बृ० भा० २३ रूपंतुतत्सुतोरुद्रोवशेप्राणस्यतद्द्वयं । अमृतोवायुरुद्दिष्टोनित्यज्ञानात्मकत्वतः । सत्यंयथार्थवक्तृत्वाद्भारतीरुद्रएवचेति ।

भ्यामयंप्राणःछन्नइत्युक्तमित्यतस्तद्याचष्टे ॥ रुद्रइति ॥ यतःसत्येरुद्रेसत्येपुवेदेषुतदभिमानिभारत्यांचसदाप्रविष्टःप्राणःत
स्मात्सत्येनाच्छादितइत्युच्यतइत्यर्थः । ननुनित्यज्ञानात्मकत्वंसर्वसाधारणमितिकथंवायोरमृतत्वेतन्निमित्तमित्यतआह ॥ नि
त्यमिति ॥ यतःस्वरूपेणाविर्भूतस्वरूपज्ञानेननित्यंस्थितोतोवायुरमृतइतिसंबंधः । आविर्भूतज्ञानतिरोभावोनास्तीतिभावः ।
यथोक्तं अतिरोहितविज्ञानाद्वायुरप्यमृतःस्मृतइति (॥ ततश्चायंखंडार्थः ॥) सरस्वतीरुद्राभ्यांवायोरुत्तमत्वंवक्तुंतदभिमन्य
मानंजगत्तावद्विभजति ॥ त्रयमिति ॥ इदंजगत्रयंवैत्रिविधं । त्रैविध्यमेवदर्शयति ॥ नामरूपंकर्मेति ॥ इतिशब्दोध्याहा
र्यः नामाभिमानिस्वरूपमाह ॥ तेपामिति ॥ तेषांनामरूपकर्मणांमध्येनाम्नांवाक्भारतीत्येतद्दैवतं तन्महिमानमाह ॥ एत
दिति ॥ एषांनाम्नांवागित्येतदुक्थमुत्थापकं । कुतः हियस्मादतोवाचोभारत्याःसर्वाणिनामानिउत्तिष्ठंति उत्पद्यंते । वाचोम
हिमांतरमाह ॥ एतदिति ॥ वागित्येतदेषांनाम्नांसाम । कुतः । हियस्मादेतद्वागित्येतत् सर्वैर्नामभिःशब्दैःसहैवरूपाणिकर्मा
णिचमातिजानातीतिचसमं । महिमांतरमाह ॥ एतदिति ॥ वागित्येतत्एषांनाम्नांब्रह्म । कुतः । हियस्मात् वागित्येतत्सर्वा
णिनामानिबिभर्ति ॥ १ ॥ रूपाभिमानिस्वरूपंदर्शयंस्तन्महिमानमाह ॥ अथेति ॥ अथनामाभिमानिस्वरूपनिरूपणानंतरं ।

भाष्यं ॥ रुद्रेवेदेपुचप्राणःप्रविष्टश्छादितःसदा । सत्यइत्युच्यतेनित्यंस्वरूपेणामृतःस्मृतइतिच । ब्राह्मणं ॥ ३ ॥ ७ ॥ ॐइतिश्रीमदानं
दतीर्थभगत्पादाचार्यविरचितेश्रीमद्बृहदारण्यकोपनिषद्भाष्येतृतीयोऽध्यायः ॥ ३ ॥

उप० ॥ त्रयंवाइदंनामरूपकर्मतेपांनाम्नांवागित्येतदेषामुक्थमतोहिसर्वाणिनामान्युत्तिष्ठंत्येतदेषाꣳसामैतद्धिसर्वैर्नामभिःसममेतदेषांब्रह्मैतद्धि
सर्वाणिनामानिबिभर्ति ॥१॥ अथरूपाणांचक्षुरित्येतदेषामुक्थमतोहिसर्वाणिरूपाण्युत्तिष्ठंत्येतदेषांसामैतद्धिसर्वैरूपैःसममेतदेषांब्रह्मैतद्धिसर्वाणिरूपा

रूपाभिमानिस्वरूपमुच्यतइतिशेषः । रूपाणांचक्षुश्चक्षुर्नामकोरुद्रइत्येतद्दैवतं इतरत्पूर्ववत् । सर्वैःरूपैःसहैवनामानिकर्माणिच मातिजानातीतिसममित्यर्थः ॥ २ ॥ कर्माभिमानिस्वरूपंनिरूपयन्तन्महिमानमाह ॥ अथेति ॥ कर्मणामात्माप्राणइत्येतद्दैवतं एतदेषामित्यादिपूर्ववत् सर्वैःकर्मभिःसहैवनामानिरूपाणिचमातिजानातीतिसममित्यर्थः । भारतीरुद्रवायूनांनामादित्रितयाभिज्ञत्वोक्त्यासाम्यशंकांवारयति ॥ तदेतादिति ॥ तदेतद्वागादित्रयंसदेकंद्वयोरेकाधीनत्वात्एकमित्यर्थः । किंतदेकंयदधीनंद्वयमित्यतआह ॥ अयमात्मेति ॥ तथाचवाक्चक्षुषोरात्माधीनत्वमितिभावः । तदुपपादयति ॥ आत्मेति ॥ आत्माप्राणःएकोमुख्यःसन्एतत्रयंवागादित्रयमुच्यतइत्यर्थः। नन्वात्मनःश्रेष्ठत्वंवाक्चक्षुषोरश्रेष्ठत्वंचकथमित्यतआह ॥ तदेतदिति ॥ तदेतदमृतमित्येतद्व्याचष्टे ॥ प्राणोवाइति ॥ प्राणोवायुरमृतमतिरोहितविज्ञानादित्यर्थः । सत्येनेत्युक्तसत्यशब्दार्थमाह ॥ नामरूपेइति ॥ वाक्चक्षुषीइत्यर्थः । इदानींवाक्यार्थमाह ॥ ताभ्यामिति ॥ ताभ्यांवाक्चक्षुर्भ्यांसरस्वतीरुद्राभ्यांअयममृतःप्राणःछन्नःतयोर्नियामकत्वेनप्रविष्टत्वादित्यर्थः ॥ इतिसप्तमब्राह्मणं ॥ ७ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीमद्बृहदारण्यकभाष्यटीकायांश्रीमद्रघुवर्यतीर्थपूज्यपादशिष्यरघोत्तमयतिकृतायांतृतीयोध्यायः ॥ ३ ॥

उप० ॥ णिबिभर्ति ॥२॥ अथकर्मणामात्मेत्येतदेषामुक्थमतोहिसर्वाणिकर्माण्युत्तिष्ठंत्येतदेषाꣳसामैतद्धिसर्वैःकर्मभिःसममेतदेषांब्रह्मैतद्धिसर्वाणिकर्माणिबिभर्तितदेतत्त्रयꣳसदेकमयमात्मात्मैकःसन्नेतत्त्रयंतदेतदमृतꣳसत्येनच्छन्नंप्राणोवाअमृतंनामरूपेसत्यंताभ्यामयंप्राणश्छन्नः ॥३॥ सप्तमब्राह्मणं ॥ बृहदारण्यकेतृतीयोध्यायः ॥ ३ ॥

तृतीयाध्यायेप्रायेण अश्वमेधब्राह्मणादिभिःवाह्याःब्रह्मविद्याउक्ताः । प्रायेणांतराःब्रह्मविद्याअनेनाध्यायेनोच्यंते । तत्रप्रथमब्रा
ह्मणेननवाह्यब्रह्मविद्यासाक्षान्मोक्षसाधिका अपितर्हिंस्वहृदिस्थब्रह्मविद्येत्याह । अतिष्ठाःसर्वेषांभूतानांमूर्धेत्यत्राप्रतीतेःसर्वेषां
भूतानांमूर्धाशिरइत्यन्यथाप्रतीतेश्चातिष्ठामूर्धशब्दार्थावाह ॥ अतीत्येति ॥ जगदंतर्गतस्यकथंजगदतिक्रमइत्यतआह ॥ **जग
द्धर्मवर्जितत्वेनेति** ॥ **उत्तमत्वान्मूर्धेति** ॥ मूर्ध्नःसर्वांगेषूत्तमत्वादित्यर्थः । ननुअपराजितसेनेत्यस्यबहुव्रीहित्वेनभगवद्विशे
षणत्वेस्त्रीलिंगानुपपत्तिः । देवादिरूपसेनायाःकदाचित्पराजयसंभवेनापराजितत्वानुपपत्तिश्चेतिकर्मधारयएवानुसर्तव्यः । त
थाचकथमेतद्भगवद्विशेषणं । स्वस्यैवस्वसेनारूपत्वायोगादित्यतस्तद्व्याचष्टे ॥ **स्वयमेवेति** ॥ जिष्णुर्जेतेत्यर्थप्रतीत्यान्यतस्त्य
जायीत्यनेनैकार्थत्वप्रतीतिंनिवारयितुंतत्पदद्वयंव्याचष्टे ॥ **जिष्णुरित्यादिना** ॥ विषासहिरित्यस्यसहतइतिसासहिःविशेषेण
सहतइतिविषासहिरितिव्याख्यानमसत् । विष्णोर्दुर्जनादिषुसहनाभावात्इतिभावेनतद्व्याचष्टे ॥ **विषासहिरिति** ॥ अनेनवि
र्निषेधार्थइत्युक्तंभवति । यएवायमात्मनिपुरुषइत्यत्रात्मनीत्यस्यस्वात्मनीत्यर्थत्वेएतदुपासनस्यांतरुपास्तित्वप्राप्त्यानैतावताविदि
तमित्युत्तरत्रास्यापिबहिरुपास्तित्वोक्तिर्विरुध्येतेत्यतस्तद्व्याचष्टे ॥ आत्मनीति ॥ आत्माविरिंचःसुमनाःसुधौतश्चेतिकथ्यतइत्य
भिधानादित्यर्थः । फलवाक्यगतमात्मन्वीत्येतदनूद्याऽप्रतीतेर्व्याचष्टे ॥ आत्मन्वीति ॥ ननूपासनेनानुरूपंहिफलंभवति ।

भाष्यं ॥ ॐ ॥ अतीत्यजगद्धर्मवर्जितत्वेनस्थितत्वादतिष्ठाः । उत्तमत्वान्मूर्धा ॥ २ ॥ स्वयमेवापराजितबहुरूपत्वादपराजितसेनाभगवान् ।
जिष्णुरुत्तमः । अन्वेषांजेताअन्यतस्त्यजायी ॥ ६ ॥ विषासहिरसह्यः । आत्मनिहिरण्यगर्भेआत्मन्वीचित्तवान् ।

तथाचकथंहिरण्यगर्भेभगवदुपास्तिंकुर्वतःचित्तवत्त्वंस्यादित्यतआह ॥ चित्तेति ॥ अभिमान्युपास्तौअभिमन्यमानवान्भवती तिनवैरूप्यमितिभावः । ननुनैतावताविदितंभवतीत्युक्तिःकिंपूर्वोक्तविद्यायाःब्रह्मविद्यैकदेशत्वात् अथवामोक्षसाधनत्वाभावा त् । नाद्यः । ब्रह्मणःकेनाप्यनवशेषेणज्ञातुमशक्यत्वात् । वक्ष्यमाणविद्यायाअपिब्रह्मविद्यैकदेशत्वाच्च । नांत्यः । ब्रह्मोपास्ति मात्रस्यैवमोक्षसाधनत्वादित्यतआह ॥ स्वहृदिस्थमिति ॥ तथाचनब्रह्मोपास्तिमात्रंमोक्षसाधनमितिभावः । एवंतर्ह्युक्तोपास नानांवैफल्यान्नैतदितिवक्तव्यं नैतावतेतिकथमुक्तमित्यतस्तदभिप्रायमाह ॥ देवतास्विति ॥ उपास्यैवस्थितस्येतिशेषः । तेन समानकर्तृता । ननुयदिदेवेषुभगवदुपासनंनमोक्षसाधनंकिंतुहृदिस्थोपासनमेवेतिराज्ञोभिप्रायः तर्हिसुप्तंप्रतिकोपिंनीत्वासोमां तर्गतभगवद्वाचकैःबृहत्पांडरवासःसोमशब्दैःसुप्तामंत्रणंकिमर्थंक्रियतेतेनाभिप्रेतार्थासिद्धेरित्यतआह ॥ स्वहृदिस्थेति ॥ भग वतःसर्वत्राविशिष्टत्वात्हृदिस्थोपासनमेवमोक्षसाधनंनदेवतांतर्गतभगवदुपासनमितिकथमितिमुनेराशंकापरिहाराय स्वस्मिन् स्वहृदिस्थभगवद्रूपस्यदेवतांतर्गतरूपापेक्षयाविशेषसंबंधज्ञापनार्थमेतैःशब्दैःआमंत्रणमित्यर्थः । नन्वेतैःशब्दैरामंत्रणेनकथमयं विशेषोज्ञापितइतिचेत् इत्थं । सुप्तजीवोत्थापनायहिविष्णोरिदमामंत्रणं । ततश्चयदिदेवांतर्गतस्यस्वहृदिस्थस्यचविष्णुरूपस्यस्व

भाष्यं ॥ चित्ताभिमानित्वात्तस्य । स्वहृदिस्थितंस्वनियामकंभगवद्रूपमुपास्यैवमोक्षोभवति ॥ देवतासुभगवंतमुपास्यतत्तद्देवतासमीपंप्राप्यपु नःस्वहृदिस्थमुपास्यैवमोक्षोभवतीत्यतोनैतावताविदितंभवतीत्युक्तं ॥ १४ ॥ स्वहृदिस्थभगवद्रूपस्यस्वस्मिन्विशेषसंबंधज्ञापनार्थंबृहत्पांडरवासइत्याद्या मंत्रणं ।

स्मिन्संबंधविशेषाभावः तर्हिदेवगतभगवद्वाचकैःशब्दैरामंत्रितःसुप्तहृद्गतोविष्णुर्जीवमुत्थापयेत् । देवस्थभगवदामंत्रणस्यैवहृदिस्थभगवदामंत्रणत्वात् । नचोत्थापयति । तेनज्ञायते देवगतभगवद्रूपापेक्षयाहृद्गतभगवद्रूपस्यस्वस्मिन्संबंधविशेषोस्तीति । येनसंबंधविशेषेणदेवस्थभगवदामंत्रणंहृदिस्थभगवदामंत्रणंनभवतीतिभावः । ननुतर्हिहृदिस्थभगवद्रूपविशेषवाचकैरसाधारणनामभिरामंत्रणंकर्तव्यं । तस्यापिप्रबोधोपायत्वात् । पाणिपेषणंकिमर्थमित्यतआह ॥ **तेभ्यइति** ॥ सत्यमसाधारणनाम्नाआमंत्रणमपिप्रबोधोपायइति । तथापिनतच्छीघ्रप्रबोधोपायः । बहुशस्तथोक्तेपिप्रबोधादर्शनात् । किंतुपाणिपेषणमेव । तदनंतरंशीघ्रप्रबोधदर्शनात् । किंतत्रनिमित्तमितिचेत् तेभ्योऽसाधारणनामभ्योपिअस्यपाणिपेषणस्यशरीरेविशेषसंबंधसत्वात् अतः पाणिपेषणस्यशीघ्रप्रबोधोपायत्वात्पाणिपेषणेनआमंत्रितोभगवाञ्जीवमुत्थापयामासेत्यर्थः । ननुकेषांचित्सर्वगत्वेनकेषांचिद्धृदये हरिः । केषांचिद्बहिरेवासावुपास्यःपुरुषोत्तमइत्युक्तेः कथंहृदिस्थंउपास्यैवमोक्षइत्युक्तिरित्यतआह ॥ **येषामिति** ॥ १५ ॥ ननुहृदिस्थोपासनमेवमोक्षसाधनमित्यभिप्रेतार्थेनुपयोगाद्यत्रैषएतत्सुप्तोभूत्इत्यादिप्रश्नःप्रतिवचनंचकिमर्थं । नचहृदिस्थस्यदेवस्यपरमात्मापेक्षयास्वस्मिन्विशेषसंबंधज्ञापनार्थंतदितिवाच्यं । तस्यबृहत्पांडरवासइत्याद्यामंत्रणेनैवकृतत्वादित्यतआह ॥ **स्वहृदिस्थेनेति** ॥ संबोधनेनार्थाज्ज्ञापितोविशेषसंबंधः । अत्रतुयएषोंतर्हृदयआकाशःतस्मिञ्शेतइत्यादिनामुखतएवेतिविशेषः ।

भाष्यं ॥ तेभ्योनामभ्योप्यस्यशरीरेविशेषसंबंधइत्यतःपाणिपेषणेनजीवमुत्थापयामासभगवान् । येषांबहिरुपासनेनमोक्षस्तेषामपिहृद्युपासनंकिंचित्कर्तव्यमेव ॥ १५ ॥ स्वहृदिस्थेनभगवद्रूपेणविशेषसंबंधदर्शनार्थसेवयत्रैषएतत्सुप्तोभूदित्यादिप्रश्नप्रतिवचनंसमस्तं ।

अतएवतत्रज्ञापनार्थमित्युक्त्वात्रदर्शनार्थमित्युक्तं । सयत्रस्वप्नयाचरतीत्यादेःसंग्रहार्थंसमस्तमित्युक्तं । यएषप्रसिद्धोविज्ञानमयः पुरुषःपुरिशेतइत्येषःयत्रयदाएतत्स्वपनंयथाभवतितथासुप्तोभूत्तदाएषविज्ञानमयः क्वाभूदितिव्याख्यानमसत् । यत्रेत्यस्यय, देत्यर्थत्वेएषविज्ञानमयःपुरुषोयदासुप्तोभूत्तदाक्वाभूदित्येतावतापूर्णत्वेनशेषवैय्यर्थ्यादितिभावेनयत्रैषएतत्सुप्तोभूदित्येतद्व्याचष्टे ॥ **यत्रेति** ॥ वक्ष्यमाणपरामर्शसौकर्यायविज्ञानमयइत्याह । नन्वेवमपिएषविज्ञानमयःपुरुषोजीवःक्वाभूदित्येतावतापूर्तेर्यएषइतिव्यर्थं । यत्रेत्यस्यपरमेश्वरइत्यर्थत्वेक्कैषतदाभूदित्येतत्प्रश्नानुपपत्तिश्चेत्यतो यएषविज्ञानमय इत्येतद्व्याचष्टे ॥ **यत्रेत्यधिकरणभूतएवेति** ॥ ततश्चैषपरमात्माक्वाभूदितिप्रश्नवाक्यार्थत्वान्नानुपपत्तिरितिभावः । विज्ञानमयशब्दस्यपरमात्मवाचकत्वेश्रुतिमाह ॥ **अन्यइति** ॥ नन्वत्रापिविज्ञानमयशब्दस्यकोशपरत्वांगीकारात्कथमेतद्विवक्षितार्थेमानमित्यतस्तत्रोदाहृतश्लोकेब्रह्मशब्दश्रवणान्नैवंशंक्यमित्याह ॥ **विज्ञानमिति** ॥ १६ ॥ तानियदागृह्णातिअथैतत्पुरुषःस्वपितिनामेत्यत्रपुरुषइत्युक्तजीवस्यैवग्रहणकर्तृत्वमितिव्याख्यानंनिवारयंस्तद्वाक्यंव्याचष्टे ॥ **तानीति** ॥ तदेषांप्राणानांविज्ञानेनविज्ञानमादायेतिइंद्रियवृत्तिग्रहणकर्तृत्वेनपरमात्मनएवप्रकृतत्वादितिभावः । सयत्रेत्यस्यसजीवोयत्रयस्मिन्कालेस्वप्नयास्वप्नप्रवृत्त्याचरतिवर्ततइतिव्याख्यानमसत् । जीवंचचारयेत्तत्रेतिप्रमाणविरुद्धत्वेनसइतिपरमात्मनएवग्राह्यत्वात् । नन्वेवंसतितस्यैवोच्चावचंनिगच्छतीत्यत्रापिकर्तृ

भाष्यं० ॥ यत्रयस्मिन्परमेश्वरेविज्ञानमयेएषजीवःसुप्तोभूत् । यत्रेत्यधिकरणभूतएवयएषविज्ञानमयइतिपरामृश्यते । अन्योंतरआत्माविज्ञानमयः । विज्ञानंब्रह्मचेद्वेदेतिश्रुतेः ॥ १६ ॥ तानियदापरमात्मागृह्णातितदैतत्पुरुषोजीवःस्वपितिनाम ।

त्वापत्तिः । तत्रकर्त्रंतरानुक्तेरित्याशंकांपरिहरंस्तद्वाक्यंव्याचष्टे ॥ **सइति** ॥ महाराजमहाब्राह्मणयोरपिउच्चपदेनैवग्रहणसंभ
वात्उच्चावचमित्येवोक्तं ॥ १८ ॥ ननुजीवेश्वरयोरुभयोरपिस्वप्नावस्थागतत्वेकिंतयोर्वैलक्षण्यंइत्याशंकापरिहारकत्वेनतदुतेव
महाराजइत्यादिकं सयथामहाराजइत्यादिकंचप्रवृत्तमितिभावेनप्राधान्यज्ञापनायतद्वाक्यद्वयंव्यत्यासेनव्याचष्टे ॥ **सर्वदेति** ॥
प्राणान्मनोव्यतिरिक्तान् । वास्तवमहाराजादिभवनादेर्बाधितत्वात् राजवदात्मानंपश्यतीत्युक्तं । उच्चेत्यस्यराजवत्ब्राह्मणवच्चे
त्यनेनैवव्याख्यातप्रायत्वात् । अवचमित्यस्यार्थः श्वमार्जारादिवद्वेति । एतेनोच्चावचंनिगच्छतीत्युक्तस्यजीवस्यैवसयथेतिमहा
राजदृष्टांतेनप्राणग्रहीतृत्वोक्तेःकथंतानियदापरमात्मागृह्णातीत्युक्तमित्येतदपिपरास्तं । कुमारोत्यंतबालोमहाराजोमहाब्राह्मणो
वातिघ्नीमतिशयेनदुःखंहंतीत्यतिघ्नी । आनंदस्यसुखस्यावस्थातांगत्वाशयीतेतिव्याख्यानमसत् । बालादीनांदुःखस्यापिसत्वेन
दुःखासंभिन्नसुखाभावादितिभावेनानंदातिघ्न्यादिपदार्थानाह ॥ **आनंदस्येति** ॥ कुमारश्चित्पितरंचंदमानंप्रतिनानामरुद्रोपयं
तमितिश्रुतेः कुमारोरुद्रः । क्षत्रजात्यभिमानीतुपवनइत्युक्तेर्महाराजोवायुः । विष्णुर्ब्राह्मणजातिःसन्ब्रह्माजज्ञेचतुर्मुखइत्युक्तेर्म
हाब्राह्मणोब्रह्मा । एवंयत्रैपएतत्सुप्तोभूदित्यादिप्रकरणंपरमात्मपरत्वेनव्याख्यायजीवपरतयापरकीयव्याख्यानेउपक्रमविरोधंता

भाष्यं० ॥ सयत्रपरमात्मास्वप्नयानाड्याचरतितदाजीवउच्चावचंनिगच्छतीव ॥ १८ ॥ सर्वदामहाराजवत्प्राणानगृहीत्वापरमात्मापरिवर्त
ते । जीवस्तुकदाचिदेवस्वप्नेराजवदात्मानंपश्यतिकदाचिद्ब्राह्मणवच्छ्वमार्जारादिवद्वा । आनंदस्यपरमात्मनोऽतिघ्नींसमीपं । कुमारोरुद्रः । महारा
जोवायुः । महाब्राह्मणोब्रह्मा ।

२/३२/२२

वदाह ॥ **नहीति** ॥ श्रौतविज्ञानेनेत्यस्याभिप्रायः विज्ञानपूर्वकमिति । प्राणानांविज्ञानंइंद्रियाणांज्ञानजननशक्तिमित्यर्थः । अस्मादात्मनःसर्वेप्राणाःइत्युपसंहारविरोधमप्याह ॥ **नचेति** ॥ ६ ॥ नैतावताविदितंभवतीत्यस्यदेवतासुभगवंतमुपास्येत्यादिनायत्तात्पर्यमुक्तं तत्प्रमाणेनद्रढयति ॥ **आदित्येत्यादिना** ॥ अनेनयएवासावादित्येपुरुषःएतमेवाहंब्रह्मोपासइत्यादिखंडद्वादशकगतगार्ग्यवचनानामपितात्पर्यमुक्तंभवति । गच्छतःपश्चात्पृष्ठतउत्पन्नःशब्दोगच्छत्पाश्चात्यशब्दः । बुध्याविवेकेनगतमित्येतत्पूर्वत्राप्यन्वितं । सार्ष्णितांसमीपं । एषांवहिरुपासनेनेत्युक्तार्थेप्रमाणमाह ॥ **अथेति** ॥ ननुबृहत्पांडुरवासःसोमादिशब्दानांचंद्रपरत्वेतद्वाचकशब्दैःपरमात्मामंत्रणमयुक्तमित्यतस्तेषांपरमात्मपरत्वमाह ॥ **यानीति** ॥ तर्हिप्रसिद्धिविरोधइत्यतआह ॥ **तदुक्तान्येवेति** ॥ तद्वाचकान्येवनामानिविष्णोराकृष्यसूर्यादेउपचारतोनामानीत्यर्थः । बृहत्पांडुरवासइत्याद्यामंत्रणस्यस्वहृदिस्थभगवद्रूपस्येतियत्तात्पर्यमुक्तंतत्रप्रमाणमाह ॥ **विशेषेणेति** ॥ हरावितिशेषः । सोमादिनाम्नाआहूतोहरिर्जीवमुत्थापयामासेतिशेषः । सयत्रस्वप्नयाचरतीत्यादेःउच्चावचंनिगच्छतीत्यंतस्यतात्पर्यमाह ॥ **जीवंचेति** ॥ नकेवलंस्वयंचरति किंतुजीवं

भाष्यं० ॥ नहिजीवोविज्ञानपूर्वकंप्राणानांविज्ञानमादत्ते । नचसर्वप्राणलोकदेवभूतानांस्रष्टा ॥ ६ ॥ आदित्यचंद्रविद्युत्सुभूतेष्वादर्शएव च । गच्छत्पाश्चात्यशब्देचचक्षुश्छायागतंतथा । हिरण्यगर्भसंस्थंचसदोपास्यहरिंपरं । वदेवसार्ष्णितामेत्यहृद्युपास्यहरिंपुनः । मुक्तिमेत्यथयोवाह्यान्मुक्तिमेष्यतिसोपितु । हृदिकिंचिदुपास्यैवविष्णुंमुक्तिमनुव्रजेत् । यानिसूर्यादिनामानिविष्णोस्तानिनसंशयः । तदुक्तान्येवसूर्यादेराकृष्यैवोपचारतः । विशेषेणतुसंवंधोयतःस्वहृदिसंस्थिते । जीवस्यातोनसोमादिनाम्नाहूतोहरिःपरः । जीवंचचारयेत्तत्र

चचारयेदितिचशब्दार्थः ।यदाजीवंचारयेत् तत्रतदाऽयंजीवःस्वप्नंपश्यतीतिसंबंधः । तत्रस्वप्ननाड्यामितिवा । अथयदासुषुप्तो भवतीत्यारभ्ययएषएतच्छेतइत्यंतस्यतात्पर्यमाह ॥ यदेति ॥ जीवोयमित्यत्राप्यनुवर्तते तत्तदा । अस्मादात्मनःसर्वेप्राणाइ त्यादिव्याख्यातुंतदर्थसिद्धमर्थमाह ॥ सम्यग्ज्ञानमयादिति ॥ अयंजीवोनकेवलंसुप्तिमेष्यति किंतुउत्थानंचव्रजेत् । अपि शब्दस्यलोकानामपीत्युत्तरत्रसंबंधः । अस्मादात्मनइत्येतद्व्याचष्टे ॥ प्राणानामिति ॥ इंद्रियाणामित्यर्थः । सत्यसत्यइत्यने नतस्योपनिषत्सत्यस्यसत्यमित्येतद्व्याख्यातं । स्रष्टापातेत्यादिनाव्युच्चरेदित्येतदुपलक्षणपरमित्युक्तंभवति ॥ ततश्चायंखंडार्थः॥ बलाकस्यापत्यंबालाकिः । गर्गस्यगोत्रापत्यंगार्ग्यः ब्राह्मणः । अनूचानोवेदाध्ययनादिसंपन्नः । अतएवदृप्तोऽहंकारी । आसह किल सगार्ग्यः । काश्यांभवंकाश्यं अजातशत्रुंराजानमभिगम्य तेब्रह्मब्रवाणीत्युवाचह एवमुक्तःसअजातशत्रुः । त्वंब्रह्मब्रवी तुमसमर्थइतिसूचयन्नुवाच । एतस्यांवाचि ब्रह्मोपदेशरूपायां । यदित्वंब्रह्मब्रूयास्तर्हितुभ्यंवयंसहस्रंदद्मइतिभावः । कुतएवम पहासइत्यतआह ॥ जनकइति ॥ यदित्वंब्रह्मवक्तुंसमर्थस्तर्हिब्रह्मशुश्रूषवोजनाः समीपस्थंब्राह्मणंत्वांपरित्यज्यजनकोजनकइ

भाष्यं० ॥ यदाविष्णुःसनातनः । स्वप्नंपश्यतिजीवोयंयदाविज्ञानरूपिणं । सुषुप्तासंस्थितंविष्णुमेतितत्सुप्तिमेष्यति । सम्यग्ज्ञानमयाद्विष्णो रुत्थानंवाप्ययंव्रजेत् । प्राणानांचैवलोकानांदेवानांप्राणिनामपि । सत्यसत्योहरिःस्रष्टापाताविलयकृत्तथा । नियंतामोक्षदश्चैवविष्णुरेवसनातनइ तिनारायणश्रुतौ ॥ २० ॥ अजातशत्रुब्राह्मणं ॥ १ ॥

उप०॥दृप्तबालाकिर्हानूचानोगार्ग्यआससहोवाचाजातशत्रुंकाश्यंब्रह्मतेब्रवाणीति । सहोवाचाजातशत्रुःसहस्रमेतस्यांवाचिदद्मोजनकोजनकइति

तिक्षत्रियंप्रतिधावनंनकुर्युः कुर्वंतिच । अतोनतवसामर्थ्यमित्यर्थः ॥ १ ॥ एवमपहासितःस्वाभ्यस्ताःवह्वीःब्रह्मविद्याआह ॥ **सहृत्यादिना** ॥ आदित्येपुरुषोविष्णुःअस्तीतिशेपः । राजाइतोधिकमपितत्रजानामीतिभावेनाह ॥ **सहोवाचाजातशत्रुरित्यादिना** ॥ **मा मां** । एतस्मिन्विष्णोरादित्यस्थत्वेविपये । मासंवदिष्ठाःसंवादंमाकार्षीः । ज्ञातज्ञापनंनकार्यमितिभावः । यद्वा गार्ग्यमतिविक्षेपार्थंभामेतिद्विर्निषेधः । अहमेतमादित्यस्थंपुरुपं । अतिष्ठाः । जगद्धर्मवर्जितत्वेनातीत्यस्थितत्वादतिष्ठाः । सर्वेपांभूतानांमूर्धाउत्तमः । राजतेदीप्यतइतिरादेत्युपासेइत्युवाचेतिसंवंधः । अतिष्ठात्वज्ञानेनफलाभावेतदुपासनंव्यर्थमित्यतआह ॥ **सइति** ॥ यएतमादित्यस्थंएवमुक्तप्रकारेणोपास्तेसइत्यन्वयः । एवमुत्तरत्रापियोज्यं ॥ २ ॥ वृहत्पांडुरंशुक्लंवासोयस्यासौतथोक्तः । शुक्लांवरधरमितिवचनात् अस्योपासकस्यगृहेअहरहःप्रतिदिनंसोमस्सुतोभवतिप्रसूतोभवतीतिनिरंतरंप्रकृतिविकृत्यात्मकयागानुवृत्तिर्भवतीत्यर्थः । अस्योपासकस्यान्नंभोग्यंनक्षीयते ॥ ३ ॥ ४ ॥ नविद्यतेप्रवृत्तिरुद्वर्तनंयस्यसःअप्रवृत्तिः ।

उप० ॥ वैजनाथावंतीति ॥ १ ॥ सहोवाचगार्ग्योयएवासावादित्येपुरुपएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाअतिष्ठाःसर्वेपांभूतानांमूर्धाराजेतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेअतिष्ठाःसर्वेपांभूतानांमूर्धाराजाभवति ॥ २ ॥ सहोवाचगार्ग्योयएवासौचंद्रेपुरुपएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठावृहत्पांडुरवासाःसोमोराजेतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेऽहरहःसुतःप्रसुतोभवतिनास्यान्नंक्षीयते ॥ ३ ॥ सहोवाचागार्ग्योयएवासौविद्युतिपुरुपएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठास्तेजस्वीतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेतेजस्वीहभवतितेजस्विनीहास्यप्रजाभवति ॥ ४ ॥

अस्यप्रजासंततिरस्माल्लोकात्नोद्वर्ततेनोन्मूल्यतइतिसंबंधः ॥ ५ ॥ इंद्रःपरमैश्वर्यसंपन्नः विगतंकुंठनंपराभवोयस्यसविकुंठः ।
विकुंठएववैकुंठः । स्वयमेवापराजितवहुरूपत्वादपराजितसेना जिष्णुरुत्तमः पराजिष्णुःपराजयशीलोनभवतीत्यपराजिष्णुः ।
अन्यतस्त्यजायीअन्येषांजेताभवतीत्यर्थः ॥ ६ ॥ नसह्यतइति विपासहिरसह्यः ॥ ७ ॥ प्रतिरूपोनुकूलः । एनंउपासकं । सर्वं
प्रतिरूपमेवानुकूलमेवउगच्छति । अवधारणव्यावर्त्यमाह ॥ नाप्रतिरूपमिति ॥ अथोअन्यच्चफलं अस्मादुपासकात् । प्रति
रूपःअनुकूलःपुत्रः । जायतइति ॥ ८ ॥ रोचिष्णुःप्रकाशनशीलः अथोअन्यच्चफलं । यैर्विद्वद्भिःसंनिगच्छतिसंगतोभवति ता
न्सर्वानतिरोचतेअतिक्रम्यप्रकाशते ॥ ९ ॥ यंतंगच्छंतं । अनुपश्चात्पृष्ठतः । शव्दःउदैतिउत्पद्यते । तस्मिन् गच्छतपश्चात्यश

उप० ॥ सहोवाचगार्ग्योयएवायमाकाशेपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्टाःपूर्णमप्रवर्तीतिवाअहमेतमुपास
इतिसयएतमेवमुपास्तेपूर्यतेप्रजयापशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्तते ॥ ५ ॥ सहोवाचगार्ग्योयएवायंवायौपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजा
तशत्रुर्मामैतस्मिन्संवदिष्टाइंद्रोवैकुंठोपराजितासेनेतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेजिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥ ६ ॥ सहोवा
चगार्ग्योयएवायमग्नौपुरुषएतमेवाहंब्रह्मोपासइति सहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्टाविषासहिरितिवाअहमेतमुपासइति सयएतमेवमुपास्ते
विपासहिर्हभवतिविषासहिर्हास्यप्रजाभवति ॥ ७ ॥ सहोवाचगार्ग्योयएवायमप्सुपुरुषएतमेवाहंब्रह्मोपासतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदि
ष्टाःप्रतिरूपइतिवाअहमेतमुपासइति सयएतमेवमुपास्तेप्रतिरूपꣳहैवैनमुपगच्छतिनाप्रतिरूपंअथोप्रतिरूपोऽस्माज्जायते ॥ ८ ॥ सहोवाचगार्ग्योय
एवायमादर्शेपुरुषएतमेवाहंब्रह्मोपासइति सहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्टारोचिष्णुरितिवाअहमेतमुपासइतिसयएतमेवमुपास्तेरोचिष्णुर्हभवति
रोचिष्णुर्हास्यप्रजाभवत्यथोयैःसंनिगच्छतिसर्वाꣳस्तानतिरोचते ॥ ९ ॥ सहोवाचगार्ग्योयएवायं यंतंपश्चाच्छव्दोनूदेत्येतमेवाहंब्रह्मोपासइति सहो

ब्दे । यएवायं पुरुषइत्यर्थः । असुःआयुष्यप्रदः । सर्वमायुरेतीत्यस्याभिप्रायमाह ॥ **नैनमिति** ॥ कालात्कालमृत्योः पुरा अपमृत्युंनप्राप्नोतीत्यर्थः ॥ १० ॥ द्वितीयःद्वितीयवान्सपरिवारः । अपगच्छतीत्यपगःनविद्यतेऽपगःपरिवारोयस्यसःअनपगः अविच्छिन्नपरिवारइत्यर्थः । गणःपरिवारः ॥ ११ ॥ छायामयःछायागतः मृत्युर्मारकः ॥ १२ ॥ आत्मनिहिरण्यगर्भे आत्मन्वीचित्ताभिमानिचतुर्मुखवानित्यर्थः । आत्मन्वीभवतिचित्तवान्भवति चतुर्मुखस्यचित्ताभिमानित्वात् ॥ १३ ॥ एवंस्वाभ्यस्तविद्याउक्त्वासगार्ग्यस्तूष्णीमासहकिल सःअजातशत्रुः तूष्णींस्थितंगार्ग्यं एतावन्मुएतावदेव ब्रह्मविदितंकिमित्युवाच एतावद्धिएतावदेव ब्रह्मविदितमितिगार्ग्यः प्रत्युवाच एवमुक्तवंतंगार्ग्यंप्रत्यजातशत्रुर्नैतावताब्रह्मविदितंभवतीत्युवाच

उप० ॥ वाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाअसुरितिवाअहमेतमुपासइतिसयएतमेवमुपास्तेसर्वꣳहैवास्मिँल्लोकआयुरेतिनैनंपुराकालात्प्राणोजहाति ॥ १० ॥ सहोवाचगार्ग्योयएवायंदिक्षुपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाद्वितीयोनपगइतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेद्वितीयवान्हभवतिनास्माद्गणश्छिद्यते ॥ ११ ॥ सहोवाचगार्ग्योयएवायंच्छायामयःपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठामृत्युरितिवाअहमेतमुपासइतिसयएतमेवमुपास्तेसर्वꣳहैवास्मिँल्लोकआयुरेतिनैनंपुराकालान्मृत्युरागच्छति ॥ १२ ॥ सहोवाचगार्ग्योयएवायमात्मनिपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाआत्मन्वीतिवाअहमेतमुपासइति सयएतमेवमुपास्ते आत्मन्वीहभवत्यात्मन्विनीहास्यप्रजाभवतिसहतूष्णीमासगार्ग्यः ॥ १३ ॥ सहोवाचाजातशत्रुरेतावन्नू३इत्येतावद्धीतिनैतावताविदितंभवतीतिसहोवाचगार्ग्यउपत्वायानीति ॥ १४ ॥

एतावताऽऽदित्यादिगतपरमात्मोपासनमात्रेणमोक्षार्थंवेदितव्यं विदितंनभवति । स्वहृद्गतपरमात्मरूपविशेषोपासनस्यैवमोक्ष साधनत्वादितिभावः । सगार्ग्योमोक्षसाधनविद्याश्रवणार्थं त्वात्वां उपायानिशिष्यत्वेनोपयामीत्युवाच ॥ १४ ॥ एवमुक्तःसअजा तशत्रुःउवाचाह क्षत्रियोमेब्रह्मवक्ष्यतीतिब्राह्मणःक्षत्रियंशिष्यत्वेनोपेयादितियत् एतत्प्रतिलोमंविपरीतंवै तस्मात् । विएवेतिपद च्छेदः । त्वात्वांप्रति। ब्रह्म विज्ञापयिष्याम्येवविज्ञापनमेवकरिष्यामि । नोपदेशमित्यर्थः। सर्वत्रपरमात्मनोऽविशिष्टत्वात्कथंहृद्ग तोपासनमेवमोक्षसाधनंनदेवाद्यंतर्गतपरमात्मोपासनमित्यतःहृद्गतस्यपरमात्मनःदेवस्थरूपापेक्षयास्वस्मिन्विशेषसंबंधंज्ञापितुका मः तंगार्ग्यं पाणावादायहस्तेगृहीत्वोत्तस्थौ । तौगार्ग्याजातशत्रू क्वचित्प्रदेशेसुप्तंपुरुषंप्रत्याजग्मतुः । पूर्वोक्तविशेषसंबंधज्ञाप नार्थंतंसुप्तपुरुषांतर्गतंपरमात्मानंबृहत्पांडुरवासःसोमराजन्नित्येतैर्नामभिःआमंत्रयांचक्रे सःसुप्तांतर्गतोनोत्तस्थौनोत्थापयामास जीवं हृद्गतरूपविशेषवाचकासाधारणनामापेक्षयाशरीरेपाणिपेषणस्यविशेषसंबंधसत्वेनशीघ्रप्रबोधोपायत्वात्तंसुप्तंपाणिनापेषं कृत्वाबोधयांचकार ससुप्तस्थोहरिःपाणिपेषणेनोत्तस्थौ । हकिल पाणिपेषणेनजीवमुत्थापयामासभगवानितियावत् ॥ १५ ॥ एवमर्थाद्विशेषसंबंधंज्ञापयित्वास्पष्टंदर्शयितुंपृच्छति ॥ **सहेति** ॥ एषजीवः एतत्एतस्मिन्शरीरे यत्रयस्मिन्परमेश्वरे सुप्तः ।

उप० ॥ सहोवाचाजातशत्रुःप्रतिलोमंवैतद्यद्ब्राह्मणःक्षत्रियमुपेयाद्ब्रह्ममेवक्ष्यतीतिव्येवत्वाज्ञापयिष्यामीतितंपाणावादायोत्तस्थौतौहपुरुषंसुप्त माजग्मतुस्तमेतैर्नामभिरामंत्रयांचक्रेबृहत्पांडुरवासःसोमराजन्नितिसनोत्तस्थौतंपाणिनापेषंबोधयांचकारसहोत्तस्थौ ॥ १५ ॥ सहोवाचाजातशत्रुर्य त्रैषएतत्सुप्तोभूद्यएष

एषसुप्ताधारः पुरुषःपरमात्मा विज्ञानमयःसम्यक्ज्ञानस्वरूपः यएषःप्रसिद्धोविज्ञानमयःपुरुषः । एषःतदासुप्तिसमयेक्वाभूत् कुत्रस्थितः एततएतस्मिन्प्रबोधकाले । कुतआगादितियोजना । ततसुप्तकालीनंपरमात्मावासस्थानंतदागमनावधिंचगार्ग्योन मेने ॥ १६ ॥ एवमप्रतिबुध्यमानंप्रश्नकर्ताअजातशत्रुरुवाच । यत्रैषएतत्सुप्तोभूतइत्याद्यनुवादः । यएषविज्ञानमयःपुरुषःपर मात्मा । तदासुप्तिंकाले । एषांप्राणानामिंद्रियाणां । विज्ञानंविज्ञानजननशक्तिं । विज्ञानेनविज्ञानपूर्वकं आदाय । एषअंतर्हृ दयेहृदयस्यांतराकाशोस्तितस्मिनशेते । यएषोंतर्हृदयआकाशइत्यादिनैवोत्तरस्यजातत्वादेषांप्राणानामित्यादिकंव्यर्थमितिचेत् । न । यतःप्रकृतसुप्तिस्वरूपनिरूपणार्थंतदुक्तमितिभावेनाह ॥ तानीति ॥ विज्ञानमयःपुरुषःपरमात्मा । तानिविज्ञानजननश क्तिमंतिइंद्रियाणि । यदागृह्णातिअथतदा एषचासौपुरुषश्चैत्तत्पुरुषःजीवः । यद्वाएततएतस्मिन्परमात्मनिशरीरेवापुरुषःस्व पितिनाम । तानिगृह्णातीत्युक्तंविवृणोति ॥ तद्गृहीतएवेति ॥ प्राणोघ्राणेंद्रियंत्वगिंद्रियंच । एवंक्वाभूदित्यस्यपरिहारोक्तौकु तआगादित्यस्यपरिहारः ततएवागादितिसुज्ञानएवेतिपृथङ्नोच्यते ॥ १७ ॥ स्वहृदिस्थस्यस्वस्मिन्विशेषसंबंधप्रदर्शनार्थमेवस्व प्नावस्थाप्रवर्तकत्वमप्याह ॥ सइति ॥ सपरमात्मा यत्रयदा एतदेतस्मिंच्छरीरे स्वप्नयानाड्या चरतिजीवंचारयतिच । पर

उप० ॥ विज्ञानमयःपुरुषःक्वैषतदाभूत्कुतएतदागादितितदुहनमेनेगार्ग्यः ॥ १६ ॥ सहोवाचाजातशत्रुर्यत्रैषएतत्सुप्तोभूद्यएषविज्ञानमयःपुरुषस्तदेषांप्राणानांविज्ञानेनविज्ञानमादाययएषोंतर्हृदयआकाशस्तस्मिनशेतेतानियदागृह्णात्यथहैतत्पुरुषःस्वपितिनामतद्गृहीतएवप्राणोभवतिगृहीतावाग्गृहीतंचक्षुर्गृहीतंश्रोत्रंगृहीतंमनः ॥ १७ ॥ सयत्रैतत्स्वप्नयाचरति

मात्मानाड्याकुतश्चरतीत्यतआह ॥ नेहेति ॥ हयस्मात् । तेनाडीविशेषाः अस्यपरमात्मनोलोकाः । तस्मात्तयाचरतीतिसंबंधः । जीवेश्वरयोरुभयोरपिस्वप्नावस्थागतत्वेकोविशेषस्तयोरित्यतस्तदाजीवव्यापारंतावदाह ॥ तद्वुतेवेति ॥ ततृतदा महाराजइवभवतितद्वदात्मानंपश्यति । महाब्राह्मणइवभवतीतिसंबंधः । किंबहुना यदुच्चंगजादि यच्चावचंश्वमार्जारादि तद्वदात्मानं निगच्छति । पश्यति उतशब्दाःपरस्परसमुच्चये । एवंजीवस्वरूपमुक्त्वापरमात्मस्वरूपंसदृष्टांतमाह ॥ सइति ॥ जनपदान्देशान् गृहीत्वास्ववशेकृत्वा एषपरमात्मा । एतत्प्राणान् एतस्यजीवस्य । मनोव्यक्तिरिक्तेंद्रियाणि । स्वेस्वाधीनेशरीरे ॥ १८ ॥ यएषोंतर्हृदयआकाशस्तस्मिन्शेतइत्युक्तं तत्रविशेषंवक्तुमाह ॥ अथेति ॥ प्रागुक्तसुप्तिस्वरूपंस्मारयन्यदासुपुप्तोभवतीत्युक्तंविवृणोति ॥ यदेति ॥ यदाजीवःकस्यचनकिंचन । नवेद तदा याःजीवस्यसुखहेतुत्वेन परमात्मनानिहितत्वेनवा हितानाम । द्वाभ्यांअधिकासप्ततिःद्वासप्ततिः सहस्राणिनाड्यः । हृदयात्हृदयमारभ्यवर्तमानंपुरीततंशिरःपर्यंतंशरीरेव्याप्तं । सुपुम्नाख्यनाडीविशेषं । अभिपरितः । प्रतिष्ठंते । ताभिर्नाडीभिः प्रत्यवसृप्यचरित्वा पुरीततिसुपुम्नाख्यनाडीविशेषे शेतेपरमात्मा । सदृष्टांतंसुपुप्तिस्थितिप्रकारमाह ॥ सयथेति ॥ वक्ष्यमाणोदृष्टांतोयथा कुमारोरुद्रः महाराजोवायुः । महाब्राह्मणोब्रह्मा । आनं

उप० ॥ तेहास्यलोकास्तदुतेवमहाराजोभवत्युतेवमहाब्राह्मण उतेवोच्चावचंनिगच्छतिसयथामहाराजोजानपदानगृहीत्वास्वेजनपदेयथाकामंपरिवर्ततैवमेवैषएतत्प्राणान्गृहीत्वास्वेशरीरेयथाकामंपरिवर्तते ॥ १८ ॥ अथयदासुपुप्तोभवतितदानकस्यचनवेदहितानामनाड्योद्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठंतेताभिःप्रत्यवसृप्यपुरीततिशेतेसयथाकुमारोवामहाराजोवामहाब्राह्मणो

दस्यानंदरूपस्यपरमात्मनोतिघ्नींसमीपं गत्वाशयीतसुखमासीत एवमेवैषजीवः एतदेतस्मिन्सुषुप्तासंस्थितेपरमात्मनि । शेते सुखमास्ते ॥ १९ ॥ नकेवलंसुप्तप्राप्यत्वंपरमात्मनः किंतुतदुत्थानहेतुत्वंचेतिभावेनहृद्गतस्यपरमात्मनोमाहात्म्यंसदृष्टांतमाह ॥ **सयथोर्णनाभिरिति** ॥ अत्रोर्णनाभिशब्देनतदुपभुक्तमन्नंग्राह्यं । तंतुनातंतुरूपेण । ऊर्णनाभेःव्युच्चरेत्उद्गच्छेत् । यथा वाक्षुद्राःविष्फुलिंगाःअग्नेर्व्युच्चरंति । एवमेवास्माद्विज्ञानमयादात्मनःपरमात्मनः । सर्वेप्राणाःइंद्रियाणि । सर्वेलोकाभूरादयः । सर्वेदेवाःचतुर्मुखादयः सर्वाणितदन्यानिभूतानिप्राणिनोव्युच्चरंति उत्पद्यंते । उपलक्षणमेतत् । नश्यंतीत्याद्यपिग्राह्यं । अंतर्यामिणोगोप्यंनामधेयमाह ॥ **तस्येति** ॥ तस्यहृद्गतस्यपरमात्मनः सत्यस्यसत्यमिति उपनिषद्रहस्यंनाम तद्व्याचष्टे॥**प्राणाइति**॥ प्राणंतीतिप्राणाःइंद्रियलोकदेवभूतानि । तेषामेषपरमात्मा सद्भावमुत्पत्तिं यापयति इतिसत्यइति ॥ २० ॥ **अजातशत्रुब्राह्मणं** ॥ १ ॥ **अथभाष्यार्थः** ॥ इंद्रियजयाभावेविद्यानसिध्यतीतिभावेन कांचनविद्यामाह ॥ **योहवाइत्यादिना** ॥ यद्वा अथेममेवनाप्नोद्योयंमध्यमःप्राणः इत्युक्तप्राणस्यमहिमांतरमाह ॥ **योहवाइति** ॥ इदमेवाधानंइदमेवप्रत्याधानमितिश्रुतावाधानप्रत्याधानशब्दौव्याख्यातौ । तत्राप्रतीतेराधानप्रत्याधानेदंशब्दार्थानाह ॥ **आधानमिति** ॥ अवस्थीयतेअस्मिन्नित्यव

उप० ॥ वातिघ्नीमानंदस्यगत्वाशयीतैवमेवैषएतच्छेते ॥ १९ ॥ सयथोर्णनाभिस्तंतुनोच्चरेद्यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनः सर्वेप्राणाःसर्वेलोकाःसर्वेदेवाःसर्वाणिभूतानिव्युच्चरंति तस्योपनिषत्सत्यस्यसत्यमितिप्राणावैसत्यंतेषामेषसत्यं ॥ २० ॥ इतिअजातशत्रुब्राह्मणं ॥१॥

भाष्यं० ॥ आधानमवस्थानंसूक्ष्मशरीरं । प्रत्याधानंवितानंस्थूलशरीरं ।

स्थानं गृहं । वितानंगृहाश्रयभूतस्थलविस्तारः । सूक्ष्मशरीरंस्थूलशरीरमितीदंशब्दद्वयार्थकथनं । प्राणशब्दस्यमध्यमप्राणपर
त्वेस्वस्यस्वस्थूणात्वायोगइत्यतस्तद्व्याचष्टे ॥ **प्राणइति** ॥ स्थूणादामबंधनस्तंभइत्यर्थः । समग्रब्राह्मणंप्रमाणेनव्याचष्टे ॥
वायुरित्यादिना ॥ अयंवावशिशुरितिवाक्यंव्याचष्टे ॥ **वायुरिति** ॥ पुरुषरूपस्यवायोःदामस्थूणाद्यनपेक्षणात् गोवत्सरूप
णेत्युक्तं । शिशुशब्दार्थकथनंवत्सरूपेणेति । तस्येदमेवाधानंइदमेवप्रत्याधानमितिवाक्यंव्याचष्टे ॥ **सूक्ष्मदेहइति** ॥ जीवस्ये
तिशेषः । स्थूलदेहइत्यनुवर्तते । अन्नंदामेतिवाक्यंव्याचष्टे ॥ **अन्नमिति** ॥ अन्नंश्रीः अन्नाभिमानिनीसाक्षाच्छ्रीरेवप्रमदोत्त
मा । सान्नमित्युच्यतइत्युक्तेः । प्राणःस्थूणेतिवाक्यंव्याचष्टे ॥ **स्थूणेति** ॥ योहवाइत्यादिअवरुणद्धीत्यंतंवाक्यंव्याचष्टे ॥
ध्यायत्येवमिति ॥ भ्रातृव्यानित्यस्यार्थः शत्रूनिति द्विषतइत्यस्यार्थः विषयेष्वभिधावतइति स्वानभिमतविषयाभिधावनहे
तुत्वादित्यर्थः । असुरान्श्रोत्राद्यभिमानिनः इंद्रियजयस्यस्वतःपुरुषार्थत्वाभावादाह ॥ **वेत्तीति** ॥ १ ॥ तमेताःसप्ताक्षितय
इत्येतद्व्याचष्टे ॥ **दक्षिणाक्षिस्थितमिति** ॥ तद्याइमाअक्षँल्लोहिन्यइतिवायूपासकरुद्रादीनांचक्षुःप्रदेशनिष्ठत्वोक्त्योपास्यस्या
पिवायोःचक्षुस्थितत्वमर्थलब्धमितिभावेनैतदुक्तं स्वरूपेणाक्षिस्थत्वंसर्वसाधारणमित्यतोव्याचष्टे ॥ **अक्षीणेति** ॥ उपासनायां

भाष्यं० ॥ प्राणोनारायणःस्थूणा । वायुर्गोवत्सरूपेणसर्वप्राणिपुसंस्थितः । सूक्ष्मदेहोगृहंतस्यवितानंस्थूलउच्यते । अन्नंदामात्मकंतस्यस्थू
णातुभगवान्हरिः । ध्यायत्येवंहियोवायुंश्रोत्रादीन्मनसासह । बुद्धिंचसप्तशत्रून्सविषयेष्वभिधावतः । असुरान्सन्निरुध्यैववेत्तिनारायणंपरं । दक्षि
णाक्षिस्थितंवायुंसप्तदेवाउपासते । अक्षीणज्ञानमनसःसदाशिवपुरःसराः । ॥ १४१ ॥

तदक्षयस्यैवोपयोगादितिभावः । नास्यान्नंक्षीयते यएवंवेदेतिवाक्यंऐहिकमात्रफलपरत्वप्रतीतिनिवारणायव्याचष्टे ॥ **उपास्य मानमिति** ॥ मोक्षार्थआनंदातिशयार्थं । तमेवंविद्वानितिश्रुतिविरोधपरिहारायोक्तंस्थूणयाविष्णुनासार्धमिति ॥ २ ॥ तस्मिन्यशोनिहितंविश्वरूपमितिमंत्रंयशआदिशब्दानांप्रसिद्धार्थपरत्वप्रतीतिंनिवारयन्व्याचष्टे ॥ **विश्वरूपमिति** ॥ सर्वेपांशिरसीतिशेषः । ननुपूर्वंतमेताःसप्ताक्षितयइतिवायोर्दक्षिणाक्षिस्थितत्वमित्युक्तं तेनैवतत्स्थूणाभूतविष्णोस्तद्दामरूपरमायाअपिदक्षिणाक्षिस्थितत्वमुक्तप्रायमेव । तथाचविष्णुरमावायूनांदक्षिणाक्षिस्थितत्वेशिरःस्थितत्वप्रतिपादकमंत्रोदाहरणंअसंगतमित्याशंकां परिहरति ॥ **सर्वेषांदक्षिणाक्षिगाःसंतःशिरसिसंस्थिताइति** ॥ अनेनश्रुतौतस्मिन्नित्यस्यदक्षिणाक्षिरूपशिरोभागविशेषइत्यर्थइत्युक्तंभवति । विष्णवादिषुविश्वरूपशब्दंनिर्वक्ति ॥ **पूर्णत्वादिति** ॥ गुणैरितिशेषः । निरूपचरितपूर्णताज्ञापनायपूर्णत्वादित्येवोक्तं । स्त्रीषुजीवेष्वितिनिर्धारणसप्तम्यौ । स्त्रीशब्दःपरतंत्रचेतनोपलक्षकः । तेष्वेवयशःशब्दंनिर्वक्ति ॥**यशइति** ॥ एतइति वक्ष्यमाणमत्रापिसंबध्यते । यतोज्ञानसुखात्मकाःअतोयशइतिउच्यंतइत्यर्थः । ननुप्राणावैयशोविश्वरूपमितिश्रोत्रादिप्राणानांयशोविश्वरूपत्वोक्तेः कथंविष्णवादिपरत्वेनव्याख्यानमित्यतःप्राणशब्दमपिविष्णवादिषुनिर्वक्ति ॥ **प्राणाश्चेति** ॥ प्रा

भाष्यं० ॥ उपास्यमानंतंदेवंमोक्षार्थंवायुमीश्वरं । स्थूणयाविष्णुनासार्धंयोविद्यात्सोन्नमश्नुते । अक्षय्यमेवमुक्तःसन्सर्वदुःखविवर्जितः ॥ २ ॥ विश्वरूपंयशश्चेतिनाम्नाविष्णूरमातथा । वायुश्चसंस्थितानित्यंसर्वेषांदक्षिणाक्षिगाः । पूर्णत्वाद्विश्वतोविष्णोरमायास्त्रीषुपूर्णतः । वायोर्जीवेषुपूर्णत्वा यशोज्ञानसुखात्मकाः । प्राणाश्चैतेप्रणेतृत्वा

णावाऋषयः इतिवाक्यगतऋषिशब्दस्यप्रसिद्धऋषिपरत्वप्रतीतिनिरासायप्राणशब्दनिर्वचनपूर्वकंतदभिधेयमाह ॥ **प्राणाश्चेति**॥ एतेरुद्रपूर्वकाः । प्रणेतृत्वात्प्राणाश्च ॥ ३ ॥ अयमेवगौतमइत्यादिवागेवात्रिरित्यंतानिवाक्यानिरुद्रादिषुगौतमादिशब्दनिर्वचन पूर्वकंव्याचष्टे ॥ **गौतमइत्यादिना** ॥ रुद्रःपर्जन्यइत्यादिकंअयमितिश्रौतेदंशब्दार्थकथनं । ताभिरेनंरुद्रइतितेषामेवप्रसक्त त्वादितिभावः । अतिशयितागौर्ज्ञानंगोतमातस्याअयमाश्रयोगौतमइतिनिर्वचनमभिप्रेत्यतत्तात्पर्यमुक्तं ॥ **सर्वज्ञत्वादिति** ॥ वाजमित्यनेनभरत्पूर्यमाणमन्नंयेनेतिविग्रहउक्तोभवति । प्रकाशनाद्विज्ञापयेदितिसंबंधः । विश्वशब्दोपपदादंतर्णीतण्यर्थात् आङुपसृष्टात् माङ्मानइत्यस्मात्कर्तरिक्त्रिप्रत्ययेआतोलोपइटिचेत्याकारलोपेगत्यर्थादमतेरित्रप्रत्ययेवाविश्वामित्रइतिरूपसिद्धि रितिज्ञेयं ॥ **जातमिति** ॥ अन्येभ्योदृश्यतइतिजनेःकर्मणिडप्रत्ययेजायतइतिजंनिर्वचनत्वान्मकारगतेकारस्याकारेतकारगता कारलोपेतकारस्यदत्वेमितंपरिमितंज्ञातंवामद् । अत्तेःकर्तरिनिप्रत्ययेदस्यगत्वेअत्तीत्यग्निः ॥ **वसतामिति** ॥ वसतीतिवसन् । ततइष्टन्प्रत्ययेटेरितिटिलोपेवसिष्ठइतिरूपं । अगुणवचनत्वेपिइष्टन्प्रत्ययःप्रयोगवशाज्ज्ञातव्यः ॥ **मेघेति** ॥ **कमुदकं श्याश याना पिबतीतिकश्यपः** । अप्यक्षरसाम्यान्निर्ब्रूयादितिशयानेत्यस्यश्यभावः । पापानइत्यतःकःप्रत्ययइतिभावः । **वाक्शब्दा**

भाष्यं० ॥ दृषयोरुद्रपूर्वकाः ॥ ३ ॥ गौतमोनामरुद्रस्तुसर्वज्ञत्वात्प्रकीर्तितः । भरद्वाजस्तुपर्जन्योवाजमन्नंभरेद्यतः । वृष्ट्यैवविश्वामि त्राख्यआदित्योयत्प्रकाशनात् । विश्वंविज्ञापयन्नित्यमग्निस्तुजमदग्निकः । जातंमितंचात्तियस्माद्वशिष्टाख्यस्तुवासवः । वसतामुत्तमोयस्मात्पृथ्वी कश्यपनामिका । मेघवृष्टंपिबेद्यत्कंशयानैवहिसासदा ।

र्थोद्यौरिति उमेत्यर्थः । हियस्मात्तस्यैद्युस्यैर्हुतमनयाऽद्यतेतस्मादित्यर्थः । अनेनवाचाह्यन्नमद्यतइत्येतद्व्याख्यातंभवति । अद भक्षणइत्यस्मात्कर्तरिऔणादिकेत्रिप्रत्ययेअत्रिरितिरूपमितिभावः । नन्वध्यात्मंशिवादीनांमनआदिषुस्थित्युक्तेःकथंदक्षिणाक्षिस्थितत्वमुच्यतइत्यतआह ॥ **श्रोत्रेति** ॥ उपलक्षणमेतत् मनआदिष्वित्यपिग्राह्यं । श्रोत्रनासिकाग्रहणेनरुद्रोन्वायत्तःइत्यत्र रुद्रादिशब्दाःचंद्रादेरुपलक्षकाइत्युक्तंभवति । श्रोत्रदिङ्नासिकावाक्चक्षुस्संस्थिताएतेशिवादयोदेवाद्वितीयेनरूपेणदक्षिणाक्षिपुसंस्थिताइतियोजना । सर्वस्यात्ताभवति सर्वमस्यान्नंभवति । यएवंवेदेतिवाक्यंव्याचष्टे ॥ **एवमिति** ॥ तमेताःसप्ताक्षितयइत्यादिस्वोक्तार्थप्रतिपादकमंत्रव्याख्यानरूपंब्राह्मणंप्रकरणशुध्याव्याख्यायेदानींश्रुत्यभिप्रेतार्थप्रतिपादकमंत्रव्याख्यानरूपंवाग्व्यष्टमीब्रह्मणासंवित्तेतिवाक्यंव्याचष्टे ॥ **सरस्वतीति** ॥ भारतीत्यर्थः । उपास्तइत्यनेनवागष्टमीतिमंत्रेआसतइत्येतद्वचनव्यत्यासेनात्रापिसंबध्यतइत्युक्तंभवति । वागष्टमीत्यंतेउक्तत्वात्तस्यारुद्राद्युपासकत्वप्रतीतिनिवारणायाह ॥ **वायुमेवैकमिति** ॥ ब्रह्मणासंवित्तेत्यस्यार्थोब्रह्मवेदितेति । तदेवविवृणोति ॥ **ब्रह्मनामेति** ॥ विशेषतोरुद्राद्यपेक्षया सर्वस्यात्ताभवतीतिवाक्यमे

भाष्यं० ॥ द्यौरत्रिरितिसंप्रोक्तातत्स्यैर्हिहुतमद्यते । श्रोत्रदिङ्नासिकावाहुदक्षिणाक्षिपुसंस्थिताः । द्वितीयेनतुरूपेणदेवाएतेशिवादयः । एवमेषांतुनामानिवेत्तियःसर्वभुग्भवेत् । सरस्वत्यष्टमीचैववाचिसंस्थाविशेषतः । उपास्तेवायुमेवैकंसस्थूणंब्रह्मवेदिता । ब्रह्मनामासदावायुरेनांवेत्तिविशेषतः । इतितांवेदयोविद्वान्सर्वात्तासभविष्यतीतिनारायणीये ॥ शिशुब्राह्मणं ॥ ७ ॥ ४ ॥ २ ॥

तच्छेषत्वेनापिव्याचष्टे ॥ इतीति ॥ ४ ॥ ततश्चायंखंडार्थः ॥ साधानंसप्रत्याधानंसस्थूणंसदामंशिशुंउपासीतेतिभावेनत
थोपास्तौफलमाह ॥ योहवाइति ॥ योऽधिकारी साधानंसप्रत्याधानंसस्थूणंसदामंशिशुंवेदोपास्ते सः । द्विषतःविषयाभिधा
वनहेतून् अतएवभ्रातृव्यान्शत्रून्सप्तमनोबुद्धिसहितश्रोत्रादिज्ञानेंद्रियरूपान् तदभिमान्यसुरांश्चावरुणद्धिजितेंद्रियोभवती
तियावत् । कःशिशुःकिमाधानादिकमित्यतआह ॥ अयंवावेति ॥ योयंप्रागुक्तःसर्वप्राणिषुसंस्थितोमध्यमःप्राणोवायुः । अय
मेवशिशुःगोवत्सरूपः । तस्यसर्वप्राणिगतगोवत्सरूपवायोः । इदमेवप्रमाणप्रसिद्धंजीवसूक्ष्मशरीरमेवाधानं । आधीयतेअस्मि
न्नित्याधानंअवस्थानंगृहमित्यर्थः । इदंजीवस्थूलशरीरमेव प्रत्याधानंवितानंगृहाश्रयप्रदेशविस्तारः । प्राणोनारायणः स्थूणाव
त्सवंधनस्तंभः । अन्नंश्रीः दामवंधकरज्जुः । तथाचजीवस्थूलशरीराख्यप्रदेशविस्तारस्थतल्लिंगशरीररूपगृहेनारायणाख्यस्थूणा
यामन्नाख्यश्रीरूपदाम्नावद्धंगोवत्सरूपवायुंयोवेदेतिपूर्ववाक्याभिप्रायइतिभावः । अक्षिस्थवायूपास्तौरुचिजननार्थपरकृतिरूपा
र्थवादमाह ॥ तमिति ॥ दक्षिणाक्षिस्थितंवायुंअक्षितयःअक्षीणज्ञानमनसः एताःवक्ष्यमाणाःरुद्राद्याः सप्तदेवताउपतिष्ठं
ते । कःकिमधिष्ठायोपास्तइत्यतआह ॥ तद्याइति ॥ तत्तत्रसप्तसुमध्ये रुद्रः याइमाःप्रसिद्धाः अक्षन्नक्षिणि लोहिन्योराजयो
रेखाः ताभिरधिष्ठानभूताभिः ताःअधिष्ठायेतियावत् । एनमक्षिस्थंवायुं । अन्वायत्तःअनुगतउपतिष्ठतइतियावत् । अथान्यत्

उप० ॥ योहवैशिशुꣳसाधनꣳसप्रत्याधानꣳसस्थूणꣳसदामंवेदससप्तहद्विषतोभ्रातृव्यानवरुणद्ध्ययंवावशिशुर्योयंमध्यमःप्राणस्तस्येदमेवाधा
नमिदंप्रत्याधानंप्राणःस्थूणाअन्नंदाम ॥ १ ॥ तमेताःसप्ताक्षितयउपतिष्ठंतेतद्याइमाअक्षँल्लोहिन्योराजयस्ताभिरेनꣳरुद्रोन्वायत्तोऽथया

अक्षन्याःआपोधूमादिसंयोगेनाभिव्यज्यमानाः ताभिःपर्जन्योन्वायत्तः । याकनीनिका चक्षुषिकृष्णवर्णवर्तुलमंडलमध्यस्था त यादित्योन्वायत्तः । यत्कृष्णं चक्षुषि तेनाग्निरन्वायत्तः । यच्छुक्लंतेनेंद्रोन्वायत्तः । अधरयावर्तन्याचक्षुर्गतोदकादिनिस्सर णमार्गेणैनंवायुं । पृथिव्यन्वायत्ता द्यौरुत्तरयावर्तन्याएनमन्वायत्ता । एवंवायुविदःफलमाह ॥ **नास्येति** ॥ योधिकारी एवं मोक्षार्थंरुद्राद्युपास्यमानमक्षिस्थंवायुं स्थूणाभूतविष्णुनासहवेद । अस्यवेत्तुःअन्नंनक्षीयते मुक्तःसन्अक्षयमेवान्नमश्नुतइत्यर्थः ॥ २ ॥ दक्षिणाक्षिस्थंवायुंरुद्राद्याउपासतइत्युक्तार्थेमंत्रमुदाहरति ॥ **तदेषइति** ॥ तत्तत्रदक्षिणाक्षिस्थवायोःरुद्राद्युपास्यत्वे । एषवक्ष्यमाणश्लोकोभवति मंत्रंपादशअनूद्याऽप्रतीतेर्व्याचष्टे ॥ **अर्वाक्बिलइति** ॥ इतिमंत्रभागेयदुक्तंतत्इदंप्रतीयमानं शिरः । कुतः हियस्मात् एषशिरोलक्षणश्चमसः । अर्वाग्बिलःबिलंमुखादितस्यबुध्नभागापेक्षयाऽर्वाक्स्थितत्वात्ऊर्ध्वबुध्नः । बुध्नाकारस्यशिरसःउपरिभागेदृश्यमानत्वात् तस्मात्शिरएवोक्तलक्षणश्चमसः । चमसविवक्षयाएषइतिपुल्लिंगः । दक्षिणान्नंवनु तेयोनआत्मेतिवत् । तस्मिन्यशोनिहितंविश्वरूपमित्येतत्प्राणान्विष्णुरमावायूनाह । कुतः यतोदक्षिणाक्षिरूपशिरोभागस्थितं यशोज्ञानसुखरूपत्वाद्यशःशब्दवाच्याः । विष्णोर्निरूपचरितपूर्णत्वात् । रमायाःपरतंत्रचेतनेषु वायोस्तुजीवेषुपूर्णत्वात्विश्व

उप० ॥ अक्षन्नापस्ताभिःपर्जन्योयाकनीनकातयादित्योयत्कृष्णंतेनाग्निर्यच्छुक्लंतेनेंद्रोधरयैनंवर्तन्यापृथिव्यन्वायत्ताद्यौरुत्तरयानास्यान्नंक्षीय तेयएवंवेद ॥ २ ॥ तदेषश्लोकोभवत्यर्वाग्बिलश्चमसऊर्ध्वबुध्नस्तस्मिन्यशोनिहितंविश्वरूपंतस्यासतऋषयःसप्ततीरेवागष्टमीब्रह्मणासंविदानेत्यर्वाग्बि लश्चमसऊर्ध्वबुध्नइतीदंतच्छिरएषह्यर्वाग्बिलश्चमसऊर्ध्वबुध्नस्तस्मिन्यशोनिहितंविश्वरूपमितिप्राणावैयशोविश्वरूपंप्राणानेतदाह ।

रूपशब्दवाच्याः । प्राणावैप्रणेतारोवै । तस्यासतऋषयःसप्ततीरइत्येतत्प्राणान्गौतमादीन्सप्तर्षीनाह । कुतः यतःऋषयःगौतमा
द्याःसप्तप्राणावैस्वस्वयोग्यप्रणेतारोवै । तथाचसप्तऋषयः गौतमाद्यास्तस्याक्ष्णः । तीरेलोहितरेखादिरूपस्थानविशेषे । तस्यक
र्मणिषष्ठी तंवायुं । आसतेउपासते । इतिमंत्रार्थइतिभावः । नकेवलंसप्तऋष्युपास्यत्वमक्षिस्थवायोः किंतुसरस्वत्युपास्यत्वमपी
तिभावेनोदाहृतमंत्रभागमनूद्यव्याचष्टे ॥ **वागष्टमीति** ॥ वाक्सरस्वतीअष्टमी । हीतिप्रसिद्धिद्योतकहिशब्देनव्याख्यातं ।
तंवायुमास्तेउपास्तइत्यर्थः । ब्रह्मणाब्रह्मनामकेनवायुना संवित्तासम्यक्ज्ञातेत्यर्थः ॥ २ ॥ ननुअक्षिस्थवायोरुद्राद्युपास्यत्वमि
त्युक्तार्थेकथंसप्तऋष्युपास्यत्वप्रतिपादकमंत्रोदाहरणमित्यतोमंत्रेपिऋषिशब्देनरुद्रादयएवविवक्षिताइतिभावेनऋषिवाचकगौत
मादिशब्दान्रुद्रादिपरतयाव्याचष्टे ॥ **इमावेवेति** ॥ तदेवविवृणोति ॥ **अयमेवेति** ॥ अयंपूर्वोक्तोरुद्रोगौतमःअतिशयित
ज्ञानवत्त्वात् । अयंपर्जन्योभरद्वाजःवृष्ट्याभरत्पूर्यमाणंवाजमन्नंयेनेतिव्युत्पत्तेः । पूर्ववत्संगृह्याह ॥ **इमावेवेति** ॥ तद्विश
दयति ॥ **अयमेवेति** ॥ अयमादित्योविश्वामित्रःस्वप्रकाशेनविश्वज्ञापकत्वात् । अयमग्निर्जमदग्निः जंजातं मत्मितमत्तीति
व्युत्पत्तेः अयमिंद्रोवशिष्टःवसतामुत्तमत्वात् । अयंपृथिवीरूपःकश्यपःकमुदकंशयानैवपिवतीतिव्युत्पत्तेः । वाक्वागभिमानिनी

उप० ॥ तस्यासतऋपयःसप्ततीरइतिप्राणावाऋपयःप्राणानेतदाहवागष्टमीब्रह्मणासंविदानेतिवाग्व्यष्टमीब्रह्मणासंवित्ता ॥ २ ॥ इमावेवगौतम
भरद्वाजावयमेवगौतमोऽयंभरद्वाजइमावेवविश्वामित्रजमदग्नीअयमेवविश्वामित्रोऽयंजमदग्निरिमावेववसिष्ठकश्यपावयमेववसिष्ठोऽयंकश्यपोवागेवा

धौरन्नाऽत्रिः । कुतः । हियस्माद्यौरित्युक्तयावाचान्नंद्युस्थैर्हुतमद्यते । तर्ह्यत्तीत्यत्तिरितिस्यात् नत्वत्रिरित्यतआह ॥ अत्रि र्हैति ॥ अत्रिरितियन्नामएतत् अत्तिरितिहवैप्रसिद्धंउभयोरप्येकार्थत्वमितिभावः । वायूपासकरुद्रादीनामुक्तनिमित्तेनगौतमादिशब्दवाच्यत्वंदक्षिणाक्षिस्थवायोःभारत्युपास्यत्वंचजानतःफलमाह ॥ सर्वस्येति ॥ सर्वस्यात्ताभवतिअदनक्रियाशक्तिमान् । अन्नंविनाशक्तिमात्रंशक्तिंविनान्नंवानपुरुषार्थइत्युभयमुक्तं ॥ ४ ॥ शिशुब्राह्मणं ॥ २॥ ॥ पूर्वोक्तविद्यायांसस्थूणंसदामंशिशुं वेदेत्युक्त्यासाम्यभ्रमनिरासायस्थूणाशब्दोक्तभगवतोमूर्तामूर्तवैलक्षण्योक्त्याऽमूर्तसारत्वोक्त्याचान्नशिशुशब्दोक्तरमावायूत्तमत्वमाहानेनब्राह्मणेन । नन्वमूर्तस्यापिसत्वात्कथमेतत्सदितिमूर्तस्यैवसत्वमुच्यतइत्यतस्तस्यार्थमाह ॥ विशरणेति ॥ विशरणं शैथिल्यंअव्याप्तत्वमितियावत् । अवसादनंप्रलयादौज्ञानविपरिलोपः । सदेःक्विंतस्यरूपमेतत् । वाय्वंतरिक्षयोश्चनैतदस्तीति भावः । अप्रतीतेरत्त्यमित्येतद्व्याचष्टे ॥ ततमिति ॥ ततत्वात्तत् । ज्ञानरूपत्वात् यं तनुविस्तारइत्यस्मात्डप्रत्ययेनिर्वचनत्वे नप्रत्ययाकारलोपे त् । याप्रापणइत्यस्मात्कप्रत्ययेआतोलोपइत्याकारलोपे यं । त्चतत्यचत्यमितिरूपसिद्धिरितिभावः ॥ १ ॥ नन्वेवंवायुरंतरिक्षंचामूर्तमितिअंतरिक्षशब्दोक्ताकाशस्यकथंत्यमित्येतद्विशेषणमित्यतोत्रांतरिक्षशब्देनरमैवोच्यतइतिभावेनतंशब्दंतन्निर्वक्ति ॥ प्रलयेपीति ॥ नकेवलमिदानींभगवतारता । किंतुप्रलयेपि कथं भगवदंतरेव प्रलयेपीत्येतदक्षितेत्यत्रापिसं

उप० ॥ त्रिर्वाचाह्यन्नमद्यतेऽत्रिर्हवैनामैतद्यदत्तिरितिसर्वस्यात्ताभवतिसर्वमस्यान्नंभवतियएवंवेद ॥ ४ ॥ शिशुब्राह्मणं ॥ २ ॥

भाष्यं ॥ विशरणावसादनयुक्तंसत् । ततंसर्वज्ञंचसत्यं ॥ १ ॥ प्रलयेपिभगवदंतरेवरताअक्षिताक्षितेतिश्रीरंतरिक्षं ।

वध्यते । अंतशब्दोपपदाद्रमतेर्डिंप्रत्ययेक्षिनिवासगत्योरित्यस्माड्डुप्रत्ययेचांतरिक्षमितिरूपसिद्धिरितिभावः । अंतशब्दोपपदात्
रमतेर्डप्रत्ययेप्रत्ययाकारलोपेअंतर् । नविद्यतेक्षंक्षयोयस्यतत्अक्षं । तृतीयोतिशयेइत्यकारस्येकारेइक्षंअंतर्चइक्षंचेतिअंतरिक्ष
मितिवाबोध्यं । यएषतपतीत्युक्तोमूर्तरसःसूर्यमंडलमितिप्रतीतिंवारयन्नाह ॥ यइति ॥ २ ॥ मंडलेपुरुषइत्युक्तोऽमूर्तरसःआ
दित्यइतिप्रतीतिंन्निवारयन्नाह ॥ मंडलइति ॥ अध्यात्मंमूर्तरसत्वंचक्षुषःअमूर्तरसत्वंदक्षिणाक्षिगतपुरुषस्यसूर्यस्योच्यतइतिप्र
तीतिनिरासायक्तंतंव्याख्यानं तत्राप्यतिदिशति ॥ एवमेवेति ॥ चक्षुर्हिरण्यगर्भः । दक्षिणेक्षन्पुरुषोभगवानित्यर्थः ॥ ५ ॥
अथातआदेशइति मूर्तामूर्तरसयोर्हिरण्यगर्भभगवतोरुपदेशःक्रियतइतिप्रतीतिंनिवारयति ॥ तस्यैवेति ॥ अमूर्तरसस्यैवेत्यन्व
यः । हिरण्यगर्भस्यामूर्तवायुसमत्वेनतद्वैलक्षण्याभावादितिभावः । नन्वथातइत्यतःशब्दस्यप्रकृतमूर्तामूर्तरसत्वादित्यर्थत्वेनहि
रण्यगर्भस्याप्ययमादेशइतिकथंतस्यैवायमादेशइत्युक्तमित्यतआह ॥ अतइति ॥ ननुयद्यमूर्तरसत्वादमूर्तसारस्यभगवतःउप
देशःक्रियते तर्हिप्रकरणस्यासमाप्तत्वात्प्रकरणांतरारंभार्थकोथशब्दोनस्यात् इत्यतस्तदर्थमाह ॥ अथेति ॥ वैलक्षण्यप्रतियोगि
मूर्तामूर्तस्वरूपनिरूपणानंतर्येर्थेवर्ततइत्यर्थः । नेतिनेतिइत्यत्रेतिशब्दस्यादेशप्रकारार्थत्वेएकस्येतिशब्दस्यवैयर्थ्यंप्रतियोग्यनुक्ति
प्रसंगश्चेतिभावेनतद्याचष्टे ॥ इतिनेति ॥ नेतिनेतीतिवीप्सयामूर्तामूर्ताविद्यातत्कार्यसर्वनिषेधावधित्वेनतत्साक्षित्वेनब्रह्मनिर्दि

भाष्यं ॥ यएषतपतीत्यादित्यस्योहिरण्यगर्भउच्यते ॥ २ ॥ मंडलेपुरुषइतिभगवान्विष्णुः । एवमेवचक्षुर्दक्षिणेक्षन्पुरुषश्च ॥ ५ ॥ तस्यै
वामूर्तरसस्यभगवतोनेतिनेतीत्यादेशः । अतस्तस्मादमूर्तसारत्वादित्यर्थः । अथेत्यानंतर्यार्थे । इतिनेतिनेतिमूर्तामूर्तविलक्षणइत्यर्थः ।

ष्टंभवतांतिव्याख्यानमसदितिभावेनवीप्साप्रयोजनमाह ॥ उभयेति ॥ अर्थांतरस्याप्रामाणिकत्वादितिभावः । ननुइतिनेति नेतिनिषिध्यमानत्वंमूर्तामूर्तयोरप्यस्ति । मूर्तस्यामूर्तविलक्षणत्वात् अमूर्तस्यचमूर्तविलक्षणत्वात् । तथाचकथमयममूर्तसारस्य भगवतएवोपदेशइत्याशंकापरिहारार्थं तर्हीतस्मादितिवाक्यंप्रवृत्तमितिभावेनतद्व्याचष्टे ॥ इतिनेतिनिषिध्यमानमपीति ॥ यद्यपिइतिनेतिनिषिध्यमानंमूर्तममूर्तंवाएतस्मादमूर्तसारात्भगवतोन्यदास्ते । तथापिएतस्मात्परमुत्तमंनास्तीत्यर्थः । परनिषेधे नलब्धमर्थमाह ॥ एषएवेति ॥ यद्वाननुइतिनेतिनेतिमूर्तामूर्तवैलक्षण्यंभगवतोयथाभिधीयते । तथामूर्तममूर्तंचइतिनेतिमू र्तामूर्तयोर्विष्णुवैलक्षण्यंवक्तुंशक्यतएव । तद्वैलक्षण्यस्यापितत्रसत्वात् । अतःकथमयंविष्णोरेवोपदेशइत्यतःप्रवृत्तंनहीतिवा क्यंव्याचष्टे ॥ इतीति ॥ यद्यपिइतिनेतिविष्णुवन्नेतिनिषिध्यमानमेतस्माद्विष्णोरन्यत्मूर्तामूर्तलक्षणमस्ति । तथापि एतस्मा त्परमुत्तमंनास्तीत्यर्थः । नन्वेतावताप्यादेशस्यसाधारण्यशंकाकथंनिवृत्तेत्यभिप्रायमाह ॥ एषएवेति ॥ विष्णोर्मूर्तामूर्तसादृ श्यनिषेधेएषविष्णुरेवपरइतिलभ्यते । पारतंत्र्यादिनातत्सादृश्यनिषेधेस्वातंत्र्यादेरेवलाभात् । मूर्तामूर्तयोस्तुविष्णुसादृश्यनिषे धेमूर्तामूर्तंविष्ण्वपेक्षयाअपरमनुत्तममेवेतिलभ्यते । स्वातंत्र्यादिनातत्सादृश्यनिषेधेपारतंत्र्यादिरूपाऽपरत्वस्यैवलाभादितिभा वः । ननुसत्यस्यसत्यमित्येतत्मूर्तामूर्तसत्यंतयोरेपसत्यमितिव्याख्येयं प्राणावैसत्यमितिकथंव्याख्यायते असंगतत्वादितिअत

भाष्यं ॥ उभयसादृश्यनिषेधार्थंद्विवारं । इतिनेतिनिषिध्यमानमप्येतस्मादन्यत्परंनास्ति । एषएवपरःमूर्तामूर्तत्परमेवैतदपेक्षया ।

आह ॥ **मूर्तामूर्तमेवेति** ॥ नन्वेवंप्राणावैसत्यंतेषामेषसत्यमित्यनेनविष्णोर्मूर्तामूर्तात्मकप्राणसत्यत्वलाभेपिहिरण्यगर्भसत्यत्वंनलभ्यते । तस्यमूर्तसारत्वेनमूर्तामूर्तात्मकत्वाभावादित्यतआह ॥ **ब्रह्मणइति** ॥ वायुग्रहणंदृष्टांतार्थं । वायोरमूर्तत्वात्तद्विशिष्टस्यब्रह्मणश्चामूर्तत्वादितियोज्यं । मूर्तामूर्तस्यैतदपेक्षयाऽपरत्वेऽपिमूर्तरसस्यब्रह्मणःपरत्वंस्यादित्यतोवाह ॥ **ब्रह्मणइति** ॥ मूर्तामूर्तोभयसादृश्यनिषेधार्थंद्विवारमित्यसत् । मूर्तरसब्रह्मसादृश्यनिषेधार्थंइतिनेतिपुनरपिवक्तव्यत्वादित्यतोवाह ॥ **ब्रह्मणइति** ॥ तथाचद्वितीयनिषेधेनैवमूर्तरससादृश्यमपिनिषिद्धमितिभावः । समग्रंब्राह्मणंप्रमाणेनव्याचष्टे ॥ **मूर्तामूर्तमित्यादिना** ॥ द्वेवावब्रह्मणोरूपेमूर्तंचामूर्तंचेतिवाक्येमूर्तामूर्तयोर्ब्रह्मस्वरूपत्वमुच्यतइतिप्रतीतिंनिवारयन्व्याचष्टे ॥ **मूर्तामूर्तमिति** ॥ प्रतिमात्मकंरूपमित्यन्वयः । स्वरूपत्वमेवरूपशब्दार्थःकिंनस्यादित्यतआह ॥ **नेति** ॥ एतत्मूर्तामूर्तं । एतस्यब्रह्मणःस्वरूपंन । कुतः हियस्माद्ब्रह्मसदासर्वपरंसर्वोत्तममित्यर्थः । ननुतदेतत्मूर्तंयदन्यद्वायोश्चांतरिक्षाच्चेतिवायुरमाव्यतिरिक्तस्यमूर्तत्वोक्तिः कथं । तथात्वेहिरण्यगर्भस्यापिमूर्तत्वप्राप्त्यातस्यमूर्तसारत्वोक्तिविरोधादित्यतआह ॥ **श्रियइति** ॥ एतत्रिकव्यतिरिक्तपरतंत्रचेतनस्यैवमूर्तत्वंकुतइत्यतोमूर्तशब्दंनिर्वक्ति ॥ **मूरमिति** ॥ तेनोक्तत्रिकव्यतिरिक्तपरतंत्रचेतनेन । तेनपापेनवा । एतत्सदितिवाक्यंव्याचष्टे ॥ **विशीर्णमिति** ॥ तदेवमूर्तमेव विशीर्णमवसन्नंचयतोऽतःसदित्युच्यतइत्यर्थः । ननु

भाष्यं ॥ मूर्तामूर्तमेवाध्यात्मंप्राणाइत्युच्यंते । ब्रह्मणोवायोश्चामूर्तत्वात् । मूर्तामूर्तमिदंरूपंब्रह्मणःप्रतिमात्मकं । नैतत्स्वरूपमेतत्स्यात्तद्धिसर्वपरंसदा । श्रियोवायोर्विरिंचाच्चयेन्येमूर्ताहितेस्मृताः । मूरंपापंहितेनात्तंमूर्तमित्यभिधीयते । विशीर्णंचावसन्नंचतदेवातःसदुच्यते ।

मूर्तस्यस्थितत्वंकथंतस्यचेतनत्वेनान्यत्रगंतुंशक्तत्वादित्यतःएतत्स्थितमित्येतद्व्याचष्टे ॥ पराधीनेति ॥ विष्णुव्यतिरिक्तपुरुषाधीनगतत्वादित्यर्थः । तस्यैतस्येत्यादियएषतपतीत्याद्युक्तोधिदैवतमध्यात्मंचमूर्तरसःकइत्यतआह ॥ तस्येति ॥ रसशव्दार्थःसारइति रसःसारोवरश्श्रेतिशव्दाःपर्यायवाचकाइतिवचनात् । कुतइत्यतआह ॥ तद्विरुद्धेति ॥ अथामूर्तवायुरंतरिक्षंचेतिवाक्यंअमूर्तपदार्थवदन्व्याचष्टे ॥ मूर्तादिति ॥ एतत्त्यमितित्यशव्दार्थमाह ॥ सर्वज्ञौचेति ॥ यदित्यस्यार्थमाह ॥ नियताविति ॥ हरिव्यतिरिक्तपुरुषानियम्यावित्यर्थः । एतस्यामूर्तस्येत्यादिपुरुषइत्यंतंवाक्यंअधिदैवाध्यात्मप्रकरणगंव्याचष्टे ॥ तयोरिति ॥ श्रीवाय्वोः हरिरेवेतिसंवंधः । चशव्दौपरस्परसमुच्चये । अधिदैवमध्यात्मंचेत्युभयोरपितयोरित्यपिशव्दान्वयः । तस्यसारोविरिंचइत्युक्तं तत्रस्थलविशेषानुक्तेःश्रुतौयएषतपतीतियश्चक्षुरितितत्त्वोक्तत्वाच्च तदाह ॥ तत्रैवेति ॥ मूर्तसारोपिब्रह्मा । तत्रैवामूर्तसारहर्यावासस्थानएवादित्यमंडलेचक्षुषिचस्थितइत्यर्थः । नन्वेवंतर्हिहरिब्रह्मणोःसाम्यापत्तिरित्यतआह ॥ तस्यचेति ॥ तस्यहैतस्यपुरुषस्यरूपमित्येतद्व्याचष्टे ॥ तस्येति ॥ यथामहारजनंवासइत्यादिव्याचष्टे ॥ महारजनवासोवदित्यादि ॥ अवेरिदमाविकंऊर्णादि पांडुईषच्छुभ्रमाविकंपांड्वाविकंतद्वदित्यर्थः । महारजनापेक्षयाइंद्रगोपस्यातिरिक्तत्वेनपृ

भाष्यं ॥ पराधीनगतित्वाच्चस्थितमित्यभिधीयते । तस्यसारोविरिंचस्तुतद्विरुद्धस्वभावकः । मूर्ताद्विरुद्धरूपत्वाच्छ्रीर्वायुश्चाप्यमूर्तकौ । सर्वज्ञौचततौचैवनियतौहरिणैवतौ । तयोःसारस्तुभगवान्हरिर्नारायणःपरः । आदित्यमंडलेचैवचक्षुष्यपिचसुस्थितः । तत्रैवसंस्थितोब्रह्मामूर्तसारोपितस्यच । विष्णुरेवपरःसारस्तस्यरूपाण्यनेकधा । महारजनवासोवत्पांड्वाविकवदेवच ।

थगुक्तिः । इंद्रगोपःकीटविशेषः । विष्णुरूपाणांप्राकृतत्वादिशंकापरिहारायोक्तं सुखभास्वरइति । सर्वत्रापिसुखरूपत्वंज्ञातव्यं रौग्मंकृष्णमित्युक्तकृष्णरूपादिसंग्रहायादिपदं । नेतिनेतीतिवाक्यंव्याचष्टे ॥ नैवेति ॥ यद्यपिब्रह्मणोवायोश्चामूर्तत्वादित्यु क्तरीत्यानचामूर्तोपमइत्यनेनैवमूर्तरसवैलक्षण्यंसिध्यति । तथाप्यंगीकारवादोयमितिज्ञातव्यं । नह्येतस्मादित्यस्याभिप्रायमाह ॥ सएवेति ॥ अथनामधेयंसत्यस्यसत्यमित्यस्यार्थमाह ॥ सत्यस्यसत्यइति ॥ प्राणावैसत्यंतेषामेषसत्यइत्येतद्व्याचष्टे ॥ मूर्तेति ॥ ननुमूर्तमूर्तरसामूर्तसादृश्यनिषेधार्थंश्रुतौनेतीतित्रिवारंस्यादित्यतआह ॥ प्रथमेति ॥ प्रथमनिषेधेनैवनतुद्वितीयनिषेधेन अंगी कारवादपक्षेमूर्तपरामर्शकेतिशब्देनैवतद्रसपरामर्शस्ययोग्यत्वात्प्रथमनिषेधप्रतियोग्युपस्थापकेतिशब्देनमूर्तमूर्तरसश्चेत्युभयंविव क्षितमितिभावः ॥ ६ ॥ ततश्चायंखंडार्थः ॥ ब्रह्मणःपरमात्मनोमूर्तममूर्तंचेतिद्वेरूपेप्रतिमे । वावेतिप्रसिद्ध्यर्थः मूर्तामूर्तयो र्विशेषणानिसंकलय्याह ॥ मर्त्यंचेति ॥ १ ॥ किंतन्मूर्तमित्यतआह ॥ तदेतदिति ॥ वायोश्चांतरिक्षात्अन्यच्च । यदन्यत् रुद्रादिकं । तदेतत्मूर्तमुरेणपापेनाप्तत्वात्मूर्तमित्युच्यते उक्तविशेषणानिकानीत्यतआह ॥ एतन्मर्त्यमिति ॥ एतन्मूर्तंमर्त्यं शरीराभिमानित्वेनतत्त्यागरूपमरणोपेतं एतत्स्थितंपरमात्मव्यतिरिक्तपुरुषाधीनं । एतत्सत्विशीर्णंअवसन्नंच उक्तविशेषणा

भाष्यं ॥ विद्युत्सद्मेंद्रगोपादिवह्निवत्सुखभास्वरः । नैवासौमूर्तवद्विष्णुर्नचमूर्तरसोपमः । नचामूर्तोपमोदेवःसएवपरमःसदा । तत्सत्यान्यद्रूप रंसर्वंसत्यसत्यःसएकराट् ।मूर्तामूर्तात्मकाःप्राणास्तेषांसत्यःसएवहीतिनारायणश्रुतौ।प्रथमनिषेधेनैवमूर्तरससादृश्यमपिनिषिद्धं।।६।।मूर्तामूर्तब्राह्मणं ३

उप० ॥ द्वेवावब्रह्मणोरूपेमूर्तंचैवामूर्तंचमर्त्यंचामृतंचस्थितंचयच्चसच्चत्यंच ॥ १॥ तदेतन्मूर्तंयदन्यद्वायोश्चांतरिक्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत्

नुवादपूर्वकंमूर्तसारंनिरूपयति ॥ तस्येति ॥ यएषआदित्यमंडलगतस्तपति । एषएतदंतर्गतश्चतुर्मुखः । रसःसारःसतःसदादिविशेषणचतुष्टयसंपन्नस्यैषआदित्यमंडलांतर्गतविरिंचोरसइतिहिप्रसिद्धमित्यर्थः ॥ २ ॥ अथमूर्तकथनानंतरं । अमूर्तमुच्यतइतिशेषः । वायुश्चांतरिक्षंश्रीश्चाऽमूर्तपापास्तत्वलक्षणमूर्तविरुद्धत्वात्अमूर्तमित्युच्यते एतदमूर्तममृतं । श्रियोनित्यमुक्तत्वादेवामृतत्वं । वायोस्तुशरीराभिमानाभावेनतत्त्यागोनमरणरूपइत्यमृतत्वं । एतदमूर्तं । यत्हरिमात्रनियम्यं । तद्व्यतिरिक्तपुरुषानियम्यमितियावत् । एतदमूर्तं त्यंततंसर्वज्ञंचेत्यर्थः । उक्तानुवादेनामूर्तरसंनिरूपयति ॥ तस्येति ॥ यएषप्रसिद्धः । एतस्मिन्परिदृश्यमानेआदित्यमंडले । पुरुषःपूर्णषड्गुणःपरमात्माएषरसइत्यन्वयः । तस्यह्येपरसइत्येतत्पूर्ववत् ॥ ३ ॥ अथाधिदैवतंमूर्तादिस्वरूपकथनानंतरं । अध्यात्मंमूर्तामूर्ततद्रसाउच्यंतेइतिशेषः । तत्रमूर्तस्वरूपमाह ॥ इदमेवेति ॥ प्राणनाद्वायुरेवाध्यात्मंप्राणइत्युच्यते तस्मात् यश्चायंप्रसिद्धः अंतरात्मन्नंतरात्मनि आकाशस्तदभिमानिश्रीतत्वं । तस्माच्चयदन्यत्इदमेवमूर्तंइतिसंबंधः । यच्चक्षुःचक्षुरंतर्गतोविरिंचः ॥ ४ ॥ दक्षिणेक्षन्चक्षुषि । योयंपुरुषःपूर्णषड्गुणः परमात्मा । एषरसः ॥ ५ ॥ तस्याधिदैवतं

उप० ॥ तस्यैतस्यमूर्तस्यैतस्यमर्त्यस्यैतस्यस्थितस्यैतस्यसतएपरसोयएषतपतिसतोह्येपरसः ॥२॥ अथामूर्तंवायुश्चांतरिक्षंचैतदमृतमेतद्यदेतत्यंतस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्ययतएतस्यत्यस्यैपरसोयएषएतस्मिन्मंडलेपुरुषस्तस्यह्येपरसइत्यधिदैवतं ॥ ३ ॥ अथाध्यात्ममिदमेवमूर्तंयदन्यत्प्राणाच्चयश्चायमंतरात्मन्नाकाशएतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्यमूर्तस्यैतस्यमर्त्यस्यैतस्यस्थितस्यैतस्यसतएषरसोयच्चक्षुःसतोह्येषरसः ॥ ४ ॥ अथामूर्तंप्राणश्चायमंतरात्मन्नाकाशएतदमृतमेतद्यदेतत्यंतस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्ययतएतस्यत्यस्यैपरसोयोयंदक्षिणेक्षन्पुरुषस्तस्यह्येषरसः ॥ ५ ॥

अमूर्तसारस्यैतस्याध्यात्मंअमूर्तसारस्यपुरुषस्यपरमात्मनोरूपमनेकविधमितिशेषः । तदेवबुद्ध्यारोहायदृष्टांतेनाह ॥**यथेति** ॥ महा
रजनंहरिद्रामंजिष्ठावा । तद्वारक्तंमाहारजनंवासोयथेत्यर्थः । यथापांडुआविकंऊर्णानिर्मितंसूक्ष्मवस्त्रंतद्वदित्यर्थः । यथाइंद्रगो
पःकीटःतद्वर्णमित्यर्थः । सकृद्विद्युत्तंयुगपदुत्पन्नविद्युन्मंडलमित्यर्थः । सकृद्विद्युत्तमिवभगवद्रूपविदःफलमुपलक्षणयाह ॥ **सकृ
द्विद्युत्तेवेति** ॥ यएवंसकृद्विद्युत्तमिवभगवद्रूपंवेदास्यवेत्तुःसकृद्विद्युत्तेवप्रकाशमानाश्रीर्भवति हवाइति । प्रमाणप्रसिद्धत्वमाह ।
अथमूर्तामूर्तस्वरूपकथनानंतरं अतःभगवतःअमूर्तसारत्वात्तस्यामूर्तसारस्यैवभगवत आदेशःउपदेशःक्रियते इतिनइतिनेति ।
मूर्तामूर्तविलक्षणइत्यर्थः ।ननुभगवतिमूर्तामूर्तवैलक्षण्यवत्मूर्तयोरपिभगवद्वैलक्षण्यमस्त्येवेतिकोविशेषइत्यतआह ॥**नहीति** ॥
यद्यपिइतिनेति निषिध्यमानमेतस्मादन्यत्मूर्तामूर्तरूपमस्ति । तथापिपरंनास्तीत्यर्थः । तात्पर्यंभाष्यएवोक्तं अथादेशानंतरं । त
स्यामूर्तसारस्य । नामधेयंसत्यस्यसत्यमिति तद्व्याचष्टे ॥ प्राणावाइति ॥ प्राणंतीतिप्राणाःमूर्तामूर्तात्मकाः । सत्यं । तेषामेष
परमात्मासत्यंसादयतिविशरणादिकंप्रापयतीतिसत् यमयतिनियच्छतीतियं । सच्चतद्यंचेतिसत्यमित्यर्थः । तथाचश्रुतिः । त
स्योपनिषत्सत्यस्यसत्यमितिएषह्येवसादयतियमयतिचेति ॥ ६ ॥ इतिमूर्तामूर्तब्राह्मणं ॥ ३ ॥ अमूर्तसारत्वेनप्रकृतभगव
तोऽमूर्तसारत्वमुपपादयितुंमहिमांतरमाह ॥ मैत्रेयीत्यादिना ॥ पत्युर्भर्तुःकामायप्रयोजनायपतिर्भार्यायाःप्रियोनभवतिकिंतु

दप० ॥ तस्यहैतस्यपुरुषस्यरूपंयथामहारजनंवासोयथापांड्वाविकंयथेंद्रगोपोयथाग्न्यर्चिर्यथापुंडरीकंयथासकृद्विद्युत्तꣳसकृद्विद्युत्तेवहवाअस्य
श्रीर्भवतियएवंवेदाथातआदेशोनेतिनेतिनह्येतस्मादितिनेत्यन्यत्परमस्त्यथनामधेयꣳसत्यस्यसत्यमितिप्राणावैसत्यंतेषामेषसत्यं॥६॥ मूर्तामूर्तब्राह्मणं ३॥

आत्मनःस्वस्याःकामायैवभार्यायाःपतिः प्रियोभवतीतिपरकीयव्याख्याननिरासायतावदात्मशब्दंव्याचष्टे ॥ आत्मेति ॥ कुतइत्यतस्तद्ग्रहणेवाक्यार्थघटनारूपंहेतुंदर्शयन्नात्मनस्त्विवतिवाक्यंव्याचष्टे ॥ तस्यैवेति ॥ प्रियोभवति जायादेरितिशेषः । अनेनतुशब्दएवार्थः कामायेतिचतुर्थीतृतीयार्थेत्युक्तंभवति । जायादीनांअहंप्रियःस्यामितिपत्यादीनांकामनयैवपत्यादिर्जायादेः प्रियोभविष्यतीतिकिंनारायणस्यैवकामेनेत्युच्यतइत्याशंकानिरासकतयाएवकारव्यावर्त्यप्रदर्शनपरत्वेननवाइतिवाक्यंव्याचष्टे॥ नहीति ॥ वाइत्येतत्प्रसिद्धिद्योतकहिशब्देनव्याख्यातं । प्रियं पत्यादिकमितिशेषः । जायादीनामित्येतदत्रापिसंबध्यते । प्रियत्वसिद्धिक्वचित्पाठः । तत्रपत्यादीनामित्येतदप्यनुवर्तनीयं । भगवदिच्छानुसारिणीपत्यादीच्छापिप्रियत्वेहेतुरितिमात्रपदं । अनेनपत्यादेःकामेनअहंजायादेःप्रियःस्यामितीच्छयापत्यादिर्जायादेःप्रियोनभवति । किंतुआत्मनःस्वस्यजायादेःकामेनपत्यादिर्मेनप्रियोभवत्विति कामनयापत्यादिर्जायादेःप्रियोभवतीतियथाश्रुतप्रतीतिरप्यपास्ता । यतःजायादीनामहंप्रियःस्यामितिपत्यादीनांकामनामात्रेणैवपत्यादिर्मेप्रियोभवत्विति । जायादीनांकामनामात्रेणापिपत्यादिजायादेःप्रियंनभवत्यविशेषादिति । नारायणस्यैवेच्छयापत्यादिर्जायादेःप्रियोभवति नतुपत्यादीच्छयेत्येतत्कुतइत्यतआह ॥ भगवदिच्छयैवेति ॥ नारायणस्यैवज्ञानविज्ञानादिसंपन्नत्वेनतदिच्छायाअमोघत्वात्पत्यादीनांतदभावेनतदिच्छायामोघत्वादितिभावः । अपव्याख्यानंदूषयति ॥

भाष्यं ॥ आत्मानारायणः । तस्यैवहिकामेनपत्यादिःप्रियोभवति । नहिपत्यादीनांजायादीनामहंप्रियःस्यामितिकामनामात्रेणप्रियं(प्रियत्वं) भवति । भगवदिच्छयैवहितद्भवति ।

अन्यथेति ॥ अन्यथाआत्मनःकामायेत्यस्यजायायाःप्रयोजनायेत्यर्थत्वे जायार्थेपतिःप्रियःइत्येवस्यात् । पत्युःकामायेत्यस्यच पत्युःप्रयोजनायेत्यर्थत्वेचपतिःपत्यर्थेप्रियोनभवतीत्येवस्यात् । लाघवात्स्पष्टप्रतीतिकत्वाच्चेतिभावः । आत्मनोदर्शनेनश्रवणेनमत्याविज्ञानेनेदंसर्वंविदितंभवतीत्युक्तं । ब्रह्मज्ञानेनसर्वविज्ञानंब्रह्मव्यतिरेकेणान्यस्याभावादित्याहुः । तदसत् । तद्वचनस्य ब्रह्मव्यतिरिक्तजगतोऽत्यंतासत्वादित्यर्थत्वेइदंसर्वंविदितंभवतीत्युक्तिविरोधात् । अपसिद्धांतत्वाच्च । ब्रह्मण्यारोपितत्वादित्यर्थत्वेअधिष्ठानयाथात्म्यज्ञानेनाध्यस्तज्ञानाभावात् । प्रत्युततज्ज्ञानेनैतज्ज्ञानस्यनिवृत्तेरेवजायमानत्वाच्चेतिभावेनस्वयंयथाव्याचष्टे ॥ प्राधान्यादिति ॥ ब्रह्मणोजगदपेक्षयाप्राधान्यात्तद्दर्शनेनेदंसर्वंविदितंभवतीत्युक्तमित्यर्थः । प्राधान्यमेवभगवतःकुतः सिद्धमित्यतआह ॥ सर्वकारणत्वाच्चेति ॥ चशब्देनसर्वस्यतदधीनत्वंसमुच्चिनोति । ब्रह्मादीनामपिरुद्राद्यपेक्षयाप्रधानत्वात्कथंसर्वप्राधान्यंभगवतइत्यतआह ॥ प्राधान्येति ॥ हिशब्दःप्रमाणप्रसिद्धिद्योतकः । ब्रह्मरुद्रादिगतप्राधान्याप्राधान्ययोरपिभगवन्निमित्तत्वेनभगवतःसर्वप्राधान्यमित्यर्थः । ननुयदिब्रह्मव्यतिरेकेणान्यस्याभावादेकविज्ञानेनसर्वविज्ञानंन तर्हिब्रह्मतंपरादाद्योन्यत्रात्मनोब्रह्मवेदेत्युत्तरवाक्येयःकोपिआत्मनोन्यत्रपार्थक्येनब्रह्मब्राह्मणजातिंवेद तंब्राह्मणजातिःपराकुर्यादितिब्रह्मव्यतिरेकेणान्यस्याभावप्रतिपादनंअसंगतंस्यादितिचेत् । न । स्यादेतदेवंयद्यत्रब्रह्मव्यतिरेकेणान्यस्याभावप्रतिपादनंस्यात् ।

भाष्यं ॥ अन्यथाजायार्थेपत्यर्थेइत्येवस्यात् । प्राधान्यादिदंसर्वंविदितं । सर्वकारणत्वाच्चसर्वप्राधान्यंभगवतः । प्राधान्याप्राधान्ययोरपिसएवहिहेतुः ।

नचैवं किंनाम एकविज्ञानेनसर्वविज्ञानेहेतुभूतप्राधान्यसाधकंजगतस्तदधीनत्वमेवोच्यतइतिभावेनतदनूद्यान्यत्रेत्येतत्सावधारणमितिभावेनतद्व्यावर्त्यमाह ॥ अन्यत्रेति ॥ ननुब्राह्मणजात्याद्यभिमानिचतुर्मुखादेर्भगवदधीनत्वाज्ञानेकथंतमःप्राप्तिरित्यतोनात्रभगवदधीनत्वाज्ञानमात्रेतात्पर्यं । किंतुतदनाश्रितत्वज्ञानेचेतिभावेनतद्व्याचष्टे ॥ तदनाश्रितत्वेनेति ॥ परादात्पराकुर्यादित्यल्पार्थत्वंनिवारयंस्तदनूद्यपरेत्यस्यापेक्षिताध्याहारेणार्थमाह ॥ परादादिति ॥ कथमनेनाप्यनर्थातिशयोक्तिरित्यतआह ॥ अंधेतमसीति ॥ ननुयोन्यत्रात्मनोब्रह्मवेदेत्यस्योक्तार्थत्वेइदंब्रह्मेत्याद्युपसंहारवाक्येनब्रह्मक्षत्रादेरात्मानतिरिक्तत्वोक्तिरसंगतास्यात् । अस्माकंतुसुसंगतेत्यतस्तद्वाक्यंव्याचष्टे ॥ इदमिति ॥ यदयमात्मेत्यनुवादः । यदित्यस्यार्थोयत्रेति । अयमितियत्रेत्यधिकरणभूतःपरमात्मापरामृश्यते । तथाचनायमभेदोपसंहारः । किंतुब्रह्मादीनांपरमात्माश्रितत्वोक्तिरितिभावः । ननुयथासावयंचेतियदयंइत्यभेदोपसंहारएवकिंनस्यादित्यतआह ॥ अन्यत्रेति ॥ तत्रापरिज्ञानेचेत्यपिग्राह्यं । तत्रपरमात्मनि । हिशब्दोहेतौ । उक्तंभवति अर्थात् । परस्परविरुद्धयोरन्यतरनिषेधस्यासामान्यतरविधिव्याप्तत्वादित्यर्थः । हियस्मात्तत्रपरिज्ञानमुक्तंभवतितस्मान्नाभेदोपसंहारःतद्विरुद्धत्वादित्यर्थः । ननुनेयमन्यत्रपरिज्ञानेदोषोक्तिःकिंतुभेदज्ञानएवेत्युक्तं अतोनतद्विरोधःइत्यतोयोन्यत्रात्मनइत्यस्यापव्याख्यानंदूषयति ॥ अन्यथेति ॥ अन्यत्रपरिज्ञानेदोषोक्तित्वानंगीकारेभेद

भाष्यं ॥ अन्यत्रात्मनोब्रह्मवेदभगवदधीनत्वेननवेद । तदनाश्रितत्वेनस्थानांतरेचवेद । परादात्परतोलोकालोकस्यांधेतमसि । इदंब्रह्मादिकं । यदयमात्मा यत्रायमात्मा । अन्यत्रपरिज्ञानेदोषोक्तेस्तत्रपरिज्ञानंह्युक्तंभवति । अन्यथाअन्यदात्मनोब्रह्मवेदेतिस्यात् ।

परिज्ञानएवदोषोक्तित्वांगी ारेचयोब्रह्मात्मनोन्यद्वेदेत्येवस्यात्सप्तम्याखलितिविहितप्रत्ययांतत्वेनान्यत्रेतिप्रयोगोनस्यादित्य र्थः । ननुभवत्पक्षेपियत्रायमात्मेतिस्यात् नतुयदयमित्यतआह ॥ यदित्यव्ययत्वादिति ॥ तत्रदृष्टांतमाह ॥ यथेति ॥ य द्वायदितिप्रथमांतमेवसप्तम्यर्थमितिभावेनप्रथमायाःसप्तम्यर्थत्वेनियामकमाह ॥ सप्तस्विति ॥ ननुइदंब्रह्मेत्यादियदयमात्मे त्यंतंवाक्यंयदिजगतोब्रह्मानतिरिक्तत्वोपसंहारपरंनस्यात्तर्हिदुंदुभ्याघातादिदृष्टांतकथनमसंगतंस्यात् । कथमुपसंहारवाक्योक्त मवगंतुंशक्यतइत्याशंकायांस्फुरणात्मस्वरूपव्यतिरेकेणकिंचिदपिग्रहीतुंनशक्यतइतितुप्रसिद्धं । यद्व्यतिरेकेणयस्याग्रहणंतस्यत दात्मकत्वमेवेतिव्याप्तौदृष्टांतत्रयाभिधानादित्यतआह ॥ दुंदुभ्याघातादीति ॥ स्यादेतत्यद्यत्रोक्तव्याप्तौदृष्टांतकथनंस्यात् । नचैवं किंनाम प्राधान्यसाधकंजगतोब्रह्माधीनत्वंब्रह्मणश्चजगत्कारणत्वंज्ञापयितुंदृष्टांतत्रयाभिधानादित्यर्थः । ननूक्तव्याप्ताव वदृष्टांताभिधानंकिंनस्यादितिचेत्न । तथात्वेदुंदुभ्यादिव्यतिरेकेणागृह्यमाणस्यदुंदुभ्यादिजन्यशब्दस्यदुंदुभ्यात्मकत्वापत्तेः । नचतदस्तीत्याह ॥ नहीति ॥ ननुदुंदुभ्यादिजन्यत्वात्तच्छब्दस्यतयोरभेदोभविष्यतीतिचेत् दुंदुभ्यादेःतच्छब्दंप्रतिनिमित्त कारणत्वंआहोस्विदुपादानकारणत्वं । नाद्यः । निमित्तकारणस्यकार्येणाभेदाभावात् । द्वितीयंदूषयति ॥ नचेति ॥ कुतइत्य तआह ॥ स्थानांतरइति ॥ स्थानांतरेशब्दस्योपलंभेपिदुंदुभ्याघातादि शब्दोपादानंकिंनस्यादित्यतआह ॥ नहीति ॥ मृदा

भाष्यं ॥ यदित्यव्ययत्वाद्यत्रेत्यपिभवति । यथायस्मादित्यर्थे । सप्तसुप्रथमेतिसूत्रं । दुंदुभ्याघातादिदृष्टांतोपितदधीनत्वंतत्कारणत्वंचज्ञाप यति । नहिदुंदुभ्यादिरेवतच्छब्दः । नचतदुपादानं । स्थानांतरेतदुपलंभात् । नह्युपादानादुपादेयंस्थानांतरेभवति ।